
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

||१||

॥ॐ नमः श्रीगणेशाय नमः॥ ॐ धर्माधर्मौ तद्विपाकास्त्रयोपि क्षेत्रज्ञाः पंच प्राणिनोपि तेन यस्मिन्नेते नेपि रामत्य ईशोपसंवंदे विष्णुमोंकारवाच्यं॥१॥ याज्ञवल्क्यमुनिभाषितं मुनिविश्वरूपविकटोक्तिविस्तृतं॥ धर्मशास्त्रमृजुभिर्मिताक्षरैर्बालबुद्धिविधये विविच्यते॥२॥ याज्ञवल्क्यशिष्यः कश्चित् प्रश्नोत्तररूपं याज्ञवल्क्यप्रणीतं धर्मशास्त्रं संक्षिप्य कथयामास॥ यथा मनुप्रोक्तं भृगुः॥ तस्य चायमादिश्लोकः॥ ॥ योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोब्रुवन्। वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः॥ योगिनां सनकादीनामीश्वरः श्रेष्ठः तं याज्ञवल्क्यं संपूज्य मनोवाक्कायकर्मभिः ऋषयो मुनयः सामश्रवःप्रभृतयः श्रवणधारणयोग्या अब्रुवन् उक्तवंतः॥ धर्मान्नः अस्मभ्यं ब्रूहि कथय अशेषतः॥ कात्स्न्येन। केषां वर्णाश्रमेतराणां वर्णा ब्राह्मणादयः आश्रमा ब्रह्मचर्यप्रभृतयः इतरे अनुलोमप्रतिलोमजाता मूर्धावसिक्तादयः॥ एतच्च द्वंद्वे द्वंद्वे चेति सर्वनामसंज्ञाप्रतिषेधः॥ अत्र च धर्मशब्दः षड्विधः स्मार्तधर्मविषयः॥ तद्यथा॥ वर्णधर्म आश्रमधर्मो वर्णाश्रमधर्मो गुणधर्मो निमित्तधर्मः साधारणधर्मश्चेति॥ तत्र वर्णधर्मो नित्यंमे ब्राह्मणो वर्जयेदित्यादिः॥ आश्रमधर्मो ग्र्यधानाभैक्षाचर्यादिः॥ वर्णाश्रमधर्मः पालाशो दंडो ब्राह्मणस्येत्येवमादिः॥ गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनादिः॥ निमित्तधर्मो विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तं। साधारणधर्मोऽहिंसादिः॥ चो वाचारो न्म्रेचिक्षये दिसाचार्यकरणं॥ प्रयुक्तो धर्मशास्त्राध्ययनस्य प्रयोजनादिरूपमनेनाप्युपदेशत्वेन॥ तत्र चायं क्रमः॥ आयुपनयनात्कामचारः॥ ऊर्ध्वमुपनयनात्प्राग्वेदाध्ययनोपक्रमात् धर्मशास्त्राध्ययनं। ततो धर्मशास्त्रविहितयमनियमोपेतस्य वेदाध्ययनं। ततस्तदर्थानुष्ठानमिति। तत्र यद्यपि धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः अनेन प्रतिपाद्यंते तथापि धर्मस्य प्राधान्याद्धर्मग्रहणं। प्राधान्यं च धर्ममूलत्वादितरेषां न च वक्तव्यं धर्ममूलो र्थोर्थमूलो धर्म इति अविशेष इति। यतोर्थं मंतरेणापि जपतीर्थयात्रादिना धर्मनिष्पत्तिरर्थलेशोपि न धर्ममंतरेणेति। एवं काममोक्षावपीति॥ ॥ स्पष्ट॥ मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाब्रवीन्मुनीन्। यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत॥ मिथिलानाम्नगरी तत्रावस्थितः स याज्ञवल्क्यो योगीश्वरः क्षणं ध्यात्वा किंचित्कालं मनः समाधाय एते श्रवणाधिकारिणो विनयेन स्थिता इति युक्तमेतेभ्यो वक्तुमित्यवधार्य मुनीनब्रवीत्॥ किं। यस्मिन्देशे मृगः कृष्णस्तस्मिन्

||१||

2

धर्मान्निबोधतेति। हृदयमसारोभ्यनुज्ञातो यस्मिन्देशे स्वच्छंदं विहरति तस्मिन्देशे वक्ष्यमाणा धर्मा अनुष्ठेया नान्यत्रेत्यभिप्रायः। येषां चार्थानां त्रिविक्षये
दृष्टार्थस्य धर्मशास्त्राध्ययनवि... धेः शिष्येण तदध्ययनं कार्यमिति ... कुतो वगम्यत इत्यत आह ॥ पुराणन्यायमीमांसाधर्मशास्त्रांगमि
श्रिताः ॥ वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ पुराणं ब्राह्मा... दि। न्यायस्तर्कविद्या। मीमांसा वेदवाक्यविचारः। धर्मशास्त्रं मान
वादि। अंगानि व्याकरणादीनि षट्। एते रुपेताश्चत्वारो वेदाः विद्यां पुरुषार्थज्ञानानि। तासां स्थानानि कीर्तितानि चतुर्दश। धर्मस्य च स्था
नानि हेतवः। एतानि पुनस्त्रैवर्णिकैरध्येतव्यानि। तदंगत्वात् धर्मशास्त्रमध्येतव्यं॥ तत्र ब्राह्मणेन विद्याप्राप्तये धर्मानुष्ठाना
य चाधिगंतव्यानि। क्षत्रियवैश्याभ्यां धर्मानुष्ठानाय। तथा चशौरवेण विद्यास्थानान्यनुक्रम्योक्तं। एतानि ब्राह्मणो ... द्विकुले प्र
वर्त्तीदर्शयती तरेषामिति। मनुरपि। द्विजातीनां धर्मशास्त्राध्ययनेधिकारः प्रवचने ब्राह्मणस्य नान्यस्येति दर्शयति। निषेकादि
श्मशानांतो मंत्रैर्यस्योदितो विधिः। तस्य शास्त्रेधिकारोस्मिन् ज्ञेयो नान्यस्य कस्यचित्। विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः। शिष्ये
भ्यश्च प्रवक्तव्यं सम्यङ्नान्येन केनचित्। अस्तु धर्मशास्त्रमध्येतव्यं। योगियाज्ञवल्क्यप्रणीतस्य तु शास्त्रस्य किमायातमित्यत आ
ह॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः॥ यमापस्तंबसंवर्ताः कात्यायनबृहस्पती॥ पराशरव्यासशंखलिखिता दक्ष
गौतमौ। शातातपो वशिष्ठश्च धर्मशास्त्रप्रयोजकाः॥ उच्यते। अदृष्टपर्यंतो द्वंद्वः। एकवद्भावः यात्तवल्क्यप्रणीतं धर्मशास्त्रमिदमध्ये
तव्यमित्यभिप्रायः। नेयं परिसंख्या किंतु प्रदर्शनार्थमेतत् ॥ अतो बौधायनादेरपि धर्मशास्त्रत्वमविरुद्धं। एतेषां प्रत्येकं प्रामाण्ये ... ५
पिसाकांक्षायामाकांक्षापरिहरणमन्यतः क्लृप्तेविरोधे विकल्पः॥ ॥ इदानीं धर्मस्य कारकहेतूनाह। देशे काल उपायेन द्रव्यं श्र
द्धासमन्वितं। पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणं॥ देशो यस्मिन्मृगः कृष्णस्तत्र लक्षणः। कालः संक्रांत्यादिः। उपायः शास्त्रोक्ते
तिकर्त्तव्यताकलापः। द्रव्यं प्रतिग्र... हादिलब्धं गवादि। श्रद्धा आस्तिक्यबुद्धिः। तदन्विते ... पात्रे। यद्विधिपूर्वकमादिव ध्य
माणलक्षणं प्रदीयते। यथा न प्रसार्वत्तेते। तथापरस्वत्वापत्त्यवसानं स्मृत्यते। एतद्धर्मस्योत्पादकं किं मे तावदेव। तेनाह। सकलमिति अन्य

दपि शास्त्रोक्तं जातिगुणानुलोमप्रयागादित्सकलं धर्मस्य कारणं। जातिगुणद्रव्यभावात्मकं चतुर्विधं धर्मस्य कारकमिसकलं भवति। तत्र समस्तं
सेवापथा शास्त्रं द्रष्टव्यं। अथ सर्वे वा अनुवर्तत एव॥ धर्मा॥ इदानीं धर्मस्य ज्ञापकहेतूनाह॥ श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्य
क्संकल्पजः कामो धर्ममूलमिदं स्मृतं॥ श्रुतिर्वेदः। स्मृतिर्धर्मशास्त्रं तथा चेमनुः। श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति।
सदाचारः सतां शिष्टानामाचारोऽनुष्ठानं। स्वस्य चात्मनः प्रियं वैक- ल्पिके विषये। यथा गर्भाष्टमेऽष्टमे वा देशस्यादावात्मेच्छैव
नियामिका। सम्यक्संकल्पाज्जातः कामः शा विरुद्धो यथा मया भोजनव्यतिरेकेणोदकं न पातव्यमिति। एतत् धर्मस्य मूलं प्रमाणं।
एतेषां विरोधे पूर्वस्य पूर्वस्य बलीयस्त्वं॥ ७॥ देशादिकारकहेतूनामपवादमाह॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां। अयं
तु परमो धर्मो यद्योगेनात्मदर्शनं॥ इत्यादीनां कर्मणामयमेव परमो धर्मः। यद्योगेन बाह्यचित्तवृत्तिनिरोधेनात्मनो दर्शनं। यथा तत्त्व
लाभं। योगेनात्मलाभे देशादिनियमो नास्तीत्यर्थः। तदुक्तं यत्रैकाग्रता तत्राविशेषादिति॥ ८॥ इदानीं कहेतुषु ज्ञापकहेतुषु वा
संदेहे निर्णयहेतुमाह॥ चत्वारो वेदधर्मज्ञाः पर्षत् त्रैविद्यमेव वा। सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तमः॥ चत्वारो ब्राह्मणा
वेदधर्मशास्त्रज्ञाः पर्षत्। त्रैविद्या त्रयी यं तत्र विद्याः तेषां समूहस्त्रैविद्यं। धर्मशास्त्रज्ञत्वमत्राप्यनुवर्तते। तथा पर्षे
न्ना सा पूर्वोक्ता पर्षत् यं ब्रूते स धर्मः। अध्यात्मज्ञाने सुनिपुणस्तथा धर्मशास्त्रज्ञश्च स एको वा यं ब्रूते सोऽपि धर्मः॥ ९॥ इत्युपो
द्घातप्रकरणं॥ ९॥ चिन्तां प्रकृतसिद्ध्यर्थमुपोद्घातं प्रचक्षते॥ एतैर्नवभिः श्लोकैः सकलशास्त्रोपोद्घात उक्तः। इदानीं वर्णादी
नां धर्मान् वक्तुं प्रथमं तावद्वर्णानाह। ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः। निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः
क्रियाः॥ ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णा वक्ष्यमाणलक्षणास्तेषामाद्यास्त्रयो ब्राह्मणक्षत्रियवैश्या द्विजाः॥ द्वि
र्जायन्त इति। तेषां द्विजानां वेदवत् शूद्रस्य निषेकाद्याः। निषेको गर्भाधानं आद्यो यासां तास्तथोक्ताः। श्मशानं तत्संबन्धि कर्म अन्तो या
सां ताः क्रिया मन्त्रैर्भवति॥ १०॥ इदानीं ताः क्रियाः क्रमत आह। गर्भाधानमृतौ पुंसः सवनं स्पन्दनात् पुरा। षष्ठेऽष्टमे वा सीमन्तो मास्येते जा

॥२॥ स२ दु ५ ॥२॥

4

तकर्मेचा अहन्येकादशेनामचतुर्थेमासिनिःक्रमः षष्ठेन्नप्राशनंमासिचूडाकार्ययथाकुलंगर्भाधानमित्यनुगतार्थकर्मनामधेय
मेवंवक्ष्यमाणान्यपि। तत्र गर्भाधानस्ततो ऋतुकालेवक्ष्यमाणेपुंसवनाख्यकर्मगर्भचलनात्पूर्वंषष्ठेष्टमेवामासिसीमन्तोन्नय
१ ए नमेतेपुंसवनसीमन्तोन्नयने क्षेत्रसंस्कारकर्मत्वात्सकृदेवकार्येनप्रतिगर्भं। यथाहदेवलः। सकृच्च संस्कृतानारी सर्वगर्भे
षु संस्कृतेति॥ एतेआ। इतेआगतेगर्भेकोशात्कुमारेजात एव चैकादशेहनिनामकर्मतच्चपितामहमातामहादिसंबद्धं। दे
वतानामसंबद्धंवा। यथाहशंखः। कुलदेवतासंबद्धंपितानामकुर्यादिति। चतुर्थेमासिनिःक्रमणात्षष्ठ पञ्चमेषष्ठेमास्यन्न
प्राशनंकर्म। चूडा तुयथाकुलंकार्यमितिप्रत्येकंसंबध्यते॥ ... एतेषांनित्यत्वेप्यानुषंगिकंफलमाह। एवमेनःशाम्यतिबीज
गर्भसमुद्भवं। एवमुक्तेनप्रकारेणगर्भाधानादिभिः संस्कारैरेनःपापंशमयतिकिंन्तबीजगर्भसमुद्भवं। शुक्रशोणितसंबद्धं। गोत्र
व्याधिसंक्रान्तिनिमित्तंनतुपतितोत्पन्नत्वादिगवा। स्त्रीणांविशेषमाह। तूष्णीमेताःक्रियाःस्त्रीणांविवाहस्तुसमंत्रकः। एताजा
तकर्मादिकाःक्रियास्त्रीणांतूष्णीममन्त्रकेनैवमंत्रैर्यथाकालंकार्याः। विवाहःपुनःसमंत्रकः॥ ... गर्भाष्टमेष्टमेवाब्देब्राह्मणस्योपनाय
नं। राज्ञामेकादशोसैकेविशामेकेयथाकुलं। गर्भाधानमादिंकृत्वा जननंवाअष्टमेवर्षेब्राह्मणस्योपनायनं। उपनयनमेवोपना
यनंस्वार्थेपूर्णवर्णोनुरागात्। अत्रेच्छयाविक ल्पः। राज्ञामेकादशे। विशांवैश्यानांसैके एकादशोद्वादशेइत्यर्थः। गर्भग्रहणं
सर्वत्रानुवर्त्तते। समासेऽप्युपसर्जनस्यापिगर्भशब्दस्यबुध्याविभज्यात्रानुवर्त्तनंकार्यं। यथाअथशब्दानुशासनंकेषांशब्दा
नामिति। अत्रापिकार्यमित्यनुवर्त्तते। कुलस्थित्यासाकेचिदुपनयनमिच्छन्ति। १८। उपनीयगुरुःशिष्यंमहाव्याहृतिपूर्वकं। वेदमध्याप
येदेनंशौचाचारांश्चशिक्षयेत्। स्वगृह्योक्तविधिनाउपनीयगुरुर्महाव्याहृतिपूर्वकंवेदंअध्यापयेत्। महाव्याहृतयश्चैव
वदेनंशौचाचारांश्चवक्ष्यमाणलक्षणान्शिक्षयेत्। १९। स्वगृह्योक्तविधिनाउपनी
... रादिसखाता सप्तापञ्चवागोतमाभिप्रायेण। किंचशौचाचारांश्च ...

नाम ४

व ६

पशौचाचारान्‌ शिक्षयेत्‌ इत्यनेन प्रागुपनयनात्‌ कामचारो दर्शितः। वर्णधर्मो न वर्जयित्वा स्त्रीणामप्येतत्समानं विवाहादर्वाक्‌।
उपनयनस्थानीयत्वाद्विवाहस्य ॥१५॥ शौचाचारानाह। ॥ दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः। कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षि-
णामुखः। कर्णस्थं ब्रह्मसूत्रं यस्य स तथोक्तः। कर्णश्च दक्षिणः पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेदिति लिंगात्‌। अस्तावहनि
संध्ययोश्च मूत्रपुरीषे कुर्यादुदङ्मुखः। चकारात्‌ स्नानादिरहिते देशे रात्रौ तु दक्षिणामुखः॥१६॥ गृहीतशिश्नश्चोत्थाय मृद्भि-
रभ्युद्धृतैर्जलैः। गंधलेपक्षयकरं शौचं कुर्यादतन्द्रितः॥ अनंतरं शिश्नं गृहीत्वोत्थायोद्धृताभिरद्भिर्वक्ष्यमाणलक्ष[illegible]णाभिर्मृ-
द्भिश्च गंधलेपयोः क्षयकरं शौचं कुर्यात्‌ अनलसः। उद्धृताभिरिति तीर्थजलैः शौचनिषेधः। अत्र गंधलेपक्षयकरमिति सर्वाश्रम-
साधारणमिदं शौचं संख्यानियमस्त्वदृष्टार्थः॥१७॥ अंतर्जानु शुचौ देश उपविष्ट उदङ्मुखः॥ प्राग्वा ब्राह्मेण तीर्थेन द्वि-
जो नित्यमुपस्पृशेत्‌। शुचौ अमेध्यादिद्रव्यासंस्पृष्टे देशे उपानच्छयनासनादिनिषेधः। उपविष्टो न स्थितः शयानः प्रह्वो
गच्छन्वा उदङ्मुखः प्राङ्मुखो वा न दिगंतराभिमुखः। देशाद्युपलक्षणात्पादप्रक्षालनप्राप्तिः। ब्राह्मेण तीर्थेन वक्ष्यमाणेन द्विजो न-
[illegible]दादिर्नित्यं सर्वकालमाश्रमांतरगतोऽपि उपस्पृशेत्‌। आचमेत्‌। कथं अंतर्जानु जानुनोर्मध्ये हस्तौ कृत्वा दक्षिणेन हस्तेन
[illegible]ति॥१८॥ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्‌। कनि[illegible]ष्ठायास्त-
र्जन्या अंगुष्ठस्य च मूलानि करस्याग्रं च प्रजापतिपितृब्रह्मदेवतीर्थानि यथाक्रमं वेदितव्यानि॥१९॥ त्रिः प्राश्यापो द्विरुन्मृ-
ज्य खान्यद्भिः समुपस्पृशेत्‌। अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः। वारत्रयमपः पीत्वा मुखमंगुष्ठमूलेन द्विरुन्मृज्य
खानि छिद्राणि ऊर्ध्वकायगतानि घ्राणादीनि अद्भिरुपस्पृशेत्‌। अद्भिर्द्रव्यांतरासंस्पृष्टाभिः पुनरद्ग्रहणं तु प्रतिच्छिद्रमुदकस्पर्शनार्थं।
पुनस्ता एव विशिनष्टि। प्रकृतिस्थाभिर्गंधरूपरसस्पर्शांतरमप्राप्ताभिः फेनबुद्बुदरहिताभिः। तु शब्दादुष्णधारागतानां

॥३॥

॥३॥

6

मूत्राद्याघ्रावर्जितानां निषेधः ॥ २० ॥ हृत्कंठतालुगाभिस्तु यथासंख्यं जातयः ॥ शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टा
भिरंततः ॥ हृत्कंठतालुगाभिरद्भिर्यथाक्रमं द्विजातयः शुध्यंति । स्त्री च शूद्रश्च अंततः अनेन तालुना स्पृष्टाभिः सकृदि
ति । वैश्यादि द्विजोषः ॥ वचनाद अनुपनीतो पि ॥ २१ ॥ स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः ॥ सूर्यस्य चाप्युपस्थानं गायत्र्याः प्र
त्यहं जपः ॥ प्रातः स्नानं यथाशास्त्रं अब्दैवतैर्मंत्रैरापो हि ष्ठेत्येवमादिभिर्मार्जनं । प्राणसंयमः प्राणायामो वक्ष्यमाणलक्षण
स्ततः सूर्योपस्थानं सौरेण मंत्रेण गायत्र्यास्तत्सवितुर्वरेण्यमित्याद्याः प्रतिदिवसं जपः । अपि शब्दो यथालिंगं गंधसेकं सं
बध्यते । गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्वकां । प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः ॥ गायत्री पूर्वोक्ता आपो ज्योति र
रित्यादिना शिरसा संयुक्तां ॐ व्याहृतिपूर्विकां प्रतिव्याहृति प्रणवेन संयुक्तां ॐ भूः ॐ भुवः इति त्रीन् वारान् न्
मुखनासिकासंचारि वायुं निरुंधन् मनसा जपेत् । इत्ययं सर्वत्र प्राणायामः ॥ २२ ॥ प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन तु ।
जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् । संध्यां प्राक् प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् । प्राणायामं पूर्वोक्तं कृत्वा तृचेनाब्दैवते
न पूर्वोक्तेनात्मानमद्भिः संप्रोक्ष्य सावित्रीं जपन् प्रसक्तु संध्यां आसीत । अर्थात् प्रत्यङ्मुख इति लभ्यते । आतारकोदयात्
या ५ तारकोदयावधि प्राक् संध्यां । प्रातः समये एवं पूर्वोक्तविधिमाचरन् प्राङ्मुखः सूर्योदयावधि तिष्ठेत् । अहोरात्रयोः संधौ
याक्रियाविधीयते सा संध्या । तत्र पः संपूर्णादित्यमंडलदर्शनयोग्यः कालः स दिवसस्तद्विपरीता रात्रिः यस्मिन्काले
म्पि ३ मंडलखंडस्योपलब्धिः सा संध्या ॥ २४ ॥ अग्निकार्यं ततः कुर्यात् संध्ययोरुभयोरपि । ततो भिवादयेद्वृद्धान् असावहमिति
ब्रुवन् । ततः संध्योपासनानंतरं द्वयोः संध्ययोरग्निकार्यं अग्नौ समित्प्रक्षेपादि यत्तत्कुर्यात् । स्वगृह्योक्तेन विधिना । तदनंतरं
वृद्धान् गुरुप्रभृतीन् अभिवादयेत् । कथं असौ देवदत्तनामाहमिति स्वं नाम कीर्तयन् ॥ २५ ॥ गुरुं चैवाप्युपासीत स्वाध्यायार्थं समा

कुलिनः॥ आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत्॥ हितं तस्याचरेन्नित्यं मनोवाक्कायकर्मभिः॥ तथा गुरुं वक्ष्य[illegible]माण लक्षण
मुपासीत परिचर्यापरस्तदधीनस्तिष्ठेत्॥ स्वाध्यायार्थमध्ययनसिद्ध्यै समाहितः अविक्षिप्तचित्तो भवेत्॥ आहूतश्चाप्य
धीयीत गुर्वाहूत एवाध्यधीयीत न स्वयं प्रेरयेत्॥ य[illegible]ल्लब्धं तत्सर्वं च गुरवे च निवेदयेत्। तथा तस्य गुरोर्हितमाचरेत् नित्यं
सदा। मनोवाक्कायकर्मभिर्न प्रतिकूलं कुर्वीत। अपित्वाद्वात् गुरुदर्शने गोतमो कर्कंठ प्रावृतादि वर्जयेत्॥ ३७॥ कृतज्ञा
द्रोहिमेधाविशुचिकल्यानसूयकाः॥ अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः॥ कृतमुपकारं न विस्मरतीति कृतज्ञः॥ वि५
अद्रोही दयावान्॥ मेधावी ग्रंथग्रहणधारणक्षमः॥ शुचिर्बाह्याभ्यंतरशौचवान्॥ कल्प आधिव्याधिरहितः। अनसूयकः गुणदो
षाणामनाविःकारेण गुणाविःकरणशीलः। साधुर्वृत्तवान्॥ शक्तः शुश्रूषायाम् आप्तो बंधुः॥ ज्ञानदो विद्याप्रदः॥ वित्तदोऽ
पण्यत्वमर्थप्रदाता। एते गुणाः समस्ता व्यस्ता वा यथा संभवं द्रष्टव्याः॥ एते च धर्मशास्त्रानुसारेण अध्याप्याः॥ ३८॥ दंडाजि
नोपवीतानि मेखलां चैव धारयेत्। तथा स्य संतरप्रसिद्धं पालाशादिदंडं। अजिनं चर्म कृष्णादि। उपवीतं कार्पासादिनिर्मि
तं। मेखलां मुंजादिनिर्मितां॥ ब्राह्मणादिर्ब्रह्मचारी धारयेत् ब्राह्मणेषु चरेद्भैक्ष्यमनिंद्येष्वात्मवृत्तये। आदिमध्याव
सानेषु भवच्छब्दोपलक्षितां। ब्राह्मणक्षत्रियविशां भैक्ष्यचर्या यथाक्रमं पूर्वोक्तदंडादियुक्तो ब्रह्मचारी ब्राह्मणेषु अ
निंद्येषु अभिशस्तादिव्यतिरिक्तेषु स्वकर्मनिरतेषु भैक्षं चरे[illegible]त्। आत्मवृत्तये आत्म[illegible]नो जीवनाय न परार्थं। आचार्य
तद्भार्यापुत्रव्यतिरेके नास्ति वेद्य गुरवेनु ज्ञातो भुंजित। तदभावे तत्पुत्रादाविति नियमात्। अत्र ब्राह्मणग्रहणं संकवेस
तानियमार्थं यच्चसार्ववर्णिकं। भैक्षाचरणमिति तत्त्रैवर्णिकप्राप्त्यर्थं। यच्च चातुर्वर्ण्यं चरेद्भैक्षमिति। तदापद्विषयं। कथं कृ
ब्रह्मचर्या आदिमध्यावसानेषु भवच्छब्दोपलक्षिता। भवति भिक्षां देहि। भिक्षां भवति देहि। भिक्षां देहि भवति॥ एवं व

धारणा ६ ॥४॥

॥४॥

यो क्रमेण भैक्ष्यचर्या कार्या ॥ १८७ ॥ कृताग्निकार्यो भुंजीत वाग्यतो गुर्वनुज्ञया। आपोशानक्रियापूर्वं सत्कृत्यान्नमकु
त्सयन्॥ पूर्वोक्तेन विधिना भिक्षामाहृत्य गुरवे निवेद्य तदनुज्ञया कृताग्निकार्यो वाग्यतो मौनी अन्नं सत्कृत्य संतुष्या
कुत्सयन्॥ आदिं दत्त्वापोशानक्रिया मस्तोपस्तरणमसीत्यादिकं पूर्वं कृत्वा भुंजीत। तत्र पुनरग्निकार्यग्रहणं सं
ध्याकाले कथंचित् कृताग्निकार्यस्य कालांतरविधानार्थं तत्तुल्यतीयप्राप्त्यर्थं ॥ १८८ ॥ ब्रह्मचर्ये स्थितो नैकमन्नमद्या
दनापदि ॥ ब्राह्मणः ममश्नीयात् श्राद्धे व्रत मपीडयन्। ब्रह्मचर्ये स्थितः। एकमन्नं नाद्यादनापदि। व्याध्याद्यभावे॥
ब्राह्मणः पुनः श्राद्धे ऽभ्यर्थितः स्वकाममश्नीयात् व्रतमपीडयन्। मधुमांसपरिहारेण च ब्राह्मणग्रहणं। क्षत्रियादेः
श्राद्धभोजनकदासार्थं। राजन्यवैश्ययोश्चैवं नैतत् कर्म प्रचक्षते इति स्मरणात् ॥ १८९ ॥ मधुमांसांजनोच्छिष्टशुक्त
स्त्रीप्राणिहिंसनं। भास्करालोकनाश्लीलपरिवादादि वर्जयेत्। मधुक्षौद्रं न मद्यं तस्य नित्यं ब्राह्मण इति निषेधात्। मांसं
भागेदेरपि। अंजनं घृतादिना गात्रस्य। कज्जलादिना चाक्ष्णोः। उच्छिष्टं गुरोः। शुक्तं निष्ठुरवाक्यं॥ मरसो मत्वतत्स्यां भक्ष
प्रकरणे निषेधात्। स्त्रियमुपभोगे। प्राणिहिंसनं। भास्करस्य आलोकनं। उदितास्तमितादित्यस्य अनालोकनं। अश्ली
लं। असत्यभाषणं। गुह्यभाषणं च। परिवादः। सदसद्रूपस्य परदोषस्य ख्यापनं। आदित्यग्रहणात् सर्वसंतरो कां धमाल्या
दिर्गृह्यते। एतानि ब्रह्मचारी वर्जयेत् ॥ १९० ॥ गुर्वादिलक्षणमाह॥ स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति। उपनीय दद
देदमाचार्यः स उदाहृतः॥ यो सौ गर्भाधानाद्या उपनयनपर्यंताः क्रिया यथाविधि कृत्वा वेदमस्मै ब्रह्मचारिणे प्रयच्छति।
स गुरुः। यः पुनरुपनयनमात्रं कृत्वा वेदं प्रयच्छति स आचार्यः ॥ ३४ ॥ एकदेशमुपाध्याय एकोत्तिग्न्यत् तदुच्यते। एतेमान्याय
चापूर्वमेव्योमातागरीयसी। वेदस्यैकदेशं मंत्रब्राह्मणयोरेकमंगानि वा यो ध्यापयति। स उपाध्यायः। यः पुनः पाकयज्ञादिकं च

का५

३६

य

9

॥५॥

कोर्णता सत्त्रत्विक्। एते चत्वारो गुर्वाचार्योपाध्यायऋत्विजो यथापूर्वं यथाक्रमेण मान्याः पूज्याः एभ्यः सर्वेभ्यो माता गरीय
सी पूज्यतमा ॥४१॥ वेदग्रहणार्थं ब्रह्मचर्यावधिमाह। प्रतिवेदं ब्र[illegible]चर्यं द्वादशाब्दानि पंच वा। ग्रहणांतिकमित्ये
के केशांतश्चैव षोडशे। यदा विवाहासंभवे न वेदानधीत्य वेदो वेति प्रवर्त्तते। तदा प्रतिवेदं वेदं वेदं प्रति ब्रह्मचर्यं यथोक्तं
द्वादशवार्षिकं कार्यं। अत्राक्षेपे च। ग्रहणांतिकमित्येके वर्णयंति। केशांतः पुनः गोदानाख्यं कर्म गर्भाधानादारभ्य षो
डशे वर्षे ब्राह्मणस्य कर्त्तव्यं। एतच्च द्वादशवार्षिके वेदव्रते बोद्धव्यं। इतरस्मिन्पक्षे यथासंभवं द्रष्टव्यं। राजन्यवैश्य
योश्च उपनयनकालवत्। द्वाविंशे चतुर्विंशे वा द्रष्टव्यं ॥४२॥ उपनयनकालस्य परमावधिमाह ॥ आषोडशाद्द्वाविंशा
च्चतुर्विंशाच्च वत्सरात्। ब्राह्मणक्षत्रियविशां मौंज नायनिकः परः। अत ऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृताः। सावित्रीपतिता
व्रात्या व्रात्यस्तोमादृते क्रतोः। आषोडशाद्वर्षात् षोडशं वर्षं यावत्। आद्वाविंशाद्वर्षात्। आचतुर्विंशाद्वर्षात् ब्रह्मक्षत्र
विट्श्रेष्ठानां औपनायनिक उपनयनसंबंधी परः कालो नातः परमुपनयनकालोस्ति। किंतु। पतंत्येते सर्वधर्मेष्वनधिकारिणो भवं
ति। व्रात्यस्तोमाक्रतोर्विना। कृतेतु तस्मिन्नुपनयनाधिकारिणो भवंति ॥४३॥ आद्यास्त्रयो द्विजा उक्ताः। तत्र हेतुमाह। मा
तुर्यदग्रे जायंते द्वितीयं मौंजिबंधनात्। ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः॥ मातुः सकाशात्प्रथमं जायंते
मौंजिबंधनाद्द्वितीयं जन्म। यस्मात्तस्मादेते ब्राह्मणक्षत्रियविशो द्विजा उच्यंते ॥४४॥ ग्रहणाध्ययनफलमाह। य
ज्ञानां श्रोतस्मार्तानां तपसां कायसंतापहू
तानां तपसां चैव शुभानां चैव कर्मणां। वेद एव द्विजातीनां निःश्रेयसकरः परः॥ यज्ञानां श्रौतस्मार्तानां तपसां कायसंतापहू
तानां तपसां चैव शुभानां चैव कर्मणां उपनयनादिसंस्काराणामवबोधकत्वेन वेद एव द्विजातीनां परो निःश्रेयसक
पाणां चांद्रायणादीनां शुभानां च कर्मणां उपनयनादिसंस्काराणामवबोधकत्वेन
रः नान्यः। वेद एवेति तन्मूलत्वेन स्मृतेरुपलक्षणार्थं ॥४५॥ ग्रहणाध्ययनफमुक्तमिदानीं काम्य ब्रह्मयज्ञाध्ययनफल

॥५॥
३६

माहः॥ मधुना पयसा चैव स देवांस्तर्पयेद्द्विजः। पितॄन्मधुघृताभ्यां च ऋचोऽधीते च योऽन्वहं॥४१॥ यजूंषि शक्तितोऽधीते योऽन्व
हं स घृतामृतैः। प्रीणाति देवानाज्येन मधुना च पितॄंस्तथा॥४२॥ स तु सोमघृतैर्देवांस्तर्पयेद्योऽन्वहं पठेत्। सामानि तृ
प्तिं कुर्याच्च पितॄणां मधुसर्पिषा॥४३॥ योऽन्वहं ऋचोऽधीते स मधुना पयसा च देवान्। पितॄंश्च मधुघृताभ्यां तर्पयति। यः
पुनः शक्तितोऽन्वहं यजूंषि अधीते स घृतामृतैर्देवान् पितॄंश्च मधुघृताभ्यां प्रीणाति। यस्तु सामान्यन्वहमधीते स सोम
घृतैर्देवान् पितॄंश्च मधुसर्पिर्भ्यां प्रीणाति। ऋगादिग्रहणं सामान्येन ऋगादिमात्रप्राप्त्यर्थं। मेदसा तर्पयेद्देवान् अथर्वा
ङ्गिरसः पठन्। पितॄंश्च मधुसर्पिर्भ्यामन्वहं शक्तितो द्विजः॥४४॥ वाकोवाक्यं पुराणं च नाराशंसीश्च गाथिकाः। इतिहासां
स्तथा विद्याः शक्त्याधीते तु योऽन्वहं॥४५॥ मांसक्षीरौदनमधुतर्पणं स दिवौकसां। करोति तृप्तिं कुर्याच्च पितॄणां मधुस
र्पिषा॥४६॥ ते तृप्तास्तर्पयन्त्येनं सर्वकामफलैः शुभैः। यः पुनः शक्तितोऽन्वहं अथर्वाङ्गिरसोऽधीते स देवान् मेदसा पि
तॄन् मधुसर्पिर्भ्यां तर्पयति। यस्तु वाकोवाक्यं प्रश्नोत्तररूपं वेदवाक्यं। पुराणं ब्राह्मादि। चकारात् मानवादिधर्मशास्त्रं।
नाराशंसीश्च रुद्रदैवत्यान्मन्त्रान्। गाथाश्च यज्ञगाथा इन्द्रगाथाद्याः। इतिहासान् महाभारतादीन् विद्याश्च वारुण्या
द्याः शक्तितोऽन्वहमधीते स मांसक्षीरौदनमधुभिर्देवान्। पितॄंश्च मधुसर्पिर्भ्यां तर्पयतीति ये। ते पुनस्तृप्ताः सन्तो
देवाः पितरश्च एनं स्वाध्यायकारिणं सर्वकामफलैः शुभैः रत्न्योपघातलक्षणैस्तर्पयन्ति॥४७॥ प्रसंगात् सार्थमाह॥
त्रिर्वित्तपूर्णपृथिवीदानस्य फलमश्नुते। तपसश्च परस्येह नित्यं स्वा
ध्यायं कुरु मधीते च तस्य तस्याश्रया फलं। यं यं क्रतुमधीते च तस्य तस्याप्नुयात्फलं। त्रिर्वित्तपूर्णपृथिवीदानस्य फलमश्नुते। तपसश्च परस्येह नित्यं स्वा
ध्यायवान् द्विजः॥४८॥ यस्य यस्य क्रतोः प्रतिपादकं वेदैकदेशमन्वहमधीते। तस्य तस्य क्रतोः फलमवाप्नोति। तथा वि
त्तपूर्णायाः पृथिव्याः त्रिर्दानेन यत्फलं। परस्य च तपसश्चान्द्रायणादेर्यत्फलं तदपि नित्यस्वाध्यायवान् प्राप्नोति।
नित्यग्रहणं काम्यस्यापि सतो नित्यत्वज्ञापनार्थं॥४८॥ एवं सामान्येन ब्रह्मचारिधर्मान् अभिधायाधुना नैष्ठि

स २

नैष्ठिके विशेषमाह
स्य

वा ३

तदभावे तत्पुत्रसमीपे

४१२

को ब्रह्मचारी तु वसेदाचार्यसन्निधौ। तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥ ४९ ॥ अनेन विधिना देहं साधय-
न् विजितेंद्रियः। ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥ ५० ॥ उक्तेन प्रकारेणा प्राणं [illegible] मुत्क्रांतिकालं नयती-
ति नैष्ठिकः। स यावज्जीवमाचार्यसमीप एव वसेत्। न वेदग्रहणोत्तरकालं स्वतंत्रो भवेत्। तदभावेत ज्ञायासमी-
पे तदभावे वैश्वानरेऽपि। अनेनोक्तेन विधिना देहं साधयन् क्षपयन् विजितेंद्रियः। इंद्रियजयेन च श्रेयसा-
न्वितः ब्रह्मचारी ब्रह्मलोकं मरणोत्तरमवाप्नोति। न कदाचिदिह पुनः आजायते ॥ ॥ ब्रह्मचारिप्रकरणं ॥ ॥

मः पुनर्वैवाहिकस्य विवाहार्थं स्नानमाह ॥ गुरवे तु वरं दत्वा स्नायाद्वा तदनुज्ञया। वेदं व्रतानि वा पारं नीत्वा ह्युभ-
यमेव वा ॥ ५१ ॥ पूर्वोक्तेन न्यायेन वेदं मंत्रब्राह्मणात्मकं। व्रतानि ब्रह्मचारिधर्मान् अनुक्रांतान् वा उभयमेव वा पारं नी-
त्वा समाप्य गुरवे पूर्वोक्ताय वरमभिलषितं यथाशक्ति दत्वा स्नायात् दत्तोक्तो तदनुज्ञया अदत्तवरोऽपि।
एषां च पक्षाणां शक्तिकालाद्यपेक्षया व्यवस्था ॥ ॥ स्नानानंतरं किं कुर्यादित्यत आह ॥ ॥ अविप्लुतब्रह्म-
चर्यो लक्षण्यां स्त्रियमुद्वहेत्। अनन्यपूर्विकां कांतामसपिंडां यवीयसीं ॥ ५२ ॥ अविप्लुतब्रह्मचर्यः अस्खलि-
तब्रह्मचर्यो लक्षण्यां बाह्याभ्यंतरलक्षणैर्युक्तां बाह्यानि तनुलोमकेशदशनादीनि गुप्तप्रोक्तानि आभ्यंत-
राणि दृष्टोपिंडान् दृत्वा इत्याश्वलायनोक्तविधिना ज्ञातव्यानि स्त्रियं। नपुंसकत्वनिवृत्तये स्त्रीत्वेन परीक्षि-
तां। अनन्यपूर्विकां। दानेनोपभोगेन वा पुरुषांतरापरिगृहीतां। कांतां कमनीयां। वोढुर्मनोनयनानंदका-
रिणीं। यस्यां मनश्चक्षुषोर्निबंधस्तस्यामृद्धिरित्यापस्तंबस्मरणात्। एतच्च सूत्राधिकांगादिबाधदो-
षाभावे। असपिंडां समानः एकः पिंडो देहो यस्याः सा सपिंडा न सपिंडा असपिंडा तां। सपिंडता च एकश-
रीरावयवान्वयेन भवति। तथाहि पुत्रस्य पितृशरीरावयवान्वयेन पित्रा सह। एवं पितामहादिभिरपि। पितृद्वारे-

न्वये १ न्वये १

अतः६

ण तच्छरीरावयवान्वयात्। एवं मातृशरीरावयवान्वयेन मात्रा। तथा मातामहादिभिरपि। मातृद्वारेण। तथा मातृष्वसृमातुलादिभिरप्येकशरीरावयवान्वयात्। तथा पितृव्यपितृष्वस्रादिभिरपि पितृद्वारेण। तथा पत्न्या सह पत्युरेकशरीरारंभकतया। एवं भ्रातृभार्याणामपि परस्परमेकशरीरारब्धैः सहैकशरीरारंभकत्वेन। एवं यत्र यत्र सपिंडशब्दस्तत्र तत्र साक्षात्परंपरया वा एकशरीरावयवान्वयो वेदितव्यः॥ यद्येवं मातामहादीनामपि दशाहं शावमाशौचं सपिंडेषु विधीयत इत्यविशेषेण [illegible] स्यादेतद्यदि। तत्र तत्र प्रत्तानामितरे कुर्वीरन् इत्यादिविशेषवचनं न स्यात्। [illegible] सपिंडेषु यत्र विशेषवचनं नास्ति तद्दशाहमित्येतद्वचनमवतिष्ठते। अवश्यं चैकशरीरावयवान्वयेन सापिंड्यं वर्णनीयं। आत्मा हि जज्ञे आत्मन इत्यादिश्रुतेः॥ तथा प्रजामनुप्रजायसे इति च। तथा पि स आत्मायं विरूढः प्रत्यक्षेणोपलभ्यत इत्यापस्तंबस्मरणाच्च। तथा गर्भोपनिषदि। एतत्षट्कौशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतः। अस्थिस्नायुमज्जानः पितृतः। त्वङ्मांसरुधिराणि मातृतः॥ तत्र तत्रावयवान्वयप्रतिपादनात्। निर्वाप्यसापिंड्यान्वयेन तु मातृसंतानेऽभ्रातृपितृव्यादिषु च सापिंड्यं न स्यात्। समुदायशक्त्यंगीकारेण रूढिपरिग्रहेऽवयवशक्तिस्तत्र तत्राव गम्यमाना परित्यक्ता स्यात्। परंपरयैकशरीरावयवान्वयेन सापिंड्येऽत्यंतातिप्रसंगस्तथा वक्ष्यामः॥ यवीयसीं वयसा प्रमाणतश्च न्यूनामुद्वहेत्। तत्परिणयेत् स्वगृह्योक्तविधिना॥ परविशेषणांतराण्याह॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां॥ अरोगिणीं। अचिकित्स्यरोगानुपस्पृष्टां। भ्रातृमतीं पुत्रिकाकरणशंकानिवृत्तये। अन्यथा परिभाषिता पुत्रिका भवतीति गम्यते। असमानार्षगोत्रजां। ऋषेरिदं आर्षं नाम प्रवरः। गोत्रं वंशपरंपराप्रसिद्धं। आर्षं च गोत्रं च आर्षगोत्रे समाने आर्षगोत्रे यस्यासौ समानार्षगोत्रस्त

।नर्हि

पृ८

गी

॥१॥

मर

स्मार्त्तास्ता समानार्षगोत्रजा । नसमानार्षगोत्रजा । असमानार्षगोत्रजा । तां । गोत्रप्रवरौ च पृथक् पर्युदासनिमित्ते तेना समा
नार्षजां समानगोत्रजामित्यर्थः ॥ तथा चासमानप्रवरैर्विवाह इति गौतमः ॥ तथा असपिंडा च या मातुरसगोत्रा च या पि
तुरिति मनुः । तथा मातृगोत्रामप्यपरिणेयां केचिदिच्छंति । मातुलस्य सुतां मूढो मातृगोत्रां तथैव च । समानप्रवरां चैव
गत्वा चांद्रायणं चरेत् । इति सायणस्मरणात् । अत्र चासपिंडामित्यनेन पितृपक्षस्य मातृपक्षस्यादिदुहितृनिषेधः ॥
तथा असगोत्रामित्यनेना [blot] सपिंडाया अपि भिन्नसंतानजायाः समानगोत्रजाया निषेधः । असमानप्रवरामि
त्यनेनाप्यसपिंडाया अप्यसगोत्राया अपि समानप्रवराया निषेधः । तथा असपिंडामित्येतत्सार्ववर्णिकं । सर्वत्र
सापिंड्यसद्भावात् । असमानार्षगोत्रजामित्येतत्त्रैवर्णिकविषयं यद्यपि राजन्यविशां प्रातिस्विकगोत्राभावात् प्रवराभा
वः ॥ तथापि पुरोहितगोत्रप्रवरौ वेदितव्यौ ॥ तथा च यजमानस्यार्षेयान्वृणीत इत्युक्त्वा पौरोहित्यान् राजन्यविशां
प्रवृणीत इत्याहाश्वलायनः ॥ सपिंडासमानगोत्रासमानप्रवरासु भार्यात्वमेव नोपपद्यते । रोगिण्यादिषु भार्यात्ववत्
सन्ने ॥ पितृष्वविरौ एवं असपिंडामित्यत्रैकशरीरावयवान्वयद्वारेण साक्षात्पारंपर्येण वा सापिंड्यमुक्तं । तच्च स

घ८

र्वस्य यथाकथंचिदनादौ संसारे संभवतीत्यतिप्रसंगस्तत आह । पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ।
पितुः संताने सप्तमादूर्ध्वं सापिंड्यमिति वर्जनीयत्वे विशेषः । अतश्चायं सापिं
ड्यं मातृतो मातुः संताने पंचमादूर्ध्वं पितृतः । पितुः संताने सप्तमादूर्ध्वं जायाद्वयविवाहे तद्विषय एव । तथा च पित्रादयः षट् सपिंडाः पुत्रा
उत्रादीवयवशात् यावद्वर्तमानोऽपि निर्णयार्थं जायाद्वयविवाहे यावत्सप्तम इति सर्वत्र योजनीयं ॥ ॥१॥
दयस्तथा ॥ आत्मा च सप्तमः ॥ संतानभेदेऽपि यतः संतानभेदस्तमादाय गणयेत् ॥ त्रीनतीत्य मातृतः पंचातीत्य पितृत इति पैठी
यः । एवं च पिंडवसिष्ठेनोक्तं पंचमीं सप्तमीं चैव मातृतः पितृतस्तथा इति सर्वस्मृतीनामविरोधः । एतच्च समानजातीये द्रष्टव्यं ।
नासिकात् पूर्वोक्तनिषेधार्थं । न पुनस्तत्सापिंड्यार्थमिति सर्वं । यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः । एकपिंडाः पृथक्शौचाः पिं
विजातीये तु विशेषः । यथाह शंखः ॥ यद्येकजाता बहवः पृथक्

14

उ स्वावर्त्तेते त्रिषु एकस्माद्ब्राह्मणादेर्जाताः पृथक्क्षेत्रास्विति जातीयासु स्त्रीषु जाताः पृथग्जनाः समानजातीया
सु भिन्नासु स्त्रीषु जातास्त एकपिंडाः सपिंडाः ॥ किंतु पृथक्शौचमाशौचप्रकरणे वक्ष्यामः ॥ पिंडस्त्वावर्त्तेते त्रिषु त्रिषु तत्समेव
सापिंड्यमिति ॥ ५३ ॥ दशपौरुषविख्यातात् श्रोत्रियाणां महाकुलात् ॥ पुरुष एव पौरुषः दशभिः पुरुषैर्मातृतः पंचभिः
पितृतः पंचभिर्विख्याते यत्कुलं तस्माच्छ्रोत्रियाणां अधीतवेदानामध्ययनमुपलक्षणं कृताध्ययनसंपन्नानां महत्
स्त्रीतत्कुलं च महाकुलं ॥ पुत्रपौत्रपशुदासीग्रामादिसमृद्धं तस्मात्कन्या आहर्तव्येति नयमन्ते ॥ ५४ ॥ एवं सर्वेलः प्राप्तो
स्तस्यामपवादमाह ॥ स्फीतादपि न संचारिरोगदोषसमन्वितात् ॥ संचारिणो रोगाः कुष्ठापस्मारप्रभृतयः पुत्रसंक्रामिणः
द्वारेणानुप्रविशंतो दोषाः ॥ पुनः हीनक्रियत्वं पुरुषादयो मनोक्ताः एतैः समन्वितात् स्फीतादपि पूर्वोक्तान्महाकुला
दपि नाहर्त्तव्येति ॥ ५४ ॥ एवं कन्याग्रहणे नियममुक्त्वा कन्यादाने वरनियममाह ॥ एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो व
रः ॥ यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः ॥ एतैरेव गुणैः पूर्वोक्तैर्युक्तो दोषैश्च वर्जितो वरो भवति ॥ तत्रायम

र्म६ परो विशेषः ॥ सवर्णः स्वजातीयः नवर्णः स्वयं च कृताध्ययनसंपन्नः ॥ यत्नात्प्रयत्नेन पुंस्त्वे परीक्षितः परीक्षोपायश्च
वते हि नारदेन दर्शितः ॥ यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलं ॥ पुमान्स्याल्लक्षणैरेतैर्विपरीतस्तु पंडकः ॥ इति ॥ युवा ॥ न वृद्धः ॥
धीमान् लौकिकवैदिकव्यवहारेषु निपुणमतिः ॥ जनप्रियः स्मितमृदुपूर्वाभिभाषणादिभिः सर्वजनानुरक्तः जनैः ॥ ५५ ॥ रतिपुत्रध ५५
र्मार्थत्वेन विवाहस्त्रिविधः तत्र पुत्रार्थो द्विविधः नित्यः काम्यश्च तत्र नित्ये पुत्रार्थे सवर्णा ॥ श्रोत्रियो वर इत्यनेन सवर्णो
मुख्या दर्शिता ॥ इदानीं काम्ये नित्यसंयोगे नानुकल्पो विवरणोऽह ॥ ५६ ॥ यदुच्यते द्विजातीनां शूद्रादारोपसं
ग्रहः ॥ न तन्मम मतं यस्मात्तत्रायं जायते स्वयं ॥ यदुच्यते काम न तु धर्मतो नामिमाः स्युः क्रमशो वरा इत्यत्र प्रकरणस्य
ब्राह्मणस्य चतस्रो भार्याः क्षत्रियस्य तिस्रो वैश्यस्य द्वे इति द्विजातीनां शूद्रादावेदनमिति केनचिदुक्तं तथा तत्रस्य

मतं यस्मादयं द्विजातिः तत्र स्वयं जायते । तज्जाया जाया भवति यदस्यां जायते पुनरिति श्रुतेः । अत्र च तत्राय- ॥४८॥
जायते स्वयमिति हेतुं वदता नैसेकपुत्रोत्पादनार्थं भार्या भवत्यस्य शूद्रापरिणयननिषेधं कुर्वता नैसेकपुत्रोत्पादनानु-
कल्पे काम्ये च पुत्रोत्पादने ब्राह्मणस्य क्षत्रियवैश्ये क्षत्रियस्य वैश्या अनुज्ञाता भवति ॥४६॥ इदानीं यति कामस्यो- अवस्था४
कल्पे सत्रपुत्रस्य वा विवक्षितभार्यस्याग्रमांतरे घनधिकारिणो ब्रह्मस्वामी माता पितरौ क्षिपणः परिणयन क्रमेणाह ॥ तिस्रो वर्णा-
ब्राह्मण क्षत्रिय विशां भार्याः स्वाः शूद्र जन्मनः ॥ वर्णक्रमेण ब्राह्म-
णुसवर्णे हेतयैका यथाक्रमं ॥
णस्येति स्वः क्षत्रियेऽद्वैवैश्यस्यैका शूद्रस्य स्वैव भार्या भवति । सवर्णा पुनः सर्वेषां मुख्या स्वैव । पूर्वं स्याः सर्वं स्या अ- स्य६
भावे उत्तरोत्तरा भवति । अयमेव चक्रमो अग्न्याधानानुकल्पे काम्ये च पुत्रोत्पादनविधौ ॥ अत एव यत्र शूद्रापुत्रस्य पुत्रमध्ये ॥४८॥
परिगणनं विभागसंकीर्तनं च तथा विप्रान्मूर्धावसिक्तो हीत्यपकम्य विन्नास्वे षविधिः स्मृत इति च तत् इति काम्यस्याश्रम
मात्रापि कां क्षिणो वा नांतरीयकतत्त्वो सत्रस्य ॥५७॥ विवाहोवाह ॥ ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता ॥ तज्जः पुना-
त्युभयतः पुरुषानेकविंशतिः । स ब्राह्मो विवाहः यस्मिंस्तु कलक्षणाय वरायाहूय यथाशक्त्यलंकृता कन्या दीयते । उदक-
पूर्वं तस्यां जातः पितादीन् दश पुत्रादीन् दश आत्मानं चैकविंशं पुनाति स इत्यर्थः ॥५८॥ यज्ञस्थ ऋत्विजे दैव आ- पुत्रउभयतः६
र्षस्तु गोद्वयं । चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट् ॥ सदैवो विवाहः । यस्मिन् प्रसाततु ॥ वितते ऋत्विजे य-
ज्ञे न्यस्यलंकृता कन्या दीयते । यस्मिन् पुनः आदाय गोमिथुनं कन्या दीयते उदकपूर्वं स आर्षः । तत्र प्रथमजो दैवविवा-
हजः चतुर्दश पुनाति सप्त पूर्वान् सप्त परान् उत्तरजः षट् पुनाति त्रीन् पूर्वान् त्रीन् परान् ॥५९॥ इत्युक्त्वा चरतां धर्मं स-
हया दीयतेऽर्थिने । स कायः पावयेत्तज्जः षट् षट् वंश्यान् सहात्मना । सह धर्मं चरतामिति परिभाष्य कन्यादानं प्राजाप-
त्यः । तज्जः षट् पूर्वान् आत्मना सह षड् परानां सहेत्येवं चपोद्दश पुनाति ॥६०॥ आसुरो द्रविणादानात् गान्धर्वः

समयान्मिथः ॥ राक्षसो युद्धहरणात् पैशाचः कन्यकाछलात् आसुरः पुनः द्रविणादानात् गान्धर्वः स्यात् परस्परानुरागेण भवति।
राक्षसो युद्धेनापहरणात् पैशाचस्तु कन्यकायाश्छलहरणात् छद्मना स्वापादवस्थासु हरणात् ॥ च सा रोचाल्लण स्या
घाः शस्त्राग्नं धर्वराक्षसौ । राज्ञस्त्वासुरविट्शूद्रे पैशाचस्तु विधीयते ॥ ६१॥ सवर्णादिपरिणयने विशेषमाह ।
पाणिर्ग्राह्यः सवर्णासु गृह्णीयात् क्षत्रिया शरं वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः । सवर्णासु विवाहेष्वयं क्रमविधिः नापा
णिरेव ग्राह्यः ॥ क्षत्रिया कन्या तु शरं गृह्णीयात् । वैश्या प्रतोदमादद्यात् उत्कृष्टवेदने । शूद्रा पुनर्वसनस्य दशां । यथाह मनुः ॥
वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने इति ॥ ६२॥ दात समाह । पिता पितामहो भ्राता सकुल्यो जननी
तथा । कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥ अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ । गम्यं त्वभावे दातॄणां क
न्या कुर्यात् स्वयंवरं । एतेषां पित्रादीनां पूर्वस्य पूर्वस्याभावे परः परः कन्याप्रदः प्रकृतिस्थश्चेत् ॥ यद्यन्मत्तत्वादिदोषवान्
न भवति । अतो यस्याधिकारः सोऽप्रयच्छन् भ्रूणहत्यामृतावृतौ वाप्नोति ॥ एतच्चोक्तलक्षणस्य वरस्य संभवे वेदितव्यं । यदा
पुनर्दातॄणामभावस्तदा कन्या एव गम्यं मनोहरं उक्तलक्षणं स्वयमेव वरयेत् ॥ ६४॥ सकृत्प्रदीयते कन्या हरं
स्तां चोरदण्डभाक् । सकृदेव कन्या प्रदीयते ॥ इति शास्त्रनियमः । अतस्तां दत्वा अपहरन् कन्यां चौरवद्दण्ड्यः ॥ एवं सर्व
त्र निषेधे प्राप्ते अपवादमाह । दत्तामपि हरेत् पूर्वात् ज्यायांश्चेद्वर आव्रजेत् । यदि पूर्वस्माद्वरात् श्रेयान् विद्याभिजनाद्यतिश
येन युक्तो वर आगच्छति । पूर्वस्य च पातकयोगो दुर्वृत्तत्वं वा तदा दत्तामपि हरेत् । एतच्च सप्तमपदात् प्राक् द्रष्टव्यं ॥ ६५॥ अ
नाख्याय ददद्दोषं दण्ड्य उत्तमसाहसं । अदुष्टां तु त्यजन् दण्ड्यो दूषयंस्तु मृषा शतं ॥ ६६॥ यः पुनः स्वकन्याया दोषम
नाख्याय कन्यां प्रयच्छति । असावुत्तमसाहसं दण्ड्यः । उत्तमसाहसं च वक्ष्यति । अदुष्टां च प्रतिगृह्य त्यजन्नुत्तमसाह
समेव दण्ड्यः । यः पुनर्विवाहात् प्रागेव द्वेषादिना । संप्रति कन्यां दोषैः दीर्घरोगादिभिर्दूषयति । सप्तपणान्तं वक्ष्यमाण

॥ ६ ॥

लक्षणमाचाले दंड्यः॥ अनन्यपूर्वां कामिन्यत्रानन्यपूर्वा परिणेयोक्ता॥ तत्रान्यपूर्वा काकी इत्यत्राह॥ अक्षता चाक्षता चैव पुनर्भूः
संस्कृता पुनः॥ स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत्॥ अन्यपूर्वा द्विविधा पुनर्भूः स्वैरिणी चेति॥ पुनर्भूरपि द्विविधा
क्षता चाक्षता च॥ तत्राक्षता संस्कारात् प्रागेव पुरुषसंबंधदूषिता अक्षता पुनः संस्कारदूषिता॥ या पुनः कौमारं पतिं
त्यक्त्वा कामतः सवर्णमाश्रयति। सा स्वैरिणीति॥ ६७॥ एवं सर्वप्रकारेणान्यपूर्वापर्युदासे प्राप्ते विशेषमाह॥ अपु
त्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया॥ सपिंडो वा सगोत्रो वा घृताभ्यक्त ऋतावियात्॥ ६८॥ आगर्भसंभवाद्गच्छेत् पतितस्त्वन्य
था भवेत्॥ अनेन विधिना जातः क्षेत्रजोस्य भवेत्सुतः॥ ६९॥ दत्तामलब्धपुत्रां पित्रादिभिः पुत्रार्थमनुज्ञातो देवरो भर्तुः
कनीयान् भ्राता सपिंडो वोक्तलक्षणः॥ सगोत्रो वा एतेषां पूर्वस्य पूर्वस्याभावे परः परो घृताभ्यक्तः सर्वांगमृतावेव
वक्ष्यमाणेऽदृष्टार्थं गच्छेत्। आगर्भोत्पत्तेः॥ ऊर्ध्वं पुनर्गच्छन्नन्येन वा प्रकारेण पतितो भवति। अनेन विधिनोत्पन्नः पू
र्वपरिणेतुः क्षेत्रिकस्य पुत्रः क्षेत्रजो भवेत्। एतच्च वाग्दत्ताविषयमित्याचार्यः। यस्या म्रियेत कन्याया वाचा सत्ये कृते
सति। तामनेन विधानेन निजो विंदेत देवर इति मनुस्मरणात्॥ छ॥ व्यभिचारिणीं प्रत्याह॥ हृताधिकारां मलिनां

न५

पिंडमात्रोपजीविनीं। परिभूतामधःशय्यां वासयेद्व्यभिचारिणीं॥ ७०॥ या व्यभिचरति तां हृताधिकारां भृत्यभरणाद्य
धिकाररहितां मलिनां। ~~[struck out]~~ अंजनाद्यंजनभूषणवस्त्राभरणशून्यां प्राणयात्रामात्रोपजीविनीं धिक्कारादिभिः परिभू
तां भूतलशायिनीं स्ववेश्मन्येव वासयेत्। वैराग्यजननार्थं निष्कृत्यर्थं च पत्युरसः परतरं तु तच्चैवांशीरयद्व्रतमितिष
यद्वा प्रायश्चित्तोपदेशात् तु॥ छ॥ अस्या अल्पप्रायश्चित्तार्थमपवादमाह॥ सोमः शौचं ददौ स्त्रीणां गंधर्वो शुभां गि
रं पावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः॥ ७१॥ पारण यनात्सूर्वसोमगंधर्ववन्हयः॥ स्त्रियो भुक्त्वा पथा ऽकर्मता
सा शौचं मधुरवचनं सर्वमेध्यत्वं निजं तवे तु॥ तस्मात् स्त्रियः सर्वत्र स्पर्शनालिंगनादि

॥ ६ ॥

शुभेच्छया: [illegible] दाः स्मृताः ॥ न च तस्यास्त्यजने दोषो नार्यो सवर्णा कनीयसीत्याह ॥ व्यभिचाराद्दतौ शुद्धिर्गर्भे त्यागो विधीयते ॥ ग
र्भभर्तृवधादौ तु तथा महति पातके ॥ ७२ ॥ अर्थकाशिता नामसनो व्यभिचारात्तु पुरुषांतरसंकल्पात् यद्दुष्टं तस्य च ऋ तौ रजो संभोगर
दर्शने शुद्धिः ॥ ऋतुकृते तु गर्भे त्यागः ॥ ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः ॥ अप्रजाता विशुध्यंति प्रायश्चित्तेन
चेतराः ॥ इति स्मरणात् ॥ तथा गर्भवधे भर्तृवधे महापातके च ब्रह्महत्यादौ ॥ आदिग्रहणात् ॥ शिष्यादिगमने च त्यागः ॥
वत्सस्त्वहु परित्याज्याः शिष्यगा गुरुगा च या ॥ पतिघ्नी च विशेषेण जुंगितोपगता च या ॥ इत्यंगिरः स्मरणात् ॥ जुंगितः प्रतिलो
मजः ॥ त्यागश्चोपभोगधर्मकार्ययोर्न तु तस्या निरुध्यादेकवेश्मनीति न्नुपमात् ॥ ६ ॥ द्वितीयपरिणयनहेतूनाह ॥
७ ॥ सुरापी व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियंवदा ॥ स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥ ७३ ॥ सुरां पिबतीति सुरापी शू
द्रापि । पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत् ॥ इति सामान्येन प्रतिषेधात् ॥ व्याधिता दीर्घरोगग्रस्ता ॥ धूर्ता विसंवादिनी ॥
वंध्याऽनिःफला ॥ अर्थघ्नी अर्थनाशनी ॥ अप्रियंवदा निष्ठुरभाषिणी ॥ स्त्रीप्रसूः स्त्रीजननी ॥ पुरुषद्वेषिणी सर्वत्राहित
कारिणी ॥ अधिवेत्तव्येति प्रत्येकं संबध्यते ॥ अधिवेदनं भार्यांतरपरिग्रहः ॥ यारोगिणी तु हिता संपुत्रा शीलसंयुता ॥ सा तु तास्या
धिवेत्तव्या नावमन्येत कर्हिचित् ॥ किंच अधिविन्ना तु भर्तव्या महदेनोन्यथा भवेत् ॥ यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्ध
ते ॥ ७४ ॥ साधिविन्ना पूर्ववदेव दानसत्कारैर्भर्तव्या ॥ अन्यथा अभरणे महदपुण्यं वक्ष्यमाणो दंडश्च स्वैर्वभरणे सति केव
लपुण्यपरिहारः ॥ यतो यत्र दंपत्यो रानुकूल्यं चित्तैक्यं तत्र धर्मार्थकामानां प्रतिदिनमभिवृद्धिः ॥ ७ ॥ स्त्रियं प्रत्याह ॥
मृते जीवति वा पत्यौ या नान्यमुपगच्छति ॥ सेह कीर्तिमवाप्नोति मोदते चोमया सह ॥ ७५ ॥ भर्तरि जीवति मृते वा पापा चा
पल्यादन्यं पुरुषं नोपगच्छति ॥ सेहलोके विपुलां कीर्तिमवाप्नोति उमया च सह क्रीडति पुण्यप्रभावात् ॥ ७ ॥ अधिवेदन
कारणाभावे ऽधिवेत्तारं प्रत्याह ॥ आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीम् ॥ त्यजन्दाप्य स्तृतीयांशमद्रव्यो भ

रूपं स्त्रियाः॥७६॥ गृहकार्यसंपादिनी दक्षा शीघ्रकारिणी वीरसूः पुत्रवती। प्रियवादिनी मधुरभाषिणी यस्त्यजति। अधिविंद
तिसराता स्वधनस्य तृतीयमंशं दाप्यः॥ निर्धनस्तु भरणं ग्रासाच्छादनादि दाप्यः॥७८॥ स्त्रीधर्मानाह।॥७९॥ स्त्रीभिर्भर्तृवचः
कार्यमेष धर्मः परः स्त्रियाः॥ आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः॥७७॥ स्त्रीभिः सदा भर्तृवचनं कार्यं यस्मादयमेव पर
॥१०॥ उत्कृष्टो धर्मः॥ स्त्रीणां स्वर्गादिहेतुत्वात् यदा तु महापातकादिदूषितः स्यात्तदा॥ आशुद्धेः संप्रतीक्ष्यो न त्याज्यः रतत्यागं उत्त
रकालं तु सुरूपं देवतत्या रलंत्र्यं॥८०॥ स्त्रीयदारसंग्रहस्य फलमाह॥८१॥ लोकानंत्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्र
कैः॥ यस्मात्तस्मात् स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः॥७८॥ लोके आनंत्यं वंशस्याविच्छेदो दिवः प्राप्तिश्च। दारसंग्रहस्य प्रयोज
नं कथमित्याह॥ पुत्रपौत्रप्रपौत्रकैः॥ लोकानंत्यं। अग्निहोत्रादिभिश्च स्वर्गप्राप्तिरित्यर्थः॥ यस्मात् स्त्रीभ्य एतद्द्वयं भव ॥१०॥
ति॥ तस्मात् स्त्रियः सेव्या उपभोग्याः प्रजार्थं रक्षितव्याश्च धर्मार्थं॥ तथा चापस्तंबेन॥ धर्मप्रजासंपत्तिप्रयोजनं दारसं
ग्रहस्योक्तं। धर्मप्रजासंपन्ने दारे नान्यां कुर्वीतेति वदता रतिफलं लौकिकमेव। पुत्रोत्पत्त्यर्थं स्त्रियः सेव्या इत्युक्तं
तत्र विशेषमाह॥ षोडशर्तुनिशाः स्त्रीणां तस्मिन् युग्मासु संविशेत्। ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत्॥
स्त्रीणां गर्भधारणयोग्यावस्थोपलक्षितः कालः ऋतुः॥ स च रजोदर्शनदिवसादारभ्य षोडशाहोरात्रः। तस्मिन्नृतौ युग्मासु स
मासु रात्रिषु रात्रिग्रहणेन दिवसप्रतिषेधः संविशेत् गच्छेत्॥ पुत्रार्थं युग्मास्विति बहुवचनं समुच्चयार्थं। अतश्च एकस्मि
न्नृतौ अपि विप्रासु युग्मासु रात्रिषु गच्छेत्॥ एवं गच्छन् ब्रह्मचारी एव भवति। अतो यत्र ब्रह्मचर्यमाद्यादिषु चोदि
तं तत्र गच्छतोऽपि न ब्रह्मचर्यस्खलनदोषोऽस्ति। किंच। पर्वाण्याद्याश्चतस्रश्च वर्जयेत्। पर्वाणीति बहुवचनादाद्यर्थावगमाद श्रा३
ष्टमीचतुर्दश्योर्ग्रहणं॥ यथाह मनुः॥ अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीं॥ ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नात
को द्विजः॥ इति। अतोऽमावास्यादीनि रजोदर्शनादारभ्य चतस्रो रात्रीश्च वर्जयेत्॥ किंच। एवं गच्छन् स्त्रियं क्षामां मघां पौष्णं

अथतेननभवतिः

च वर्जयेत्॥ सुस्थइंदौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान्॥ ८०॥ स एवमुक्तेन प्रकारेण स्त्रियं गच्छन् क्षामां गच्छेत्॥ क्षाम
तां च तस्मिन् काले रजस्वलाव्रतेनैव भवति। तदा कर्त्तव्या क्षामता पुत्रो सत्यर्थमल्पस्निग्धभोजनादिना। पुमान्पुं
सोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः॥ यदा युग्मायामपि रात्रौ शोणिताधिक्यं तदा स्त्र्येव भवति। पुरुषाकृतिः॥ अ
युग्मायामपि शुक्राधिको पुमान् भवति स्त्र्याकृतिः॥ कालस्य निमित्तत्वात् शुक्रशोणितयोश्चोपादानकारणत्वेन प्राबल्या
त् तस्मात् क्षामा कर्त्तव्या। मघां मूलं नक्षत्रं च वर्जयेत्। चंद्रे चैकादशादिशुभस्थानगते। चकारात् पुंनाम्नि नक्षत्रे शुभयोग
लग्नादिसंपत्तौ सकृदेकस्यां रात्रौ न द्वित्रिवा। ततो लक्षण्यं पुत्रं जनयति पुमान् अप्रतिहतपुंसः॥ ८०॥ एवमृतौ
नियममुक्त्वाऽन्यत्र नियममाह॥ यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्। स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः त८
स्मृताः॥ ८१॥ भार्याया इच्छानतिक्रमेण प्रवृत्तिर्यस्यास्तीति यथाकामी भवेत्। वाशब्दो नियमान्तरपरिग्रहार्थश्च
पर्वनियमनिवृत्त्यर्थः॥ स्त्रीणां वरमिंद्रदत्तमनुस्मरन् यथाता अब्रुवन् वरं वृणामहै ऋत्वियात् प्रजां विंदामहे का
ममाविजनितोः संभवामेति तस्मादृत्वियात् स्त्रियः प्रजां विंदंते काममाजनितोः संभवंति॥ वरं वृतं यासामिति। अ
पि च। स्वदारेष्वेव निरतो निरतस्त्वन्यमनस्को भवेदित्यनुपज्यते। एवकारेण स्त्र्यंतरगमनं विवर्जयति। आपस्तंबस्मरणात्॥
उभयत्रापि दृष्टप्रयोजनमाह॥ स्त्रियो रक्ष्या यतः स्मृता इति यस्मात् स्त्रियो रक्ष्याः स्मृताऽतः॥ कर्त्तव्याश्च सुरक्षिता इति॥
तच्च रक्षणं यथाकामित्वेन स्त्र्यंतरागमनेन च संभवतीति। अत्र हि। तस्मिन् युग्मासु संविशेत् इति किमयं विधिः। नियमः
परिसंख्या वा। उच्यते न तावद्विधिः प्राप्तत्वात्॥ नापि परिसंख्या॥ दोषत्रयसमासक्तेः। अतो नियमं प्रतिपादयिष्याय
विदः। कः पुनरेषां भेदः। अत्यंताप्राप्तप्रापणं विधिः। यथाग्निहोत्रं जुहुयात् अष्टकाः कर्त्तव्या इति। पक्षे प्राप्तस्य अप्राप्तपक्षांतर
यथा प्रापणं नियमः। समे यजेतेति दर्शपौर्णमासाभ्यां यजेतेति यागः कर्त्तव्यतया विहितः। स च देशांतरेण कर्तुमशक्य इति अ
र्थाद्देशः प्राप्तः। स च समोऽविषमश्चेति द्विविधः। यदा यजमानः समे देशे यियक्षति तदा समे यजेतेति देवयजनमुद्दास्य। स्वार्थस्य प्रा॥

21

कालात् यदा तु विषमे देशो ऽपि यस्तत्र तदा समे यन्नेन दं स्वार्थं विधत्ते। स्वार्थस्य तदानीमप्राप्तत्वात्। विषमदेशनिवृत्तिः स्वार्थो नोक्ता देशो वेने
र्यनिष्पत्तेरनोदितदेशोपादानेन यथाशास्त्रं यागोनुष्ठितो भवति। तथा प्राङ्मुखो ऽन्नानि भुंजीतेति इदमपि स्मार्तमुदाहर
णं पूर्वेण व्याख्यातं एकस्यानेकत्र प्राप्तस्यान्यतो निवृत्त्यर्थमेकत्र पुनर्वचनं परिसंख्या। तद्यथा। इमामगृ त्रशनामृतस्येत्य
श्वाभिधानीमादत्त इत्यत्र मंत्रः स्व सामर्थ्याद् अश्वाभिधान्या गर्दभाभिधान्याश्च रशनाया ग्रहणे ऽविशेषेणोक्तः पुनर
श्वाभिधानीमादत्त इति वचनेन अश्वाभिधान्या नियुज्यमानो गर्दभाभिधान्या निवर्त्तते। तथा पंचपंचनखा भक्ष्या इति
अत्र हि यदृच्छया श्वादिषु शशादिषु च भक्षणं प्राप्तं पुनः शशादिषु प्रमाणं श्वादिभ्यो विनिवर्त्तत इति। तथा प्राङ्मुखो

॥११॥

ऽन्नानि भुंजीतेति इदमपि स्मार्तमुदाहरणं। पूर्वेणैव व्याख्यातं किंतु न त्रैयुक्तं। परिसंख्या त्वाह। तथापि हि जलदारसंग्रहे स्वयं
येव न तो गमनं प्राप्तं इति न विधेरयं विषयः। नापि नियमस्य गच्छन्स्मृति विरोधात् एवं हि स्मर तिग्यह्यकाराद्दारसंग्रहानंतरं त्रिरा
त्रं द्वादशरात्रं संवत्सरं वा ब्रह्मचारी स्यादिति तच्च द्वादशरात्रात् संवत्सराद्वा पूर्वमेव ऋतौ गच्छेदेवेति नियमात् ब्रह्मचर्यस्मरणं बाध्यते।

॥११॥

अपि च प्राप्ते भावार्थवचनं विशेषणपरं युक्तं प्राप्तं च ऋतौ भार्यागमनमिच्छया एव। ततो यदि गच्छेत् तावद् वति वचनव्यक्तिर्युक्ता। किंच।
नैयमिकात्सुखोत्पत्ति विधेरेव ऋतौ गमनं नस प्राप्त एवमेति ऋतौ गच्छेदेवेति नियमो नर्थकः स्यात्। नियमे वा दृष्टं कल्पनीयं।

रो ५

किं च ऋतौ गंतव्यमेवेति नियमो ऽसंनिहितस्य व्याध्यादिना असमर्थस्य अनिष्ठो ब्रा[illegible] शक्यो र्थ उपदिष्टः स्याद्विध्यनुवादविध
श्च नियमेत थाप्येकः शब्दः सकृदुच्चरितं सामर्थ्यं पक्षे नुवदति पक्षे विधत्ते चेति। तस्मात् तावेव गच्छेन्नान्यत्रेति परिसंख्यैव यु
क्ता। यदि दं प्रोक्तं विशिष्टरूपादयो नानुमन्यते। यतो नियम एव युक्तः पक्षे स्वार्थविधिसंभवात्। अगमने दोषश्रवणात्। ऋतुस्ना
तां तु यो भार्यां संनिधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इति। न च विध्यनु वादविरोधः। अनुवादाभावात्
विध्यर्थत्वाच्च वचनस्य। न च हि विध्यनुवादविरोधोपपत्त्या विधेर्बाधितयात देवा नुवदितव्यम
प्राप्ततयान्यो देशो न विधातव्य इति

ने२ मि२ पि२

यथा वाजपेयाधिकरणे पूर्वपक्षे। वाजपेयेन स्वाराज्यकामो यजेतेति। वाजपेयस्य लक्षणागुणविधानावधित्वेन यागोऽनुवेदितव्यः। स एव स्वा
राज्यलक्षणफलोद्देशेन विधातव्य इति न चानुवादे हेतुः समस्ति॥ यत्तु नियमे दृष्टकल्पना तस्य परिसंख्यायाम समानं॥ अन्ये तोग छ
तो दोषः कल्पमस्यात्॥ यत्तु नैयमिकपुत्रोत्पादनविध्यापक्षे ऋतौ वक्तव्यो नित्यगमनप्राप्तेर्नेनियम इति॥ स एवापन्नैयमिकपुत्रोत्पादन
विधिः स्यान्मतं। एवं गच्छन् स्त्रियं क्षामां लक्षण्यं पुत्रं जनयेदिति॥ स्त्र्यभिगमनातिरिक्तः पुत्रोत्पादनविधिरिति। तत्र गमन करणि
ना५ कायाभाव्यायाएव पुत्रोत्पत्तिकर्मता प्रदर्श्यते॥ एवं गच्छन् स्त्रियं क्षामां लक्षण्यं पुत्रं जनयेदित्यनेन यथाग्निहोत्रं जुहुयात् स्वर्गकाम
इति। न चासंनिहितादेरन्यार्थविधिप्रसंगः। संनिहितत्वा न्यथोत्तरेवोपदेशात्। स तु स्नातां तु यो भार्यां संनिधो नोपगच्छ
ति। यः सदारान्स्तु स्नातान् स्वसुः सन्नोपगच्छतीति च विशेषोपादानात्॥ अनिबन्धनिवृत्तिस्तु नियमविधानादेव न च विशेष
णापूर्व तापक्षे भावार्थविधिसंभवात्। नापि गन्धस्य स्मृतिविरोधः। संवत्सरास्तु सर्वमेव तु दर्शने संविशतो नाब्रह्मचर्यस्खल
न दोषः। यथा श्वादादिषु लस्तात्स्वार्थहानिपरार्थकल्पना प्राप्तबाधलक्षणदोषत्रयवती परिसंख्या न युक्ता। पंच पंचनखा भक्ष्या
इत्य त्र यद्यपि श्वादिषु भक्षणस्य पक्षप्राप्तेर्नियमः। श्वादिषु श्वादिषु च प्राप्तेः परिसंख्येकभयसंभवः। तथापि नियमप
क्षे श्वाद्यभक्षणे दोषप्रसंगः श्वादिभक्षणे चादोषप्रसंगे न्यायाश्रुतस्मृतिविरोधः इति। अत्र परिसंख्यैवाश्रिता एतेन सायंप्रा
तर्द्विजातीनाम शनं श्रुतिचोदितम्। नान्तरा भोजनं कुर्यादिति च पुनरुक्तं स्यात्। परिसंख्यायां। एवं च नि
यमे सत्यृतावलावित्ति वीप्सा लभ्यते॥ न भिन्नार्थता नैमित्तिकप्रयावर्त्तते इति न्यायाद्यथाकामी भवेदित्ययमपि नियम एव अन्य क५
तावपि स्त्रीकामनां पांसत्यां स्त्रियमभिरमयेदेवेति। ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जमिति एतदपि गौतमीयं सूत्रद्वयं नियम
या मपरमेव। ऋतौ उपेयादेव अनृतावपि स्त्रीकामनायां प्रतिषिद्धवर्जमुपेयादेवेत्यलं प्रपंचनप्रसंगेन॥ किंच। भर्तृभ्रातृपितृ
ज्ञातिश्वश्रूश्वशुरदेवरैः। बंधुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः। नैताः प्रकृतिभिः पूर्वोक्ताः साध्व स्त्रियो यथा
शक्त्य लंकारवसनभोजनपुष्पादिभिः संमाननीयाः। यस्मात्ताः पूजिता धर्मार्थकामान् संवर्द्धयंति॥ तथा पुनः समार्ग

नू२

23

तद्गृहव्यापारस्या किंस्वरूपयास्थितव्यमित्याह। संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी॥ कुर्यात् श्वशुरयोः पादवंदनं भर्तृ
तत्परा॥ संयतः स्वस्थाननिवेशितउपस्करो गृहोपकरणवर्गो यया सा तथोक्ता। यथोलूखलमुसलसूर्पादेः कंड
नस्थाने। दृषदुपलयोरविवियोगेन पेषणस्थाने इत्यादि। दक्षा गृहव्यापारकुशला। हृष्टा सदैव प्रहसितानना। व्ययपरा
ङ्मुखी। न व्ययशीला स्यादिति सर्वत्र शेषः। किंच। श्वशुरश्च श्वश्रूश्च श्वशुरौ श्वशुर [illegible] श्वेत्येकशेषः। तयोः पाद वंदनं
च संकुर्यात्। श्वशुरग्रहणं मान्यान्तरोपलक्षणार्थं। भर्तृतत्परा। भर्तृवशवर्तिनी॥ सती शैवी क्रीडेत् कुर्यात्॥ [illegible] भर्तृ
सन्निधा [illegible]। प्रोषिते भर्तरि तया किं कर्तव्यमित्याह। क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं। हास्यं परगृहे यानं त्य
जेत्प्रोषितभर्तृका॥ देशांतरगतभर्तृका क्रीडां कंदुकादिभिः। शरीरसंस्कारमुद्वर्तनादिभिः। समाजो जनसमू
हः। उत्सवो विवाहादिः। तयोर्दर्शनं। हास्यं विजृम्भणं परगृहे परगृहगमनं त्यजेदिति प्रत्येकं संबध्यते॥ किंच।
रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्द्धके। अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित्स्त्रियाः॥ पाणिग्रहणात्प्रा
क्कन्यामकार्यकरणाद्रक्षेत्। [illegible] धे भर्त्ता [illegible] पुत्राश्च तदभावे च। तेषामुक्तानामभावे ज्ञातयो ज्ञातीनामभावे
राजा। पक्षद्वयावसाने तु राजा भर्त्ता प्रभुः स्त्रिया इति वचनात्। अतः क्वचिदपि स्त्रीणां नैव स्वातंत्र्यं। किंच। पितृमातृ
सुतभ्रातृश्वश्रूश्वसुरमातुलैः। हीना न स्याद्विना भर्त्रा गर्हणीयान्यथा भवेत्॥ [illegible] त्रा विना भर्तुः रहिताऽपि त्वा
दिरहिता न स्यात्। यस्मात्तद्रहिता गर्हणीया निंद्या भवेत्। एतच्च ब्रह्मचर्यपक्षे। भर्तरि प्रेते ब्रह्मचर्यमन्वारोहणं चेति।
विष्णुस्मरणात्॥ अन्वारोहणे तु महान् अभ्युदयः। तथा च व्यासः। कपोतिकाख्यानव्याजेन दर्शितवान्। पतिव्रता तु संदी
प्तं प्रविवेश हुताशनं। तत्रस्थं चित्रांगदधरं भर्तारं सान्वपद्यत। ततः स्वर्गं गतः पक्षी भार्यया सह संगतः। कर्मणा पूजितस्तत्र रे
मे च सह भार्यया॥ इति॥ तथा च शं [illegible] खांगिरसौ॥ तिस्रः कोट्योऽर्धकोटी च यानि लोमानि मानुषे। तावत्कालं वसेत्स्वर्गे भर्तारं यानु
गच्छति। इति प्रतिपाद्य तयोरवियोगं दर्शयतः। व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्॥ तद्वदुद्धृत्य सा नारी तेनैव सह मो

स्व५

दते ॥ तत्र सा परन्तप रमा स्त्रवमाना प्सरोगणैः ॥ क्रीडते पतिना सार्द्धं यावदिंद्राश्चतुर्दश ॥ इति ॥ ब्रह्मघ्नो वा सुरापो वा मित्रघ्नो वा
भवेत्पतिः ॥ पुनात्यविधवा नारी तमादाय मृता तु या ॥ हारीतः ॥ मृते भर्त्तरि या नारी समारोहेद्धुताशनं ॥ सारुंधतीसमाचारा स्वर्गे लोके म
हीयते ॥ यावच्चाग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत् ॥ तावन्न मुच्यते सा हि स्त्रीशरीरात्कथंचनेति ॥ हारीतोपि ॥ मातृकं पैतृकं चापि य
त्र चैव प्रदीयते ॥ कुलत्रयं पुनात्येषा भर्त्तारं यानुगच्छतीति ॥ तथा ॥ आर्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा ॥ मृते म्रियेत या पत्यौ सा
स्त्री ज्ञेया पतिव्रता ॥ अयं च सर्वासां स्त्रीणामगर्भिणीनामबालापत्यानामाचांडालं साधारणो धर्मः ॥ भर्त्तारं यानुगच्छतीति अ
विशेषोपादानात् ॥ यानि च ब्राह्मण्यनुगमननिषेधपराणि वाक्यानि मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् ॥ या स्त्री ब्रा
ह्मणजातीया मृतं पतिमनुव्रजेत् ॥ स्वर्गमात्मघातेन नात्मानं न पतिं नयेत् ॥ इत्येवमादीनि तानि पृथक्चित्यधिरोहणविष
याणि ॥ पृथक्चितिं समारुह्य न विप्रा गंतुमर्हतीति ॥ इति विशेषस्मरणात् ॥ अनेन क्षत्रियादिस्त्रीणां पृथक्चित्यामनुज्ञाग
म्यते ॥ यत्तु केश्चिदुक्तं ॥ पुरुषाणामिव स्त्रीणामपि आत्महननस्य प्रतिषिद्धत्वात् ॥ अतिप्रवृद्धस्वर्गलिप्सायाः प्रतिषेधशास्त्र
मतिक्रामंत्या अयमनुगमनोपदेशः श्येनवत् ॥ यथा तीव्रक्रोधाक्रांतस्वांतस्य प्रतिषेधशास्त्रमतिक्रामतः श्येनोपदेश इति ॥
तदयुक्तं ॥ एतावता श्येनकरणिकाया भावनाया भाव्यमेतत् हिंसार्थे विधिसंस्पर्शाभावेन प्रतिषेधस्य सफलत्वद्वारेण श्येन
स्यानर्थकत्वं वर्णयंति ॥ तेषां मते हिंसाया एव स्वर्गार्थतयानुगमनशास्त्रेण विधीयमानत्वात् ॥ प्रतिषेधसंस्पर्शाभावात् ॥ अग्नीषो
मीयवत् ॥ स्पष्टमेवानुगमनस्य श्येनेन वैषम्यं ॥ यन्मतं ॥ हिंसा नाम परमरणानुकूलो व्यापारः ॥ श्येनस्य परमरणानुकूलव्यापा
ररूपत्वात् हिंसैव ॥ कामाधिकारे च करणांशे रागतः प्रवृत्तिसंभवेन विधेरप्रवर्त्तकत्वात् ॥ रागप्रयुक्तहिंसारूपत्वात् ॥
श्येनः प्रतिषिद्धस्वरूपेणैवानर्थ इति ॥ तत्राप्यनुगमनशास्त्रेण मरणस्यैव स्वर्गसाधनतया विधानात् ॥ मरणे यद्यपि रागतः
प्रवृत्तिस्तथापि मरणानुकूले व्यापारे अग्निप्रवेशादाविति कर्त्तव्यतारूपे विहित एव प्रवृत्तिरिति न निषेधस्यावकाशः ॥ वायव्यं श्वेत
मालभेत भूतिकाम इतिवत् तस्मात् ॥ स्पष्टमेवानुगमनस्य श्येनेन वैषम्यं ॥ परंतु तस्मादुहनः पुरायुषः स्वःकामी प्रेयादिति श्रुति

१ सा

णा १

२५

तिविरोधादनुगमनमस्तु क्रमिति। तच्च न स्वः काम्यायुषः प्राङ्नप्रेयादिति स्वर्गफलेहेत्तोन आयुषः प्रागायुर्व्ययो न कर्त्तव्यो मोक्षार्थि
नायस्मादायुषः शेषे सति नित्यनैमित्तिककर्मानुष्ठानक्षपितांतःकरणकलंकस्य श्रवणमनननिदिध्यासनसंपन्नो सत्यामात्मज्ञानेन
नस्यानरतिशयानंदब्रह्मप्राप्तिलक्षणो मोक्षसंभवस्तस्मादनित्यात्यल्पस्वर्गार्थमायुर्व्ययो न कर्त्तव्य इत्यर्थः। अतश्च मोक्षमनिच्छंत्या अ
नित्यात्यल्पसुखरूपस्वर्गार्थिन्या अनुगमनं युक्तं इतरकाम्यानुष्ठानवदिति सर्वमनवद्यं। किंच। पतिप्रियहिते युक्ता स्वाचारा विजितें
द्रिया। इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमां गतिं॥ ८७॥ प्रियं अनवद्यत्वेन मनोनुकूलं आयत्यां च उपस्करं तद्धितं प्रियं च हितं
तस्मिन् युक्ता निरता स्वाचारा शोभन आचारो यस्याः सा तथोक्ता शोभनस्वाचारो दर्शितः शंखेन। नानुक्ता गृहान्निर्गच्छेत्॥ नानुत्त
रीया त्वरितं व्रजेत्॥ न परपुरुषमभिभाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यः। न नाभिं दर्शयेत्। आगुल्फाद्वासः परिदध्यात्। न
स्तनौ विवृतौ कुर्यात्। न हसेदप्रावृतं न भर्त्तारं तद्बंधुं वा द्विष्यात् न गणिकाधूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामायामूलकु
हककारिकादुःशीलादिभिः सहैकत्र तिष्ठेत्। संसर्गेण हि चरित्रं दुष्यतीति। विजितेंद्रिया विजितानि संयमितानि इंद्रियाणि
श्रोत्रादीनि वागादीनि च मनःसहितानि यया। सेहलोके कीर्त्तिं प्रख्यातिं परलोके चोत्तमां गतिं प्राप्नोति। ये चैते सकल एव
स्त्रीधर्मा विवाहादूर्ध्वं वेदितव्याः प्रागुपनयनात्कामचारकामवादकामभक्ष इति स्मरणात्॥ वैवाहिको विधिः स्त्रीणामौप
नायनिकः स्मृतः इति च॥ अनेकभार्यस्याह॥ सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत्। सवर्णासु विधौ धर्म्ये ज्येष्ठ
या न विनेतरा॥ ८८॥ सहवर्णायां सत्यामन्यामसवर्णां नैव धर्मकार्यं कारयेत्॥ सवर्णास्वपि बह्वीषु धर्म्ये विधौ धर्मा
नुष्ठाने ज्येष्ठया विना ज्येष्ठामुल्लंघ्य इतरा मध्यमा कनिष्ठा वा न योक्तव्या॥ ८८॥ प्रमीतपतिकाया विधिमुक्त्वा इदानीं
प्रमीतभार्यस्याह॥ दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः॥ आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन्॥ ८९॥
पूर्वोक्तां वृत्तवतीं आचारवतीं विपन्नां स्त्रियं अग्निहोत्रेण श्रौतेनाग्निना तदभावे स्मार्त्तेन दाहयित्वा पतिर्भर्त्ताऽनु
त्पादितपुत्रो निष्ठयतो वा आश्रमांतरेष्वनधिकृतो वा स्वयं तदानंतरमेव पुनर्दारानग्नींश्च विधिवदाहरेत्। आवस्थ

॥ ५२ ॥

॥ ५२ ॥

यस्त्वाश्रममेव। अनाश्रमी न तिष्ठेत् दिनमेकमपि द्विजः इति दक्षस्मरणात्॥ र तत्राधाने सहाधिकृतायाएव मान्य
स्याः॥ यत्तु। द्वितीयां वै तु यो भार्यां दहेद्वैतानिकाग्निभिः॥ जीवंत्यां प्रथमायां तु सुरापानसमं हि तत्॥ तथा॥ मृतायां तु
द्वितीयायां योग्निहोत्रं समुत्सृजेत्। ब्रह्मघ्नं तं विजानीयात् यश्च कामात्समुत्सृजेत् इति। एवमादि तदाधाने
सहानधिकृताया अग्निदाने वेदितव्यं ते छ॥ इति विवाहप्रकरणं॥ छ॥ ब्राह्मणस्य चतस्रो भार्याः क्षत्रियस्य ति
स्रो वैश्यस्य द्वे शूद्रस्यैका तासु पुत्रा उत्पादयितव्याः॥ इत्युक्तमिदानीं कस्यां कस्मात्कः पुत्रो भवतीति विवे
कुमाह॥ ९०॥ सवर्णेभ्यः सवर्णासु जायंते हि सजातयः॥ अनिंद्येषु विवाहेषु पुत्राः संतानवर्द्धनाः॥ ९१॥ सवर्णेभ्यो ब्राह्म
णादिभ्यः सवर्णासु ब्राह्मण्यादिषु सजातयो मातापित्रोः समानजातीयाः पुत्रा भवंति। विन्नास्वेष विधिः स्मृत
विवाहेषु
इति सर्वशेषत्वेनोपसंहारादूढासु सवर्णास्विति सर्वत्र संबध्यते। विन्नाशब्दस्य संबंधित्वादूढानां वेत्यंशः स
वर्णेभ्य इति लभ्यते। [illegible] सवर्णशब्दः स्पष्टार्थः॥ अतश्चायमर्थः संपन्नः॥ उक्तेन विधिना ऊढायां सवर्णायां
वोढुः सवर्णादुत्पन्नः [illegible] समानजातीयो भवतीति। अतश्च कुंडगोलककानीनसहोढानामसवर्ण
त्वमुक्तं भवतीति। ते च सवर्णेभ्योऽनुलोमप्रतिलोमेभ्यश्च भिद्यमानाः साधारणधर्मै रहिंसादिभि रधिक्रियंते॥ शू
द्राणां तु सधर्माणः सर्वेपध्वंसजाः स्मृताः इति स्मरणात्॥ अपध्वंसजा व्यभिचारजाताः॥ शूद्रधर्मै रपि द्विज
शुश्रूषादिभि रधिक्रियंते। ननु कुंडगोलकयोर्ब्राह्मणत्वेन श्राद्धे प्रतिषेधोऽनुपपन्नः। न्यायविरोधश्च। यो यज्जा
तीयायामुत्पन्नः स तज्जातीय एव। यथा गोर्गवि गोः॥ अश्वाद्वडवायामश्वः॥ तस्माद्ब्राह्मण्यामुत्पन्नो न ब्राह्मण
तद्ब्राह्मणा
इति विरुद्धं। तथा कानीनपुनर्भवादीनां तु ऋष्य सजातीयत्वप्रोक्तस्तनयेषु मया विधिः इति वक्ष्यमाणवचनवि
रोधश्च। नैतत्सारं॥ ब्राह्मणेन ब्राह्मण्यामुत्पन्नो ब्राह्मण इति धर्मस्यानुत्पन्नमानिवत्स्यर्थः॥ श्राद्धे प्रतिषेधः॥ य
थाच संतमप्राप्तस्य पतितस्य श्राद्धे प्रतिषेधः। न च न्यायविरोधः। यत्र प्रत्यक्षगम्या जातिः सर्वे तितत्र तथा॥

यज्जातीयात् ५

क्ष१ क्ष२ क्षेत्रजाः४

ब्राह्मण्या द्विजातिस्तु स्मृति लोपाय यास्मरणं भवति। यथा समानेपि ब्राह्मण्ये कुंडिनो वसिष्ठो त्रिगोतम इति स्मरण लक्ष
पंगोत्रं। तथा मनुष्यत्वे समानेपि ब्राह्मण्यां द्विजातिः स्मरणलक्षणा मातापित्रोः श्वेत देवजातिलक्षणं। न चानवस्था। अना
दित्वात्संसारस्य। शब्दार्थव्यवहारवत्। सजातीयेष्वयं प्रोक्तः इत्येतदनुवाद त्वात्। यथा संभवं व्याख्यास्यते। क्षे
त्रजस्तु मातृ समानजातीयो नियोगस्मरणात्। शिष्टसमाचाराच्च यथा धृतराष्ट्र पांडु विदुराः संतोमात्र समानजाती
याः इत्यलं प्रसंगेन। किं चानिंदितेषु ब्राह्मादिषु पुत्राः संतानवर्द्धनाः। अरोगिण्यादी र्घायुषो धर्मप्रजासंपन्ना भवंति।
सवर्णानुक्तेदानीं अनुलोमानाह॥ विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायाँ अंबष्ठः शूद्रांनिषादो जातः पारसवोपि वा॥ ९१॥ ब्राह्मणात्क्ष
त्रियायां विन्नायां उत्पन्नोजः स्यान्मूर्द्धावसिक्तो नाम पुत्रो भवति। वैश्यकन्यायां विन्नायामंबष्ठो नाम भवति॥ शूद्रायां वि
न्नायां निषादोनाम भवति। निषादोनाम ... घातजीवी प्रतिलोमजः। समाप्त इति पारसवोयं निषादः ... सं ज्ञावि
... कल्प्यः॥ विप्रादिति सर्वत्रानुवर्तते। यत्र ब्राह्मणेन क्षत्रियायामुत्पादितः क्षत्रियस्य एव भवति॥ क्षत्रियेण वैश्यायां वे
... एव। वैश्येन शूद्रायां शूद्र एव इति। सवर्णे स्मरणं। तस्मात्क्षत्रियाद्युत्पन्न धर्म प्राप्त्यर्थं। न पुनर्मूर्द्धावसिक्तादि जातिनिराक
रणार्थं क्षत्रियादि जाति प्राप्त्यर्थं वा। अतश्च मूर्द्धावसिक्तादीनां क्षत्रियादेरुक्ते स्वदंडाजिनोपवीतादि रूपनयनादि कं
कार्यं प्रागुपनयनात् कामचारः इत्यर्व वद्देदितव्यं। वैश्याशूद्रयोस्तु राजन्यान्माहिष्योग्रौ सुतौ मतौ। वैश्यात्तु करणः शू
द्रायां विन्नास्वेष विधिः स्मृतः॥ ९२॥ वैश्यायां शूद्रायां च विन्नायां राजन्यान्माहिष्योग्रौ यथाक्रमं पुत्रौ भवतः॥ वैश्येन शू
द्रायां विन्नायां करणो नाम पुत्रो भवति। एष सवर्णमूर्द्धावसिक्तादि संज्ञाविधिः। विन्नासु ऊढासु स्मृतः ... वेदितव्यः।
... षडनुलोमजाः पुत्रा वेदितव्याः॥ प्रतिलोमानाह। ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेह
... निषादस्माहिष्योग्र करणाः षडनुलोमजाः पुत्रा वेदितव्याः॥ ... ब्राह्मण्यां क्षत्रिय वैश्य शूद्रैरुत्पादिता यथाक्रमं सू
कस्तथा। शूद्राज्जातस्तु चांडालः सर्वधर्मबहिष्कृतः॥ ९३॥

विवाहेषु ५ ॥ ९४॥ द्वि विन्नास्त्रियां

मं१

प३ ॥ ९४॥

स्म॰

तवैदेहिकचंडालाख्याः पुत्रा भवंति। तत्र चंडालः सर्वधर्मबहिष्कृतः। किंच। क्षत्रियामागधं वैश्यात् शूद्रात्क्षत्तारमेव
च। शूद्रादायोगवं वैश्या जनयामास वै सुतं॥९४॥ क्षत्रिययोषित्तु वैश्यान्मागधं नाम पुत्रं जनयति सैव शूद्रात्क्षत्तारं।
वैश्ययोषित्तु शूद्रादायोगवं पुत्रं जनयति। एते सूतवैदेहिकचंडालमागधक्षत्त्रायोगवाः षट् प्रतिलोमजाः। एतेषां
च स्वजनपश्चोशानसे मानवे च द्रष्टव्याः॥९॥ संकीर्णसंकरजात्यंतरमाह॥ माहिष्येण करण्यां तु रथकारः प्रजायते। असत्संतस्तु वि
ज्ञेयाः प्रतिलोमानुलोमजाः॥९५॥ क्षत्रियेण वैश्यायामुत्पादितो माहिष्यो वैश्येन शूद्रायामुत्पादिता करणी तस्यां माहिष्ये
णोत्पादितो रथकारो नाम जात्या भवति। तस्य चोपनयनादि सर्वं कार्यं वचनाद्यथाहुः शंखः। क्षत्रियवैश्यानुलोमानंतरोत्पन्नो
यो रथकारस्तस्य ज्यादा [illegible] नोपनयनसंस्कारक्रिया अश्वप्रतिष्ठारथसूत्रवास्तु [illegible] विद्याध्ययनवृत्तिता [illegible] चेत्येवं
ब्राह्मणक्षत्रियादीनां मूर्धावसिक्तमाहिष्याद्यनुलोमसंकरजात्यंतरस्योपनयनादिप्राप्तिरवगंतव्या। तयोर्द्विजत्वात्॥ एवं
संज्ञास्तु स्मृत्यंतरोक्ता द्रष्टव्याः॥ एतच्च प्रदर्शनमात्रमुक्तं संकीर्णसंकरजातीनामानंत्याद्वक्तुमशक्यत्वात्॥ अत एतावद
च विवक्षितं। असंतः प्रतिलोमजाः संतश्चानुलोमजा ज्ञातव्याः॥ इति। सवर्णेभ्यः सवर्णासु जायंते हि सजातयः इत्यादिना
वर्णापवादकारणमुक्तमिदानीं कारणांतरमाह॥ जात्युत्कर्षो युगे ज्ञेयः सप्तमे पंचमेपि वा। व्यत्यये कर्मणां साम्यं पूर्वव
च्चाधरोत्तरं॥९६॥ जातयो मूर्धावसिक्तादयो यास्तासामुत्कर्षो ब्राह्मणत्वादिप्राप्तिर्जो [illegible] स्यैकर्षो युगे जन्मनि सप्त
मे पंचमे अपिशब्दात् षष्ठे वा बोद्धव्यो व्यवस्थितश्चायं विकल्पः॥ व्यवस्था च। ब्राह्मणेन शूद्रायामुत्पादिता निषादी
सा ब्राह्मणेनोढा दुहितरं काचिज्जनयति। सापि ब्राह्मणेनान्यां इत्यनेन प्रकारेण षष्ठी सप्तमं ब्राह्मणं जनयति। ब्रा
ह्मणेन वैश्यायामुत्पादिता अंबष्ठी सापि अनेन प्रकारेण पंचमी षष्ठं ब्राह्मणं जनयति। मूर्धावसिक्ता अप्यनेन प्रकारे
ण चतुर्थी पंचमं ब्राह्मणं जनयति। एवमुग्राक्षत्रियोढा माहिष्या च यथाक्रमं षष्ठपंचमं क्षत्रियं जनयति। तथा कर
णी वैश्योढा पंचमं वैश्यमित्येवमन्यत्राप्यूहनीयं। किंच कर्मणां व्यत्यये च सवर्णानां कर्मणां व्यत्यये विपर्यासे यथा ब्राह्मणो

29

मुख्यवृत्त्याऽजीवन्क्षात्रेण कर्मणाजीवेदित्यनुकल्पस्तेनाप्यजीवन् वैश्यवृत्त्यातयाप्यजीवन्शूद्रावृत्त्या क्षत्रियोपि स्वकर्मणाजी
वतार्थे नाजीवन् वैश्यवृत्त्या शूद्रवृत्त्या वा वैश्योपि स्वव‍ृत्त्याऽजीवन् शूद्रवैश्यैर्लिकर्मणां व्युत्पत्तस्ते स्वेरव्यत्यये सति यथा प्र
मो क्षेपितां वृत्तिं नपरित्यजति। यदा सप्तमे षष्ठे पंचमे वा जन्मनि साम्यं। पश्चैं नवर्णस्य कर्मणाजीवति तत्समानो भवति। तथा
था ब्राह्मणः शूद्रवृत्त्याजीवन् तामपरित्यजन् पादपुत्रमुत्पादयति। सोपि तथैव वृत्त्याजीवन् पुत्रांतरमित्येवं परंपरया सप्तमे जन्म
नि शूद्रं जनयति। इति। वैश्यवृत्त्या [illegible] जीवन् षष्ठे वैश्यं क्षत्रवृत्त्याजीवन् पंचमे क्षत्रियं। क्षत्रियोपि शूद्रवृत्त्याजीवन् षष्ठे शू
द्रं वैश्यवृत्त्याजीवन् पंचमे वैश्यं। वैश्योपि शूद्रवृत्त्याजीवन् तामपरित्यजन्। पुत्रपरंपरया पंचमे [illegible] जन्मनि शूद्रं जनय
तीति। पूर्वं वच्चाधरोत्तरं। अस्यार्थः। वर्णसंकरेतु अनुलोमजाः प्रतिलोमजाश्च दर्शिताः [illegible]। संकीर्णसंकरजाता प्रदर्श्य
कारनिदर्शनेन दर्शिताः। इदानीं वर्णसंकीर्णसंकरजाताः प्रदर्श्यंते। अधरेचोत्तरे च अधरोत्तरं। यथा मूर्धावसि
क्ताः क्षत्रियवैश्यशूद्रैरुत्पादिताः। तथाऽंबष्ठायां वैश्यशूद्राभ्यां नि[illegible]षाद्यां शूद्रेणोत्पादिता अधराः प्रतिलोमजाः।
तथा मूर्धावसिक्तांबष्ठानिषादीषु ब्राह्मणोत्पादितामाहिष्योग्रयोर्ब्राह्मणेन क्षत्रियेण चोत्पादिताः करणां ब्राह्मणेन
नक्षत्रियेण वैश्येन चोत्पादिता उत्तरे अनुलोमजाः एवमन्यत्राप्यूहनीयं। एतदधरोत्तरं पूर्ववदसत्सदिति बोद्धव्यं।
इति वर्णजातिविवेकप्र०। श्रौतस्मार्तानि कर्माणि अग्निसाध्यानि दर्शयिष्यन् कस्मिन्नग्नौ किं कर्तव्यमित्याह। क
र्मस्मार्तं विवाहाग्नौ कुर्वीत गृह्यं गृही। दायकालाहृते वापि श्रौतं वैतानिकाग्निषु। १। स्मार्तं कर्म वैश्वदेवादि कं
कर्म लौकिकं च कर्म यानि तेषु दिनं पाकलक्षणं [illegible] तदपि गृहस्थो विवाहाग्नौ विवाहसंस्थले कुर्वीत। गृहस्थ का
लाहृते वा। वैवपकुल्या दग्निमानीय साग्निको कृतसंस्कारसंस्थले अपि शब्दाच्चेते वाग्नेह पतावाहृते संस्थले एव।
तत श्रौतकाल त्रयपाति कर्मे प्रायश्चित्तीयतेऽग्निहोत्रादिकं कर्म वैतानिकाग्निषु आहवनीयादिषु कुर्वीते ति। ४।

गृहस्थधर्मानाह॥ शरीरचिंतां निर्वर्त्य कृतशौचविधिर्द्विजः॥ प्रातःसंध्यामुपासीत दंतधावनपूर्व
कं॥९८॥ शरीरचिंतामावश्यकादिकां दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुख उक्तविधिना निर्वर्त्य
गंधलेपक्षयकरमित्यादिनोक्तेन विधिना कृतशौचविधिर्द्विजः॥ दंतधावनपूर्वकं प्रातःसंध्या
मुपासीत। दंतधावनविधिश्च। कंटकिक्षीरवृक्षोत्थं द्वादशांगुलसंमितं॥ कनिष्ठिकाग्रवत्स्थूलं पर्वा
र्द्धकृतकूर्चकं॥ दंतधावनमुद्दिष्टं जिह्वोल्लेखनिका तथेति॥ अत्र वृक्षो वनिस्यनेन तत्फलोष्ठीगुल्मादि

पलाशाद

निषेधः॥ श्लेष्मात्यादिनिषेधश्च स्मृत्यंतरोक्तो द्रष्टव्यः॥ दंतधावनमंत्रश्च॥ आयुर्बलं यशो वर्चः
प्रजां पशून्वसूनि च॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते इति॥ ब्रह्मचारिप्रकरणोक्तस्यापि संध्यावंदनस्य पुन
र्वचनं दंतधावनपूर्वत्वप्रतिपादनार्थं। दंतधावनं त्वगीतादि ब्रह्मचारी वर्जयेदिति तन्निषेधात्॥ हुत्वाग्नीन्सूर्यदै
वत्यान्जपेन्मंत्रान्समाहितः॥ वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च॥९९॥ प्रातःसंध्यावंदनानंतरं
अग्नीनाहवनीयादीन् यथोक्तेन विधिना हुत्वा औपासनाग्निं वा तदनंतरं सूर्यदेवत्यान् उदुत्यं जातवेदसमित्या
दीन्मंत्रान्जपेत्॥ समाहितोऽविक्षिप्तचित्तः सदनंतरं वेदार्थान्निरुक्तव्याकरणादिश्रवणेनाधिगच्छेत् ज्ञा
नीयात्॥ चकारादधीतं चाभ्यस्येत्। विविधानि च शास्त्राणि मीमांसाप्रभृतीनि धर्मार्थयोग्यप्रतिपादका
न्यधिगच्छेत्॥ उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये। स्नात्वा देवान्पितॄंश्चैव तर्पयेदर्चयेत्तथा॥१००॥ त

म ३

दनंतरमीश्वरं माभिषेकादिगुणयुक्तमन्यं च श्रीमंतं कुलिनं योगक्षेमार्थं॥ अलब्धलाभो योगो लब्धस्य
परिपालनं क्षेमः॥ तदर्थमुपेयात् उपासीत॥ उपेयादिति अनेन सेवाप्रतिषेधपरा॥ वेतनग्रहणेन आज्ञा
करणं सेवा। तस्याः श्ववृत्तित्वेन निषेधात्॥ ततो मध्याह्ने शास्त्रोक्तेन विधिना नद्यादिषु स्नात्वा देवान् स्कन्दाद्युक्तान्

31

पितॄन्स्वकाराद्दर्षींश्च देवान्दितीर्थे न तर्पयेत्॥ तदनंतरं गंधकुसुमाक्षतैर्हरिहरहिरण्यगर्भप्रभृतीनामन्यतमं यथा
वासं नम्रग्यजुःसाममंत्रैस्तत्प्रकाशनैः स्वनामभिर्वा चतुर्थ्यंतैर्नमस्कारयुक्तैराराधयेत्॥ यथोक्तेन विधिना॥ वेदा
थर्वपुराणानि सेतिहासानि शक्तितः॥ जपयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्॥१०१॥ तदनंतरं वेदाथर्वपु
राणेतिहासादीनि समस्तानि व्यस्तानि वा आध्यात्मिकीं च विद्यां जपयज्ञसिद्ध्यर्थं यथोक्तेन विधिना यथाशक्ति ज
पेत्॥ बलिकर्म स्वधा होम स्वाध्यायातिथिसत्क्रिया॥ भूतपित्रमरब्रह्ममनुष्याणां महामखाः॥१०२॥ बलिकर्म भूत
यज्ञः॥ स्वधा पितृयज्ञः॥ होमो देवयज्ञः स्वाध्यायो ब्रह्मयज्ञः॥ अतिथिसत्क्रिया मनुष्ययज्ञः॥ एते पंच यज्ञा अहरहः कर्त्त
व्या नित्यत्वात्॥ यत्पुनरेषां फलश्रवणं तदेषां पावनत्वज्ञापनार्थं न काम्यत्वप्रतिपादनाय॥ देवेभ्यश्च हुतादन्नाच्छेषं भू
तबलिं हरेत्॥ अन्नं भूमौ श्वचंडालवायसेभ्यश्च निक्षिपेत्॥१०३॥ स्वगृह्योक्तविधिना वैश्वदेवहोमं कृत्वा तदव
शिष्टेनान्येन भूतेभ्यो बलिं हरेत्॥ अन्नग्रहणमपक्वव्युदासार्थं॥ तदनंतरं यथाशक्ति भूमावन्नं श्वचंडालवायसेभ्यो
निक्षिपेत्॥ चराद्वालमिपापरोगिपतितेभ्यः॥ यथाह मनुः॥ शुनां च श्वपचां पापरोगिणां च शनकैर्निक्षिपेद्भुवि॥
एतच्च सायंप्रातः कर्तव्यं॥ अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्याश्वलायनस्मरणात्॥ इह केचिद्वैश्वदेवा
ख्यस्य कर्मणः पुरुषार्थत्वमन्नसंस्कारकत्वं चेच्छंति॥ अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्यन्नसं
स्कारकर्मता प्रतीयते॥ अथातः पंचमहायज्ञानित्युपक्रम्य तानेतानहरहः कुर्वीतेति नित्यत्वावगमात्॥ पुरु
षार्थत्वं चावगम्यत इति॥ तदयुक्तं॥ पुरुषार्थत्वे संस्कारकर्मत्वानुपपत्तेः॥ तथाहि द्रव्यसंस्कारकत्वपक्षेऽन्नार्थ
त्वं वैश्वदेवकर्मणः पुरुषार्थत्वे वैश्वदेवकर्मार्थता द्रव्यस्येति परस्परविरोधात्॥ पुरुषार्थत्वमेव युक्तं॥ महायज्ञे

पतितानां च — वायसानां कृमीणां

प३ ॥१६३॥ व७ — प४ ॥१६३॥ श्व५

श्रै॰१

श्रयैश्च ब्राह्मीयुं क्रियतेतनु:॥ तथा। वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत्॥ तस्याप्यन्नं यथाशक्ति
प्रदद्यान्न बलिं हरेदिति मनुस्मरणात्॥ उरुषार्थत्वे वैश्वदेवाख्यकर्मणः प्रतिपाकमावर्तनीयं॥ तस्मादथ सायंप्रा
तरित्यादिनोपूर्तिप्रयोगो दर्शितो॥ तानेतान्यथाकालमहरहः कुर्वीतेत्यधिकारविधिरिति सर्वमेवद्यं॥
अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलं॥ स्वाध्यायं चान्वहं कुर्यान्न पचेदन्नमात्मने॥१०४॥ अन्यहमन्नं पितृभ्यो म
नुष्येभ्यश्च यथाशक्ति देयमन्नाभावे कंदमूलफलादि तस्याप्यभावे जलं॥ देयम पित्राब्दात्। स्वाध्यायं सततं कुर्यादवि
स्मरणार्थं न पचेदन्नमात्मार्थं॥ अन्नग्रहणं सक्तलादनीयद्रव्यप्रदर्शनार्थं कथं तर्हि। देवतोद्देशेनैव॥ बालसुवासिनी
वृद्धगर्भिण्यातुरकन्यकाः॥ संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभोजनं॥१०५॥ परिणीतापि पितृगृहे स्थिता सुवासि
नी शेषाः प्रसिद्धाः॥ बालादीनतिथिभृत्यांश्च संभोज्य भोजयित्वा दंपत्योः शेषभोजनं कर्तव्यं।
अपोशानेनोपरिष्टादधस्तादश्नतो तथा। अनग्नममृतं चैव कार्यमन्नं द्विजन्म
ना॥१०६॥ उपरिष्टादधस्ताच्च अपोशानाख्येन कर्मणा। अनग्नमनग्नममृतं च कार्यं द्विजन्मग्रहणं उपनयनप्रभृति।
सर्वाश्रमिसाधारणार्थं॥ अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः॥ अप्रणोद्यो ऽतिथिः सायमपि वा भूतृणोदकैः॥ वै
श्वदेवानंतरं वर्णानां ब्राह्मणादीनां अतिथित्वेन युगपत् प्राप्तानां ब्राह्मणानुपूर्व्येण यथाशक्ति देयं। सायंकालेपि
यद्यतिथिरागच्छति॥ तदासौ अप्रणोद्यः॥ अप्रत्याख्येय एव। यद्य प्यदनीयं किमपि नास्ति। तथापि भूतृणोदकैरपि
सत्कारं कुर्यात्॥ तथा च मनुः॥ तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता। चैतान्यपि सतां गेहे नोच्छिद्यंते कदाचनेति॥
सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय च। भोजयेच्चागतान्काले सखिसंबंधिबांधवान्॥१०८॥ भिक्षवे सामान्येन
भिक्षातव्या॥ सुव्रताय ब्रह्मचारिणे यतये च सत्कृत्य स्वस्तिवाच्य भिक्षादानमपपूर्वमित्यनेन विधिना भिक्षादा

दा॰१

२८ न२

तु०

तव्या॥ [illegible] भिक्षा च ग्राससंमिता। ग्राससमा ग्रासभवेद्भिक्षा पुष्कलं तच्चतुर्गुणं। हंतिं तैश्चतुर्भिः स्याद्यंतत्त्रिगुणं भवेत्। इति शातातपस्मरणात्। भोजनकाले चागतान् सखिसंबंधिबांधवान् भोजयेत्। सखा मित्रं। संबंधिनो येभ्यः कन्या दत्ता गृहीता वा। मातृपितृसं[illegible]बांधवाः॥ महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्॥ सत्क्रियान्वासनं स्वादु भोजनं सूनृतं वचः॥१०९॥ महांतमुक्षाणं धौरेयं महाजं वा श्रोत्रियायोक्तलक्षणायोपकल्पयेद्वदेदयं भवदर्थमस्माभिः परिकल्पित इति तत्प्रीत्यर्थं न पुनर्दानाय व्यापादनाय वा। यथा सर्वमेतद्भवदीयमिति। प्रति श्रोत्रियमुक्षासंभवात्। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्विति निषेधाच्च। तस्मात्सत्क्रियाद्येव कर्तव्यं॥ सत्क्रिया स्वागतवचनासनपाद्यार्घ्याचमनादिदानं। तस्मिन्नुपविष्टे पश्चादुपवेशनमन्वासनं। स्वादुभोजनं मिष्टमन्नं। सूनृतं वचः धन्या वयं मघवदागमनादित्येवमादि। च श्रोत्रिये पुनः। अश्रोत्रियस्य आसनोदके इति गौतमोक्तं वेदितव्यं॥ ॥१७॥ प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः॥ प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः॥११०॥ स्नातकः विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकश्च। आचार्य उक्तलक्षणः। पार्थिवो वक्ष्यमाणलक्षणः। प्रियो मित्रं। विवाह्यो जामाता। चकाराच्छ्वशुरपितृव्यमातुलादीनां ग्रहणं॥ ऋत्विजो वृत्वा मधुपर्कमाहरेत् स्नातकायोपस्थिताय राज्ञे वाचार्यश्वशुरपितृव्यमातुलादीनां चेत्याश्वलायनस्मरणात्। एते स्नातकादयः प्रतिसंवत्सरं गृहमागता अर्घ्याः मधुपर्केण संपूज्याः॥ अर्घशब्दो मधुपर्कं लक्षयति। ऋत्विजस्तु लक्षणाः संवत्सरादर्वागपि प्रतियज्ञं मधुपर्केण संपूज्याः॥ अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः। मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः॥१११॥ अध्वनि वर्तमानोऽतिथिरिति वेदितव्यः॥ श्रोत्रियो वेदपारगश्चाध्वनि वर्तमानो ब्रह्मलोकमभीप्सतो गृहस्थस्य मान्यावतिथी वेदितव्यौ॥ यद्यपि अध्ययनमात्रेण श्रोत्रियस्तथापि स्मृ[illegible] नाध्ययनसंपन्नोऽत्र श्रोत्रियोऽभिधीयते। एकशाखाध्ययनक्षमो वेदपा

॥१७॥

34

चि१ ना१४

स्ग॥ परपाकरुचिर्न स्यादनिंद्यामंत्रणादृते॥ वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनं। परपाके रुचिर्न स्यात्सीत
भोक्तुः॥ नैव परपाकरुचिर्न स्यादनिंद्यामंत्रणं विना। अनिंद्ये रामरक्षितो नापक्रामेदति स्मरणात्॥ वाक्पाणिपा
दचापल्यं॥ वाक् पाणी च पादौ च वाक्पाणिपादं तस्य चापल्यं वर्जयेत्॥ वाक्चापल्यमसभ्यान्नलादिभाषणं। पाणि
चापल्यं चेलनास्फोटनादि। पादचापल्यं लंघनोल्लवगूदचकारान्नेश्रादि चापल्यं वर्जयेत्॥ नचैव श्रोदरपाणिपादचक्षु
र्वाक्चापल्यानि कुर्यादिति गोतमस्मरणात्॥ अतिभोजनं च वर्जयेदनारोग्यहेतुत्वात्॥ अतिथिं श्रोत्रियं तृप्तमा — मः५
सीमांतादनुव्रजेत्॥ अहः शेषं समासीत शिष्टैरिष्टैश्च बंधुभिः॥ ७३॥ पूर्वोक्तं श्रोत्रियमतिथिं वेदपारगमतिथिं च भो
जनादिना तृप्तं सीमांतं यावदनुव्रजेत्॥ ततो भोजनानंतरमहः शेषं शिष्टैरिष्टैर्हास्यपुराणादिवेदिभि
रिष्टैः काव्यकथाप्रपंचचतुरैर्बंधुभिश्च अनुकूलालापकुशलैः सहासीत॥ उपास्य पश्चिमां संध्यां हुत्वाग्नींस्तानुपास्य च। भृ — ला१८
त्यैः परिवृतो भुक्त्वा नातितृप्त्याथ संविशेत्॥ ७४॥ ततः पूर्वोक्तेन विधिना पश्चिमां संध्यामुपास्य अग्निमग्नीन्वा हुत्वा ता — नू
नुपास्योपस्थाय भृत्यैः स्ववासिन्यादिभिः परिवृतो नातितृप्त्या भुक्त्वा चकारादायव्ययादिगृहचिंतां निर्वर्त्यानंतरं संविशे — एवीकैः७
त्स्वप्यात्॥ ७४॥ ब्राह्मे मुहूर्ते उत्थाय चिंतयेदात्मनो हितं। धर्मार्थमोक्षान्स्वे स्वे काले यथाशक्ति न हापयेत्॥ ७५॥ ततो ब्राह्मे मु
हूर्ते पश्चिमे प्रहरे प्रबुद्ध आत्मनो हितं करिष्यमाणवेदार्थसंग्रहयांश्च चिंतयेत्। तदानीं चित्तस्याव्याकुलत्वेन तत्संप्रति
भासयोग्यत्वात्। ततो धर्मार्थकामान्स्वोचिते काले यथाशक्ति न हापयेत्॥ यथासंभवं सेवेतेत्यर्थः॥ ७५॥ पुरुषार्थैर्यथा ह्मो — वं४ ला१४
लमः॥ न पूर्वाह्नमध्यंदिनापराह्नानफलान्कुर्यात्॥ धर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्यादिति॥ अत्र यथेष्टं तेषां सामान्ये
न सेवनमुक्तं॥ तथापि कामार्थयोर्धर्माविरोधेनानुष्ठानं॥ तयोर्धर्ममूलत्वादेवं प्रतिदिनमनुष्ठेयं॥ विद्याकर्मवयोबंधु
वित्तैर्मान्या यथाक्रमं॥ एतैः प्रभूतैः शूद्रोऽपि वृद्धके मानमर्हति॥ ७६॥ विद्यापूर्वोक्ता कर्म श्रौतं स्मार्तं च। वय आत्मनोऽति

वा१ नपरित्यजेत् ४

35

वरोविवाहोद्यतः ५

रिक्तं सप्तस्या उर्ध्वं वा बंधुबहुस्वजनसंपत्तिः वित्तं ग्रामस्वादिकं । एतैर्युक्ताः क्रमेण मान्याः पूजनीयाः एते बंधु कर्मवित्तैः प्रभूतैः प्रव ऽहेः सम स्तैर्वा स्तेवी युक्तः शूद्रोपि वार्द्धके शीतेरू ईमानमर्हति । शूद्रे षष्ठी तिका वरइति ॥ गौतमस्मरणात् ॥ १७ ॥ वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणां ॥ पंथादेयो नृपस्तेषां मान्यस्नातश्च भूपतेः ॥ वे दः प्रसिद्धः ॥ भारी भाराक्रांतः । नृपो भूपतिः ॥ नक्षत्रियमात्रं । स्नातको विद्याव्रतोस्नातकः । स्त्री प्रसिद्धा ॥ रोगी व्याधितः ॥ चक्री शाकटिकः । चकारात् मत्तोन्मत्तादीनां ग्रहणं । बालवृद्धमत्तोपहतदेह भाराक्रांतस्त्रीस्नातकप्रव जितेभ्य इति शंखस्मरणात् । एतेभ्यः पंथादेय एतेषां मिथः स्वायातेषु स्वयं पथोपक्रमेत । वृद्धा दीनां राज्ञा सहपाथ समवायेराजामान्य इति तस्मै पंथा देयोनृपतेरपि स्नातको मान्य ॥ स्नातक ग्रहणं स्नातकमात्रप्राप्त्यर्थं न ब्राह्मणानि प्रायेण तस्य सदैव गुरुत्वात् ॥ यथाह शंखः ॥ अथ ब्राह्मणयात्रे पंथा राजस्वे केतत्ब्राह्मण गुरुज्येष्ठ ब्राह्मणोऽत्र राजानमपि विशेते । तस्मै पंथा इति वृद्धादीनां पथिपरस्परसमवाये वृद्धतराद्यपेक्ष या विधादिगुणवो विज्ञेयो द्रष्टव्यः ॥ १८ ॥ इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च । प्रतिग्रहोधिको विप्रे याजनाध्यापने तथा । वैश्यस्य क्षत्रियस्य चकाराद् ब्राह्मणस्य द्विजानुलोमानां च यागाध्ययनदानानि साधारणानि कर्माणि । ब्राह्मणस्याधिकानि प्रतिग्रहयाजनाध्यापनानि । तथैतिस्मृत्यंतरे अध्यापनं प्रतिग्रहो याजनं गौतमः ॥ कृषिवाणिज्ये वा स्वयं कृते कुसीदं चेति । अध्यापनं तु क्षत्रियवैश्ययोर्ब्राह्मणाभावे तयोर्भवति । तत्स्वेच्छया । आपत्काले ब्राह्मणस्याब्राह्मणाद्विद्योपयोगे अनुगमनं । शुश्रूषा चैमाप्ते वर्ते समाप्ते ब्राह्मणो गुरुरिति । गौतमस्मरणात् ॥ एतान्यनापदि ब्राह्मणस्य षट्कर्माणि त्रीण्यादीनि धर्मार्थानि लुकर्मणामस्य त्रीणि कर्माणि जीविका ॥ याजनाध्यापने वैश्व विशुद्धात्प्रतिग्रहः इति

प्रतिग्रहादीनि वृत्त्यर्थानि षण्णां १

व १

स्मरणात्॥ अत इत्यादीन्यवश्यकर्तव्यानि न प्रतिग्रहादीनि द्विजातीनां अध्ययनमित्यादीनां आत्मज्ञानस्याधि
क्यः प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियम इति गौतमस्मरणात्॥ प्रधानं क्षत्रियस्य कर्म प्रजानां परिपाल
नं कुसीदकृषिवाणिज्यपाशुपाल्यं विशः स्मृतं॥११९॥ क्षत्रियस्य प्रधानं कर्म प्रजापालनं धर्मार्थं स्वधर्मश्च॥ वैश्य
स्य कुसीदकृषिवाणिज्यपशुपालनानि वृत्त्यर्थानि कर्माणि कुसीदं वृद्ध्यर्थं द्रव्यप्रयोगः॥ लाभार्थं क्रयविक्रयौ वाणि
ज्यं शेषं प्रसिद्धं॥ शस्त्रभृत्त्वं क्षत्रियस्य वाणिज्यं पशु कृषी विशः॥ आजीवनार्थं धर्मस्तु दानमध्ययनं यजिरिति मनु
स्मरणात्॥ शूद्रस्य द्विजशुश्रूषा तयाजीवन् वणिग्भवेत्। शिल्पैर्वा विविधैर्जीवेत् द्विजातिहितमाचरन्॥
१२०॥ शूद्रस्य द्विजशुश्रूषा प्रधानं कर्म धर्मार्थं च। तत्र ब्राह्मणशुश्रूषा परमो धर्मः॥ विप्रसेवैव शूद्रस्य विशि
ष्टं कर्म कीर्त्यते॥ इति मनुस्मरणात्॥ यदा पुनर्द्विजशुश्रूषया जीवितुं न शक्नोति तदा वाणिज्येन जीवेत्॥
नानाविधैर्वा शिल्पैर्द्विजातीनां हितं कुर्वन् याहन्नैः कर्मभिर्द्विजातिशुश्रूषायामयोग्यो न भवति। तादृशानि
कुर्वन्नित्यर्थः॥ तानि च देवलेनोक्तानि। शूद्रधर्मो द्विजातिशुश्रूषा पापवर्जनं कलत्रादिपोषणं पशुपालनं
भारोद्वहनं पण्यव्यवहारश्चित्रकर्म नृत्यगीतवेणुवीणामुरजमृदङ्गवादनानीति॥१२१॥ किं च। भार्यारतिः शुचि
र्भृत्यभर्ता श्राद्धक्रियारतः॥ नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत्॥१२१॥ भार्यायामेव साधारणस्त्रीषु पर
स्त्रीषु वा रतिः रमिगमनं यस्य स तथोक्तः। शुचिर्बाह्याभ्यन्तरशौचयुक्तः। द्विजवच्छूद्रोऽपि तत्र श्राद्धक्रिया रतः
श्राद्धानि नित्यनैमित्तिककाम्यानि। क्रियाः स्मार्तकृत्यान्यविरुद्धानि तेषु रतः। नम इत्यनेन मन्त्रेण पञ्चयज्ञान् पञ्चय
ज्ञान्न हापयेत्। अनुतिष्ठेत्। नमस्कारमन्त्रं केचिद्देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वाहा स्व
धायेन स्यमेव नमोनम इति। वर्णयन्ति। नमस्यते नेन वैश्वदेवं लौकिकेऽग्नौ कर्तव्यं वैवाहिकेऽग्नौ इत्याचार्याः॥१२१॥

पा४ य५ वसर्थं७ णंकर्म७ न५ ति

॥५१॥ ६६

वृत्तर्थे ८ ह७

स्तानां साधारणधर्मानाह ॥ ७ ॥ अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः ॥ दानं दमो दया क्षांतिः सर्वेषां धर्मसा
धनं ॥ २१ ॥ हिंसा प्राणिपीडा तस्या अकरणं अहिंसा ॥ सत्यं अप्राणिपीडाकरं यथार्थवचनं । अस्तेयं । अदत्ता
नुपादानं ॥ शौचं बाह्यमाभ्यंतरं च । बुद्धिकर्मेंद्रियाणां नियतविषयव्यावर्तनं इंद्रियनिग्रहः ॥ यथाशक्ति प्राणि
नामन्नोदकादिदानेन आर्त्यपहरणं दानं । अंतःकरणसंयमो दमः ॥ आपन्नरक्षणं दया ॥ अपकारे कृते
न स्याद्विकारः क्षांतिः ॥ एते सर्वेषामेव पुरुषाणां धर्मसाधनं ॥ वयोबुध्यर्थवाग्वेषश्रुताभिजनकर्म
णां । आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा ॥ २२ ॥ वयो बाल्ययौवनादि । बुद्धिर्नैसर्गिकी लौकिक
वैदिकव्यवहारेषु ज्ञानं ॥ अर्थो वित्तं गृहक्षेत्रादिः । वाग्वचनं ॥ वेषो वस्त्रमाल्यादिविन्यासः ॥ श्रुतं पुरुषा
र्थशास्त्रश्रवणं । अभिजनं कुलं । कर्म प्रतिग्रहादि । एतेषां वयःप्रभृतीनां सदृशीमुचितां वृत्तिमाचरेत् स्वी
कुर्यात् ॥ यथा वृद्धः । स्वोचितां एवं बुध्यादिष्वपि योज्यं । अजिह्मामवक्रां । अशठाममत्सरां ॥ एवं स्मार्त्तानि क ॥५१॥
र्माण्यनुक्रम्येदानीं श्रौतानि कर्माण्यनुक्रामति । त्रैवार्षिकाधिकान्नो यः स सोमं हि पिबेद्द्विजः । प्राक्सौमिकीः
क्रियाः कुर्याद्यस्यान्नं वार्षिकं भवेत् ॥ २३ ॥ त्रिवर्षजीवनपर्याप्तं त्रैवार्षिकं । अधिकं वा अन्नं यस्य स एव सो
मयागं कुर्यात् ॥ नातोल्पधनः । अत अल्पीयसि द्रव्ये सोमं पिबति यो द्विजः । स पीतसोमपूर्वोपि न तस्याप्नो पी
ति तत्फलमिति दोषश्रवणात् ॥ एतच्च काम्याभिप्रायेण नित्यस्य त्ववश्यकर्तव्यत्वान्न नियमः । यस्य वर्षं जीव
नपर्याप्तं अन्नं भवति । स प्राक्सौमिकीः सोमात् प्राक् प्राक्सोमं प्राक्सोमं भवाः प्राक्सौमिक्यः । काः ताः ।
अग्निहोत्रदर्शपौर्णमासपशुचातुर्मास्यानि काम्यानि तद्धि कोराक्षताः क्रियाः कुर्यात् ॥ एवं काम्यानि श्रौता

नयोचनोचितां ७

38

निकर्माण्यभिधायेदानीं नित्यान्याह। प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा। कर्त्तव्याग्रयणेष्टिश्च चातुर्मास्या
नि चैव हि। संवत्सरे संवत्सरे सोमयागः कर्त्तव्यः। पशुः प्रत्ययनं। अयने अयने दक्षिणोत्तरसंक्रान्तौ निरूढः
पशुयागः कर्त्तव्यः। तथा प्रतिसंवत्सरं वा पशुना संवत्सरे संवत्सरे यजेत षट्सु षट्सु वा मासेष्वित्येके इति श्रवणा
त्। आग्रयणेष्टिश्च सस्योत्पत्तौ कर्त्तव्या। चातुर्मास्यानि प्रतिसंवत्सरं कर्त्तव्यानि॥२४॥ एषामसंभवे कुर्यादि
ष्टिं वैश्वानरीं द्विजः। एषां सोमप्रभृतीनां पूर्वोक्तानां अग्न्याधानानां कथंचिदसंभवे तत्तत्काले वैश्वानरीमिष्टिं कु
र्यात्। किंच। हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदं॥२४॥ यो यं हीनकल्प उक्तः सति द्रव्ये असोमकर्त्त व्यः। य
च्च फलप्रदं काम्यं कर्म तत्तद्धीनकल्पं न कर्त्तव्यमेव॥२५॥ चंडालो जायते यज्ञकरणाच्छूद्रभिक्षितात्। य ज्ञा
र्थं लब्धमददद्भासः काकोऽपि वा भवेत्॥२६॥ यज्ञार्थं शूद्रधनयाचनेन जन्मांतरे चांडालो जायते। यः पुनर्यज्ञार्थं
याचितं न सर्वं परित्यजति स भासः काकोपि वा भवेत्। वर्षं शतं यथाहेतुः। य ज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्र
यच्छति। स याति भासतां विप्रः काकतां वा शतं समाः॥ इति भासः शकुन्तः काकः प्रसिद्धः। कुशूलकुंभीधान्यो वा
हिकोऽश्वस्तनोऽपि वा। कुशूलं कोष्ठं कुंभी उष्ट्रिका। कुशूले च कुंभीव कुत्री न कुंभ्यो॥ ताभ्यां परिमितं धान्यं य
स्य स तथोक्तः। कुशूलधान्यः स्यात्। कुंभीधान्यो वा। तत्र स्वकुटुंबपोषणे द्वादशाहमात्रपर्याप्तधनः कु
शूलधान्यः। कुंभीधान्यस्तु स्वकुटुंबपोषणे षडहमात्रपर्याप्तधनः। त्र्यहं पर्याप्तधनमस्यास्तीति त्र्याहिकः। श्वो
सवंधान्यादि श्वस्तनं। न विद्यते श्वस्तनं यस्यासौ अश्वस्तनः। कुशूलधान्यादेः संचयोपायमाह। जीवेद्वापि शि
लोंछेन श्रेयानेषां परः परः॥२७॥ शालिस्यादेर्नपतितपरित्यक्तकवल्लरीग्रहणं शिलः। एकैकस्य सस्यकण

स्यो याद्दनं उंछं ॥ शिलं च उंछश्च शिलोंछं ॥ तेन शिलेन वा कुसूलैर्धान्यादिसंग्र[...] वृद्धो गृहस्थो जीवेत् । [...]ते [...]धा पश्चात् २
कुसूलधान्यादीनां ब्राह्मणानां गृहस्थानां चतुर्णामपि परः परः पूर्वस्मात् श्रेयान् प्रशस्यतरः ॥ एत[...]च यद्यपि द्वि
जः प्रकृतस्तथापि ब्राह्मणस्यैव भवितुमर्हति विशेषणसामर्थ्ययोगात् । तथा च मनुः ॥ अद्रोहेणैव भूतानामल्प
द्रोहेण वा पुनः ॥ या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥ इति विप्रमेव प्रस्तुत्य कुसूलधान्यको वा स्यादित्या
॥२०॥ लिहितत्वादेतच्चातिसंयतं । यायावरं प्रस्तूयते । न विप्रमात्रोपि प्रायेण । तथा च सति वार्षिकाधिकान्नोपः
समस्तोंमहीपि वेदितव्ये न विरोधः ॥ तथा च गृहस्थानां द्वैविध्यं तत्रोक्तं । यथाह देवलः ॥ द्विविधो गृह ॥२०॥
स्थो यायावरः शालीनश्च । तयोर्यायावरः प्रवरो याजनाध्यापनप्रतिग्रहार्जनात् । षट्कर्मोपे
ष्यचतुष्ट तः प्रे[...]दृग्ध्यामधनधान्ययुक्तो लोकानुवर्ती शालीन इति । शालीनोपि चतुर्विधः । याजनाध्यापन
प्रतिग्रहकृषिवाणिज्यपशुपाल्यैः षड्भिः कर्मभिर्वर्तमानो याजनादिभिस्त्रिभिर्याजनाध्यापनाभ्यामेकः । चतुर्थः ॥ षट्
स्वाध्यायेनैव । यथाह मनुः ॥ षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते । द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जी
वति ॥ अत्र प्रतिग्रहोधिको विप्र इत्यादिना शालीनस्य वृत्तयो दर्शिताः ॥ यायावरस्य जीवन्नापि शिलोंछे
चेति ॥ ७ ॥ ॥ इति गृहस्थप्रकरणं ॥ ॥ एवं स्नातकमात्र नैमित्तिकमपि गृहस्थस्याभिधायेदानीं स्नातकधर्मान्यब्रा
ह्मणस्याभवस्यकर्तव्यानि विधिप्रतिषेधात्मकमानसं संकल्परूपाणि स्नातकव्रतान्याह । न स्वाध्याय विरो
धर्थमीहेत न यतस्ततः । न विरुद्धप्रसंगेन संतोषी च भवेत्सदा ॥ १२९ ॥ ब्राह्मणस्य प्रतिग्रहादयोऽर्थप्राप्त्युपाया
दर्शितास्तत्र विशेष उच्यते ॥ स्वाध्यायाविरोधिनमर्थमप्रतिषिद्धमपि नेहेत न इच्छेत् । [...] यतस्ततो न [...] कुल

40

१ अर्थमीहेतेति संबध्यते १ ड० रा०

श्रिद विदिताचारात् ॥ न विरुद्धप्रसंगेन । विरुद्धमयाज्ययाजनादि । प्रसंगो गीतादि विरुद्धं च प्रसंगश्च विरुद्ध[illegible] प्रसंगं
तेनार्थमीहेतेति संबध्यते । न च स्वावृत्तिः अल्पेकं पर्युदासार्थं । सर्वत्रास्ति न स्नातकप्रकरणेन नञ्द्वयः पर्युदा
सार्थ एव । किंच । अर्थालाभेपि संतोषी परित्यक्तो भवेत् । चकारोऽयं नत्र । संतोषं परमास्थाय सु[illegible]खार्थी संयतो
भवेदिति मनुस्मरणात् ॥ कुतश्चिद्धि धनमिच्छेदित्या[illegible]ह ॥ राजांतेवासियाज्येभ्यः सीद[illegible]न्निच्छेद्धनं क्षुधा । दांभिहै
तुकपाखंडिबकवृत्तींश्च वर्जयेत् ॥ ३३ ॥ क्षुधा सीदन् पीड्यमानः स्नातको राज्ञो वदितव्यात्तांतात् अंतेवासि
नो वक्ष्यमाणलक्षणात् याज्यात् याजनार्हात् धनमाददीत । क्षुधा सीदन्नित्यनेन व्याग्गादि आपत्कुटुंबपो
षणपर्याप्तधनेन कुतश्चिदर्थमिच्छेदिति गम्यते ॥ [illegible] किंच । दांभिहैतुकादीन् सर्वकार्येषु लौकिकशास्त्रीये
षु वर्जयेत् ॥ चकाराद्विकर्मस्थान् बैडालव्रतिकान् शठान् । यथाह मनुः ॥ पाषंडिनो विकर्मस्थान् बैडालव्रतिका
न् शठान् । हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥ लोकरंजनार्थमेव कर्मानुष्ठायी दांभी । युक्तिब
लेन सर्वत्र संशयकारी हैतुकः । त्रैविद्यविधापर्वैरगृहीता आश्रमिणः पाखंडिनः । बकवदस्य वर्तनमिति बक
वृत्तिः । यथाह मनुः । अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्याविनीतश्च बकव्रतिरुदाहृतः ।
प्रतिषिद्धसेविनो विकर्मस्थाः । बिडालो मार्जारस्तस्य स्वभावो व्रतं तद्यस्यास्ति सो बैडालव्रतिकः । धर्मध्वजी स
दा लुब्धश्छाद्मिको लोकदंभकः । बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसंधकः इति मनुस्मरणात् । शठः सर्वत्र व
क्रः । एतैः संसर्गनिषेधादेव स्वयमेवंविधो न भवेदिति गम्यते ॥ किंच ॥ शुक्लांबरधरो नीचकेशश्मश्रुनखः शु
चिः । न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः ॥ ३४ ॥ शुक्ले धौते अंबरे वास[illegible]सी धारयतीति शुक्लांबरधरः ।

म ५

स्वं६

केशाश्रुश्मश्रुणि च नखाश्च केशश्मश्रू नखं नीच लूनं केशश्मश्रु नखं यस्य स तथोक्तः। शुचिरंत बहिश्च।
स्नानानुलेपनधूपक्षगादिभिः सुगंधिश्च भवेत्। यथाह गौतमः। स्नातको नित्यं शुचिः सुगंधिः स्नानशील इति।
गंधविधाने नैव निर्गंधमाल्यनिषेधः॥ तथा च गोभिलः॥ नागंधां स्रजं धारयेत्॥ अन्य त्र हिरण्यस्रजेति सदा
स्नातक एकं स्रता भवेदेत सति संभवे। नजीर्णो मलिनवासाः स्याद्वेद्वे बिभृयाद्वसति इति स्मरणात्॥ नच वर्ष्यया
दर्शने। तस्यां पुरतो व्यवस्थितायां अभ्नीयात्। अवीर्यवदपत्योत्पत्तिभयात्। तथा श्रुतिः। जायाया अंते नाश्नी
याद वीर्यवदपत्यं भवतीति। अतस्तया सह भोजनं दूरादेव निरस्तं। नचैकवासा नापि संस्थितः लग्नछित॥ अश्नी
यादिति संबध्यते॥ किंच। न संशयं प्रपद्येत नाकस्माद प्रियं वदेत्। नाहितं नानृतं चैव न स्तेनः स्या [illegible]
[illegible] न्नवा द्विषी॥२१॥ कदाचिदपि संशयं प्राणविपत्ति संशयावहं कर्म प्रपद्येत। न कुर्यात्। ॥२१॥
यथा व्याघ्रचौराद्युपहते देशे कर्म दिषु अकस्मान्निःकारणं किंचिदपि परुषं अप्रियमुद्वेगपरं वाक्यं न वदे
त्। अहितमन्यतं वापि यमापि च कारात्। असत्यं च भत्सा करं च अकस्मादुपेतीदं संबध्यते। एतच्चपार
हासादि व्यतिरेके गुरुणापि समं हास्यं कर्तव्यं कुटिलं विनेत्यादि स्मरणात्। नच स्तेनः। अन्यदीयस्य
अदत्तस्य ग्रहीता स्यात्। नवा द्विषी स्यात्॥ प्रतिषिद्धोपजीवी द्विषी। किंच। दाक्षायणी ब्रह्मसूत्री वेणु
मान् सकमंडलुः। कुर्यात्प्रदक्षिणं देवम्लेच्छोविप्रवनस्पतीन्॥२२॥ दाक्षायणं सुवर्णं तद्वान् दाक्षायणी।
ब्रह्मसूत्रं यज्ञोपवीतं तदस्तीति ब्रह्मसूत्री। वेणवं यष्टिमान्। कमंडलुमान्। स्यादिति सर्वत्र संबधनीयं अ
त्र च ब्रह्मचारिप्रकरणोक्तस्यापि यज्ञोपवीतस्य पुनर्वचनं द्वितीयप्राप्त्यर्थं। यथाह वसिष्ठः। स्नातकानां

॥२१॥ जरु णा८ अ९ न६ नी४

स॰१ द्वितीयं स्याद्दंतर्वांस्तथोत्तरं ।। यज्ञोपवीते द्वे यष्टिः सोदकश्च कमंडलुरिति। अत्र दाक्षायणी ति सामान्या
भिधाने पि कुंडलधारणमेव कार्यं वेणी वी धारयेद्यष्टिं सोदकं च क मंडलुं यज्ञोपवीतं वेदं च शुभे रौक्मे
च कुंडले॰ इति मनुस्मरणात् ।। तथा देवं देवतांश्च मृदं गां घृतं। गां ब्राह्मणं च वनस्पतीश्च श्वत्थादीन्
प्रदक्षिणं कुर्यात्। एतान् प्रदक्षिणतः कृत्वा व्रजेदेवं चतुष्पथादीन पि। मृदं गां दैवतं विप्रं घृतं मधु
चतुष्पथं। प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन् ।। इति मनुस्मरणात्। न तु मोहेन दीक्षायां
६सो वर्त्मनि छायां न भस्म तु। न प्रत्यग्न्यर्क गोसोमसंध्यां बु स्त्री द्विजन्मनः ।। ७२ ।। न धावेत् तु न मोहेन तु। मूत्र
पुरीषोत्सर्गं न कुर्यात् ।। एवं स्मशानादावपि ।। यथाह गोरवः ।। न गोमय कृष्टे न शाड्वले स्मशा
न वर्त्म [illegible] पर्वत पुलिनेषु मेहेत। मूलाधार स्वादिति। तथा अग्न्यादिनामधुत्सु स्वेन मोहेत। नाप्येतान्यस्ये
न्यथाह गोतमः ।। न घर्मि विप्रादित्यापो देवतागाश्च प्रतिपश्यन्। वा मूत्रपुरीषामेध्यानि नोदस्येदेता देव २री
ताः प्रति पादौ न प्रसारयेदिति। एतद्दृश्या व्यतिरेकेण। भूमिमयज्ञिये स्तृणे रंतर्धाय मेहनं कार्यं यथा ह
वसिष्ठः। परिवेष्टितशिरा भूमिमयज्ञियैस्तृणैरंतर्धाय मेहनं कार्यं मूत्रपुरीषे कुर्यादिति। नेक्षेतार्कं
न नग्नां स्त्रीं न च संसृष्टमैथुनां। न च मूत्रं पुरीषं वा नाशुची राहुतारकाः ।। ७४ ।। नैवार्कमीक्षेत ।। य
घप्यत्र सामान्येनोक्तं। तथापि फदयास्तमयराहुग्रस्तोदकप्रतिबिंबमध्याह्नवर्जितं एवादित्यस्ये
क्षणं निषिध्यते। न सर्वदा यथोक्तं। मनुना। नेक्षेतोद्यंतमादित्यं नास्तं यांतं कदाचन। नोपसृष्टं न
वारिस्थं न मध्यं नभसो गतमिति। उपभोगादन्यत्र स्त्रियं नेक्षेत नग्नां। न नग्नां स्त्रियमीक्षेतान्य
नग्नां।

॥२३॥

न६

त्र मैथुनादित्याश्वलायनः। संसृष्टमैथुनां सूतोपभोगां। रूपभोगीति नग्नामपि नेक्षेत॥ चकाराद्दोजस्वादि
क माचरन्तीं। तथा च मनुः। नाश्नीया [illegible] द्भार्यया सार्धं नैनामीक्षेत चाश्नतीं। क्षुवतीं जृम्भमाणां वा न चासी
नां यथासुखं। नाञ्जयन्तीं स्वके नेत्रे न चाभ्य [illegible] क्तामनावृतां। न पश्येत्प्रसवन्तीं च तेजस्कामो द्विजोत्तम इति।
मूत्रपुरीषे न पश्येत्तथाऽशुचिः सन् राहुं तारकाश्च न पश्येत्। चकारादुदके स्वप्रतिबिम्बं न पश्येत्। न चोदके
ऽगरीक्षेत स्वं रूपमिति धारणेति वचनात्। यं ज्ञे मेव ज्ञइस्येवं सर्वमंत्रमुदीरयेत्। वर्षस्य प्रावृतो ग
च्छेत्स्वपेच्च स्वकूलिरानच। [illegible]वर्षति सति अयंमेवगः पाप्मानमपहंत्विति सर्वमंत्रमुदीरयेत्। प्रोक्ष्ये वेतद
ति अनाच्छादितो गच्छेत्। न धावन्नप्राधावेच्च वर्षतीति निषेधात्। न च प्रस्वकुशिमं सुप्यात्। चकारान्नग्नो न शयी
त। एकश्च शून्यगृहे। न च नग्नः शयीतेति नैकः सुप्यात् शून्यगृह इति च मनुस्मरणात्। ष्ठीवनासृक् चाप्सु प्ररेतोऽप्स्व ॥२२॥
प्सु न निक्षिपेत्। पादौ प्रतापयेन्नाग्नौ न चैनमभिलङ्घयेत्। ष्ठीवनमुत्सीरणं॥ असृक् रुधिरं। चकारात् पुरीषं। शेषं प्रसिद्धं ए
तान्यप्सु नाभिक्षिपेत्। एवं तुषादीनपि। यथाह शङ्खः। तुषकेशपुरीषभस्मास्थिश्लेष्मनखलोमान्यप्सु न क्षिपेत्। न पा न७
देन पाणिना वा जलमभिहन्यादिति। अग्नौ च पादौ प्रतापयेत्॥ नाप्यग्निं लङ्घयेत्। चकारात् ष्ठीवनादीनि अग्नौ न नि
क्षिपेत्। मुखोपधमनादि चाग्नेर्न कुर्यात्। तथा च मनुः। नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियं। नामेध्यं प्रक्षिपेदग्नौ
न च पादौ प्रतापयेत्। अधस्तान्नोपदध्याच्च न चैनमभिलङ्घयेत्। न चैनं पादतः कुर्यान्न प्राणाबाधमाचरेत्। जलं पिबेन्ना
ञ्जलिना न च शयानं प्रबोधयेत्। नाक्षैः क्रीडेन्न धर्मघ्नो व्याधितैर्वा न संविशेत्॥ जलमञ्जलिना संहताभ्यां पाणिभ्यां न
पिबेत्॥ जलग्रहणं पेयमात्रोपलक्षणार्थं। विद्यादिभिरात्मनोऽधिकं शयानं न प्रबोधयेन्नोत्थापयेत्। श्रेयांसं नरं न
न प्रबोधयेदिति वचनात्। अक्षादिभिर्न क्रीडेत् धर्मघ्नैः पशुलंघनादिभिः कर्मभिः क्रीडेत्॥ याधितैर्ज्वरादिभिर्भरैरेकं

चनसंविशेत्न्नायी लौकिकं द्रव्यं वर्जयेत्कर्मयेतधूमं नदी तरं केशान्भस्म तुषांगारकपालेषु च संस्थितिं ॥४८॥ जनप
दस्यामकुलाचारविरुद्धं कर्म वर्जयेत् ॥ प्रेतधूमं वा कुर्यान्नदीतरणं वर्जयेदिति संबध्यते। केशादिषु चासंस्थितिं
वर्जयेत् ॥ चकारादस्थिकर्पासामेध्येषु च। ७०॥ नाचक्षीत धयन्तीं गां नाद्वारेण विशेत्क्वचित्। न राज्ञः प्रतिगृ
ह्णीयात् लुब्धस्योच्छास्त्रवर्तिनः ॥७९॥ परस्य क्षीरादपि बंतीं गां परस्मै नाचक्षीत। न च निवर्तयेत्। अद्वारेण
लापथेन क्वचिदपि नगरे ग्रामे मंदिरे वा न प्रविशेत्॥ न च रूपणस्य शास्त्रातिक्रमकारिणो राज्ञः सकाशात् प्रति
गृह्णीयात्। प्रतिग्रहे स्तुनिचक्रिध्वजिवेश्यानराधिपाः दुष्टा दशगुणं पूर्वात्पूर्वादेतेयथाक्रमं ॥८०॥ प्रतिग्रहं सा
ध्येसूत्यादयः पंचपूर्वस्मात्पूर्वस्मात्परः परो दशगुणं दुष्टः। सूनावपि [illegible] अस्या स्तीति सूनी। प्राणिहिंसाप
रः। चक्री तैलिकः। ध्वजी सुराविक्रयी। वेश्यापण्यस्त्री। नराधिपः अनंतरश्लोकः। ॥८१॥ अध्ययनधर्मानाह। अध्या
नायामुपाकर्म श्रावण्यां श्रवणेन वा। हस्ते नौषधिभावे वा पंचम्यां श्रावणस्य तु। अधीयत इति अध्याया वेदास्ते
षां उपाकर्म उपक्रमम् ओषधीनां प्रादुर्भावे सति। श्रावणमासस्य पौर्णमास्यां श्रवणनक्षत्रयुक्ते वा दिने। हस्ते न युक्ता
यां पंचम्यां वा। स्वगृह्योक्तविधिना कुर्यात्। यदा तु श्रावणमासे ओषधयो न प्रादुर्भवंति। तदा भाद्रपदमासे श्रवणन
क्षत्रे कुर्यात्। अतऊर्ध्वं सार्धं चतुरो मासान्वेदानधीयीत। तथा च मनुः। श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथा
विधि। युक्तश्छंदांस्यधीयीत मासान्विप्रोऽर्धपंचमान्। इति। पौषमासस्य रोहिण्यामष्टकायामथापि वा॥ जलांते
छंदसां कुर्यादुत्सर्गं विधिवद्बहिः। पौषमासस्य रोहिण्यां अष्टकायां वा। ग्रामाद्बहिर्जलसमीपे छंदसां वेदानां स्वगृह्योक्त
विधिनोत्सर्गं कुर्यात्। यदा पुनर्भाद्रपदे मासे उपाकर्म तदा माघे शुक्लप्रथमादिवसे कुर्यात्॥ यथोक्तं मनुना॥ पुष्ये तु
छंदसां कुर्याद्बहिरुत्सर्जनं द्विजः ॥ माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि। तदनंतरं पक्षिणीमहोरात्रं वा विरम्य

म ५

दु ७

ण

ओदि

शुक्लपक्षेषु वेदान्कृष्णपक्षेषु अंगान्यधीयीत ॥ यथामनुः ॥ यथाशास्त्रं तु कृत्वैवमुत्सर्गं छंदसां बहिः । विरमेत्पक्षिणीं रात्रीं
तदैवैकमहर्निशं ॥ अत ऊर्ध्वं तु छंदांसि शुक्लेषु नियतः पठेत् । वेदांगानि तु सर्वाणि कृष्णपक्षेषु संपठेदिति ॥ ७९ ॥ अनध्या प २
यानाह । त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु । उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा । उक्तमार्गेणाधीया
नस्य शिष्यस्य ऋत्विग्गुरुबंधुषु प्रेतेषु मृतेषु त्र्यहमनध्यायः । त्रीनेता रात्रानध्यायमेव जपेत् । उपाकर्मणि उत्सर्गा
गौरुः ॥ ख्ये च कर्मणि च कृते त्र्यहमनध्यायः ॥ ८० ॥ उत्सर्गे तु मनूक्तपक्षिण्यहोरात्रं वा आभ्यां सहास्य विकल्पः । स्वशाखाध्या
यिनि च प्रेते त्र्यहमनध्यायः ॥ संध्यागर्जितनिर्घातभूकंपोल्कानिपातने । समाप्य वेदं द्युनिशं आरण्यकमधीत्य च ।
५७ संध्यायां मेघनिर्घोषे निर्घाते आकाशे उत्पातध्वनौ । भूमिचलने ॥ उल्कापातने । मंत्रस्य ब्राह्मणस्य वा समाप्तौ ॥ आरण्यका
ध्ययने चाहर्निशमहोरात्रमनध्यायः ॥ ८१ ॥ पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके । ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्र श्रा२३॥
तिगृह्य च । पंचदश्याममावास्यापौर्णमास्योः चतुर्दश्यामष्टम्यां राहुसूतके । चंद्रसूर्योपरागे च द्युनिशमनध्या
यः । यत्तु त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके । इति तद्वृत्तासामान्यविषयं । ऋतुसंधिगतासु च प्रतिपत्सु । श्राद्धिक
भोजने । तत्प्रतिग्रहे च द्युनिशमनध्यायः । एतच्चैकोद्दिष्टव्यतिरिक्तविषयं । तत्र तु त्रिरात्रं प्रतिग्रहाद्दजो विशेष ए छ११
कोद्दिष्टस्य केतनं । त्र्यहं न कीर्तयेद्ब्रह्मेति स्मरणात् ॥ ८२ ॥ पशुमंडूकनकुलश्वाहिमार्जारमूषकैः । कृतेंतरे त्वहोरात्रं शक्र
पातिते तथोच्छ्रये । अध्येतॄणां पश्वादिभिरंतरागमने सति । शक्रध्वजस्यावरोपणदिवसे उच्छ्रयदिवसे च । अहोरात्रमन
ध्यायः ॥ द्युनिशमिति प्रसक्ते पुनरहोरात्रग्रहणं संध्यागर्जितनिर्घातभूकंपोल्कानिपातने आकालिकत्वज्ञापनार्थं आ
कालिकानिर्घातभूकंपराहुदर्शनोल्का इति गौतमवचनात् । नैमित्तिककालादारभ्य परेद्युर्यावत्स एव कालस्तावत्कालमाकालं । का २
तत्रभव आकालिकोऽनध्यायः । एतच्च प्रातःसंध्यास्तमिते । सायंसंध्यास्तमिते तु रात्रिमेव । प्रायः संध्यास्तमिते रात्रिं प्रातः

२ = तिकेरजोवर्षे। दिग्दाहेयत्र [illegible]लिताइव दिशो दृश्यंते। संध्ययो नीहारे धूमिकायां भीतिषु चोरराजादि दैताव [illegible]कालमनध्यायः।

संध्यायामहोरात्रमितिहारीतस्मरणात॥ पतत्कुनर्गौलतमे नौके। श्वलकुलसर्प्यमंडूकमार्जाराणां सप्त हमुपवा सोवश्यवा मास्रुति। तत्र प्रथमाध्ययन एव॥ ४३॥ श्व क्रोष्टुगर्दभोलूकसामबाणार्तनिस्वने। अमेध्य शवशूद्रांत्य श्मशानपतितांतिके। श्वा कुक्कुटः। क्रोष्टा गोमायुः। गर्द्दभो रासभः। बाणो वेणुः। उलूको घूकः। आर्तो दुःखितः। एषां श्वादीनां निस्वने तावत्कालमनध्यायः। एवं वीर्णादिस्वनेपि। वेणुवीणाभेरीमृदंगगद्दीर्तशादे ध्वतिगौतमवचनात्। गर्द्दभः शकटः। अमेध्यादीनां सन्निधाने तावत्कालिकोनध्यायः॥ ४४॥ देशे अशुचौ [illegible] चात्मनि च विद्युत्स्तनितसंप्लवे। भुक्तार्द्रपाणिरंभोंतरर्द्धरात्रेतिमारुते। अशुचौ देशे अशुचावात्मनि तथा विद्युत्स्तनितसंप्लवे पुनःपुनर्मेघघोषे तमानायां विद्युति। स्तनितसंप्लवे पुनःपुनर्मेघघोषे। तात्कालिकोनध्यायः॥ भुक्त्वा ईपाणिर्नाधीयीत। जलमध्ये चार्द्धरात्रे महानिशा रूये मध्यप्रहरद्वये। अतिमारुते हन्यपि तात्कालेनाधीयीत॥ ४५॥ पांसुप्रवर्षे दिग्दाहे संध्यानीहारभीतिषु। धावतः पूतिगंधे च शिष्टे च गृहमागते। [illegible]सानध्याय। पूतिगंधे च कुत्सितगंधे [illegible] अमेध्य मद्यादिगंधे। [illegible] शिष्टे च श्रोत्रिये गृहं प्राप्ते तदनु तावत्कालिकमनध्यायः॥ ४६॥ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे। सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः। यानं रथादि। इरणमूषरं। मरुभूमिर्वा। खरादीनां रोहणे तावत्कालमनध्यायः। एवं श्वक्रोष्टुगर्दभेत्यस्मादारभ्य सप्तत्रिंशदनध्यायांस्तात्कालिकान्विधिज्ञा विदुः। अनेन स्पष्टं तरोक्तानन्यानपि संगृह्णाति। यथा मनुः॥ ४७॥ शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकां। नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च॥ इत्यादि॥ ४७॥ एवमनध्यायांस्तत्कालत्वेन स्नातकव्रतान्याह। देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियः॥ नाक्रामेद्

न१ निमित्तसमकालानुविदुरध्याय ३

51

कविण्मूत्रष्ठीवनोद्वर्त्तनानि च॥ देवतार्चामृत्विक्स्नातकाचार्यराज्ञां पुरस्त्रियाश्च छायां नाक्रामेत्॥ नाधितिष्ठे-
त् न लंघयेच्च बभ्रुदुष्टवर्णं॥ यथाह मनुः॥ देवतानां गुरो राज्ञः स्नातकाचार्ययोरपि॥ नाक्रामेत्कामतश्छायां बभ्रुणो
दीक्षितस्य चेति॥ बभ्रुणो नकुलवर्णस्य यस्य कस्यापि गोरन्यस्य वा॥ सोमादेः॥ बभ्रुण इति नष्टसकलिंगपतिर्दृश्यात्॥ रक्ता-
दीनि च नाधितिष्ठेत् [illegible]दिग्रहणात्॥ स्नानोदकादेर्ग्रहणं॥ उद्वर्त्तनमप्यत्र॥ नं विण्मूत्रे रक्तमेव च॥ श्लेष्मनिष्ठ्यूतवां-
तानि नाधितिष्ठेत्तु कामतः॥ इति॥ विप्राहिक्षत्रियात्मानो नावज्ञेयाः कदाचन॥ आमृत्योः॥ आयमांकीक्षेत्रकंचिन्मर्माणि
स्पृशेत॥ [illegible]॥ दूरादुच्छिष्टविण्मूत्रपादोदकानि समुत्सृजेत्॥ [illegible] कृतिसत्कृदिलं धर्म्यं नित्यमाचारमाचरेत्॥ पर[illegible]
गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत्॥ नासंदाताडनेकुर्यात्पुत्रं शिष्यं च ताडयेत्॥ [illegible]॥ विप्रो बहुश्रुतो ब्रा-
ह्मणः॥ अहिः सर्पः॥ क्षत्रियो नृपतिः॥ आत्मा च॥ एते कदाचिदपि नावमंतव्याः॥ आमृत्यो[illegible] यावज्जीवं [illegible] पर्यंदृच्छेत् न
कंचिन्मर्माणि स्पृशेत॥ कस्यचिन्मर्मदुःखादि न प्रकाशयेत्॥ भोजनादि[illegible]॥ विण्मूत्रे॥ पादप्रक्षालनोदकं च
गृहात् दूरात् समुत्सृजेत्॥ श्रौतं स्मार्त्तं चाचारं नित्यं सम्यगनु[illegible]ष्ठेत्॥ गां ब्राह्मणमग्निमन्नमदनीयं विशेषतः॥
पक्वमन्नं चोच्छिष्टः स्पृशेत॥ पादेन खलु उच्छिष्टोपि यदा पुरः प्रमादात्स्पृशति॥ तदा आचमनोत्तरकाले॥ स्पृष्ट्वैतानशु-
चिर्नित्यमद्भिः प्राणानुपस्पृशेत॥ गा[illegible]त्राणि चैव सर्वाणि नाभिं पाणितलेन त्विति॥ एवं प्राणादीनुपस्पृशेत॥
कदाचिदपि नैंदाताडनेन कुर्यात्॥ एतच्चानपकारिणि॥ अप्रबुध्यमा[illegible]ना स्यात्सोपि ब्राह्मणस्यापि सृजं तततः॥ दुःख-
मुमहदाप्नोति प्रेत्याप्राज्ञतया नरः॥ इति॥ पुत्रं शिष्यं शिक्षार्थमेव ताडयेत्॥ चकाराद्दासी[illegible]॥ ताडने र[illegible]
र्द्दिनाडनमंगव्यालिरेकेणकार्यं॥ शिष्यशिष्टिरवधेनाशक्तौ रज्जुवेणुविदलाभ्यां अन्येन[illegible] राज्ञा शास्या॥ इति

ध०४॥

॥२६॥

ज्वार

ध०२

52

गोतमस्मरणात्। दृष्टतत्त्वब्रह्मचारी रस्य नोतमांगे कदाचनेति मनुस्मरणात्। कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्। अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु। कर्मणा कायेन यथाशक्ति धर्ममनुतिष्ठेत् तमेव मनसा ध्यायेत्। वाचा च वदेत्। धर्म्यं विहितमपि लोकाद्विष्टं लोकाभिशस्ति जनकं मधुपर्के गोवधादिकं नाचरेत्। यस्मादस्वर्ग्यम् अग्नीषोमीयवत्स्वर्गसाधनं भवति॥१७८॥

ऋ५

मातृपित्रतिथिभ्रातृजामिसंबंधिमातुलैः। वृद्धबालातुराचार्यवैद्यसंश्रितबांधवैः॥१७९॥ ऋत्विक्पुरोहितापत्यभार्यादाससनाभिभिः। विवादं वर्जयित्वा तु सर्वान्ल्लोकाञ्जयेद्गृही॥ माता जननी। पिता जनकः। अतिथिरध्वनीनः। भ्रातरो भिन्नोदराः। जामयो विद्यमानभर्तृकाः स्त्रियः। संबंधिनो वैवाह्याः। मातुलो मातुर्भ्राता। वृद्धः सप्ततिवर्षवयस्कः। बालः आषोडशाद्वर्षात्। आतुरो रोगी। आचार्य उपनेता। वैद्यो विद्वान् भिषक् वा। संश्रितः उपजीवी। बांधवाः पितृपक्षा मातृपक्षाश्च। मातुलस्य पृथक् उपादानमादरार्थं। ऋत्विक् याजकः। पुरोहितः शांत्यादेः कर्ता। अपत्यं पुत्रादि। भार्या सधर्मचारिणी। दासः कर्मकरः। सनाभयः सोदराः॥ भ्रातृभ्यः पृथगुपादानं। जामि भगिनी प्राधान्यार्थं। एतैः सौरादिभिः सह वाक्कलहं परित्यज्य सर्वान् प्राजापत्यादीन् लोकान् प्राप्नोति॥१८०॥

पि५

त्व५

पंचापिंडाननुद्धृत्य न स्नायात्परवारिषु। स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च॥१८१॥ परवारिषु परसंबंधिषु सर्वस्वोद्दिष्टेषु नीयसकेषु तडागादिषु पंचपिंडाननुद्धृत्य न स्नायात्। अनेनोत्सर्गेष्वनुत्सृष्टेषु स्नाते पिंडोद्धरणमंतरेणापि स्नानमभ्यनुज्ञातं। नद्यादिषु कर्त्तव्यमित्याह। स्नायान्नदीति। साक्षात्परंपरया वा समुद्रगाः स्रवंत्यो नद्यः। देवैः खातं देवनिर्मितं पुष्करादि। दुकप्रवाहाभिघातकृतः सजलो महानिम्नप्रदेशो ह्रदः। पर्वतादिकच्छदेशात्स्रुतमुदकं प्रस्रवणं। एतेषु पंचपिंडाननु

स्वार

नु३

ना३ ना५

द्धरणेनैव स्नायात्। एतच्च नित्यस्नानविषयं। संभवे सति। नदीषु देवखातेषु तडागेषु सरस्सु च। स्नानं स
माचरेन्नित्यं न प्रस्रवणेषु चेति नित्यग्रहणात्॥ ... मोचायर्थं॥ तु यथा संभवं परवापीषु पिंडानुद्धरणे
न वस्त्या निषेधः। परकीयया स्नानोपान ग्रहायानि वर्जयेत्। अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि॥
नायर्थे खद्याशिषुः। आसनं पीठादि। ठयानं मात्रं वणादि। गृहं प्रसिद्धं यानं रथादि। परस्वं वेष्ट्यांन्यथा निअ
दत्तानि अननुज्ञातानि वर्जयेत्। नोपभुंजीत। अप्रोत्य... न्यह। अग्निहीनस्येति। अग्निहीनस्य श्रोत
स्मा ... काररहितस्य मूढस्य ज्ञान लोभजस्य च। अधिकारस्ति लोपि। आग्नरहितस्य अन्नमनापादनकुं
जीत। न पालग्रहको पाद्यं। तस्मात् ... नास्वर्के ... जातीनां ब्राह्मणो भुंजीत। प्रतिग्रहको ...
ज्ञेति। गोतमस्मरणात्। कदर्यबद्धचोराणां क्लीबरंगावतारिणां। वेणवशिल्पस्य वार्धुष्यगणिका
गणप्रदीक्षिणो। कदर्यो लुब्धः सच आत्मानं धर्मकार्यं च पुत्रदारांश्च पीडयेत्॥ लोभाद्यः पितरौ भृत्यान्
न स कदर्य इति स्मृतः इस्करः। बद्धो निगडादिना। वाचा वा संनिरुद्धश्च। चौरो ब्राह्मणसुवर्ण
व्यतिरिक्तपरस्वापहारी। क्लीबो नपुंसकः। रंगावतारी नटचारणमल्लादिः। वेणुच्छेदजीवी वैणः।
आसन्नास्ताः। पतनीयैः कर्मभिरभियुक्तः। वार्धुषी निषिद्धवृद्ध्युपजीवी। गणिका। पण्यस्त्री॥
गणदीक्षी बहुयाजकः। एतेषां अन्नं नाश्नीयात् इत्यनुवर्त्तते॥ ५७॥ चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां॥
क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनां॥ चिकित्सको भिषक् वृत्त्युपजीवी॥ आतुरो महारोगोपसृष्टः॥
वातव्याध्यश्मरीकुष्ठमेहोदरभगंदराः॥ अर्शांसि ग्रहणी सप्तैते महारोगाः प्रकीर्तिताः॥ इति॥ क्रुद्धः कुपितः॥

॥२५॥ त६

द्वि८ ॥२५॥ का२

54

पुंश्चली व्यभिचारिणी ॥ मत्तो विद्यादिना गर्वितः ॥ विद्विट् शत्रुः ॥ क्रूरो दृढाभ्यंतरकोपः ॥ काकः कायव्यापारेण उद्वेगज
नकउग्रः ॥ पतितो ब्रह्महत्यादिः ॥ व्रात्यः पतितसावित्रीकः ॥ दांभिको वंचकः ॥ उच्छिष्टभोजी परस्य क्तावर्जितान्नी ॥ एषां
चिकित्सकादीनामन्नं नाश्नीयात् ॥ ५८ ॥ अवीरस्त्री स्वर्णकार स्त्रीजित ग्रामयाजिनां ॥ शस्त्रविक्रयी कर्मारी तुंतवाप

ध्या ४

श्ववृत्तिनां ॥ पू॰ ॥ अवीरा स्वतंत्रा व्यभिचारमंतरेण ॥ पतिपुत्ररहिते त्यन्ये ॥ स्वर्णकारः सुवर्णस्य विकारांतरकृत् ॥
स्त्रीजितः सर्वत्र स्त्रीवश्यवर्त्ती ॥ ग्रामयाजी ग्राममुख्यस्य शांतिकादिकर्त्ता ॥ बहूनामुपनेता वा ॥ शस्त्रविक्रयी शस्त्रवि
क्रयोपजीवी ॥ कर्मारी लोहकारः ॥ तक्षकादिश्च ॥ तुंतवायः सूचीशिल्पोपजीवी ॥ कुविंदको वा ॥ श्ववृत्तिर्जीवनं य
स्यास्ती तिश्ववृत्ती ॥ एतेषामन्नं नाश्नीयात् ॥ नृशंसराजरजककृतघ्नवधजीविनां ॥ चैलधावसुराजीवसहोपप

ध्या ८

तिवेश्मनां ॥ पिशुनानृतिनोश्चैव तथा चाक्रिकबंदिनां ॥ एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥ ६ ॥ नृशंसो निर्दयः ॥
राजा भूपतिः ॥ तस्माद्दर्पी सुरोहितश्च ॥ यथाह शंखः ॥ भीतावगीतरुदिताक्रंदितावघुष्टस्युतपरिभुक्तविस्मितोन्मत्तावधू

रा १०

तराजपुरोहितान्नानि वर्जयेत् ॥ रजको वस्त्रादीनां नील्यादिरंगकरः ॥ कृतघ्न उपकृतस्य हंता ॥ वधजीवि प्राणिनो वधे

ध्या ५

नवर्त्तकः ॥ चैलधावो वस्त्रनिर्णेजनकृत् ॥ सुराजीवो मद्यविक्रयी ॥ उपपतिर्जारः ॥ सह उपपतिना वेश्म यस्यासौ स
होपपतिवेश्मा ॥ पिशुनः परदोषस्य ख्यापकः ॥ अनृती मिथ्यावादी ॥ चाक्रिकः तैलिकः ॥ शाकटिकश्च ॥ अभिशस्त
पतितचाक्रिकतैलिकइत्यभेदेनाभिधानात् ॥ बंदिनः स्तावकाः ॥ सोमविक्रयी सोमलताया विक्रेता ॥ एतेषामन्नं
न भोक्तव्यं ॥ सर्वे चैते कदर्यादयो द्विजा एव कदर्यत्वादिदोषदुष्टा अभोज्यान्नाः ॥ प्रायस्य वा तु ज्ञा सिपूर्वे कत्वा च प्र

इतरेषां

तिषेधस्य ॥ अग्निहीनस्य नोन्नमद्यादनापदि ॥ इत्यत्र शूद्रस्याभोज्यान्नत्वमुक्तं ॥ तत्र प्रतिप्रसवं धर्मीमाह ॥ शूद्रेषु

॥२८॥

दासगोपालकुलमित्रार्द्धसिरीणः॥ भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्॥ दासागर्भदासादयः॥ गोपालो गवां पालनेन यो जीवति॥ कुलमित्रं पितृपितामहादिक्रमायातं॥ अर्द्धसीरी हलपर्याय सीरी पलक्षित कृषिफलार्धग्राही॥ नापि-

-त्राश्च कारालकुंभकारश्च॥ गोपाल नापितकुंभकार कुलमित्रार्द्धिक निवेदितात्मानो भोज्यान्नाः इति गौतमवचनात्॥

तःकारयिता॥ यश्च वाग्मनःकायकर्मभिरात्मानं निवेदयति॥ तवाहमिति॥ एतेदासादयः शूद्राणां मध्ये भोज्या-

॥५॥ इति स्नातकप्रकरणं॥५॥ न स्वाध्याय विरोध्यर्थमिच्छत आरभ्य ब्राह्मणस्य स्नातकव्रतान्यभिधायेदानीं द्विजा-

-तिधर्मानाह॥ अनर्चितं वृथा मांसं केशकीटसमन्वितं॥ शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितं॥ उदक्यास्पृष्टसं-

-घुष्टं पर्यायान्नं च [illegible] वर्जयेत्॥ गोघ्रातं शकुनोच्छिष्टं पदास्पृष्टं च कामतः॥१६४॥ अनर्चितं॥ अर्चार्हाय पद्वतुच्छ-

-यादीयते॥ वृथामांसं न क्ष्यमो[illegible]प्राणात्ययादिव्यतिरेकेण देवाद्यर्चनशिष्टं च यन्न भवति॥ आत्मार्थमेव पचनं

-पितं॥ केशकीटादिभिः संयुक्तं॥ पचस्वयमेव न मलं केवलं कालपरि[illegible]रिवासेन द्रव्यांतरसंसर्गकालपरिवासा-

-भ्यां वा अम्लीभवति॥ तत्शुक्तं॥ दध्यादिव्यतिरेकेण न पापी पसोन्नमश्नीयात्॥ नहिःपक्वं॥ न पर्युषितं सक्तुवा-

-न्यत्र रागषाडवचुक्रदधिगुडगोधूमयवपिष्ट विकारेभ्यो रात्रवस्मरणात्॥ पर्युषितं रात्र्यंतरितं॥ उच्छिष्टमुच्छि-

-ष्टं॥ श्वस्पृष्टं शुनास्पृष्टं॥ पतितेक्षितं॥ पति[illegible]दिभिरीक्षितं॥ उदक्यास्पृष्टे॥ रजस्वलया स्पृष्टं॥ उद्क्यग्रह-

-णं चंडालाद्युपलक्ष[illegible]र्थं॥ अमेध्यपतित चंडालसूतकसरजस्वलाकुनखिकुष्ठिसंस्पृष्टान्नं वर्जयेदिति संव-

स्मरणात्॥ को भुंक्ते इति यदा घुष्यदीयते॥ तत्संघुष्टान्नं॥ अन्यसंबंधान्यपदेशेन यदीयते तत्पर्यायान्नं॥ यथा॥

॥२८॥

इति ४

ता ३ य १

56

पाठे ३

ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् ॥ उभावेतावभोज्यान्नौ भुक्त्वा चांद्रायणं चरेदिति ॥ पर्य्याचांतमिति पाठे परि
गतमाचांतं गंडूषग्रहणं यस्मिन् तत्पर्य्याचांतं तन्न भोक्तव्यं ॥ एतदुक्तं भवति गंडूषग्रहणोर्द्ध्वं आचमनात् प्राक् न भो
क्तव्यं ॥ पार्श्वाचांतमिति एकस्यां पंक्तौ पार्श्वस्थेनाचांते न भोक्तव्यं ॥ भस्मोदकादिविच्छेदेन विना वर्जयेदिति प्रसंगः सं
बध्यते ॥ तथा गोघ्रातं गवा घ्रातं ॥ शकुनेन काकादिना आस्वादितं शकुनोच्छिष्टं ॥ पदास्पृष्टं बुद्धिपूर्वं पादेन स्पृष्टं
वर्जयेत् ॥ पर्युषितस्य प्रतिप्रसवमाह ॥ अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितं ॥ अस्नेहा अपि गोधूमयवगो
रसविक्रियाः ॥ [illegible] ॥ अन्नमदनीयं पर्युषितमपि घृतादिस्नेहसंयुक्तं चिरकालसंस्थितमपि भोज्यं ॥ गोधूमयव
गोरसविक्रिया मंडकसक्तुकिलाटकूचिकाद्या अस्नेहा अपि चिरकालसंस्थिता भोज्याः ॥ यदि तद्विकारांतरमाप
न्नाः अपूपधानकरंभसक्तुपावकतिलपायसशाकानि शुक्तानि वर्जयेदिति वसिष्ठस्मरणात् ॥ संधिन्यनि

औ ८

र्दशावत्सागोपयः परिवर्जयेत् ॥ ग्राम्यैकशफस्त्रैणमारण्यकमथाविकं ॥ ६६ ॥ या वृषेण संधीयते ॥ वत्सार्थिं ध्यां विज्ञा
नीयाद्बाष्कलाकांतां च संधिनीमिति त्रिकांडीस्मरणात् ॥ या चैककालमतिक्रम्य दुह्यते ॥ या वत्सांतरेण संधीयते सा
संधिनी ॥ प्रसूता अनतिक्रांतदशाहा अनिर्दशा ॥ मृतवत्सा संधिनी च अनिर्दशा च अवत्सा च संधिन्यनिर्द
शावत्सास्ताश्च ता गावश्च तासां पयः क्षीरं परिवर्जयेत् ॥ संधिनीग्रहणं स्यंदिनीयमसूवाद्युपलक्षणार्थं ॥ यथा
ह गौतमः ॥ स्यंदिनीयमसूसंधिनीनां चेति ॥ स्रवत्पयःस्तनी स्यंदिनी ॥ यमसूः युग्मप्रसविनी ॥ एवमजामहि
ष्योरनिर्दशायोः पयो वर्जयेत् ॥ गोमहिष्यजानामनिर्दशानामिति ॥ वसिष्ठस्मरणात् ॥ पयोग्रहणात्तद्विकाराण
मपि दध्यादीनां निषेधः ॥ नहि मांसाभिषेधे तद्विकाराणामनिषेधो युक्तः ॥ विकारनिषेधे तत्प्रकृतेरनिषेधः ॥ पयो

सकलर

निषेधाच्छ्वक्षीरात्क्षीरादेरनिषेधः ॥ उष्ट्राज्जातं औष्ट्रं पयोमूत्रादि एकशफाश्ववडवादयः ॥ तत्प्रभवमेकशफं ॥ स्त्रीप्रभवं
स्त्रैणं स्त्रीग्रहणमजाव्यतिरिक्तद्विस्तनीनामुपलक्षणार्थं ॥ सर्वासां द्विस्तनीनां क्षीरमभोज्यमिति शंखस्मरणात् ॥
अरण्ये भवा आरण्यास्तदीयमारण्यं क्षीरं ॥ माहिषव्यतिरेकेण ॥ आरण्यानां च सर्वेषां मृगाणां माहिषं विनेति व
चनात् ॥ आवेर्जातं आविकं वर्जयेदिति प्रत्येकमिति संबध्यते ॥ औष्ट्रमित्यादि विकारप्रत्ययनिर्देशात् ॥ विकार
मात्रस्य पयोमूत्रादेः सर्वस्य निषेधः ॥ निःसमाविकमपेयमौष्ट्रमैकशफं चेति गौतमस्मरणात् ॥ देवतार्थं हविः

॥२७॥

शिग्रुं लोहितान्वृक्षनिर्यासांस्तथा ॥ अनुपाकृतमांसानि विड्जानि कवकानि च ॥ १७० ॥ देवतार्थं बल्युपहार नि
मित्तं साधितं ॥ हविः हवनार्थं सिद्धं ॥ प्राग्घोमात् ॥ शिग्रुर्भांजनः ॥ लोहितान्वृक्षनिर्यासान् ॥ वृश्चनप्रभ
वान् ॥ वृक्षच्छेदजातान् ॥ लोहितानपि ॥ यथाह मनुः ॥ लोहितान्वृक्षनिर्यासान्वृश्चनप्रभवांस्तथेति ॥
लोहितग्रहणात् हिंगुकर्पूरादीनामनिषेधः ॥ अनुपाकृतमांसानि यज्ञेष्वनुपाकृतस्य पशोर्मांसानि ॥ वि[illegible]नी
मनुष्यादि जन्यबीज पुरीषोत्पन्नानि ॥ पुरीषस्थानोत्पन्नानि च तंदुलीयकप्रभृतीनि ॥ कवकानि छत्रकानि ॥ व
र्जयेदिति प्रत्येकमभिसंबध्यते ॥ छ ॥ क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभान् ॥ सारसैकशफान्हंसान्सर्वांश्च ग्राम
वासिनः ॥ १७१ ॥ क्रव्यादाः आममांसादनशीलाः ॥ पक्षिणो गृध्रादयः ॥ दात्यूहाः ॥ चातकाः ॥ शुकाः कीराः ॥ च[illegible] प्र
तुद्य प्रतुद्य भक्षयंतीति प्रतुदाः श्येनादयः ॥ टिट्टिभस्तच्छब्दानुकारी ॥ सारसो लक्ष्मणः ॥ एकशफाः अश्वादयः ॥
हंसाः प्रसिद्धाः ॥ ग्रामवासिनः पारापतप्रभृतयः ॥ एतान्क्रव्यादादीन्वर्जयेत् ॥ कोयष्टिप्लवचक्राह्वबलाकाबक

औोर

उाइ ॥२७॥

चा ३

विष्किरान्॥ वृथा कृशरसंयाव पायसापूपशष्कुलीः॥ ४९ ॥ कोयष्टिः कोबकः॥ प्लवो जलकुक्कुटः॥ चक्राह्वश्चक्रवाकः॥ बलाका बकौ प्रसिद्धौ॥ नखैर्विकीर्य भक्षयंतीति विष्किरास्ते कोरादय एव गृह्यंते॥ लावकमयूरादीनां भक्ष्यत्वात्॥ ग्रामकुक्कुटस्य ग्रामवासित्वादेव निषेधाच्चेति॥ एतान् कोयष्टिकादीन् वर्जयेत्॥ वृथा देवताद्युद्देशमंतरेण साधिताः कृशरसंयावपायसापूपशष्कुलीर्वर्जयेत्॥ कृशरं तिलमुद्गसिद्धमोदनं॥ संयावः क्षीरगुडघृतादिकृतउत्कारिकाख्यः॥ पायसं पयसा शृतमन्नं॥ अपूपः अस्नेहपक्वो गोधूमविकारः॥ शष्कुली स्नेहपक्वो गोधूमविकारः॥ नएचेद नमात्मन इति कृशरादीनां निषेधे सिद्धे पुनरपि धानं प्रायश्चित्तगौरवार्थं॥ ५० ॥ कलविंकं सकोलं कुररं रज्जुदालकं॥ जालपादान् खंजरीटान् अज्ञातांश्च मृगद्विजान्॥ कलविंको ग्रामचटकः॥ ग्रामणी वा सित्वेन प्रतिषेधे सत्यपि उभयचरणत्वात् पुनर्वचनं॥ काकोलो द्रोणकाकः॥ कुररउत्क्रोशः॥ रज्जुदालको वृक्षकुक्कुटः॥ जालपादा जलाकारपादा अजालपादा अपि हंसा सं तीति हंसानां पृथग्वचनं॥ खंजरीटाः खंजनकाः॥ जातितो ये अज्ञाता मृगाः पक्षिणश्च॥ एतान् कलविंकादीन् वर्जयेत्॥ ५१ ॥ चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च॥ मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत्॥ ५२ ॥ चाषाः किकिदिवयः॥ रक्तपादाः कादंबप्रभृतयः॥ सौनं घातनस्थाने सर्वं मांसं भक्ष्याणामपि॥ वल्लूरं शुष्कमांसं॥ भक्ष्याणामपि॥ मत्स्या मीनाः॥ एतांश्चाषादीन् वर्जयेत्॥ चकारान्नालिकात्राणछत्राककुसुंभादीन्॥ नालिका त्राणछत्राककुसुंभो लाबुविड्भवान्॥ कुंभीहतुंबे ताककोविदारांश्च वर्जयेत्॥ तथा कोलवृक्षरूढानि पुष्पाणि च फलानि च॥ विकारवज्ञ यत्किंचित्तत्सर्वं यत्नेन वर्जयेत्॥ तथा वरप्लक्षाश्वत्थदधित्थकपित्थनीयमातुलिंगफलानि वर्जयेत् इत्यादिस्मरणात्॥ एतान् संधिनीक्षीरप्रभृतीननुक्रांतान् अकामैस्त्वहोरात्रं॥ का

ओ ४

वा द का द

क ३

॥२८॥

मतोऽभक्षयित्वा त्रिरात्रमुपवसेत्॥ अकामतस्त्वहोरात्रं शेषेषूपवसेत्त्र्यहमिति मनुस्मरणात्॥ यस्तु नः शंखेनोक्तं॥ बक
बलाकाहंसमद्गुचक्रवाककारंडवकग्रहचटककपोतपारापतपांडुशुकसारिकासारसटिट्टिभोलूककंकरक्तपाददात्यूह
भासवायसकोकिलशार्दूलिकुक्कुटहारीतभक्षणेद्वादशरात्रमनाहारः पिबेदूमूत्रयावकमिति॥ तद्बुद्धिकालाभ्यास
मतिपूर्वसमस्तभक्षणे वा वेदितव्यं॥ ६१॥ पलांडुं विडूराहं च छत्राकं [illegible] ग्रामकुक्कुटं॥ लशुनं गृंजनं चैव जग्ध्वा
चांद्रायणं चरेत्॥ पलांडुः स्थूलकंदनालो लशुनानुकारी॥ विडूराहो ग्रामशूकरः॥ छत्राकं॥ सर्पछत्रं॥ ग्रामकुक्कु
टः प्रसिद्धः॥ लशुनेरसोनं सूक्ष्मश्वेतकंदनालं॥ गृंजनं लशुनानुकारी लोहितसूक्ष्मकंदं॥ एतानि षट्॥ सकृत्का
मतो जग्ध्वा [illegible] भक्षयित्वा चांद्रायणं व[illegible]क्ष्यमाणलक्षणं चरेत्॥ ग्रामकुक्कुटछत्राकयोः पूर्वं प्रतिषिद्धयोरि
हाभिधानं पलांड्वादिसमानप्रायश्चित्तार्थं॥ मतिपूर्वं चिरतराभ्यासे तु॥ छत्राकं विड्वराहं लशुनं ग्रामकुक्कुटं॥ प
लांडुं गृंजनं चैव मत्या जग्ध्वा पतेद्द्विजः॥ इति मनूक्तं॥ ६१॥ अमतिपूर्वाभ्यासे तु॥ अमत्यैतानि षट् [illegible] जग्ध्वा कृ
च्छ्रं चांद्रायणं चरेत्॥ यतिचांद्रायणं वापीति दृष्टं॥ अमतिपूर्वाभ्यासे तु शंखोक्तं॥ लशुनपलांडुगृंजनविड्वराहग्रा
मकुक्कुटकुंभीकभ[illegible]क्षणे द्वादशरात्रं पयः पिबेत्॥ ६२॥ भक्ष्याः पंचनखाः सेधागोधाकच्छपशल्लकाः॥ शशश्च
मत्स्येष्वपि हि सिंहतुंडकरोहिताः॥ तथा पाठीनराजीवसशल्काश्च द्विजातिभिः॥ ६४॥ सेधाश्वावित्॥ गोधा
कृकलासानुकारिणी महती॥ कच्छपः कूर्मः॥ शल्लकः शल्ली॥ शशः प्रसिद्धः॥ पंचनखानां श्ववानरमार्जारादी
नां मध्ये एते सेधादयो भक्ष्याः चकारात् खड्गोपि यथाहुर्गौतमः॥ पंचनखाः शशशल्लकश्वावितगोधाखड्गकच्छ

॥२८

सांतपनं५

60

डा ५

ति ७

पा इति॥ तथा मनुरपि॥ श्वाविधं शल्लकं गोधां खड्गकूर्मशशांस्तथा॥ भक्ष्यान्पंचनखेष्वाहुरनुष्ट्रांश्चैकतोदत इति॥ यत्पुनर्वसिष्ठेन खड्गे तु विवदंत इति॥ अभक्ष्यत्वमुक्तं तच्छ्राद्धादन्यत्र॥ खड्गमांसेर्भवेद्दत्तमक्षय्यं पितृकर्मणीति श्राद्धे फलश्रुतिदर्शनात्॥ तथा मत्स्यानां मध्ये सिंहतुंडादयो भक्ष्याः॥ सिंहतुंडः सिंहमुखः॥ रोहितो लोहितवर्णः॥ पाठीनश्चंद्रकाख्यः॥ राजीवः पद्मवर्णः॥ सहस्रशल्कैः शुक्तया कौर्यवर्तेत इति सशल्काः॥ एते च सिंहतुं[illegible]दयो नियुक्तस्यैव भक्ष्याः॥ पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः॥ राजीवान्सिंहतुंडांश्च सशल्कांश्चैव सर्वशः इति स्मरणात्॥ [illegible] द्विजातिग्रहणं शूद्रव्युदासार्थं॥ अनर्चितं वृ[illegible]था मांसमिति सारस्यद्विजानां धर्मो नुक्ते दानीं चातुर्वर्ण्यप्रसादः॥ अतः शृणुध्वं मांसस्य विधिं भक्षण व[illegible]र्जने॥ मांस्ये से प्रोक्षितादे भक्षणे तद्व्यतिरिक्तस्य चानिषिद्धस्य वर्जने प्रोक्षितादि[illegible]व्यतिरेकेण मांसं न भक्षयामीत्येवं संकल्परूपं विधिं सामस्त्येन प्रमत्तपो हे मुनयः [illegible] शृणुध्वं॥ तत्र भक्षणे विधिं दर्शयति॥ प्राणात्ययेतथा श्राद्धे प्रोक्षितं द्विजकाम्य[illegible]या॥ देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाक्॥ अन्नाभावेन व्याध्यभिभवेन वा मांसभक्षणमंतरेण यदा प्राणबाधा भवति॥ तदा नियमेन मांसं भक्षयेत्॥ सर्वत एवात्मानं गोपायेदिति स्मरक्षणविधा

61

॥२९॥

नात्तस्माद्धृहन्तः पुरापुषः स्वः कामी प्रेयादिति मरणनिषेधाच्च ॥ तथा श्राद्धे [illegible] मांसं निमंत्रितो नियमेन भक्षयेत् ॥ अभक्षणे दोषश्रवणात् ॥ यथाविधि नियुक्तस्तु यो मांसं नात्ति मानवः ॥ स प्रेत्य पशुतां याति संभवानेकविंशतिमिति ॥ प्रोक्षणा [illegible] रव्यश्रौतसंस्कारसंस्कृतस्य पशोः पीगार्थस्याग्निषोमीयादेर्हुतावशिष्टं मांसं

म५

प्रोक्षितं तद्भक्षयेत् ॥ अभक्षणे यागानिष्पत्तेः ॥ द्विजकाम्यया ब्राह्मणभोजनार्थं देवपित्रर्थं च यत्साधितं तेन तानभ्यर्च्य वाशिष्टं भक्षयेन्न दोषभाक् भवति ॥ एवं भृत्यभरणावशिष्टमपि ॥ यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः ॥ भृत्यानां चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पुरेति ॥ मनुस्मरणात् ॥ न दोषभागिति दोषाभावमात्रं वदता अतिथ्याद्यर्चनशिष्टस्याभ्यनुज्ञामात्रं ॥ न प्रोक्षितादिवन्नियम इति दर्शितं ॥ एवमप्रतिषिद्धानामपि शशादीनां प्राणात्ययादिव्यतिरेकेणाभक्ष्यत्वावगमात् शूद्रस्यापि मांसं प्रतिषिद्धं सर्वविधिनिषेधाधिकारोवगम्यते ॥ इदानीं प्रोक्षितादिव्यतिरिक्तस्य वृथा मांसभक्षणेन प्रतिषिद्धस्य भक्षणे निंदार्थवादमाह ॥ वसेत्स नरके घोरे दिनानि पशुरोमभिः ॥ संमितानि दुराचारो यो हंत्यविधिना पशून् ॥ ७५ ॥ अविधिना देवताद्युद्देशमंतरेण यः पशून् हंति ॥ स तस्य पशोर्यावंति रोमाणि तावंति दिनानि घोरे नरके वसति ॥ हंती सर्वेषि चोपि

62

दमदाद्यः। रागवं धास्तु आदि। रज्जु वैदलं आदिनिर्मिता। फलमार्द्रकादि। फलमाम्रकादि। वासो वस्त्रं। विदलं वेणवादि। चर्म अजिनं अजादीनां। विदलचर्मणोर्ग्रहणं त९

च खादकश्चेति घातकाः॥ इति॥ इदानीं वर्जने विधिमाह॥ सर्वान् कामानवाप्नोति हयमेधफलं तथा। गृहेऽपि निवसन् विप्रो मु
निर्मांसविवर्जनात्॥ ७६॥ यः प्रोक्षितादिव्यतिरेकेण मांसं न भक्षयिष्यामीति सत्यसंकल्पो भवति। स सर्वान् कामांस्त
था लभते। प्रत्युतो मिर्विघ्नं प्राप्नोति विशुद्धाशयत्वात्॥ यथाह॥ यथ्यायतेरस्कृतेरंतिबध्नातियत्र चातुर्दयाज्योत्स्नेव घेनयोहित
लभते। धर्मे प्रवृत्तो निर्विघ्नं प्राप्नोति विशुद्धाशयत्वात्॥ यथाह॥ एतदुक्तं सावर्णिरिकसंकल्पस्य। वर्षे वर्षेऽश्वमेधेन यो यजेत शतं स
मा नाकिं च नेति। एतस्यानुषंगिकं फलं। मुख्यफलमाह। हयमेधफलं तथेति। एतच्च साधारणं। रत्नासंकल्पस्य। वर्षे वर्षेऽश्वमेधेन यो यजेत शतं
समाः। मांसानि च न खादेद्यस्तयोः पुण्यफलं सममिति मनुस्मरणात्। तथापि गृहेऽपि निवसन् आलयादिष्वालुचल्लिकामुनिवन्मान नीयो भ
वति मांसत्यागात्। एतच्चेन प्रतिषिद्धमांसविषयं नापि प्रोक्षितादिविषयं। पारिशेष्याद् तिथ्यादौ वर्जने शिष्टाभ्यनुज्ञातविषयमिति॥ ७७॥ इति
भक्ष्याभक्ष्यप्रकरणं॥ ७॥ इदानीं द्रव्यशुद्धिमाह॥ सौवर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनां॥ शाकरज्जुमूलफलवासोविदलचर्मणां॥ पात्राणां च
मासा नां च यारिणा शुद्धिरिष्यते। सौवर्णं सुवर्णकृतं पात्रं। राजतं रजतकृतं। अब्जं मुक्ताफलशंखशुक्त्यादि। ऊर्ध्वपात्रं यज्ञियोलूखलादि
दिग्रहादिसाहचर्यात्। ग्रहाः सोमग्रहाः प्रस्तरादयः। अश्मानिस्कारादयः। यद्यपि मानमुपलक्षणार्थं। पात्राणि प्रोक्षणीपात्रप्रभृतीनि। चमसा
दिः। तत्र च मसादयः। एते पात्रादयः। एतेषां सोवर्णादीनां लेपरहितानां मुच्छिष्टस्पर्शमात्रे वारिणा प्रक्षालनेन शुद्धिः॥ ७७॥ चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारि
णा। चरुश्च स्रुक् स्थाली। स्रुक् स्रुवो प्रसिद्धौ। सस्नेहानि पात्राणि प्राशित्रहरणादीनि। एतानि च लेपरहितानि उष्णेन वारिणा शुद्ध्यन्ति। निर्लेपत्वा च
न। भाण्डमण्डिरेव विशुध्यन्ति। अजासम्युक्तं च राजतं चाप स्थालमिति मनुस्मरणात्। अनुपस्तृतम् सपात्र परिगतं। सलेपानां तु तेजसानां मृण
नां तु सर्वस्यास्मम्यस्य चाम्समानां मृद्भिः क्षारैः तामुनी। विभिरिति मनुना द्रष्टव्यं। मद्यमनोरेव कार्या शुद्धिः। भलाः आपस्तु समुच्चीयन्ते।
मार्जारादिमुखोपघाते तु। लशुनकुक्कुटमुखावमर्शपात्रं न प्रयुंजीत तेन दृष्टव्यं। एतच्च मार्जारादन्यत्र मार्जारस्य तु
वरचमारुत भस्मदग्धिरिति मनुस्मरणात्। स्फ्यस्य शूर्पाजिनधान्यानां मुसलोलूखलानसां। स्पर्शवत्सोऽयज्ञोऽग्नः। सर्वा प्रसिद्धा। एतेषां
मुसलेन वारिणा शुद्धिः। पुनरजिनग्रहणं यज्ञार्थं जिनार्थस्य प्रोक्षणं संहतानां च बहूनां धान्यवाससां। संहतानामुक्तिशुद्धिर्द्रव्याणां
विनां बहूनां वाससां वा प्रोक्षणं। शुद्धिः। सा। बहुत्वं बहूनां वाससां वासो ग्रहणमुक्तशुद्धीनामुपलक्षणं। उक्तशुद्धीनां धान्यवाससः प्राप्तानां बहूनां राशीकृतानां प्रोक्षणेनैव शुद्धिः। बहुत्वं
च स्पृष्टापेक्षया। एतदुक्तं भवति। यदा धान्यानि वस्त्रादीनि वा [illegible]कृतानि तत्र चण्डालादिस्पृष्टानि अल्पानि बहूनि चास्पृष्टानि। स्पृष्टानां
चैव शुद्धिरितिरेव प्रोक्षणमिति। तथा च स्मृत्यन्तरं। वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे। तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति॥

रविवार

63

म२

॥३०॥

यदा पुनः स्पृष्टानां बहूनामस्पृष्टानां चाल्पत्वं । तदा सर्वेषामेव तैर्क्षेप्यं । यथाह मनुः । अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्य
वाससां । प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते । स्पृष्टानामस्पृष्टानां च संख्ये [illegible] त्वेपि प्रोक्षणमेवा बहूनां प्रोक्षण
विधानेनाल्पानां क्षालनेऽस्ति क्रे पुनरल्पानां क्षालनवचनस्य समे प्रक्षालननिवृत्यर्थत्वात् । तार्स्य स्पृष्टमिय दस्पृ
ष्टं ईषत्स्पृष्टमिषदस्पृष्टमित्यविवेके तु क्षालनमेव । पाक्षिकस्यापि दोषस्य परिहर्तव्यत्वात् । अनेकपुरुषोद्धार्या
णां तु धान्यवाससः प्रभूतानां स्पृष्टानामस्पृष्टानां च प्रोक्षणमेवेति निबंधकृतः ॥ ७ ॥ नामिन्नेपानां स्पृष्टानामुद्धृता
नां [illegible] मुत्के तानीमलेपानां शुद्धिमाह । तक्षणं दारुशृंगास्थ्नां गोवालैः फलसंभुवां । मार्ज्जनं यज्ञपात्राणां पाणिना [illegible]
यज्ञकर्मणि ॥ ७१ ॥ दारूणामेषां महिषादिशृंगाणां करिवराहास्थ्नां अस्थिग्रहणेन दंतानामपि ग्रहणं । उच्छिष्टस्ने
हादिलिप्तानां मलमूत्रस्नेहोदकादिभिरनपगतलेपानां । यावन्नापैत्यमेध्याक्तो गंधो लेपश्च तत्कृतः । तावन्मृद्वारि चा
देयं सर्वासु द्रव्यशुद्धिष्विति सामान्यशुद्धिविधानात् । तक्षणं तावन्मात्रापनयनं शुद्धिः फलसंभवानां बिल्वालाबुना
लिकेरादिफलसंभवानां पात्राणां गोवालैः [illegible] र्षणं शुद्धिः । यज्ञपात्राणां स्रुक्स्रुवादीनां यज्ञकर्मणि प्रयुज्यमानानां द
क्षिणेन हस्तेन द[illegible] र्भैर्दूरणपवित्रेण वा यथाशास्त्रं मार्गतया मार्जनेन च कृत्वा । एतच्च श्रौतमुदाहरणं । अन्येषामपि सौ
नर्लादीनां पात्राणां तस्मात्तल्लौकिककर्मसु कृतशौचानामेवागतचुदर्शयितुं यज्ञांगानां [illegible] पुनः कृतशौचानामिदं दशापवि
त्रादिभिर्मार्जनं संस्कारार्थमिति विशेषः । रसदानां सतैलपानामेव केवलविल्लेपापकर्षणे । विनोपहतानाह । सोषैरुदकगोमूत्रैः
शुध्यत्याविककौशिकं । सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा । उपर्युक्तं निक्षारसहितेन गोमूत्रेणोदकेन वा लेपक्षया
आविकं ऊर्णामयं । कौशिकं कोशोत्थं तसरीपट्टादि प्रक्षालितं शुध्यति । उदकगोमूत्रैरिति बहुवचनपक्षादप्युदय
पापस्पर्शे । अंशुपट्टं वल्कलतंतुकृतं सश्रीफलैर्बिल्वफलसहितैः । कुतपः पार्वतीयच्छागरोमनिर्मितः कंबलः । अरिष्टफ
लसहितैः । फेनिलफलसहितैः उदकगोमूत्रैः शुध्यतीत्यनुवर्तते । एतच्चोच्छिष्टस्नेहादि ~~[illegible]~~

दु

शि ६

म८

ना ९

पा

64

म

चर्यादिषु गमनागमने त्रियदा नाशुचिरथ्याकर्दमादिनापि न दुष्यति। तथा योषिन्मुखं संयोगकाले शुचि स्त्रियश्चरति संसर्गे इति स्मरणात्॥ ७॥४

~~[illegible]~~

~~[illegible]~~ यो गोसति नेदिनव्यो। अन्त्योपघाते तु प्रोक्षणादि। क्षालनासहत्वात्तु सर्व

~~[illegible]~~ एवं क्रोशे यकुलपपद क्षौम दुकूलजाः। अन्यशो चामवल्ये ते शोषणप्रोक्षणा

त्रद्वयादिना शौ। नैव शुद्धिरिष्टत्वात्। तथा च देवलः। [illegible] ॥ धान्यपल्लवं स्नुपफलाजैरसेक्षारानुगैरपिस्तैः। क्षौमवद्देवसीरा

[illegible] स्यात् धायायः। नान्येषामेव प्रयुक्तानि क्षालयेत्। शोधनैः स्वकैः। धान्यपल्लवं स्नुपफला। अनन्तस्यात्मोपघाते नैव क्षालनं कार्यममेध्यलेपान्यत्र। तलिनामु

स्यसमान योनि वो। तु [illegible] ग्रहणं नदारव्य तुलिकादिप्राप्त्यर्थं। अनन्तस्यात्मोपघाते नैव क्षालनं कार्यम् [illegible] संमार्जयेन्मृदः। पञ्चाश्ववारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि। नान्यप्य

पधानं च पुष्परक्तांबरं तथा। शोषयित्वातपे किंचित्करैः संमार्जयेन्मृदः। पञ्चाश्ववारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि। नान्यप्य

नाम [illegible] ष्ठानि यथावत्परिशोधयेदिति देवलस्मरणात्। पुष्परक्तानि कुकुमकुसुंभादिरक्तानि पुष्परक्तग्रहणमन्यस्यापि हरि

द्रारक्तस्य क्षालनासहस्य प्राप्त्यर्थं। न मार्जिष्ठादेः। तस्य क्षालनसहत्वात्। शंखिनाप्कलं रागद्रव्यानि प्रोक्षितानि तु शुचि

निनि॥ ७॥ सगौरसर्षपैः क्षौमं पुनःपाकान्महीमयोगौरसर्षपसहितेन उदकगोमुत्रैः क्षौमक्षालनमात्मसंसर्ग त्रनिर्मलक्षो

मं शुध्यति। पुनःपाकेन महीमयं मन्मयघटादि। एतच्चोपिक्षेतुलिप्ते वेदितव्यो। चंडालाद्युपघाते तु त्याग एव। यथाह परा

शरः। चंडालाद्यैस्तु संस्पृष्टं धान्यवस्त्रमथापि वा। प्रक्षालनेन शुध्येत परित्यागान्महीमयाः इति। कारस्तः शुचिः पण्यं भैक्ष्यं

योषिन्मुखं तथा। कारवो रजकचैलधावकसूपघोरादयस्तेषां हस्तः शुचिः। शुचिर्वस्त्रं च तत्साधक मणि वस्त्रधावनादौ स्तः नक्षादि

संभवेऽपि। तथा च कूर्मपुराणे। कारवः शिल्पिनो वैद्या दासी दासस्तथैव च। राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः इति।

पण्यं पण्यार्हं विक्रेयं विक्रेयेभिशिद्यादि जनेभ्रकेत्रजनकरपरिघट्टिनमप्यप्रयतनामवति। स्तन्तकादिनिमित्ते च वणिजां भिक्षाणस

मुखो भैक्ष्यं पतन्द्रलैः दानी अशुद्धि नाहाः॥ ७॥ भशुद्धिमार्जनाद्दाहात्कालाद्गोक्रमणादपि। सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनात्॥

॥ मार्जन्या पांशुत्सरणादिना प्रोत्सारणं मार्जनं। दहनं तृणकाष्ठाद्यैः। कालो यावता कालेन लेपादिक्षयो भवति। तावान्

गोक्रमणं। गवां पादपरिघट्टनं। सेकः क्षीरगोमुत्रगोमयवारिभिः प्रवर्षणं वा। उल्लेखनं। तक्षणं। खननं वा। लेपो गोम

यादिभिः एतैर्मार्जनादिभिः समस्तैर्व्यस्तैर्वा अमेध्यादुष्टा मलिना च भूः शुध्यति। तथा च देवलः। यत्र प्रसूयते नारी

65

॥३१॥

म्रियते दह्यतेपि वा। चांडालाध्युषितं यत्र यत्र विष्टादिसंगतिः। एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्तिता॥
श्वभ्रकूरखरोष्ट्रादिसंस्पृष्टा दुष्टतां व्रजेत्। अंगारतुषकेशास्थिभस्माद्यैर्मलिना भवेदिसमेध्या दुष्टा मलिने
ति। सौ ध्यभूमेस्त्रैविध्यमभिधाय शुद्धिं विभागाद्दर्शयति। पंचधा वा चतुर्धा वा भूरमेध्या विशुध्यति। दुष्टा च्चिना
त्रिधा द्वेधा शुध्यते मलिनैकधेति। यत्र मनुष्या दह्यन्ते। यत्र चंडालैरध्युषितं। तयोः पंचभिर्दहनकालगोक्रम
णसेकोल्लेखनैः शुचिः। यत्र मनुष्या जायंते यत्र म्रियन्ते यत्र चास्युर्नं विष्टादिसंसृतास्तासोदाहवर्जितैः। सेको
खचतुर्भिः। श्वभ्रकरखरोष्ट्रैश्चिरकालमध्युषिता या गोक्रमणसेकोल्लेखनैस्त्रिभिः। नष्टग्रामकुटादि
भिश्चिरकालमधिवासितायाः सेकोल्लेखनाभ्यां शुद्धिः। अंगारतुषादिभिश्चिरकालमधिवासिताया
न्लेखनेन शुद्धिः। मार्जनानुलेपने सर्वत्र समुच्चियेते। एवं गृहमार्जनानुलेपनाभ्यां शुध्यति। गृह
स्य पदपशुपादानसंमार्जनलेपनयोः ज्ञातद्दिवसंज्ञास्यर्थौ॥६॥ गोघ्राते न्ने तथा केशमक्षिकाकी
टदूषिते। सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये। गोघ्राते गोनिश्वासोपहते न्ने अदनियमाच्चोत
धा केशमक्षिकाकीटैर्दूषिते। केशग्रहणं लोमादिप्राप्त्यर्थो। कीटाः पिपीलिकादयः। तदंशस्य मृद्वाय यथासं
भवं प्रक्षेप्तव्यं। शुध्यर्थं। यत्तु गौतमेनोक्तं नित्यमभोज्यं केशकीटापपन्नमिति। तत्केशकीटादिभिः सहय
पक्वं तद्विषयं॥७॥ त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः। भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य
च। त्रपुप्रभृतीनि त्रासि ह्यानि। तेषां क्षारोदकेन आम्लोदकेन वारिणा चोपघातापेक्षया समस्तैर्व्यस्तैर्वा
शुद्धिः कार्या। कांस्यलोहानां भस्मोदकेन। ताम्रग्रहणात् रीतिकाचन्नलोहयोर्ग्रहणं। एकयोनित्वात्। एतच्चा
क्यादिना मन्त्रोदकादिभिः शुध्यभिधानं। ननीयमार्थो। मलसंयोगजं तत् यस्य येनोपहन्यते। तस्य तत्त्वरोधा

ॐ

सा०२ ध्य० नै०६

नं प्रोक्तं सामान्यं द्रव्यशुद्धिप्रकृदिस्याविशेषेण स्मरणात्। अतो न तन्माम्रादेरुच्छिष्टोदकादिलेपस्यान्येनापगमसं
भवे नियमेन आम्लादिना शुद्धिः कार्या। अतएवमनुनाऽमान्येनोक्तं ॥ […] ।ताम्रायस्कांस्यरैत्यानां त्रपुणः सी
सकस्य च शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिरिति। यत्तु भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति।
तन्नाम्रादेः शौचस्य परोक्षार्थं प्रतिपादयितुं नान्यनिषेधाय। यदा तु उपघातातिशयस्तदाम्लोदकादीना
मावृत्तिः। गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च। शुध्यन्ति दशभिः क्षारैः श्वकाकोपहतानि चेति स्मरणा
त्। शुद्धिः कार्या द्रव्यस्य विविना। द्रवस्य द्रवद्रव्यस्य घृतादेः प्रस्थप्रमाणाधिकस्य श्वकाकाद्युपहतस्य अमे
ध्यसंस्पृष्टद्रव्यसंस्पृष्टस्य च प्लावः प्लावनं समानजातीयेन द्रवद्रव्येण प्रान्तप्रतिपूरणं(?) शोः। वह्निः संस्पर्ण(?)
शुद्धिरित्यनुवर्तते। ततो प्लुतस्य त्यागः। बकुलमतं च देशकालापेक्षया वेदितव्या। यथा बौधायनः। देशका
लं तथात्मानं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्। तत्र लिखितं च घृतपहतस्य(?)
उत्पवनं। यथाह मनुः। द्रवाणां […] वसर्वेषां शुद्धिरुत्पवनं स्मृतं। उत्पवनं चात्र वस्त्रान्तरितपात्रप्रक्षे
पः। अन्यथा कीटाद्युपगमस्यासंभवात्। अशुद्धभाजनस्थितस्य मधुदध्यादेः पात्रान्तरानयनाच्छुद्धिः। म
धुदधिपयस्तद्विकाराश्च पात्रात्पात्रान्तरानयनेन शुध्यन्तीति बौधायनस्मरणात्। मधु […] देव […] एवं(?)
पर्युदहस्तात्(?) […] स्य पात्रान्तरानयनं पुनः पचनं च कार्यं। यथाह शंखः। अभ्यवहार्याणां घृतेनाभि
घारितानां पुनः पचनं। एवं स्नेहानां स्नेहवद्रसानामिति। एवं सौवर्णराजतादीनां(?) तत्प्रकरण
प्रतिपादितानां सर्वेषामशुचिष्ठस्नेहाद्युपघाते शुद्धिस्तु केदानीं तेषामेवामेध्योपहतानां शुद्धिमाह।

त० त६ घृता०

67

॥३२॥ क्रा२

ण२

अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धादिकर्षणात्। अमेध्याः शरीरजा मलाः। वसा शुक्रमसृक्
मज्जा मूत्रविट्कर्णविण्नखाः। श्लेष्माश्रुदूषिकाः स्वेदो द्वादशैते नृणां मलाः। तथा मानुषास्थि शवं
विण्मूत्ररेतोमूत्रार्त्तवं वसा। स्वेदाश्रुदूषिकाश्लेष्मा मद्यं चामेध्यमुच्यते। इति मनुदेवलादिप्रणीतपादितानां
तैर्वसादिभिर्लिप्तममेध्याक्तं तस्य मृदा तोयेन च शुद्धिः कर्त्तव्या। गन्धापकर्षणेन। आदिग्रहणाल्लेप
स्यापि ग्रहणम्। तथाह गोतमः। लेपगन्धापकर्षणे शौचममेध्यलिप्तस्येति। स च शुद्धिश्च प्रथमं मृत्तोयैरे
व लेपगन्धापकर्षणे कार्या। अशक्तावन्येन। तदाह पूर्वं मृदा चोत्तिगोलमवचनाच्च। वसादिग्रहणं च
सर्वेषाममेध्यानां प्रतिपादयितुं न समानोपघातत्वे मध्यमूत्रपुरीषेभ्यः श्लेष्माश्रुशोणितैः संस्पृष्ट
नैव शुध्येत् पुनः पाकेन मृन्मयमित्युपघातविशेषाभिधानात्। आमेध्यत्वं चैषां देहा वमलान्य
नारलिवृचनान्नादेहच्युतानामेव न स्वस्थानावस्थितानाम्। पुरुषस्य नाभेरूर्ध्वं करव्यतिरिक्ताङ्गा
नाममेध्यस्पर्शे स्नानम्। यथाह देवलः। मानुषास्थि वसा विष्ठामार्त्तवं मूत्ररेतसी। मज्जानं शोणि
तं स्पृष्ट्वा परस्य स्नानमाचरेत्। तान्येव स्वानि संस्पृश्य प्रक्षाल्याचम्य शुध्यतीति। ऊर्ध्वं नाभेः करौ मु

क्त्वा यदङ्गमुपहन्यते। तत्र स्नानमधस्तात्तु प्रक्षाल्याचम्य शुध्यतीति॥ वाक्शस्तमम्बुनिर्णिक्तमज्ञातं
च सदा शुचिः। श्लुतेपि यथार्थो शौचे मनसा परितोषाद्यत्र शुद्धिसन्देहो भवति। तत्र वाक्शस्तं शु चि।
शुद्धमेतदस्त्विति ब्राह्मणवचनेन शुद्धं भवतीत्यर्थः। अम्बुनिर्णिक्तं। यत्र प्रतिपदोक्ता शुद्धिर्नोक्ता।
तस्य प्रक्षालनेन शुद्धिः। प्रक्षालनासहस्य प्रोक्षणेन। अज्ञातं च सदा यत्किञ्चिदुपहतं न प्रत्युक्तं न क
दाचिदपि ज्ञायते। तच्छुचि। तदुपयोगाददृष्टदोषो नास्तीत्यर्थः। ननु नैतद्विरुध्यते। संवत्सरस्यै

त्रै०

क२

क

न२

68

तन्

कृमपि चरेच्छुध्यर्थं द्विजोत्तमः। अज्ञानतस्तु शुद्ध्यर्थं ज्ञातस्य तु विशेषतः॥ रसदृष्टदोषेपि प्रायश्चित्तप्र
तिपादनात्॥ नैतत्प्रायश्चित्तस्य जग्धविषयत्वात्। दोषाभावस्य चोन्यापयोगविषयत्वात्। शुचि
गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतं। तथा मांसं श्वचांडालक्रव्यादादिनिपातितं॥ महीगतं भूमिस्थमु
दकमेकगवीतृप्तिजनने समर्थं चांडालादिभिरसंस्पृष्टं प्रकृतिस्थं रूपरसगंधस्पर्शान्तरमनापन्नं
आशुचि आचमनादियोग्यं भवति। महीगतमिति अशुचिस्थानगतस्य शुचित्वनिषेधार्थं [illegible] तु अंतरिक्षो
दकस्य शुद्धत्वख्यापनार्थं। [illegible] पुष्कलस्यात् [illegible] ताश्चापि शुध्यंति शुद्धैः पात्रैः समुद्धृताः। एकरात्रोषि
आपः स्त्रियः औपि शुद्धा स्वयं इति देवलवचनात्। तथा चंडालादिखाततडागादौ न दोषः। आतुरैरपि
हृते कूपे शैलो वाप्यादिके तथा। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते इति शातातपस्मरणात्।
तथा मांसं श्वचांडालक्रव्यादादिनिपातितं शुचि। आदिग्रहणात् पु[illegible]सादेरपि ग्रहणं। निपातितग्रहणं
भक्षितस्य निराकरणार्थं। रश्मिरग्निरजश्छाया गोरश्वो वसुधानिलः। विप्रुषो मक्षिकास्पर्शे वत्सः प्रस्न
वने शुचिः॥ रश्मयः सूर्यादिप्रकाशाः कृत्स्नस्य। अग्निः प्रसिद्धः। रजो जादिसंबंधिव्यतिरेकेण तत्र श्च
काकोष्ट्रखरोलूकसूकरग्राम्यपक्षिणां। अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीयते॥ इति दोषश्रवणा
त्। समा[illegible]नादिकृच्छ्रायां छाया वृक्षादेः। [illegible] अश्वाः। वसुधा भूमिः। अनिलो वायुः। विप्रुषाः। अ
विरुया [illegible] विदवः। मुखजा नां वक्ष्यमाणत्वात्। मक्षिकाश्चाप्येते चांडालादिस्पृष्टा अपि स्पर्शे शुचयः। व
त्सः प्रस्र[illegible]वने ऊधोगलद्दुग्धाकर्षणे शुचिः। वत्सग्रहणं बालस्योपलक्षणार्थं। बालैरनुपरिक्रांताः स्त्रि
यो मेध्याः स्मृताः इति वचनात्॥ अजाश्वं मुखतो मेध्यं न गौर्न नरजा मलाः। [illegible] पंथानश्च विशुध्यंति
सोमसूर्यांशुमारुतैः। अजाश्वयोर्मुखं मेध्यं गौर्न नरजा मलाः। नरशब्दो लक्षणया देहमभिधत्ते। नरजा म

न५

ल्क१

गोः५

गोः२

प३

67

॥२३॥

लावसादेयो नमे ध्यानभवंति। पंथानो मार्गाश्चंडाला दिस्पृष्टा अपि रात्रौ सोमांशुभिः। मारुतेन तु
धूयंते दिवा तु सूर्यरश्मिभिर्मारुतेन चा मुखजा विप्रुषो मेध्यास्तथा चमनबिंदवः। श्मश्रु चास्यगतं द
न्तसक्तं यच्चान्तर्मुखिः। मुखजा नाम मुखजाः। श्लेष्माविप्रुषो मेध्या नोच्छिष्टं कुर्वंति। न चेदंगे निपतं
तीति गौतमवचनात्। तथा आचमनतोयबिंदवः पादौ स्पृशंति ते पि मेध्याः। श्मश्रु चास्यप्राप्तं वि
ष्टत [illegible] न करोति। दंतसक्ते चान्नादिकं स्वयमेव च्युतं तत्स्वाद्यं शुचि भवति। अच्युतं तु दंतसमा
तथा च गौतमः। दंतश्लिष्टेषु दंतवदन्यत्र जिह्वाभिम[illegible]र्शनात् प्राक् च्युतेरित्येके। च्युतेष्वास्रा
ववद्विद्यान्निगिरन्नेव तच्छुचिरिति। निगरणं पुनरन्नेनयाज्ञवल्क्यो दंतेन्न्यायेन स्विकल्पं पतेत्।
निगिरन्नेव स्येवकारः। चर्वणे हा चर्मणि न्यम कालाबलचर्णा। [illegible]ष्ठो विलोमको स्पृष्टा वा
सोपि परिधाय चेति। बि[illegible]का चमनं निषेधार्थी। ताबलयरुणफला च पलक्षणीयर्थी यथा हताति
लपः। ताब्लेच फले। चैवमुक्तसंस्त्रावसिष्टको। दंतलग्नस्य संस्पर्शो घृष्टो भवति हि मेरिति। नो
स्नात्वापि तौ तु लेखलेपश्च कार्यथसमर्पणे आचांतः पुनराचामेत्। सोपि परिधाय च। स्नात्वा
पानश्रुतस्वप्नभोजनरथ्योपसर्पणवासोविपरिधानेषु कृते घाचांतः पुनराचामेदिति द्विराच
मेदित्यर्थः। चक्राराजो दनाध्य यनारंभ चापत्याम्नतो कोदिष्टु। तथा च वसिष्ठः। सुप्त्वा भुक्त्वा क्षु
त्वा स्नात्वा रुदित्वा चा चांतः पुनराचामेदिति। मनुरपि। सुप्त्वा क्षुत्वा चभुक्त्वा च ष्ठीवित्वोक्त्वानृतं वचो
पीत्वापो ध्येष्यमाणश्च आचामेत्प्रयतोपि सन्निति। भोजने हा दायपिधिरा चमनं।

छि५

छ्८

प५

ओ८

नो६

70

पानिस्पृष्टमात्रं न श्वभिर्वा यसैः ॥ अध्येष्यमाणस्तु प्रयतोऽपि द्विराचामेदित्यापस्तंबस्मरणात्स्नानपा
नयोरादौ स्पृष्टोऽध्ययनेहारंभे द्विजः । अवेष एव यथोक्ते द्विराचमने ॥ रथ्याकर्दमतोयानि स्पृ
ष्टान्यंत्यश्ववायसैः । मारुतेनैव शुध्यंति पक्वेष्टकचितानि च ॥ रथ्या मार्गमात्रं । कर्दमः कर्पः । तोयमु
दकं । रथ्यास्थितानि कर्दमतोयानि अंत्यैश्चंडालादिभिः श्वभिर्वायसैश्च स्पृष्टानि मारुतेनैव शुद्धि
मुपयांति । बहुवचनं तज्जातीयगोमयक्षारकेशादिग्रहणार्थं यथ वलगृहादीनि । चंडालादिस्पृष्टानि मारु
तेनैव शुध्यंति । एतच्च प्रोक्षणं संहतानामिति स्फुटं प्रोक्षणनिषेधार्थं ॥ तृणकाष्ठपर्णादिमयानां
तु प्रोक्षणमेवेति द्रव्यशुद्धिप्रकरणं ॥ ६ ॥ इदानीं दानधर्मं प्रतिपादयिष्यंस्तदंगभूतपात्रप्रतिपादना
र्थं तस्य प्रशंसामाह । तपस्तप्त्वासृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये । तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च ॥ ब्रह्मा
हिरण्यगर्भः कल्पादौ तपस्तप्त्वा ध्यानं कृत्वा कान्मुख्यान्सृजामीति पूर्वं ब्राह्मणान्सृष्टवान् । किमर्थं वेदगु
प्तये वेदरक्षणार्थं पितृणां च देवानां च तृप्त्यर्थं अनुष्ठानोपदेशद्वारेण धर्मसंरक्षणार्थं च । अतस्तेभ्यो दत्त
मक्षयफलं भवतीत्यभिप्रायः । सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः । श्रुताध्ययनसंपन्नाः उत्कृष्टाः ।
तेभ्योऽपि क्रियापरा विहितानुष्ठानशीलाः । तेभ्योऽप्यध्यात्मवित्तमाः वक्ष्यमाणमार्गेण शमदमादियोगेना
त्मज्ञाननिरताः श्रेष्ठा इत्यनुषज्यते ॥ ९७ ॥ एवं जातिविद्यानुष्ठानतपसां प्रशंसामुखेनैकैकयोगे पा
त्रत्वमभिधायाधुना तेषां समुच्चये संपूर्णपात्रतामाह । न विद्यया केवलया तपसा वापि पात्रता । य
त्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितं ॥ केवलया विद्यया श्रुताध्ययनतपसा नेन संपूर्णपात्रता ।

म२

तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः ॥ सर्वस्य क्षत्रियादेः ब्राह्मणाः प्रभवः श्रेष्ठाः । जात्या कर्मणा च ॥ ब्राह्मणेष्वपि श्रुताध्ययने॰

॥३४॥

नापि केवलेन तपसा शमदमादीना। अपिशब्दात् केवलेनानुष्ठानेन केवलया जात्या चनैव संप्रदानपात्रता। कथं तर्हि। यत्र एते स्युः तेवल्लमनुष्ठानादिमे चोभे विद्यातपसी स्तः। चशब्दात् ब्राह्मण जातिश्च। तदेवमन्वादिभिः संप्रदानपात्रं प्रकीर्तितं। हि यस्मादतः परं श्रेष्ठं पात्रं नास्ति। अत्र च जाति विद्यानुष्ठानतपः समुच्चयानामुत्तरोत्तर प्राशस्त्येन फलतारतम्यं द्रष्टव्यं। गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितं। नापात्रे विदुषा किंचित् आत्मनः श्रेय इच्छता। पूर्वोक्तेपात्रे गवादिकमर्चितं। शास्त्रोक्तोदकदाना दीति कर्तव्यता सहितं देयं। अपात्रे क्षत्रियादौ ब्राह्मणे च

नं७ पतितादौ विदुषा पात्रविशेषेण फलविशेषज्ञातात्रेयः संप्रदानमिच्छता किंचित् स्वल्पमपि न दातव्यं। श्रेयोग्रहणात् अपात्रे दानेपि किंचित्फलमस्तीति सूचितं। यथाह द्वैपायनः। अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमविज्ञातं तत्तामसमुदाहृतं। अपात्रे न दातव्यमित्ययं वदता विशिष्टदेशकालसन्निधौ पात्रस्यासन्निधाने द्रव्यस्य वा तदुद्देशेन त्यागो न तस्मै प्रति द७

हू५ श्रवणं वा त्वा समर्पयेन्न त्वपात्रे दातव्यमिति सूचितं। तथा प्रतिश्रुतमपि पश्चात् पतितत्वादि संयोगे ज्ञाते न देयं। प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यादिति निषेधात्। अपात्रे दाननिषेधमुक्त्वा प्रतिगृहीतारं प्रत्याह। विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः। गृह्णन् प्रदातारमधो नयत्यात्मानमेव च॥ विद्यातपोभ्यां हीनेन प्रतिग्रहः सुवर्णादिर्न तु ग्राह्यः। यस्मात् विद्या हीनः प्रतिगृह्णन् दातारमात्मानं चाधो नरकं प्रापयन्ति॥ ४॥ गवादि पात्रे दातव्यमित्युक्तं तत्र विशेषमाह। दातव्यं प्रत्यहं पा दि२

72

तन२

त्रे निमित्तेषु विशेषः। याचितेनापि दातव्यं श्रद्धाफलं तु शक्तितः। प्रतिदिनं स्वशक्त्यनुसारेण
यथोक्तविधिनानेन पात्रे गवादिकं स्वकुटुंबाविरोधेन दातव्यं। निमित्तेषु च ग्रहोपरागादिषु विशेषतो
धिकं यत्नेन दातव्यं। याचितेनापि श्रद्धापूर्वमनसूयया पापविशुद्धये तु शक्त्या दातव्यं। याचितेनापि
ते५ दातव्यमिति वदता यथोक्तं पात्रं स्वयमेव गत्वा आहूय वा यद्दानं तन्महाफलमित्युक्तं तथा च स्मर द्वा४
णं। गत्वा यद्दीयते दानं तदनंतफलं स्मृतं। सहस्रगुणमाहूय याचितेतु तदर्द्धकं। इति। गवादिकं देयमि
त्युक्तं तत्र गोदाने विशेषमाह। हेमशृंगी शफै रौप्यैः सुशीला वस्त्रसंयुता। सकांस्यपात्रा दातव्या
स८ क्षीरिणी गौः दक्षिणा। हेममये शृंगे यस्याः सा हेमशृंगी। शफौ रौप्यौ राजतैः खुरैः संयुता वस्त्रेण संयुता। च८
कांस्यपात्र स[illegible]हिता बहुक्षीरा गौर्यथाशक्ति दक्षिणासहिता दातव्या। गोदानस्य फलमाह। दा
तास्याः स्वर्गमाप्नोति वत्सरान् रोमसंमितान्। कपिला चेत्तारयति भूयश्चासप्तमं कुलं। अस्या गोः
भि६ रोमसंख्यान्[illegible] रोमसंख्याकान् वत्सरान् स्वर्गमाप्नोति दाता। सा यदि कपिला तदा न केवलं दातारं ता
रयति। किंतु कुलमप्यासप्तमं सप्तमपर्यं[illegible] पित्रादीन् षट् पुत्रादीन् षट् आत्मानं च सप्तमं
अप्यर्थे भूयः शब्दः। सवत्सारोमतुल्यानि युगान्युभयतोमुखी। दातास्याः स्वर्गमाप्नोति विधिना द पूर्वेण४
दत्। सवत्सा वत्सेन सह वर्तत इति सवत्सा। तस्या रोमतुल्यानि वत्सस्य गोश्च यावंति रोमाणि ता
वत्संख्याकानि युगानि उभयतोमुखीं ददत् स्वर्गमाप्नोति। अनुभवति। पूर्वेण विधिना दा
ता चेत्। का पुनरुभयतोमुखी वृथैवा तद्दानं महाफलमित्यत आह। यावद्वत्सस्य पादौ द्वौ मुखं यो

कृतत्रेतादीनि२ ख्या५

73

।।२५।।

ग

णिप

न्या चदृश्यते। तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुंचति। गर्भाद्विर्गच्छतो वत्सस्य द्वौ पादौ मुखं
च यावत्कालं योन्यां दृश्यते। तावत्कालमुभयतोमुखमस्या अस्तीति उभयतोमुखी यावत्का
लं गर्भं न मुंचति। तावत्सा गौः पृथिवी समा विज्ञेया। अतः फलातिशयो मुक्तः। यथाकथंचिद्वत्सां गां धे
नुं वा धेनुमेव वा। अरोगामपरिक्लिष्टां [illegible] दाता स्वर्गे महीयते। यथाकथंचित् हेमशृंगाद्य
संभवे पि यथासारं वयपूर्वोक्तेन विधिना। धेनुदो गां अ धेनुं अवंध्यां अरोगां रोगरहितां अपरिक्लिष्टां
असंतां दुर्बलां गां दत्वा दाता स्वर्गे महीयते। पूज्यते। गोदानसमान्याह। श्रांतसंवाहनं रोगीपरिचर्या
सुरार्चनं। पाददौचं द्विजोच्छिष्टमार्जनं गोप्रदानसमं। श्रांतस्यासनशयनादिदानेन श्रमापनयनं
श्रांतसंवाहनं। रोगिणां परिचर्या यथाशक्त्यौषधादिदानेन। सुरार्चनं। हरिहरहिरण्यगर्भादीनां
गंधमाल्यादिभिराराधनं। पादशौचं द्विजातीनां समानानामधिकानां च। तेषामेवोच्छिष्टसंमार्ज
नं। एतान्यनंतरोक्तेन गोदानेन समानि। भूदीपाश्चान्नवस्त्राणि सतिलसर्पिः प्रतिश्रयान्नैवे
शिकं स्वर्ण [illegible] धुर्यान् दत्वा स्वर्गे महीयते। भूः फलप्रदा। दीपो देवतायतनादिषु। प्रतिश्रयः प्रवासि
नामाश्रयः। निवेशार्थं गार्हस्थ्योपयोग्यकन्यादि दीयते। तन्नैवेशिकं। स्वर्णं सुवर्णं धुर्यो भारसहो
बलीवर्दः शेषं प्रसिद्धं। एतानुदपादीन् दत्वा स्वर्गलोके पूज्यते। स्वर्गफलं च अहदानादीनां न
फलांतरस्य दासार्थ्यं। लिंचित्कृते पापे ज्ञानतोज्ञानतोपि वा। अपि गोचर्ममात्रेण भूदानेन न
विशुध्यति। तथा। वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः। तिलप्रदः प्रजामिष्टां दीपदश्चक्षु

दी ४

रुत्तमं । वासोदश्चन्द्रसालोक्यं अश्वि सालोक्यमश्वदः स्यादिपूर्लो तुरगप्रदानं । गोचर्मलक्षणं
च बृहस्पतिना दर्शितं । दशहस्तेन दंडेन त्रिंशद्दंडं निवर्तनं । दश तान्येव गोचर्म दत्वा स्वर्गे महीयते ॥
इति । गृहधान्याभयोपानच्छत्रमाल्यानुलेपनं । यानं वृक्षं प्रियं शय्यां दत्वात्यंतसुखी भवेत् ।
गृहं [illegible] धान्यानि व्रीहिगोधूमा[illegible]दि । अभयं भीतत्राणं । उपानहौ छत्रं । माल्यं मल्लिकादि । अनु
लेपनं कुंकुम चंदनादि । यानं रथादि । वृक्षं अनुजीव्यमाम्रादिकं । प्रीयं धर्मादिकं । शय्यां च दत्वा
अत्यंतमतिशयेन सुखी भवति ॥ न च हिरण्यादिवद्रत्नदानं [illegible] शक्यता धर्मस्य दानासंभव ॥ मदि
भूमिदानादावपि समानत्वात् । स्मर्यते ऽपि धर्म [illegible] न श्रवणात् देवतानां [illegible] गुरूणां च माता दा ६
पित्रोस्तथैव च । पुण्यं देयं प्रयत्नेन नापुण्यं चोदितं क्वचित् । अपुण्यदानेन न तु देववे [illegible] नो । प्रति ३८
गृहीतुरपि लोभादिना प्रवृत्तस्य यः पापमवलं[illegible]वा प्रतिग्रहान्निवृत्तिः । गर्हिताचर
णात्तस्य पापं नावसमाश्रयेत् सामि द्विगुणसाहस्रमानं त्वं च प्रदोषं [illegible] तस्मरणात् । इह
च सर्वत्र देशकालपात्रविशेषाद् दानविशेषाच्च आवृत्ति वीर्य बाच्च फलतारतम्यं द्रष्टव्यं । स
र्वधर्ममयं ब्रह्मप्रदानेभ्योधिकं यतः । ~~[illegible]~~
~~[illegible]~~ सामा । त्रिमधु [illegible] देय देशस्त [illegible] चातद्रुता चरणे
~~[illegible]~~ तद्ददत्समवाप्नोति ब्रह्मलोकमपि च

देयविशेषात् ४

75

॥३६॥

च्युतं। यस्मात्सर्वं धर्ममयं ब्रह्म अवबोधकत्वेन तस्मात्तद्दानं सर्वदानेभ्योऽधिकं। अतस्त
द्दत् अध्यापनादिद्वारेण ब्रह्मलोकमवाप्नोति अविच्युतं। विच्युतिर्यत्र न भवति। आभू
तसंप्लवं ब्रह्मलोके निष्ठतः स्थैर्य्यः। अत्र च ब्रह्मदाने तत्त्वापादनमात्रं दानं स्वत्वनिवृत्तेः क
र्तुमशक्यत्वात्। दानेन फलमुक्तमिदानीं दानव्यतिरेकेणापि दानफलावाप्तिहेतुमाह। प्रतिग्र
हसमर्थोऽपि नादत्ते यः प्रतिग्रहं। ये लोका दानशीलानां स तानाप्नोति पुष्कलान्॥ यः पा
त्रभूतोऽपि आमं प्रतिग्रहं सुवर्णादिकं नादत्ते न स्वीकरोत्यसौ यद्यद्दानं नौपादनेन तत्तद्दानशी
लानां ये लोकास्ताननुसमग्रानाप्नोति। इदानीं सर्वप्रतिग्रहे निवृत्तिप्रसंगेनापवादमाह॥ छ॥ ५
कुशाः शाकं पयो मत्स्या गंधाः पुष्पं दधि क्षितिः। मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च॥ धा
नाभ्रष्टाः स्तुतुलाः। क्षितिर्मृत्तिका। शेषं प्रसिद्धं। एतत्कुशादिकं स्वयमुपनीतं न प्रत्याख्येयं॥
चकारा[illegible]हादि[illegible]यां गृह[illegible]। कुशान् गंधान् न पः पुण्यं मणीन् दधि। मत्स्यान् धानाः पयो मांसं
शाकं चैव न निर्णुदेत्। न यारं यो दक्षं मूलफलं अन्नमभ्युद्यतं च यत्। सर्वतः प्रतिगृह्णीयान्म
ध्वथाभयदक्षिणामिति मनुस्मरणात्। किमिति न प्रत्याख्येयमाह। अयाचिता[illegible]तंया[illegible]हृतं
विद्भि[illegible]नत्कर्मणः। अन्यत्र कुलटाषंढपतितेभ्यस्तथा द्विषः॥ तस्मादयाचितमेनत्कुशाद्या[illegible]तं दु

ख३ ह६ न५ नृ४ नृ३ ह२ षू१ ह६

76

घृतकर्मणोपि संबंधियाह्यं । मिथुनं यथोक्तकारिणः तस्मान्न प्रत्याख्येयं । अन्यत्र कुलटास्वं६
पतितेभ्यः ग्रा ग्राह्यं । कुलाकुलमटनीति कुलटा स्वैरिण्यादिका षंढस्तृतीया प्रकृतिः । प्रतिग्रहस्य
वृत्तेरपवादान्तरमाह । देवातिथ्यर्चनकृते गुरुभृत्यार्थमेव च । सर्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थ
मेव च । देवातिथ्यर्चनादेरावश्यकत्वात्तदर्थमनापत्कारणस्यापि तोस्य कुत्सित वर्ज्ज सर्वतः प्रति
त्रा ५ गृह्णीयात् । गुरवो मातापि[illegible]दयः । भृत्याभरणीया भार्यापुत्रादयः ॥ छ ॥ इति दानप्रकरणं ॥ छ ॥ ॥
इदानीं श्राद्धप्रकरणमारभ्यते । श्राद्धं नाम अदनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देशेन श्रद्धया त्या
गः । तच्च द्विविधं । पार्वणमेकोद्दिष्टमिति । तत्र त्रिपुरुषोद्देशेन यत्क्रियते तत्पार्वणं । एकपुरुषोद्देशेन
क्रियमाणमेकोद्दिष्टं । पुनश्च त्रिविधं । नित्यं नैमित्तिकं काम्यमिति । तत्र नित्यं । नियतनिमित्तोपाधौ चो
दितमहरहरमावास्याष्टकादिषु । अनियतनिमित्तोपाधौ चो[illegible]दितं नैमित्तिकं । यथा पुत्रजन्मादि
षु । फलकामनोपाधौ विहितं काम्यं । यथा स्वर्गादिकामानां कृत्तिकादिषु नक्षत्रेषु । पुनश्च पंचवि
धं । अहरहः श्राद्धं । पार्वणं । वृद्धिश्राद्धं । एकोद्दिष्टं सपिंडीकरणं चेति । तत्राहरहः श्राद्धं अन्नं पितृ
मनुष्येभ्य इत्यादिनोक्तं । [illegible]षु पार्वणं वृद्धिश्राद्धं दर्शयिष्यन् तयोः कालानाह । अमावास्याष्टका वृद्धिः
कृष्णपक्षोयनद्वयं । द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः ॥ व्यतिपातो गजच्छाया ग्रहणं चंद्रसू

अरनोर व१

77

॥३७॥

न१

र्ययोः। श्राद्धप्रतिरुचिश्चैव श्राद्धकालाः प्रकीर्तिताः। यत्र दिने चंद्रमो न दृश्यते सा अमावस्या। तस्यां मुहूर्त
व्यापिन्यामपराह्णव्यापिनी ग्राह्या। अपराह्णः पितॄणामिति वचनात्। अपराह्णश्च पंचधा विभक्ते
दिने चतुर्थो भागस्त्रिमुहूर्तः। अष्टका [illegible] अतस्त्वः। हेमंतशिशिरयोश्चतुर्णामपरपक्षाणाम् अष्टमी अष्टका
इत्याश्वलायनोक्ताः। वृद्धिः पुत्रजन्मादिः। कृष्णपक्षोऽपरपक्षः। अयनद्वयं दक्षिणोत्तरसंज्ञं। द्रव्यं कूरारस्मां
सादिकं। ब्राह्मणसंपत्तिर्वक्ष्यमाणा। विषुवद्वयं मेषतुलाख्योः सूर्यागमनं। सूर्यसंक्रमः। आदित्यस्य राशेः राश्यं
तरसंक्रांतिः। व्यतीपातः। अयनविषुवतोः संक्रांतित्वेन सिद्धेऽपि पृथग्ग्रहणं दानफलातिशयप्रतिपादनार्थं। व्यति
पातो योगविशेषः। गजच्छायायां दद्युः पितृदैवत्ये हंसश्चैव करे स्थिते। याम्या तिथिर्भवेत्सा हि गजच्छाया
प्रकीर्तिता इति परिभाषिता॥ छा॥ हस्तिच्छायेति केचित्। सैंहिकेयग्रस्ते काल प्रक्रमात्। ग्रहणं चंद्रसूर्योप
रागः। यदा च कर्तुः श्राद्धं प्रति रुचिर्भवति। तदापि च शास्त्रान्तरे युगादिप्रभृतयः एते श्राद्धकालाः। यद्यपि च
द्रव्यसूर्यग्रहे नाद्यादिति ग्रहणे भोजननिषेधस्तथापि भोक्तृदोषो दातुरभ्युदयः॥ अहरहः श्राद्धमप्यति
क्रवक्ष्यमाणं चतुर्विधं श्राद्धेषु ब्राह्मणसंपत्तिमाह॥ अग्र्याः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद्युवा। वेदा

कृत्ये४

र्थवित् [illegible] ष्ठसामा [illegible] त्रिमधुस्त्रिसुपर्णिकः। सर्वेषु वेदेषु ऋग्वेदादिषु। अनन्यमनस्कतया पूर्वस्वलि
ताध्ययनक्षमा अग्र्याः। श्रोत्रियः श्रुताध्ययनसंपन्नः। वक्ष्यमाणब्रह्मयोबे ससो ब्रह्मविन्। युवा मध्य
मवयस्कः। सर्वस्य वेदस्य वि[illegible]षणं। मंत्रब्राह्मणयोरर्थं जानातीति वेदार्थवित्। ज्येष्ठसामैक्यवित्। यस्तदध्ययनागत्र
तं चैतद्व्रताचरणेन यस्तदधीते स ज्येष्ठसामा। त्रिमधु ऋग्वेदैकदेशस्तद्व्रतं चातद्व्रताचरणेनाध्यायी त्रिमधुः॥
॥

ज्ञेर

तिसामर द१

78

त्रिसुपर्णमृग्यजुर्घोरेकदेशस्तद्व्रतं च तद्व्रताचरणेन यस्तदधीते स त्रिसुपर्णिकः ॥ एते ब्राह्मणाः श्राद्धसंपदः इति
वक्ष्यमाणेन इति क्रियया संबंधः ॥ स्वस्त्रीय ऋत्विग्जामा[illegible]स्याज्यश्वशुरमातुलाः ॥ त्रिणाचिकेतदौहित्रशिष्यसंबं
न३ धिबांधवाः ॥ स्वस्त्रियो भागिनेयः कलिर्गुणलक्षणः ॥ जामाता दुहितुर्भर्ता ॥ त्रिणाचिकेतं यजुर्वेदैकदेशस्तद्व्रतं च तद्
व्रताचरणेन तदध्यायि त्रिणाचिकेतः ॥ अन्यत्स्पष्टं ॥ एते च पूर्वोक्ता अग्न्याद्याः त्रियाद्यासो वेदे वेदितव्याः ॥ अनुकल्पस्त्वयं
ज्ञेयः सदा सद्भिरनिंदितः ॥ इत्यभिधाय मनुना स्वस्त्रीयादीनामभिहितत्वात् ॥ कर्मनिष्ठास्तपोनिष्ठाः पंचाग्निब्रह्मचारि
णः ॥ पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसंपदः ॥ कर्मनिष्ठा विहितानुष्ठानपराः ॥ तपोनिष्ठाः तप[illegible]शीलाः ॥ सभ्या
वसथ्यौ त्रेताग्नयश्च यस्य संति स पंचाग्निः ॥ पंचाग्निविद्याध्यायी वा ब्रह्मचारी ॥ उपकुर्वाणको नैष्ठिकश्च ॥ पितृमा
तृपराः ॥ तच्छुश्रूषापराः ॥ चकारात् ॥ ज्ञाननिष्ठादयश्च ब्राह्मणाः न क्षत्रियादयः ॥ श्राद्धसंपदः ॥ श्राद्धस्याक्षयफलसंपत्ति
हेतवः ॥ वर्ज्यानाह ॥ रोगी हीनातिरिक्तांगः काणः पौनर्भवस्तथा ॥ अवकीर्णी कुंडगोलौ कुनखी श्यावदंतकः ॥ रोगी म व६
हारोगोपसृष्टः ॥ हीनमतिरिक्तं वाऽङ्गं यस्यासौ हीनातिरिक्तांगः ॥ एकेन अक्ष्णा यो न पश्यति असौ काणः ॥
एतस्मादेवांधबधिरविकृष्टप्रजननस्खलतिदुश्चर्मिप्रभृतयो निरस्ताः ॥ पुनर्भूरुक्तलक्षणा तस्यां जातः पौनर्भ न५
वः ॥ अवकीर्णो ब्रह्मचार्येव स्खलितब्रह्मचर्यः ॥ कुंडगोलौ ॥ परदारेषु जायेते द्वौ सुतौ कुंडगोलकौ ॥ पत्यौ जीवति कुं
डः स्यान्मृते भर्तरि गोलकः ॥ इत्येवंलक्षणकौ ॥ कुनखी संकुचितनखः ॥ श्यावदंतकः ॥ स्वभावकृष्णदशनः ॥ एते श्रा
द्धे निंदिता इति वक्ष्यमाणेन संबंधः ॥ भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः ॥ मित्रध्रुक् पिशुनः सोमविक्र
यी परिविंदकः ॥ वेतनग्रहणेन योऽध्यापयति स भृतकाध्यापकः ॥ वेतनदानेन च योऽधीते सोऽपि ॥ क्लीबो नपुंसकः ॥

दा ४ ॥३८॥ ॥३८५ वे ५

असद्भिः सद्भिर्वा दोषैः कन्यां दूषयति स कन्यादूषी। सता असता वा ब्रह्महत्यादिनाऽभियुक्तोऽभिशस्तः।
मित्रध्रुक् मित्रद्रोही। परदोषसंकीर्तनशीलः पिशुनः। सोमविक्रयी। यज्ञे सोमस्य विक्रेता। परिविंदकः
परिवेत्ता। ज्येष्ठे अकृतदारे कृताग्निपरिग्रहे वा यः कनीयान् दारपरिग्रहमग्निपरिग्रहं वा कुर्यात् स प
रिवेत्ता। ज्येष्ठस्तु परिवित्तिः। यथाह मनुः। [illegible]ग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते। परिवेत्ता स विज्ञेयः परि
वित्तिस्तु पूर्वजः॥ एवं दारत्यागकारणेऽपि। परिवित्तिः परिवेत्ता यया च परिविद्यते। सर्वे ते नरकं यान्ति दातृ
याजकपंचमाः इति वचनात्। मातापितृगुरुत्यागी कुंडाशी वृषलात्मजः। परपूर्वापतिः स्तेनः कर्मदुष्टाश्च निं
दिताः। विना कारणेन मातापितृगुरून् यस्त्यजति स मातापितृगुरुत्यागी। एवं भार्यासुतत्याग्यपि। च द्रो
च मातापितरौ साध्वीं भार्यां सुतं शिशुम्। अपकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्। [illegible] इति समानेन निर्दिष्टात्।
कुंडस्यान्नं यो भुंक्ते। असौ कुंडाशी। एवं गोलकस्यापि यस्तयोरन्नमश्नाति स कुंडाशी प्रकीर्तितः। इति वचना
त्। वृषलो निंद्यकर्मरतः तस्मात् वृषलात्मजः। परपूर्वा पुनर्भूः। तस्याः पतिः परपूर्वापतिः। अदत्तादायी स्तेनः। क
र्मदुष्टाः शास्त्रविरुद्धकारिणः। चकारात् क्रीतनवदेवकुलेप्रस्तुतयः। एते श्राद्धे निंदिताः प्रतिषिद्धाः। अन्याः स
र्वे [illegible] देषिस्त्यादीनां श्राद्धयोग्यब्राह्मणप्रतिपादने नैषां निरिक्ता नाम योग्यत्वे सिद्धे पुनः केषांचिद्योग्या
दीनां प्रतिषेधवचनमुक्तलक्षणब्राह्मणसंभवे प्रतिषेधपरहितानां प्राप्त्यर्थं। [illegible] ब्राह्मणं
[illegible] पुनः पार्वणमाह। निमंत्रयेत पूर्वेद्युर्ब्राह्मणानात्मवान् शुचिः। तैश्चापि संयतैर्भाव्यं मनोवाक्कायकर्म
भिः। पूर्वेद्युः कृतान् ब्राह्मणान् श्राद्धक्षणः क्रियतामिति पूर्वेद्युर्निमंत्रयेत। साधनानां क्षणम[illegible]भ्युपगम
येदपरेद्युर्वा। पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते। निमंत्रयेत त्र्यवरान् सम्यग्विप्रान् यथोदितानिति।

80

मनुस्मरणात्॥ आत्मवांश्चेन्निरोक्तोस्मरादिरहितश्चेत्तु॥ यद्वा॥ आत्मवान्नियतेंद्रियो भवेत्॥ शुचिः प्रय
तः श्वन्निर्नैरपि निमंत्रितैर्ब्राह्मणैर्मनोवाक्कायव्यापारेश्च संयतैर्नियतैर्भवितव्यं॥ अपरेह्नि समभ्यर्च्य स्वाग [सार]
तेनागतान् स्तुतान् पवित्रपाणिराचांतानासनेषूपवे शयेत्॥ अपराह्णे तु कुलक्षणे तान् निमंत्रितान् ब्रा
ह्मणानाहूय स्वागतवचनेन पूजयित्वा कृतपादधावनानाचांतान् कृतेष्वासनेषु पवित्रपाणिः पवित्रपाणीनु
पवेशयेत्॥ यद्यपि सामान्येनापराह्णः स्मृतः॥ तथापि कुतपात्प्रारभ्य तदादि पंचमुहूर्तेषु परिसमापनं श्रे
यस्करं॥ अह्नो मुहूर्ता विख्याता दश पंच च सर्वदा॥ तत्राष्टमो मु [illegible] हूर्तो यः स कालः कुतपः
स्मृतः॥ मध्याह्ने सर्वथा यस्मान्मंदीभवति भास्करः॥ तस्मादनंतफलदस्तत्रारंभो विशिष्यते॥ ऊर्ध्वं मुहूर्तात् कु
तपाद्यन्मुहूर्तचतुष्टयं॥ मुहूर्तपंचकं ह्येतत् स्वधाभवनमिष्यते॥ इति वचनात्॥ तथान्यदपि श्राद्धोपयोगि तु पस [कु]
प्तकमुक्तं॥ मध्याह्नः खड्गपात्रं च तथा नेपालकंबलः॥ रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः॥ पापं कुत्सि
तमित्याहुस्तस्य संतापकारिणः॥ अष्टावेते यतस्तस्मात् कुतुपा इति विश्रुता इति॥ युग्मान् दैवे यथाशक्ति पि
त्र्ये युग्मांस्तथैव च॥ परिश्रिते शुचौ देशे दक्षिणाप्रवणे तथा॥ दैवे आभ्युदयिके श्राद्धे युग्मान् समान् ब्राह्मणानु
पवेशयेत्॥ कथं॥ यथाशक्ति रात्रिमनतिक्रम्य॥ तत्रैव श्वदेवे द्वौ॥ मात्रादीनां तिसृणामेकैकस्य द्वौ द्वौ॥ तिसृ
णां वा द्वौ॥ एवं पित्रादीनामेकैकस्य द्वौ द्वौ॥ त्रयाणां वा द्वौ॥ एवं मातामहादीनां चैवमित्रेयेपि वैश्वदेवं तंत्रं वा॥ पित्र्ये
पार्वणश्राद्धे अयुग्मान् विषमानुपूर्वेशयेदिति संबध्यते॥ एतच्च परिश्रिते सर्वतः प्रच्छादिते शुचौ गोमयादि
नोपलिप्ते दक्षिणाप्रवणे दक्षिणतो वनते देशे कार्यं॥ ॥ द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेव वा॥ मातामह

॥३९॥

नामप्येवंतंत्रंवावैश्वदेविकं॥अयुग्मानृपित्र्येइतिपार्वणश्राद्धांगभूतवैश्वदेवेप्ययुग्म प्रसंगइदमारभ्यते॥द्वौदैवइति॥दैवे वैश्वदेवेद्वौब्राह्मणौप्राङ्मुखावुपवेश्यौ॥पित्र्येयुग्मानित्यविशेषप्रसंगेविशेषउच्यते॥त्रयःपित्र्यइति॥पित्र्येपित्रादिस्थानेत्रयउदङ्मुखाउपवेश्याः॥पक्षांतरमाह॥एकैकमेववावैश्वदेवेपित्र्येच॥एकमेकमुपवेशयेत्॥संभवतोविकल्पः॥मातामहानामपिश्राद्धंनिमंत्रणादि द्वौदैवेप्राकत्रयःपित्र्यउदगेकैकमेववेत्येवमंतं पितृश्राद्धवत्कर्त्तव्यं॥पितृश्राद्धमातामहश्राद्धेचवैश्वदेविकं॥वैश्वदेवंतंत्रेणवाकर्त्तव्यं॥यदाद्वावेवब्राह्मणौलब्धौतदावैश्वदेवेपात्रंप्रकल्प्यो भयत्रैकैकंब्राह्मणंनियुज्यते॥यथाहवशिष्ठः॥यद्येकंभोजयेच्छ्राद्धेदैवंतत्रकथंभवेत्॥अन्नंपात्रेसमुद्धृत्यसर्वस्यप्रकृतस्यच॥दैवतायतनेकृत्वाततःश्राद्धंप्रवर्त्तयेत्॥प्रास्येदन्नंतदग्नौतुदद्याद्वाब्रह्मचारिणेइति॥एकएवय दाविप्रोद्वितीयोनोपपद्यते॥पितॄणांब्राह्मणोयोज्योदैवेत्वग्निंनियोजयेत्॥पाणिप्रक्षालनंदत्वाविष्टरार्थंकुशानपि॥आवाहयेदनुज्ञातोविश्वेदेवासइत्यृचा॥तदनंतरंविश्वेदेवार्थंब्राह्मणहस्तेजलंविष्टरार्थंकुशांश्च युग्मान्दद्द्विगुणितानासनेदक्षिणतोदत्वाविश्वेदेवानावाहयिष्येइतिब्राह्मणानृत्यपृष्ट्वातैरावाहयेत्यनुज्ञातोवि श्वेदेवासआगतशृणुतायाचीओमगच्छंतुमहाभागाविश्वेदेवामहाबलाः॥येयत्रविहिताःश्राद्धेसावधानाभवंतुते॥इति॥अनेनचस्मार्त्तेनमंत्रेणतानावाहयेत्॥पूत चयज्ञोपवीतिनाप्रदक्षिणंसर्वंकार्यं॥अपसव्यंततःकृत्वापितॄणामप्रदक्षिणं॥इतिपित्र्येविशेषस्मरणात्॥यवैरन्ववकीर्यार्घ्यभाजनेसपवित्रके॥शन्नोदेव्यापयःक्षिप्त्वायवोसीतियवांस्तथा॥यादिव्याइतिमंत्रेणहस्तेत्व

॥३९॥

र्घ्यं विनिक्षि[illegible]पेत्॥ ततो वैश्वदेवार्घ्यब्राह्मणसमीपभूमिं प्रादक्षिण्येनायवैरास्तीर्य अनंतरं रौप्यैर्नसादिभाजनेसपवित्रके कुशाग्रुग्मांतर्हिते शन्नोदेवीरभिष्टय इत्यनयर्चापः क्षिप्त्वा यवोसि धान्यराजो इत्यादिनाध्ययनेन मंत्रेणयवान्॥ ततो गंधपुष्पा णि चक्षि[illegible]स्नानेतरमर्घ्यपात्रे पवित्रांतर्हिते ब्राह्मणहस्तेषु यादिव्या आपः पयसा संबभूवुर्या इति मंत्रेण विश्वेदेवा इदं वो अर्घ्यमि त्यर्घ्योदकं विनिक्षिपेत्॥ दत्त्वोदकं गंधमाल्यं धूपदानं सदीपकं॥ अथ स्मृत्यंतरोपमुदकं रत्नायथा क्रमं गंधपुष्पधूपदीपप्रदान कुर्यात्तथा च्छादनदानं च॥ गंधादीनां च स्मृत्यंतरोक्तो विशेषो दृष्टव्यः॥ चंदनं कुंकुमं कर्पूरागुरु पद्मकान्यनुलेपनार्थे इति विष्णुनोक्तं॥ पुष्पाणि च श्राद्धे ग्राह्याः प्रशस्तास्तु मल्लिका श्वेतयूथिका॥ जलोद्भवानि सर्वाणि कुसुमानि च चंपकमि त्याधुक्तानि॥ वर्ज्यानि॥ उग्रगंधीन्यगंधीनि चैत्यवृक्षोद्भवानि च॥ पुष्पाणि वर्ज्नीयानि रक्तवर्णानि यानि च। नकंटकि जं। कंटकिजमपि शुक्लं सुगंधि यत्तद्दद्यान्नोत्पलं दद्यात्कमपि कुंकुमं जं जलजं च दद्यादित्यादीनि दृष्टव्यानि॥ धूपे च वि शेषो विष्णुनोक्तः॥ प्राण्यंगं सर्वं धूपार्थे न दद्यात्। घृतमधुसंयुक्तं गुग्गुलं श्रीखंडागरुदेवदारुसरलादि दद्या त्॥ इति॥ दीपे च विशेषः शंखेनोक्तः॥ घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः॥ वसामेदोभवं दीपं प्रयत्नेन विवर्ज येदिति॥ आच्छादनं च शुभं नवमहतं सदशं दद्यादिति॥ एतच्च सर्वं विश्वेदेवानुष्ठानकांडमुदङ्मुखः कुर्यात्॥ पित्र्यकांडं दक्षि णामुखः॥ यथाह वृद्धशातातपः॥ उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः॥ प्रदद्यात्पार्वणे [illegible] सर्वं दैवपूर्वं विधानतः इ ति॥ अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणं॥ द्विगुणांस्तु कुशान्दत्त्वा ह्युशंतस्त्वेत्यृचा पितॄन्॥ आवाह्य तदनुज्ञातो जपेदा यं तु नस्ततः॥ ततो वैश्वदेवकांडानंतरं अपसव्यं यज्ञोपवीतं प्राचीनावीतं कृत्वा अतत इति वदता कांडानुसमयो दर्शि तः॥ न पदार्थानुसमयः पित्रादीनां त्रयाणामनुसमाय द्विगुणभुग्नान् अप्रदक्षिणं वामतो विष्टरार्थमासनेषु दर्भान्दत्त्वा पुनरु

२८

२५

83

दत्तं दद्यात्। अपः प्रदाय द्विगुणभुग्नान् कुशान् दत्वापः प्रदाये त्याश्वलायनस्मरणात्। एतच्चार्घतयोरक्षदानं वैश्वदेवेपि
ष्वेच प्रतिपादनार्थं द्रष्टव्यं। अथ पितॄन् पितामहान् प्रपितामहानावाहयिष्य इति ब्राह्मणान् पृष्ट्वा आवाहयेति तैरनुज्ञातः उ
शंतस्त्वा निधीमही त्यनया ऋचा पित्रादीनावाह्यायंतु नः पितर इत्यादिमंत्रेणोपतिष्ठेत॥ यवार्थाः [illegible] तिलैः कार्याः कुर्यादर्घ्या
दि पूर्ववत्। दत्वार्घं संस्रवांस्तेषां पात्रे [illegible] विधानतः। पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः। यवार्थाय वसाध्यानि
कार्याणि अन्वकिरणादीनि तिलैः कर्तव्यानि। ततोर्घपात्रसाधनाद्याच्छादनांतं पूर्ववत्कुर्यात्॥ तत्रायं विशेषः। तिलान् अप
हता असुरा रक्षांसि इत्यादिना मंत्रेण ब्राह्मणान् परितो प्रदक्षिणमन्वकीर्य राजतादिपात्रेषु त्रिषु युग्मकुशनिर्मितकूर्चा
न्निधाय तेषु शंनोदेवीरिति मंत्रेणापः क्षिप्त्वा तिलोसि सोमदेवत्य इत्यादिना मंत्रेण तिलान् गंधपुष्पाणि च क्षिप्त्वा स्वधार्घ्या
इति ब्राह्मणानां पुरतोर्घपात्राणि स्थापयित्वा या दिव्या इति मंत्रांते पितरिदं तेर्घ्यं पितामह इदं ते अर्घ्यं प्रपिताम
ह इदं ते अर्घ्यं इति ब्राह्मणानां हस्तेष्वर्घं दद्यादेकैकमुभयत्र वैस्मिन्नपि पक्षे पात्रत्रयं कार्यं। एवमर्घ्यं दत्वा तेषामर्घ्या
णां संस्रवान् ब्राह्मणहस्तगलितार्घोदकानि पितृपात्रे गृहीत्वा दक्षिणाग्रकुशस्तंबं भूमौ निधाय तस्योपरि पितृभ्यः
स्थानमसीत्यनेन मंत्रेण तत्पात्रं न्युब्जमधोमुखं कुर्यात्। तस्योपरि [illegible] अर्घपात्रपवित्राणि निदध्यात्। अनंतरं गंधपुष्पधूप
दीपाच्छादनानि। पितर इयं ते गंधः। पितरिदं ते पुष्पं इत्यादिप्रयोगेण दद्यात्। अग्नौकरिष्य इत्यादाय घृतसिक्तं घृतप्लुतं कुर्वे
भ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत्। हुतशेषं प्रदद्यात्तु भाजनेषु समाहितः। यथालाभोपपन्नेषु रौप्येषु च विशेषतः। अ
ग्नौकरणं घृतप्लुतं घृताक्तमन्नमादाय ब्राह्मणान् पृच्छेत्। अग्नौ करिष्य इति। घृतग्रहणं सूपकादिनिवृत्त्यर्थं। तत

॥४०॥ कृ.४

व.८५

पं.४ ॥४०॥

84

क्ष२ प२

स्ते: कुरुक्षेत्यन्यत्तु ज्ञातं प्राचीनावीती स्थालीमुपसमा धाय मेक्षणेनादायावदानं संदंशं जुहुयात् सोमाय पितृमते स्वधा

नमोऽग्नये कव्यवाहनाय स्वधानम इति पिंडपितृयज्ञकल्पेनाग्नौकृत्वा मेक्षणमनुप्रहृत्य हुतशेषं मन्त्रयवर्जं यथाल

ब्धोपपन्नेषु विशेषतो रौप्येषु पित्र्यादिभाजनेषु दध्यान्नं वैश्वदेवभाजनेषु समाहितो नन्यमनस्कः। अत्र यद्यप्यग्ना

वित्यविशेषणोक्तं तथाप्याहिताग्नेः सर्वाधानपक्षे औपासनाग्नेरभावात् सिंडपितृयज्ञानंतरं भाविनिपातेणाग्ना

वेव विहितदक्षिणाग्नेः संनिधानात्। दक्षिणाग्नौ क्रमेस्मार्तविवाहाद्यग्नौ स्यापवाददर्शनात्। यथाह मा कंडेयः।

आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः। अनाहिताग्निस्त्वौपसदे अग्न्यभावे द्विजेप्सु वेति। अर्द्धाधानपक्षे त्वौ

पासनाग्निसद्भावात् आहिताग्नेरप्यौपासनाग्नावेवाग्नौकरणहोमः। एवमन्वष्टका दिषु त्रिषु पिंडपितृय

ज्ञकल्पमवेशात्। काम्यादिषु चतुर्षु ब्राह्मणपाणावेव होमः। यथाहुः प्रकाशः। अन्वष्टक्यं च पूर्वेद्यु मासि मासि

च पार्वणं। काम्यमभ्युदयेष्टम्यां एकोद्दिष्टमथाष्टमं। चतुर्ष्वाद्येषु साग्नीनां अग्नौ होमो विधीयते। पि

त्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि। इति। अस्यार्थः। हेमंतशिशिरयोश्चतुर्णामपरपक्षाणाम

ष्टमी ष्वष्टका इत्यष्टका विहिताः। तत्र नवम्यां यत् क्रियते तदन्वष्टक्यं सप्तम्यां क्रियमाणं पूर्वेद्युः। मासि मासि

दर्शपक्षे पंचमीप्रभृतिषु यस्यां कस्यांचित्तिथौ अन्वष्टक्यातिदेशेन यद्विहितं अमावास्यायां पिंडपितृयज्ञा

नंतरं यद्विहितं तत्पार्वणं। स्वर्गादिकामानां कृत्तिकादिषु नक्षत्रेषु यद्विहितं तत्काम्यं। अभ्युदये पुत्रोत्सवस्ना

नदृष्टतडागारामदेवताप्रतिष्ठादिषु च यद्विहितं। अष्टम्यां अष्टका विहिताः। एकोद्दिष्टं। अत्र एकोद्दिष्टशब्दे

नसपिंडीकरणं नाम यति। तत्रैकोद्दिष्टस्यापि मन्त्राभावात् साक्षादेकोद्दिष्टेत दक्षाभावात्। अथ वा गृध्यकामाध्य

हो २ कारमतेन साक्षात् एकोद्दिष्टे पिपाणौ मस्य लक्षणाभावात्॥ एकोद्दिष्टमेव। एतेषामष्टानामाद्येषु चतुर्षु साग्निकस्या

ग्नौ होमः। उत्तरेषु चतुर्षु पित्र्यब्राह्मणहस्ते निरग्निकस्यापि प्रमितपितृकस्य द्विजस्य पार्वणे नित्यामिति।

पि ४ नस्याप्पाणावेव होमः। न निर्वपति यः श्राद्धं प्रमीतपितृको द्विजः। इंदुक्षये मासि मासि प्रायश्चित्तीय

मु ५ ते तु स इति वचनात्। एवं काम्यादियुक्तैको द्दिष्टेषु पाणावेव। अग्न्यभावे तु विप्रस्य पाणाविवोपपादये

त्। इति मनुस्मरणात्। पाणि दत्तस्य पृथगास प्रतिषेधश्च स्मर्यते यथाग्न्यकरणः। अन्नं पाणितले दत्तं पू

र्वमश्नात्यबुद्धयः। पितरस्तेन तृप्यन्ति शेषान्नं न लभन्ति ते। यच्च पाणितले दत्तं यच्चान्यदुपकल्पितं। एकी

भावेन भोक्तव्यं पृथग्भावेन विद्यते इति दत्त्वान्नं पृथिवीपात्रमिति पात्राभिमंत्रणं। ततेदं विष्णुरित्यन्नेद्विजांगु

ष्ठं निवेशयेत्। अन्नमोदे देवे यज्ञोपवीति पितृ स्वाहाव्यं रक्षेति। पित्र्ये प्राचीनावीति वैरक्षेति वि

व ६ स्वोहव्यवत्कव्यं चाक्षुयात् इति कमादिति मनुस्मरणात्। सव्याहृतिं गायत्रीं मधुवाता इति त्र्यचं जपेत्यथा

सुखं चाक्षुं जीरं स्तोपिवाग्यताः। अनंतरं विश्वेभ्यो देवेभ्य इदमन्नं परिविष्टं परिवेक्ष्यमाणं चान्नं दत्तं स्वाहेति॥ यवोद

केनानं वेद्यात तथा पित्रे अमुकगोत्राय अमुकशर्मणे इदमन्नं परिविष्टं परिवेक्ष्यमाणं चान्नं दत्तं स्वधेति तिलो

दकेनानं निवेद्यात तथा पित्र्यं निवेद्येवं पितामहाय प्रपितामहाय च निवेद्यानंतरमपोशानं पूर्वोक्ता पि ब्रा

हे ८ तिभिः सहितां गायत्रीं मधुवाता ऋचं मधु मधु मध्विति त्रिवारं जप्त्वा यथासुखं जुषध्वमिति ब्रू

यात्। संकल्पपितृस्वेभ्यः सावित्रीं मधुमग्रं यः श्राद्धं निवेद्यापोशानं जुषध्वं प्रेषोय भोजनं। तथा

× नसरूपणायसादिकं भाजनेषु दत्त्वा पृथिवीते पात्रमित्यादिनादैत्यौ मंत्रेण पात्राभिमंत्रणं कृत्वा इदं विष्णुर्विचक्रमे इत्यस्यानेन [illegible] वी ३ ॥४९॥

इति २ दत्त्वा ३

× [illegible]

गायत्रीं च सकृद्वापि जपेद्व्याहृतिपूर्विकां । मधु वाता ऋतायते इत्येवं मधुमत्येते । तत्त्रिकं तथा । इति पारस्करादिव
चनात् । भुंजीरंस्ते पि वाग्यताः । ते पि ब्राह्मणा वाग्यता मौनिनो भुंजीरन् । अन्नमिष्टं हविष्यं च दद्यादक्रोध
नोत्वरः ॥ अंते सोस्तु पवित्राणि जप्त्वा पूर्वं जपं तथा । अन्नं भक्ष्यं भोज्यं लेह्यं चोष्यं पेयात्मकं पंचविधं ॥
इष्टं यद्ब्राह्मणानां प्रेतापकं त्रैवारोच्यते । हविष्यं श्राद्धहविर्योग्यं व्रीहिशालियवगोधूममुद्गमाष
ला५ मुन्यन्नकालशाकमहाशल्कौ शुंठीमरिचहिंगुगुडशर्करा कर्पूरसैंधवसांभारपनसनालिकेरफ
लकदलीबदरगव्यपयोदधिघृतपायसमधुमांसप्रभृति स्मृत्यंतरप्रसिद्धं वा दत्तव्यं । हविष्यमिस्सने नैका
यो भ्यस्मृत्यंतर प्रतिषिद्धस्य कोद्रवमसूरचणककुलत्थपुलाकनिष्पावराजमाषकूष्मांडवार्ताकबृह
तीमूलपोदकीवंशांकुरपिप्पलीवरान्नपुष्पोषाविठलवणमाहिषचामरक्षीरदधिघृतपायसादी
नानि इति । अक्रोधनः क्रोधहेतुसंभवेपि । अत्वरोऽव्यग्रः । आदद्यादद्यादिति संबंधः तुशब्दापिथा
किंचिदुच्छिष्यते । तथा दद्यात् । उच्छेषणस्य दासवर्गभागधेयत्वात् ॥ उच्छेषणं भूमिगतमजिह्म
स्याशठस्य च । दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते । इति मनुस्मरणात् ॥ तथा ॥ अंते पि पवित्राणि
पुरुषसूक्तपावमानप्रभृतीनि जप्त्वा तत्र ब्राह्मणाः पूर्वोक्तं यज्जपं च सव्याहृतिकां सावित्रीं च जप
मादाय४ कुर्यात् ॥ अन्नं तेषांस्त्रशेषं वैवानुमन्य च । ततश्च विकिरे दुमोर दद्यादापः सकृत्सकृत् । अन्नंत
रसर्वं वर्णमन्नमादाय तत्पात्रः स्वस्ति तान् पृष्ट्वा तत्ताः स्वदितमिति प्रत्युक्तः शेषमन्नमभ्यनुज्ञाय किं क्रि
यतामिति पृष्ट्वा इष्टैः सहोपभुज्यतामिति स्याचमन पात्रमध्यतरश्च पितृस्थानब्राह्मणस्य पुरस्तादुच्छिष्टसं
निधौ दक्षिणाग्रदर्भांतरितायां भूमौ तिलोदकप्रक्षेपपूर्वकं ये अग्निदग्धाइत्यनेन प्राचीनिक्षिप्य

पुनस्तिलोदकं निक्षिपेत् ॥ तदनंतरं ब्राह्मणहस्तेषु गंडूषार्थं सकृत्सकृदपो दद्यात् ॥ सर्वमन्नमुपादाय स
तिलं दक्षिणामुखः ॥ उच्छिष्टसंनिधौ पिंडान्दद्याद्वै पितृयज्ञवत् ॥ पिंडपितृयज्ञकल्पातिदेशेन वरुणप्रण
सद्भावे नौकरणशिष्टचरुशेषेण सह सर्वमन्नमुपादाया ग्निसंनिधौ पिंडान्दद्यात् ॥ तदभावे ब्राह्मणार्थं सा
र्ववर्णिकमन्नमुपादाय [illegible] मानिलतिलमिश्रं दक्षिणामुखः उच्छिष्टसान्निधौ पिंडं पितृयज्ञकल्पेन
पिंडान्दद्यात् मातामहानामप्येवं दद्यादाचमनं ततः ॥ स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव च ॥ माता
महानामपि आवाहनादिपिंडदानपर्यंतं कर्मैवमेव कर्तव्य ॥ अनंतरं ब्राह्मणा[illegible]नामाचमनं दद्यात् ततः स्वस्ति
ति ब्रूतेति [illegible] ब्राह्मणान् स्वस्ति वाचये[illegible]त् ॥ तैश्च स्वस्त्युक्ते अक्षय्यमस्त्विति ब्रूतेति ब्राह्मणहस्तेषूदक
दानं कुर्यात् ॥ तैश्चास्त्वक्षय्यमिति वक्तव्यं ॥ दत्वानु दक्षिणां शक्त्या स्वधाकारमुदाहरेत् ॥ वाच्यतामि
त्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यतां ॥ अनंतरं यथाशक्ति रजतहिरण्यादि दक्षिणां दत्वा स्वधां वाचयिष्य इति पृष्ट्वा
ब्राह्मणैर्वाच्यतामित्यनुज्ञातः ॥ प्रकृतेभ्यः पित्रादिभ्यो मातामहादिभ्यश्च स्वधोच्यतामिति स्वधाकारमुदाहरेत् ॥
अस्तु स्वधेत्युक्ते भूमौ सिंचेत्ततो जलं ॥ विश्वेदेवाश्च प्रीयंतामिति प्रेष्य [illegible]दं जपेत् ॥ ते च ब्राह्मणा अस्तु स्व
धेति ब्रूयुः ॥ तैरेवमुक्ते अनंतरं कमंडलुना उदकं भूमौ सिंचेत् ततो विश्वेदेवाः प्रीयंतामिति ब्रूयुः ॥ ब्राह्मणैश्च प्री
यंतां विश्वेदेवा इत्युक्ते इदमनंतरोक्तमानं जपेत् ॥ दातारो नोऽभिवर्धंतां वेदाः संततिरेव च ॥ श्रद्धा च नो माव्य
गमद्बहुदेयं च नोऽस्त्विति ॥ दातारो हिरण्यादेर्नोऽस्माकं कुले वर्धंतां बहवो भवंतु ॥ वेदश्च वर्धतां अध्ययनाध्या
पनतदर्थज्ञानानुष्ठानद्वारेण ॥ संततिः पुत्रपौत्रादिपरंपरया ॥ श्रद्धा चोपतकर्मणि नोऽस्माकं माव्यगमत् ॥

मा २

३५

ध्य २

८८

भाप[..] गच्छतु ॥ देयं च हिरण्यादि बहु अपर्यंतं अस्माकं भवत्विति ॥ जपेदिदमन्वयः ॥ इस्कृहो काप्रियावा[..]वः
प्रणिपत्य विसर्जयेत् ॥ वाजेवाजे इति प्रीतः पितृपूर्वं विसर्जनं ॥ एवं पूर्वोक्त प्रार्थना मंत्रं जप्त्वा कृत्वा प्रियावासः ॥ धन्या
वयं भवच्चरणकमलयुगलरजः पवित्रीकृतमस्मन्मंदिरं शाकाघरानक्लेशमवगणय्य सर्वाङ्गिरनुरक्ता तावयाभि
रेवं रूपाः प्रणिपत्य प्र[..]दक्षिणापूर्वं नमस्कृत्य विसर्जयेत् ॥ कथं विसर्जयेत् स्यात् ॥ वाजेवाजेवत वाजिनो न इत्य
नेयाच्चापि पितृपूर्वं प्रपितामहादि विश्वेदेवांतं दर्भाग्रेणारंभणेनोत्तिष्ठंतु पितर इति प्रीतः सुप्रीतमना विसर्जनं कुर्यात् ॥
यस्मिंस्तस्मिंस्त्वा वा पूर्वमर्घपात्रे निवेशिताः ॥ पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्जयेत् ॥ यस्मिन्नर्घपात्रे पूर्वमर्घस्ता
नानंतरं तेस्रवा ब्राह्मणहस्तगलिता वोदकादि निवेशिता स्थापिता ॥ [illegible]
[illegible] ॥ न सितृपात्रं [..] सद्भुत्तानमर्घ्यं भुवं कृत्वा विप्रान् विस
र्जयेत् ॥ एतच्चाशीर्मंत्रं जपाद्ध्वं वाजेवाजे इत्यतः प्रागद्रष्टव्यं कृत्वा विसर्जयेदिति कात्यायनवचनात् प्रदक्षिण
मनुव्रज्य भुंजीत पितृसेवितं ॥ ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह ॥ अनंतर मासीमांतं ब्राह्मणाननुव्र
ज्य तैरास्यतामिति सन्तु होतस्तान् प्रदक्षिणीकृत्य प्रतिनिवृत्तः पितृसेवितं श्राद्धशिष्टमिष्टैः सह भुंजीत नि
यम एवायं न पारिसंख्या मासेतु यथान्न विशतिद्विजकोप्ययेस्यात्राक्रं ॥ यस्मिन् दिने श्राद्धं कृतं तत्संबंधिनी रात्रिं भोक्तृभि
र्ब्राह्मणैः सह कर्त्रा ब्रह्मचारी भवेत् ॥ तुरा रात् पुनर्भोजिनोरा हितो भवेत् ॥ पुनर्भोजनमध्वानं भाराध्ययनमैथुनं दानंप्र
तिग्रहं होमं श्राद्धभुक् त्वष्ट वर्जयेत् ॥ कर्तृवर्ज्यान्याह ॥ दंतधावनतांबूलं क्षौराभ्यंगमभोजनं ॥ रत्यौषधपरान्नं च
श्राद्धकृत्सप्त वर्जयेत् ॥ ८ ॥ एवं पार्वणश्राद्धमुक्त्वा दानीं वृद्धिश्राद्धमाह ॥ एवं प्रदक्षिणं कृत्वोदङ्मुखो नांदीमुखान् पितॄन् ॥
यजेत दधिकर्कंधू[..]मिश्रान् पिंडान् यवैः सह ॥ दङ्मुखो पुत्रजन्मादिनिमित्ते रुद्धिश्राद्धे एवमुक्तेन प्रकारेण पितॄ

दि८

नूयजेत्पूजयेत्॥ तत्रविशेषमाह॥ प्रदक्षिणावृत्कः इति प्रदक्षिणा आवृदनुष्ठानपद्धतीयस्यासौ प्रदक्षिणावृत्कः
प्रदक्षिणप्रचार इति यावत्॥ नांदीमुखाश्चेति पितॄ[illegible]णां विशेषणं॥ अतश्चावाहनादौ नांदीमुखान् पितॄन् आवाहयिष्ये
नांदीमुखाश्च पितामहाः नित्याः इति प्रयोगाः इष्टव्यः॥ कथं यजेतेत्याह॥ दधिकर्कंधूमिश्रानिति कर्कंधू बदरीफलं॥
दध्ना बदरफलैश्च मिश्रान् पिंडान् दद्याय जेतेति संबध्यते॥ तिलस्थाने यवाः क्रियायवैः कर्तव्याः॥ अत्र ब्रा
ह्मणसंख्यादर्शितैव॥ युग्मान्दैवे यथाशक्ति इत्यत्र प्रदक्षिणवृत्के [illegible]परिगणनमन्येषामपि स्मृत्यंतरोक्ता
नां विशेषधर्माणां प्रदर्शनार्थं॥ यथाश्वलायन आह॥ अथाभ्युदयिके युग्मा ब्राह्मणा अमूलादर्भाः प्राङ्मुखायज्ञोपवि
ती स्यात्॥ प्रदक्षिणमुपचारो यवैस्तिलार्थो गंधादिदानं द्विर्द्विरजुद [illegible] भी नासने दद्यात्॥ यवोसि सोमदेवत्यो गोस
वो देवनिर्मितः॥ प्रत्नमद्भिः पृक्तः पुष्ट्या नांदीमुखान् पितॄन् इमाल्लोकान् प्रीणाहिनः स्वाहेति यवावपनं विश्वेदेवा इदं वो
अर्घ्यं नांदीमुखाः पितर इदं वोर्घ्यं इति यथालिंगमर्घ्यदानं॥ पाणौ होमो अग्नये कव्यवाहनाय स्वाहा सोमाय पितृ
मते स्वाहेति मधु वाता ऋतायत इति तृचस्थाने उपास्मै गायतेति पंचमधुमतीः श्रावयेदक्षन्नमीमदन्त इति
च षष्ठी मा वा तेषु भुक्तवत्सु शय्यान्वा गोमयेनोपलिप्यते षु प्राचीनाग्रान् दर्भान् संस्तीर्य तेषु दध्यामिश्रेणाभुक्तशेषे
णैकैकस्य द्वौ द्वौ पिंडौ दद्यात्॥ इत्यादि यथा पितॄन् यजेतेति सामान्येनोक्तत्वात् पि श्राद्धत्रयं क्रमशश्च॥ स्मृत्यं
तराद्द्रष्टव्यः॥ यथा शातातपः॥ मातृश्राद्धं तु पूर्वं स्यात् पितॄणां तदनंतरं॥ ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृत
मिति॥ ॥ एकोद्दिष्टमाह॥ एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकं॥ आवाहनाग्नौकरणरहितं ह्यपसव्यवत्॥ एकोद्दि
ष्टमेकमुद्दिश्य यस्मिन् श्राद्धे तदेकोद्दिष्टं इति कर्मनामधेयं शेषं पूर्ववदाचरेत्॥ इह पसंहारात् पार्व
णसकलधर्मप्राप्तौ विशेषो विधीयते॥ दैवहीनं वैश्वदेवरहितं॥ एकार्घपात्रं॥ आवाहनेन अग्नौकरण ॥४२॥

एकदर्भपवित्रकं १

त५

५६

त४

१०

नं २

होमेनरहितं ॥ अपसव्यवत् प्राचीनावीत अस्य सूत्रवत् अनेनोत्तरस्मोक्तेः ॥ भ्यदक्षिणे यज्ञोपवीती स्वं चवसूचयति ॥ किंच ॥
उपतिष्ठतामक्षय्यस्थाने विप्रविसर्जने अभिरम्यतामितिवदेद्ब्रूयुः स्तोभिरताःस्महे ॥ यदुक्तं ॥ स्वस्तिवाच्यं ततः कुर्याद्दक्षय्यो
दकमेवचेति ॥ तत्राक्षय्यस्थाने उपतिष्ठतामितिवदेत् ॥ विप्रविसर्जने कर्तव्ये ॥ वाजेवाजे इति जपानंतरं दर्भाग्रैर्भ्रमणे नाभिरम्य
तामिति ब्रूयात् ॥ ते चाभिरताः स्मेति ब्रूयुः ॥ प्रसिद्धो शेषं प्रसिद्धं पूर्ववदिति यावत् ॥ एतच्च मध्याह्ने कर्तव्यं ॥ यथाह देवलः ॥
पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पैतृकं ॥ एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति ॥ भुंजीत पितृसेवितमित्यस्यैकोद्दिष्ट विषे
षाप्रतिषेधो दृश्यते ॥ नवश्राद्धे तु यच्छिष्टं गृहे पर्युषितं च यत् ॥ दंपत्योर्भुक्तशिष्टं च न भुंजीत कदाचनेति ॥ नवश्राद्धं च कथ्यते ॥
प्रथमेऽह्नि तृतीयेऽह्नि पंचमे सप्तमे पि वा ॥ नवमैकादशे चैव तन्नवश्राद्धमुच्यते ॥ ॥ सपिंडीकरणमाह ॥ गंधोदकतिलैर्युक्तं कु
र्यात्पात्रचतुष्टयं ॥ अथार्घ्यं पितृपात्रेषु प्रेतपात्रं प्रसिंचयेत् ॥ ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् ॥ एतत्सपिंडीकरण
मेकोद्दिष्टं स्त्रिया अपि ॥ गंधोदकतिलैर्युक्तं पात्रचतुष्टयमर्घ्यसिध्यर्थं पूर्वोक्तविधिना कुर्यात् ॥ तिलैर्युक्तं पात्रचतुष्ट
यं वदता पितृवर्गे चत्वारो ब्राह्मणा दर्शिताः ॥ वैश्वदेवे द्वौ स्थितावेव ॥ तत्र प्रेतपात्रोदकं किंचिद्विशेषं त्रिधा विभज्य
पितृपात्रेषु संचयेत् ॥ ये समानाः समनस इति द्वाभ्यां मंत्राभ्यां शेषं विश्वेदेवावाहनादि विसर्जनांतं पूर्ववत्पार्वणव
दाचरेत् ॥ प्रेतार्थं पात्रावशिष्टोदकेन प्रेतस्थाने ब्राह्मणहस्ते अर्घ्यं दत्वा शेषमेकोद्दिष्टवत्समापयेत् ॥ पित्रेषु त्रिषु पार्व
णवत् ॥ एतत्सपिंडीकरणमनंतरप्रोक्तं एकोद्दिष्टं चैव ततः ॥ अत्र प्रेतश्राद्धे [illegible] पितुः प्रपितामहविषयं के विहर्णयंति ॥
लस्य त्रिपुरुषभावेन सपिंडीकरणोत्तरकाल पिंडदानादिना निरस्कपपत्तेः ॥ समनंतरमरतस्य सपिंडीकरणादूर्ध्वं पि
डोदकदानं तु एकोद्दिष्टं दैवहीनमिति भागुरिः स्त्रिया अपि मातुरपि कर्तव्यं ॥ एवं च वदता पार्वणे मातृश्राद्धं पृथक्
न कर्तव्यं ॥ इत्युक्तं भवति ॥ [illegible] ॥ स्त्रेरत रक्षावो नयुक्तः ॥ अमावास्या
दि पिंडसंभवात् ॥ मातृवाह्ययम ॥ ॥ यः सपिंडीकृतं प्रेतं पृथक्पिंडे नियोजयेत् ॥ विधिघ्नस्तेन भवति पितृहा
चोपजायते ॥ इतिप्रकर्षेण इतः प्रेते चतुर्थे पि प्रेतश्राद्धोपपत्तेः ॥ प्रेतोऽप्य एवं त्रिदशणी यादिति प्रयोगदर्शनात् ॥ अपि च ॥

ह ४

पृ ६

इति १

च १ ग १

सर्वंतेषु

सपिंडीकरणं श्राद्धं देवपूर्वं नियोजयेत्॥ पितॄनेवाशयेत्तत्र पुनः प्रेतं न निर्दिशेत्॥ सपिंडीकरणोत्तरकालं प्रेतस्य श्राद्धादि प्रतिषेधो

रश्यते॥ स चानंतरमृतस्य न संभवत्यमावास्यादौ श्राद्धविधानात्॥ सपिंडता तु पुरुषे सप्तमे विनिवर्त्तते इत्यादि वचनं चतुर्थस्य

त्रिषु तत्र भावएव घटते॥ चतुर्थस्य पिंडत्रय व्यापित्वात् पंचमस्य पिंडद्वय व्यापित्वात् षष्ठस्य एकपिंड व्यापित्वात् सप्तमे विनिवर्त्तत इति॥

पितृपात्रेष्वेतदपि पितृमुख्यत्वादस्मिन्नेव पक्षे घटते॥ नान्यथा पितामहप्र[illegible]मुख[illegible]त्वात्॥ तस्मात् पितृपात्रेषु प्रेतपात्रं प्रसिं

चयेत् [illegible] पितुः प्रपितामहपात्रं पित्रादिपात्रेषु [illegible] सेचयेत्॥ तस्युक्तं। न ह्यत्र पिंडसंयोजनमुत्तरत्र पिंडदानादि निवृत्तिप्रयोजकं॥

अपितृप्रेतत्वनिरस्यापितृत्व प्राप्त्यर्थं॥ प्रेतत्वं च पुत्रस्यापि जनितश्चतदुःखानुभावाव[illegible]स्थ॥ ॥ यथाह मार्कंडेयः॥ प्रेतलोके तु

वसांतेन ण्वावर्षं प्रकीर्त्तिता॥ क्षुत्तृष्णे प्रत्यहं तत्र भवेतां भृगुनंदन इति पितृत्वप्राप्तिश्च वस्वादि श्राद्धदेवता संबंधः प्रोक्तः नैकोद्दिष्टस

हितेन सपिंडीकरणेन प्रेतत्वनिरस्यापितृत्वं प्राप्नोत्यवगम्यते॥ यस्यैतानि न दत्तानि प्रेतश्राद्धानि षोडश। प्रेतत्वं सुस्थिरं तस्य द

तैश्राद्धशतैरपि तथा चतुरो [illegible] निर्वपेत् पिंडान् समावपेत्॥ ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते॥ इत्यादि वचनात्॥

यत्सापिंडी [illegible] कृतं प्रेतं न मिश्रयनेना पि पृथक् एकोद्दिष्टविधानैः पिंडदाननिषेधात् [illegible] पार्वणविधानेन सहपिंडदानमवगम्यते॥

माब्दसांवत्सरिक पाक्षिकैकोद्दिष्टविधानेनापोह्यते॥ यदपि पुनः प्रेतं न निर्दिशेत् [illegible] इति तदपि प्रेतशब्दं नोच्चारयेत्॥ अपि वित्तप्र

दमेवैरेवमर्थं॥ न च प्रकर्षगमः पितुः प्रपितामहेनात्तत्रैव प्रेतशब्दः यतो विशिष्टदुःखानुभ[illegible]रस्था प्रेतशब्देन रूढ्याभिधीय

तद्युक्तं॥ योपि प्रमीतमात्रे प्रेतशब्दप्रयोगः। सोपि भूतपूर्वगत्या॥ सापिंडता तु पुरुषे सप्तमे विनिवर्त्तत इति च प्रथमस्य

पिंडस्य चतुर्थव्यापित्वात् द्वितीयस्य पंचमव्यापित्वात्॥ तृतीयस्य षष्ठव्यापित्वात् सप्तमे विनिवर्त्तत इत्येवमपि घटते॥ अ

पि च निवृत्यपिंडान्वयेन सापिंड्यमव्यापकत्वात्॥ अपि लेकशरीरावयवान्वयेनेत्युक्तं॥ पितृशब्दश्च प्रेतत्वनिरस्या श्राद्धदेवता

न्वयं गतेषु वर्त्तत इति पितृपात्रेषु इत्येवाविरुद्धं॥ तस्मादनंतरस्य तत्पात्रोदकस्य तासिंड्स्य चापि तत्पात्रेतासिंडेषु चत्वेषु भज्यस

सर्जनामेति स्थितमाचार्यस्तु परमतमेवोपन्यस्तवान्॥ एतच्च पितुः सपिंडीकरणं पितामहादिषु त्रिषु प्रमीतेषु वेदित

व्यं॥ पितरि प्रेते पितामहे प्रपितामहे वा जीवति सपिंडीकरणं नास्त्येव व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिंडता इति

वचनात्॥ यत्तु मनुवचनं पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः॥ पितुः स नाम संकीर्त्य कीर्त्तयेत् प्रपितामहमिति॥ ॥४२॥

×तस्मिन्पितुर्वा अंतरलमतत्र पित्रादिशब्दानां संबंधिवचनत्वात् ध्रियमाने तु पितरि पितुः ३×

(सोपि२) तद्पितृशब्दप्रयोगानियमाय। निपिंडस्यदानार्थं॥ कथं। ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत्॥ पिता यस्य तु वृत्तः स्याज्जीवेद्वापि पिताम
हः। पूर्वेषामेव निर्वपेदिस्वनयः॥ वक्ष्यद्येयपि कथं निर्वपेदित्याह॥ पितुः स नाम संकीर्तयेत् प्रपितामहं॥ इत्यादौ तद्ग्रहणेन सर्वत्रापि (कीर्त्य२)
(मह३) तेभ्यः पितामहेभ्यः प्रपितामहेभ्यः एवं प्रयोगो न पुनः कदाचिदपि पितामहस्य प्रपितामहस्य वा दद्यात् प्रपितामहस्यैव पितृभ्यः
पितामहेभ्यः प्रपितामहेभ्य इति। पितामहे ध्रियमाणे पितामहस्य पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इत्यस्मिन्सपिंडविधये ज्ञेयं शुंधंतां
पितर इत्यादि मंत्रेणाप्यूहो न भाव स्यादिति। यदपि विष्णुवचनं। यस्य पिता प्रेतः स्यात् स पितृपिंडं निधाय पितामहात्परा भ्यां द्वाभ्यां
दद्यादिति॥ तस्याप्ययमर्थः। पितामहे ध्रियमाणे प्रेते च पितरि पितुरेकं पिंडमेकोद्दिष्टविधानेन निधाय पितुर्यः पितामहस्ततः
पराभ्यां द्वाभ्यां दद्यात्। पितुः पितामहस्तत्सूनः प्रपितामहः संप्रदानभूतः स्थितस्तएवेति प्रपितामहाय ततः पराभ्यां द्वाभ्यां
दद्यादिति॥ तद्प्रयोगानियमस्तु पूर्वोक्त एव। एवं गोत्रा ब्राह्मणादिस्तस्यापि सपिंडीकरणाभावो वेदितव्यः। यथाह कात्यायनः॥
ब्राह्मणादिहते ताते पतिते संगवर्जिते॥ व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसाविति॥ गोत्रब्राह्मणो हतस्य पितुः सपिंडी
(घ्य१) करणसंभवे तन्मूलं पितामहादिभ्यः पार्वणविधानमनुपपन्नमिति सपिंडीकरणाभावोवगम्यते॥ मातुः पिंडदाना (दि१)
गोत्रे विप्राते पतिः॥ भर्तृगोत्रेण पितृगोत्रेण वा दातव्यमिति॥ कश्यपवचनदर्शनात्॥ स्वगोत्राद्भ्रश्यते नारी विवाहात्स
प्तमे पदे॥ स्वामिगोत्रेण कर्तव्यास्तस्याः पिंडोदकक्रिया॥ इत्यादि भर्तृगोत्रविषयं वचनं॥ पितृगोत्रं समुद्दिश्य न कुर्यादिति
(च६) गोत्रतः जन्मन्येव विपत्तौ नारी पतेः कंकुलमित्यादि पितृगोत्रविषयं। एवं विप्रपत्तावासुरादिविवाहेषु पुत्रिकाकरणे च पि (त्र६)
तृगोत्रमेव। तत्रतत्र विशेषवचनाभावात् स्यानियतत्वं॥ ब्राह्मादिविवाहेषु त्रीह्येवं तत्र वह इंधनरेव द्विकल्प एव। (व५)
तत्र च। येनास्य पितरो याता येन याताः पितामहाः। तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यतीति इति वचनात् वंशपरंपरा
यातसमाचारेणाव्यवस्था। एवं विधविषयव्यतिरेकेण स्ववचनस्य विषयांतराभावात्। यत्र पुनः शास्त्रतौ व्यवस्था (नम्र)
(स्तु२) नाप्याचारतस्तत्रासमं सिरेक्षेतिवचनादात्मतुष्टिरेव व्यवस्थापिका॥ यथा गर्भाष्टमेष्टमेवाब्देइति॥ मातुः सपि
डीकरणेपि विरुद्धानि बहवाक्यानि दृश्यंते॥ तत्र पितामह्यादिभिः सार्धं सपिंडीकरणं स्मृतं। तथा भर्त्रापि भार्यायाः स्वमात्रा

(नर) (तिद्)

रिभिः सह सपिंडीकरणं कर्तव्यमिति पैठीनसिराह। अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडतां श्वश्र्वादिभिः सहैवास्याः सा
पिंडीकरणं भवेत्॥ पत्या सह सपिंडीकरणं यम आह॥ पत्या चैकेन कर्तव्यं सपिंडीकरणं स्त्रियाः॥ सा मृतापि हि तेनैक्यं ग
ता मंत्राहुतिव्रतैः॥ उशनसा तु॥ मातामहेन सापिंडीकरणं तु कुर्यात् पितुः पितामहे यद्वत्पूर्णे संवत्सरे सुतैः। मातु मातामहे
तद्वदेषा कार्या सपिंडता॥ तथा। पित्रा पितामहे तद्वत्पूर्णे संवत्सरे सुतैः। माता मातामहे तद्वदित्याह भगवान् शिवः॥ इ
ति एवंविधेषु वचनेषु सत्सु अपुत्रायां भार्यायां प्रमीतायां भर्ता स्वयमेव सापिंड्यं कुर्यात्॥ अन्यथारोहणे तु पुत्रैः स्वपित्रैव मातुः सा
पिंड्यं कुर्यात्॥ असुरादिविवाहोत्पन्नैः पुत्रिकासुतैः मातामहेनैव ब्राह्मादिविवाहोत्पन्नैः पित्रा मातामहेन पितामहेन वा
वा विकल्पेन कुर्यात्॥ अत्रापि नियतो वंशसमाचारः स्त स्तत्तथैव कुर्यात्। सोऽपि वंशसमाचारोऽपि अनियत
श्चेदात्मनस्तुष्टिरेव वेति यथारुचि कुर्यात्। न च वचनेन केनापि मातुः सापिंड्येपि यात्रान्वष्टकादिषु मातृश्राद्धं पृथ
ग्विहितमन्वष्टकासु वृद्धौ च गयायां च मृतेऽहनि। मातुः श्राद्धं पृथक्कुर्यादन्यत्र पतिना सह। तत्रापि तामहाद्यादि
भिरेव पार्वणश्राद्धं कर्तव्यं। अन्यत्र पतिना सहेति पतिसापिंडने दर्शश्राद्धमिच्छत तेनैव सह यथाह शातातपः॥ ए
कमूर्तित्वमायाति सापिंडीकरणे कृते। पत्नी पतिपितॄणां तु तस्मादंशेषु भागिनी॥ एवं च सती भर्तामहेन मातुः सा
पिंड्ये मातामहश्राद्धं पितुः श्राद्धं च नित्यमेव॥ पत्या पितामहाद्यैर्वा मातुः सापिंड्ये मातामहश्राद्धं नानित्यं कृतेऽपु
त्रयोः कृते न प्रत्यवायः॥ इति निर्णयः॥ अर्वाक् सपिंडीकरणं यस्य संवत्सराद्भवेत्॥ तस्याप्यन्नं सोदकुंभं दद्यात्सं
वत्सरं द्विजे॥ संवत्सरादर्वाक् सपिंडीकरणं यस्य कृतं तस्य कृतेतदुद्देशेन प्रतिदिवसं प्रतिमासं वा यावत्संवत्सरं तथा
नुसारेण अन्नमुदकुंभसहितं ब्राह्मणाय दद्यात्॥ अर्वाक् संवत्सरादिति वदता सपिंडीकरणं
संवत्सरे पूर्णे प्राग्वा॥ यथाह च्यवनः॥ अथ सपिंडीकरणं संवत्सरान्ते द्वादशाहे इति कात्यायनः॥ ततः
संवत्सरे पूर्णे सपिंडीकरणं त्रिपक्षे वा यदहर्वा वृद्धिरापद्यत इति। द्वादशाहे त्रिपक्षे वा द्विमासे संवत्सरे इति

वा७ त८ व४ तिवेदितव्यं२ व९ व९ १२८४

चत्वारः पक्षा दर्शिताः ॥ तत्र द्वादशाहे पितुः सपिंडीकरणं त्रिपक्षे वा यदर्वाग्वृद्धिरापद्यत इति ॥ द्वादशाहे त्रिपक्षे
वा वृद्धिप्राप्तौ संवत्सरे चेति सानिकेनैव कार्यं सपिंडीकरणं विनापि वृद्धिं यज्ञादिसिद्धेः । साग्निकस्तु यदा कृताग्निः प्रेतो वाप्य
ग्निमान् भवेत् ॥ द्वादशाहे तदा कार्यं सपिंडीकरणं पितुरिति वचनात् । निरग्निस्तु त्रिपक्षे वृद्धिप्राप्तौ संवत्सरे वा कुर्यात् ॥ यदा प्रा
क् संवत्सरात् सपिंडीकरणं तदा षोडशश्राद्धानि कृत्वा सपिंडीकरणं कार्यं कृतसपिंडीकरणं कृत्वा स्वकाले तानि कर्तव्यानीति
संशये उभयथा वचनदर्शनात् ॥ श्राद्धानि षोडशादत्त्वा न तु कुर्यात् सपिंडतां ॥ श्राद्धानि षोडशापाद्य विदधीत सपिंडता
मिति षोडशश्राद्धानि च ॥ द्वादशाहे त्रिपक्षे च षण्मासे मासिके द्वे ॥ श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभि
रिति दर्शितानि ॥ यथा ॥ यस्यापि संवत्सरादर्वाक् सपिंडीकरणं भवेत् ॥ मासिकं चोदकुंभं च देयं तस्यापि वत्सरमिति न
च सपिंडीकरणं कृत्वा स्वकाले एव तानि कर्तव्यानीति प्रथमः कल्पः अप्राप्तकालत्वेन प्रागनधिकारात् ॥ परत्वेव चनं षोड
शश्राद्धानि कृत्वैव सपिंडीकरणं संवत्सरात् प्रागपि कर्तव्यतामिति सोयमापत्कल्पः ॥ यदा साग्निना प्राक् सपिंडीक
रणात् प्रेतश्राद्धानि करोति तदैकोद्दिष्टविधानेन कुर्यादिति तदा द्विवेश्राद्धं यो यथा करोति पार्वणमेकोद्दिष्टं वा । तथा मा
सिकानि कुर्यात् । सपिंडीकरणादर्वाक् कुर्वन् श्राद्धानि षोडश ॥ एकोद्दिष्टविधानेन कुर्यात् सर्वाणि तानि तु ॥ सपिंडीकरणा
दूर्ध्वं यदा कुर्यात्तदा पुनः ॥ प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात् स तान्यपीति स्मरणात् ॥ एतच्च प्रेतश्राद्ध सहितं
सपिंडीकरणं संविभक्तधनेषु भ्रातृषु सत्स्वप्येकेनैव कृतेनालं न सर्वैः कर्तव्यं ॥ नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षो
डशैव एकेनैव तु कार्याणि संविभक्तधनेष्वपीति स्मरणात् ॥ इदं च प्रेतश्राद्धसहितं सपिंडीकरणमसंन्यासिनां
पुत्रादिभिर्नियमेन कर्तव्यं प्रेतत्वविमोक्षार्थत्वात् ॥ संन्यासिनां तु एकोद्दिष्टं न कर्तव्यं ॥ यथाह उशनाः ॥ एकोद्दिष्टं न कर्तव्यं
यतीनां चैव सर्वदा ॥ अहन्येकादशे प्राप्ते पार्वणं तु विधीयते ॥ सपिंडीकरणं तेषां न कर्तव्यं सुतादिभिः ॥ त्रिदंड
ग्रहणादेव प्रेतत्वं नैव जायते इति पुत्राभिधानेन येन सगोत्रादिना दाहसंस्कारः कृतः ॥ तेनैव दशाहान्तं प्रे

× यदा तु मुख्यकल्पेन स्वकाले करोति २ ×

द्वा१२

तकर्म कर्तव्यं ॥ असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् ॥ प्रथमेऽहनि योदद्यात् स दशाहं समापयेत् इति स्मरणा
त् ॥ [illegible] कामप्येतत्कर्तव्यं ॥ अमंत्रकं द्वादशेऽह्नि एवं सपिंडकरणं मंत्रवर्जं स्त्रीणां द्वादशेऽह्नि इति विष्णुस्मर
णात् ॥ सपिंडीकरणादूर्ध्वं सांवत्सरिकपार्वणादिनी पुत्रस्य नियमेनैव कार्याणि अन्येषां तु नियतानि ॥ ॥ एको
द्दिष्टकालमाह ॥ मृतेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरं ॥ प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ॥ मृतेऽहनि प्रति
मासं संवत्सरं यावदेकोद्दिष्टं कार्यं सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरमेवमेवैकोद्दिष्टं कर्तव्यं ॥ आद्यं सर्वैकोद्दि
ष्टप्रकृतिभूतमेकोद्दिष्टमेकादशेऽहनि मृततिथिसापिंड्यो नेतवर्णदिवसे अमावास्यायां वा कर्तव्यं ॥ अपरिहा
ते मृतेऽहनि अमावास्यायां श्रवण दिवसे वेति स्मरणात् ॥ अमावास्यायामिति गमनमाससंबंधिन्याममा
वास्यायां प्रयासयासरे [illegible] ते मासे कृष्णपक्षेऽपि वेति स्मरणात् मृतेऽहनि यत्राहिताग्नेर्विशेषो नानुकल्प्ये
नोक्तः ऊर्ध्वं त्रिपक्षाद्य [illegible] दह्येत तस्यैव तद्भवेत् ॥ अथ यस्तु कार्यः [illegible] आहिताग्नेर्दिनमनः इति पक्षादर्वाक् यस्तु
कर्मतद्दिवसात् [illegible] रथ्याहिताग्नेः इति त्रिपक्षादूर्ध्वं यत् श्राद्धं तन्मरणदिवस एवेत्यर्थः ॥ अनाहिताग्नेस्तु सर्वमृताहे एव ॥
अथ मेकादशेऽहनीति स्वाशौचापलक्षणमिति केचित् ॥ श्रुत्वा वैनाककर्मकर्तव्यमिति शुद्धे रंतुरंगतात् ॥ अथाशौचापगम
इति सामान्येनैकमेवैकोद्दिष्टस्य विष्णुनाविहितत्वाच्च तद्युक्तं ॥ एकादशेऽहनि यत् श्राद्धं तत् सामान्यं तच्चतुर्णामपि
वर्णानां सूतकं च पृथक् पृथक् इति पैठीनसी स्मरणाद्विरोधात् ॥ आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ॥ क
र्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः [illegible] वचनविरोधाच्च ॥ सामान्यपक्षमाविष्णुवचनं [illegible] शौचावि
षयमपि घटते ॥ प्रतिसंवत्सरं चैवमिति प्रतिसंवत्सरं मृततिथ्येकोद्दिष्टमुपदिष्टं योगीश्वरेण ॥ तथा मृते संतर ॥
वर्षवर्षे तु कर्तव्या मातापित्रोस्तु सत्क्रिया ॥ अदैवं भोजयेच्छ्राद्धं पिंडमेकं च निर्वपेत् ॥ यमोप्याह ॥ सपिंडीकरणा

घ्या०८ दृ.ह६ पप या०८ घ०६ त्रि०८ मु.दा.ह५

ह्यूर्ध्वं प्रतिसंवत्सरं स्मृतेः मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेऽहनीति। व्यासस्तु पार्वणं प्रतिषेधयति। एकोद्दिष्टं परित्यज्य पार्वणं कुरुते नरः।
अकृतं तद्विजानीयात् स च पितृघातकः इति। जमदग्निस्तु पार्वणमाह। आपाद्य सपिण्डत्वमौरसो विधिवत्सुतः। कुर्वीत दर्शवच्छ्राद्धं माता
पित्रोः क्षयेऽहनीति। शातातपोऽप्याह। सपिण्डीकरणं कृत्वा कुर्यात्पार्वणवत्सदा। प्रतिसंवत्सरं विद्वान् छागलेयोदितो विधिः। एतेषां व
चनविप्रतिपत्तौ दाक्षिणात्या व्यवस्थामाहुः। औरसक्षेत्रजाभ्यां मातापित्रोः क्षयाहे पार्वणमेव कर्तव्यं। दत्तकादिभिरेकोद्दिष्टमिति।
जातूकर्ण्यवचनात्। प्रसङ्गे पार्वणेनैव विधिना क्षेत्रजौरसौ। कुर्यातामितरे कुर्युरेकोद्दिष्टं सुता दश इति। तदसत्। न ह्यत्र क्षयाहवचन

क्षयाह ६

ना ७

मस्ति। अपितु प्रत्यब्दमिति। संतिर्चैव्यतिरिक्तानि प्रत्यब्दं श्राद्धानि अक्षततृतीयामाघीवैशाखीप्रभृतिषु। अतो न क्षयाहविषयपार्वणै

य ६

कोद्दिष्टव्यवस्थापैयालं। यत्तु पराशरवचनं। पितृगोत्रस्य देवत्वमौरसस्य त्रिपौरुषं। सर्वत्रानेकगोत्राणामेकस्यैव मृतेऽहनीति। तदपि न व्य

स ७

वस्थापकं। यस्मादस्यायमर्थः। देवत्वं गतस्य सपिण्डीकृतस्य पितुः सर्वत्र औरसस्य औरसेन त्रिपौरुषं पार्वणं कार्यं। अनेकगोत्राणां भि

स ८

न्नगोत्राणां मातुलादीनां क्षयेऽहनि यच्छ्राद्धं तदेकस्यैव एकोद्दिष्टमेवेति। किंच सपिण्डीकरणादूर्ध्वमप्येकोद्दिष्टमेव कर्तव्यं। औरसेनापि
तुल्यं पैठीनसिना। एकोद्दिष्टं हि कर्तव्यमौरसेन मृतेऽहनि। सपिण्डीकरणादूर्ध्वं मातापित्रोर्न पार्वणमिति। उदीच्यास्तु पुनरेवं व्यवस्थापयन्ति।
अमावास्यायां भाद्रपदकृष्णपक्षे वा मृतास्ते पार्वणमन्यत्र मृताहे एकोद्दिष्टमेव। अमावास्यां क्षययस्य प्रेतपक्षे यस्य वा पुनः। पार्वणं तत्र कर्तव्यं नै
कोद्दिष्टं कदाचनेति स्मरणात्। एतदपि नाद्रियते वृद्धैः। अनिश्चितमूलेनानेन वचनेन निश्चितमूलानां क्षयाहमात्रपार्वणविषयाणां वचना
नाममावास्याप्रेतपक्षमृतास्वविषयत्वेनातिसंकोचस्यायुक्तत्वात्। सामान्यवचनानर्थक्याच्च। तत्र हि सामान्यवचनस्य विशेषवचनेनोपसं
हारो यत्र सामान्यविशेषसंबन्धज्ञानेन वचनद्वयमर्थवत्। यथा ससदस्यासामिध्येनीरनुब्रूयादिति नारम्याधीतस्य विकृतिमात्रविषयस्य सप
दशवाक्यस्य सामिध्येनीलक्षणद्वारसंबन्धिनार्थवतो मित्रविंशादिप्रकरणपठितेन ससदशवाक्येन मित्रविंदाद्यधिकारात्सर्वसंबन्धबोधि

च ३

त्र ४

नार्थवतामित्रविंदादिप्रकरणउपसंहारः। इह तु द्वयोर्मृताहमात्रविषयत्वान्नार्थवत्त्वेति। अतो त्रपाक्षिकैकोद्दिष्टनिवृत्तिफलतया पार्वणनियमवि
धानं युक्तं। न चैकोद्दिष्टवचनानां मातापित्रोः क्षयाहविषयत्वेन पार्वणवचनानां चतदन्यक्षयाहविषयत्वेन व्यवस्थायुक्ता। उभयत्रापि माता
पित्रसुतग्रहणस्य विद्यमानत्वात्। सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं स्मृतेः मातापित्रोः एकेक्कार्यमेकोद्दिष्टं मृतेऽहनीति। तथा। आपाद्य

९७

सहपिंडत्वमौरसो विधिवत्स्कृतः। कुर्वीत दर्शवच्छ्राद्धं मातापित्रोः क्षयेऽहनीति। यदपि केचिदुच्यते। मातापित्रोः क्षयाहे साग्निः पार्वणं कुर्यान्निर
ग्निरेकोद्दिष्टं। वर्षे वर्षे सुतः कुर्यात्पार्वणं योऽग्निमान् द्विजः। पित्रोरनग्निमान् धीर एकोद्दिष्टं मृतेऽहनीति। सुमंतुवचनादिति तदपि सश्रुति
पक्षत्वादुपेक्षणीयं। बहूनां यस्तु ये विप्रा ये चैकाग्नय एव च। तेषां सपिंडनादूर्ध्वमेकोद्दिष्टं न पार्वणमिति स्मरणात्। तत्रैवं निर्णयः। सन्या
सिनां क्षयाहे तु सुतेन पार्वणमेव कर्तव्यं। एकोद्दिष्टं यतेर्नास्ति त्रिदंडग्रहणादिहेति। सपिंडकरणाभावात्पार्वणं तस्य सर्वदेति प्रचेतः स्मरणात्।
अमावास्यां प्रेतपक्षे क्षयाहे च पार्वणमेव। अमावास्याक्षयो यस्य प्रेतपक्षेऽथवा पुनः। इत्यादिवचनस्योक्तरीत्या नियमपरत्वात्। अन्य
त्र क्षयाहे पार्वणैकोद्दिष्टयोर्व्रीहियववद्विकल्प एव। तत्रापि वंशसमाचारव्यवस्था। यां सर्वां व्यवस्थितां व्रीहियववद्विकल्प एव। असरा
भिप्रा। इत्यलमतिप्रसंगेन। नित्यश्राद्धमुक्तं तिरिक्तं सर्वश्राद्धेष्वेव भिदमपि धीयते। पिंडांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा। प्रक्षिपेत्स
त्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत्। एवं दत्तानां पिंडस्य वा प्रतिपत्तिरियं। गवे अजाय ब्राह्मणाय वा तद्दद्यान्न पिंडान्न दद्यात्। अग्नावगा
धे जले वा प्रक्षिपेत्। किंच सत्सु विप्रेषु भोजनदेशावस्थितेषु द्विजोच्छिष्टं न मार्जयेत्। नोद्वासयेत्। भोजनविशेषेण फलविशेषमाह।
हविष्यान्नेन वै मासं पायसेन तु वत्सरं। मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः। ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमं। मासवृद्ध्या
भितृप्यंति दत्तैरिह पितामहाः। हविष्यं च वियोग्यं तिलव्रीह्यादि। यथाह मनुः। तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा। दत्तेन मासं प्रीय
ते विधिवत्पितरो नृणामिति। तदन्नं हविष्यान्नं तेन मासं पितरस्तृप्यंति। इत्यनागतेनान्वयः। पायसेन गव्यपयःसिद्धेन संवत्सरं। संवत्स
रं तु गव्येन पयसा पायसेन वेति स्मरणात्। मत्स्यो भक्ष्यः पाठीनादिस्तस्येदं मात्स्यं। हरिणस्ताम्रो मृगः। एणः कृष्णमृगो ज्ञेयः स्ता
म्रो हरिण उच्यत इत्यायुर्वेदस्मरणात्। तस्येदं हारिणकं॥ अविरुरभ्रस्तत्संबंध्यौरभ्रं। शाकुनं भक्ष्यपक्षिसंबंधि। अज
श्छागस्तदीयं छागं। पृषतश्चित्रमृगस्तन्मांसं पार्षतं। एणः कृष्णमृगस्तत्संबंधि मैणं। रुरुः शंबरस्तत्संबंधि रौरवं। वराहोऽरण्यशू
करस्तदीयं वाराहं। शशस्येदं शाशं। एभिर्मांसैः पितृभ्यो दत्तैः हविष्यान्नेन मासमित्युक्तत्वात्। अत ऊर्ध्वं यथाक्रममेकैकमास
वृद्ध्यापि तरस्तृप्यंति। किंच खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च। लोहामिषं महाशाकं मांसं वार्ध्रीणसस्य च। यद्ददाति
गयास्थश्च सर्वमानंत्यमश्नुते। तथा वर्षात्रयोदश्यां मघासु च विशेषतः। खड्गो गंडकस्तस्य मांसं। महाशल्को मत्स्यभेदः॥

यांक्षपाले ५
वद्
५७
पिंडानां ८
ल८

ड ४
व

मधुमासिकां मुन्यन्नं सर्वमारण्यं नीवारादि। लोहो रक्तश्छागः तदामिषं लोहामिषं। महाशाकं कालशाकं वा। ध्रीणसो वृद्धश्वेतश्छागः। त्रिपि
बं त्विंद्रियक्षीणं श्वेतं वृद्धमजापतिं। वाध्रीणसं तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणीति। याज्ञिकानां प्रसिद्धेः। त्रिपिबः। पिबतः कर्णौ जिह्वा यस्य
जलं स्पृशंति। स त्रिभिः पिबतीति त्रिपिबः। तस्य वाध्रीणस्य सं मांसं। यद्ददाति गयायां च। यत्किंचिन्मध्वादिकमपि गयायां स्वे
ददाति। वराहवाटगाट्टादिषु। च। गंगाद्वारे प्रयागे च नैमिषे पुष्करेऽर्बुदे। सन्निहत्यां गयायां च श्राद्धमक्षय्यतां व्रजेदिति। आनंत्यमश्नु
ते। अनंतफलहेतुत्वं च प्राप्नोत्यानंत्यमश्नुते। इति प्रसेकः संबध्यते। तथा वर्षत्रयोदश्यां भाद्रपदकृष्णपक्षत्रयोदश्यां विशेषतो
मघायुक्तायां। यत्किंचिद्दीयते तत्सर्वमानंत्यमश्नुत इति गतेन संबंधः। अत्र यद्यपि मुन्यन्नं मांसं मध्वादीनि सर्ववर्णानां सामान्येन
श्राद्धयोग्यानि दर्शितानि। तथापि पुलस्त्योक्ता व्यवस्था दर्शनीया। मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः। मधुप्रधानं
शूद्रस्य सर्वेषां चाविरोधि यत्। अस्यायमर्थः। मुन्यन्नं नीवारादि यत् श्राद्धयोग्यमुक्तं तद्ब्राह्मणस्य प्रधानं समग्रफलदं। यच्च मां
सं तत् क्षत्रियवैश्ययोः। यच्च मधु उक्तं तच्छूद्रस्य। एतत्त्रितयव्यतिरिक्तं यदविरोधि यद्यत् प्रतिषिद्धं वास्तुकादि यच्च विहितं हविष्यकालशा
कादि तत्सर्वेषां समग्रफलदमिति॥६७॥ तिथिविशेषात्फलविशेषमाह। कन्यां कन्यावेदिनश्च पशून्वै तत्सुतानपि। द्यूतं कृषिं
वणिज्यं च द्विशफैकशफांस्तथा। ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके। ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा। प्रति
पत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीं। शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते। कन्यां रूपलक्षणशीलवतीं। कन्यावेदिनो जामात
रो बुद्धिरूपलक्षणसंपन्नाः। पशवः क्षुद्राः अजादयः। सुताः सन्मार्गवर्त्तिनः। द्यूतं द्यूतविजयः। कृषिः कृषिफलं। वाणिज्यं
वाणिज्यलाभः। द्विशफाः गवादयः। एकशफा अश्वादयः। ब्रह्मवर्चस्विनः पुत्राः। वेदाध्ययनतदर्थानुष्ठानजपादिजनितं तेजो
ब्रह्मवर्चसं। तद्युतः। स्वर्णरूप्ये हेमरजते। तद्व्यतिरिक्तं त्रपुसीसकादि कुप्यकं। ज्ञातिश्रैष्ठ्यं ज्ञातिषूत्कृष्टत्वं। सर्वकामाः काम्यंत
इति कामाः। स्वर्गपुत्रपश्वादयः। एतानि कन्यादीनि चतुर्दशफलानि। कृष्णपक्षप्रतिपत्प्रभृतिषु अमावास्यापर्यंतासु चतुर्द
शीवर्जितासु चतुर्दशसु तिथिषु श्राद्धदो यथाक्रममिति। ये केचन शस्त्रेण हतास्तेभ्यः कृष्णपक्षचतुर्दश्यामेकोद्दिष्टवि

त्रि २

यां ४

त्रह

यानेन श्राद्धं विरथ्यात्। यदि ब्राह्मणादिस्तान भवंति समत्वमागतस्यापि पितुः शस्त्रहतस्यैव। एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां म
हालये इति स्मरणात्। समत्वमागतस्य सपिंडीकृतस्य महालये भाद्रपदकृष्णपक्षे चतुर्दश्यां शस्त्रहतस्यैव नान्यस्येति निय
म्यते। न पुनः शस्त्रहतस्य चतुर्दश्यामेवेति। अतश्च क्षयाहादौ शस्त्रहतस्यापि यथाप्राप्तमेव श्राद्धं। न च भाद्रपदकृष्णपक्ष
एवायं विधिरिति मंतव्यं। प्रोष्ठपद्या अपरपक्षे श्राद्धं कुर्वीत मासि मासि चैवमिति शौनकस्मरणात्। नक्षत्रविशेषात् फल
विशेषमाह। ७॥ स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा। पुत्रं श्रैष्ठ्यं ससौभाग्यं समृद्धिं मुख्यतां शुभं। प्रवृत्तचक्रतां चैव
वाणिज्यप्रभृतीनपि। अरोगित्वं यशो वीतशोकतां परमां गतिं। धनं वेदान् भिषक्सिद्धिं कुप्यं गा अप्यजाविकं। अश्वाना
युश्च विधिवद्यः श्राद्धं संप्रयच्छति। कृत्तिकादिभरण्यंतं स कामानाप्नुयादिमान्। आस्तिकः श्रद्दधानश्च व्यपेतमदमत्सरः।
कृत्तिकादिं कृत्वा भरण्यंतं प्रतिनक्षत्रं यः श्राद्धं ददाति स यथाक्रमं स्वर्गादीनायुःपर्यंतान् कामानाप्नोति। यद्यास्तिकः श्रद्दधा
नो व्यपेतमत्सरश्च भवति। आस्तिको विश्वासवान्। श्रद्दधान आदरातिशययु[illegible]ः। व्यपेतमदमत्सरः। मदो गर्वः। मत्सर ई
र्ष्या। ताभ्यां च रहितः। स्वर्गो निरतिशयं सुखं। अपत्यमविशेषेण। [illegible] आत्मशक्त्यतिशयः। शौर्यं निर्भयत्वं। क्षेत्रं फलवत्। बलं
शारीरं। पुत्रो गुणवान्। श्रैष्ठ्यं जातिषु। सौभाग्यं जनप्रियता। समृद्धिर्धनादे[illegible]ः। मुख्यता अग्र्यता। शुभं सामान्येन। प्रवृत्तचक्रता
अप्रतिहताज्ञता। वाणिज्यप्रभृतयः। वाणिज्यकृषिकुसीदगोरक्षाः। अरोगित्वमनामयत्वं। यशः प्रख्यातिः। वीतशोकता। इ
ष्टवियोगादिजनितदुःखाभावः। परमा गतिर्ब्रह्मलोकप्राप्तिः। धनं सुवर्णादि। वेदा ऋग्वेदादयः। भिषक्सिद्धिर्भेषजफ
लावाप्तिः। कुप्यं सुवर्णरजतव्यतिरिक्तं ताम्रादि। गावः प्रसिद्धाः। अजा अवय[illegible]श्च। आयुर्दीर्घजीवनं। नास्य र[illegible]भित्वं प
ति दत्तैरिह पितामहाः। इत्यनेन पितृणां श्राद्धेन तृप्तिर्भवतीत्युक्तं। तदनुपपन्नं। प्रातिस्विककर्मानुगुणकर्मवशेन स्वर्गन
रकादिगतानां मनुष्याणां पुत्रादिभिर्दत्तैरन्नपानादिभिस्तृ[illegible] संभवात्। संभवेपि स्वप्रमार्जनमप्यनीशाः कथं स्वर्गा
दिफलं प्रयच्छंतीत्यत आह। वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः। प्रीणयंति मनुष्याणां पितॄन् श्राद्धे पितर्पिताः। आयुः प्र

मद१ औ१

सौ१

स्य२

न्नपानादिना ३

जां धनं विद्यां स्वर्गं मोक्षं सुखानि च । प्रयच्छंति तथा राज्यं प्रीता नॄणां पितामहाः । नन्वत्र देवदत्तादय एव श्राद्धकर्मणि संप्रदानभूताः पित्रा
दिशब्दैरुच्यंते । किं त्वधिष्ठातृवस्वादिदेवतासहिता एव । यथा देवदत्तादिशब्दैर्न शरीरमात्रं नाप्यात्ममात्रं किंतु विशिष्ट आत्मा न उच्यते । ए
वमधिष्ठातृदेवतासहिता एव देवदत्तादयः पित्रादिशब्दैरुच्यंते । अतः स्वाधिष्ठातृदेवतावस्वादयः पुत्रादिभिर्दत्तेनान्नादिना संतर्पिताः संतस्तानपि
देवदत्तादीं स्तर्पयंति । कर्तॄंश्च पुत्रादीन् फलेन संयोजयंति । यथा माता गर्भपोषणाप्राप्तेन दोहदान्नपानादिना स्वयमुपभुक्तेनात्म
त्मासती स्वजठरगतम पत्यं तर्पयति । दोहदान्नपानादिप्रदायिनश्च प्रत्युपकारफलेन संयोजयति । तद्वद्वसवो रुद्रा अदितिसुता
आदित्याः ते पितरः पितृपितामहप्रपितामहशब्दवाच्याः श्राद्धकर्मणि संप्रदानभूताः । किमतः । मनुष्याणां पितॄन्देवदत्तादीन्
स्वयं श्राद्धेन तर्पिताः तर्पयंति । ज्ञानशक्त्यतिशययोगेन । किं च । न केवलं ते पितॄंस्तर्पयंति । अपि तु श्राद्धकारिणः आयुः प्रजां धनं वि
द्यां स्वर्गं मोक्षं सुखानि । राज्यं च कारणत्रयतत्रास्योक्तमन्यदपि फलं स्वयं प्रीताः पितामहा वस्वादयः प्रयच्छंति । ७० ॥ इति श्राद्धप्र
करणं ॥ ७ ॥ दृष्टादृष्टफलसाधनानि कर्माण्यभिहितान्यभिधायिष्यंते च । तेषां स्वरूपनिष्पत्तिः फलसाधनत्वं च विघ्नेन भ
वतीत्यविघ्नार्थं कर्म विधास्यन् विघ्नस्य कारकं हेतुमाह । विनायकः कर्मविघ्नसिद्ध्यर्थमित्यादि । ननु अविघ्नहेतुपरिज्ञानाद्विघ्नस्य प्रागभा
वपरिपालनायोपस्थितस्य प्रध्वंसाय वा प्रेक्षापूर्वकारिणः प्रवर्तंते । रोगस्येवाभयहेतुपरिज्ञानात् । विनायकः कर्मविघ्नसिद्ध्यर्थं विनियो
जितः । गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥ विनायको विघ्नेश्वरः पुरुषार्थसाधनानां कर्मणां विघ्नसिद्ध्यर्थं स्व
रूपफलसाधनत्वविघातसिद्ध्यर्थं विनियोजितो नियोजितः । रुद्रेण ब्रह्मणा च काराद्विष्णुना च गणानां प्रमथानां तत्प्रभृतीनामाधिपत्ये स्वाम्ये
च । एवं विघ्नस्य कारके हेतुमुक्त्वाधुना ज्ञापकं तद्दर्शनार्थमाह । तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत । स्वप्नेवगाहतेत्यर्थं जलं मुंडांश्च
पश्यति । काषायवाससश्चैव क्रव्यादांश्चाधिरोहति । अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते । व्रजन्नपि तथात्मानं मन्यतेनुगतं प
रैः । तेन विनायकेनोपसृष्टो गृहीतो यस्तस्य लक्षणानि । ज्ञापकानि निबोधत जानीध्वं हे मुनयः । पुनर्मुनीनां प्रत्यवमर्शः त्रिभिः
प्रकरणप्रारंभार्थः । स्वप्ने स्वप्नावस्थायां जलं जेम स्वर्पमव गाहते । स्रोतसा ह्रियते निमज्जति वा । मुंडितशिरसः पुरुषान्प
श्यति । काषायवाससो रक्तनीलादिवस्त्रप्रावरणांश्च क्रव्यादान् आममांसाशिनः पक्षिणो गृध्रादीन् मृगांश्च व्याघ्रादीन्

७८

ज्ञापक०
लनार्

यः
विघ्न
निप
ति

मिच्ला

नि२

६५

अधिरोहति। तथा त्यजेश्च आंडाल्यादिभिर्गर्दभैः खरैरुष्ट्रैः क्रमेलकैः सह परिवृतस्तिष्ठति। व्रजन्न गच्छन्नात्मानं परैः शत्रुभिः
पृष्ठतो धावद्भिरनुगतमभिभूयमानमात्मानं मन्यते। एवं स्वप्नदर्शनात् युक्तप्रसङ्गाल्लिङ्गान्याह। विमना विफलारंभः सं
सीदत्यमित्रतः। तेनोपसृष्टो लभते न राज्यं राजनंदनः। कुमारी न च भर्तारमपत्यं गर्भमंगना। आचार्यत्वं श्रोत्रियस्तु न
शिष्योऽध्ययनं तथा। वणिक्लाभं न चाप्नोति कृषिं चापि कृषीवलः। विमना विक्षिप्तचित्तः। विफलारंभो विफलो यारंभ
यस्य स तथोक्तः। न कंचित्फलमाप्नोति। संसीदत्यमित्रतः। विनाकारणेन विमनस्को भवति। राजनंदनो राजकुले जातः श्रुत
शौर्यधैर्यादिगुणयुक्तोऽपि न राज्यं लभते। कुमारी रूपलक्षणादिसंपन्नापीप्सितं भर्तारं। अंगना गार्भिण्यपत्यं। श्रु
तुमती गर्भं। अध्ययनतत्त्वज्ञानेन संपन्नाचार्यत्वं श्रोत्रियः विनयाचारादियुक्तोऽपि शिष्योऽध्ययनं श्रवणं वा न लभते। इति
सर्वत्र संबध्यते। वणिक् वाणिज्योपजीवी तत्र कु लोऽपि वाणिज्यादिक्रयवि क्रयादिषु लाभं। कृषीवलः कर्षकः स तत्राभियु
क्तोऽपि कृषिफलं नाप्नोति। एवं यो यया वृत्त्या जीवति स तत्र निष्फलारंभस्तेनोपसृष्टो वेदितव्यः। एवंकारकनायकशांतिम
ध्यायविधोपन्यासपूर्वकं सविधानमाह। स्नपनं तस्य कर्तव्यं पुण्येऽह्नि विधिपूर्वकं। गौरसर्षपकल्केन सा नोत्सादितस्य च।
सर्वौषधैः सर्वगंधैर्विलिप्तशिरसस्तथा। भद्रासनोपविष्टस्य स्वस्ति वाच्या द्विजाः शुभाः। तस्य विनायकोपसृष्टस्य
अनागतविनायकोपसर्गपरिहारार्थिनो वा स्नपनं। अभिषेचनं कर्तव्यं पुण्येऽह्नि स्वानुकूले नक्षत्रादियुक्ते दिवसे न रात्रौ
विधिपूर्वकं शास्त्रोक्तेतिकर्तव्यतासहितं स्नपनविधिमाह। गौरसर्षपकल्केन सिद्धार्थपिष्टेन। साज्येन घृतलोलीकृते
नोत्सादितस्य। उद्वर्तितांगस्य तथा सर्वौषधैः प्रियंगुनागकेसरादिभिः सर्वगंधैश्चंदनागरकस्तुरिकादिभिर्विलिप्तशिरसो वक्ष्य
माणभद्रासनोपविष्टस्य द्विजा ब्राह्मणाः शुभाः श्रुताध्ययनवृत्तसंपन्नाः शोभना हृतयश्चत्वारो स्य स्वस्ति भवंतो ब्रुवंतु इति वा
च्याः। अस्मिन् समये गृह्योक्तमार्गेण पुण्याहवाचनं कुर्यादित्यर्थः। किंच। अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्।
मृत्तिकां रोचनां गंधान्गुग्गुलं चाप्सु निक्षिपेत्। या आहृता ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात्। चर्मण्यानडुहे रक्ते स्थाप्यं भ

मि५

ज्येट

॥न्र॥

102

शोधि४ भि८ स्मृति६ ह१ नु३ गो८

द्रासनं ततः। अश्वस्थानात् गजस्थानात् वल्मीकात् सरित्संगमात् ह्रदाद्गोष्ठाद्देश्योऽचौं तां पंचविधां मृदं गोरोचनां गंधान् चंदनकुंकुमागुरुप्रभृतीन्

गुग्गुलं च तास्वप्सु निक्षिपेत्। या आप आहृता एकवर्णैः समानवर्णैश्चतुर्भिः कलशैः अव्रणैः अस्फुटितैः कालकैः ह्रदाद्द्रोण्या संगमाद्वा। ततश्चानडुहे

चर्मणि रक्ते लोहितवर्णे उत्तरलोम्नि प्राचीनग्रीवे भद्रं मनोरमम् आसनं श्रीपर्णीनिर्मितं स्थाप्यं। ततः [illegible] सहितान् भूतादि

पल्लवोप [illegible] तान् स्रग्दामवेष्टितकंठान् चंदनचर्चितान् नवाहतवस्त्रभूषितान् कलशान् पूर्वादिदिक्षु स्थापयित्वा [illegible] चित

पंचवर्णस्वस्तिके लोहितमानडुहं चर्मोत्तरलोम प्राचीनग्रीवमास्तीर्य तस्योपरि न्यस्तवस्त्रप्रच्छादितमासनं स्थापयेदित्येतद्भद्रासनं तस्मिन्नु

पविष्टस्य स्वस्तिवाच्य द्विजान् शुभान्॥ छ॥ सहस्राक्षं शतधारम् ऋषिभिः पावनं कृतं। तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते। स्वस्तिवाचनानंतरं

जीवत्पतिपुत्राभी रूपगुणशालिनीभिः सुवेषाभिः कृतमंगलं पूर्वदिक्स्थावस्थितं कलशमादायानेन मंत्रेणाभिषिंचेद्गुरुः। सहस्राक्षम

नेकशक्तिकं शतधारं बहुप्रवाहम् ऋषिभिः मन्वादिभिरेतदुदकं पावनं पवित्रं कृतमुत्पादितं तेनोदकेन त्वां विनायकोपसृष्टं विनायकोपस

र्गशांतये अभिषिंचामि पावमान्यश्चैता आपस्त्वां पुनंतु॥ छ॥ तदनंतरं दक्षिणावस्थितं द्वितीयकलशमादायानेन मंत्रेणाभिषिंचेत्।

भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः। भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुरिति॥ छ॥ ततस्तृतीयं कलशमादायानेन मंत्रेणाभिषि

चेत्। यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि। ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा। तेन वः केशेषु यद्दौर्भाग्यमकल्याणं सीमंते

मूर्द्धनि ललाटे कर्णयोश्चक्षुषोश्च यत्तत्सर्वमापो देव्यो घ्नंतु उपशमयंतु सर्वदेति। ततश्चतुर्थं कलशमादाय सर्वैरेभिस्त्रिभिर्मं

त्रैरभिषिंचेत्। सर्वैर्मंत्रैश्चतुर्थमिति लिंगात्॥ छ॥ स्नातस्य सार्षपं तैलं स्रुवेणौदुंबरेण तु॥ जुहुयान्मूर्द्धनि कुशान्सव्येन परिगृह्य

च॥ उक्तेन प्रकारेण कृताभिषेकस्य मूर्द्धनि सव्यपाणिगृहीतकुशांतर्हिते सार्षपं तैलमौदुंबरवृक्षोद्भवेन स्रुवेण वक्ष्यमाणमंत्रैर्जु

हुयादाचार्यः। मितश्च संमितश्चैव तथा शालकटंकटौ। कूष्मांडो राजपुत्रश्चेत्यंते स्वाहासमन्वितैः। नामभिर्बलिमंत्रैश्च नमस्कारसमन्वि

तैः। मितसंमितादिभिर्विनायकनामभिः स्वाहाकारांतैः प्रणवाद्यैर्जुहुयादिति गतेन संबंधः। स्वाहाकारयोगाच्चतुर्थी विभक्तिस्ततश्च मि

ताय स्वाहा। संमिताय। शालाय। कटंकटाय। कूष्मांडाय। राजपुत्राय स्वाहेति षण्मंत्रा भवंति। अनंतरं लौकिकेऽग्नौ स्थालीपाकवि

धिना चरुं श्रपयित्वा एवमेभिर्मंत्रैस्तस्मिन्नेवाग्नौ हुत्वा तच्छेषं बलिमंत्रैरिंद्राग्नियमनिर्ऋतिवरुणवायुसोमेशान ब्रह्मानंता

तै १

103

॥४९॥

कां॰ २

नां नामभिश्चतुर्थ्यंतैर्नमोंतैस्तेभ्यो बलिं दद्यात्। अनंतरं किं कुर्यादित्याह। द्यावाचतुष्पथे सूर्पे कृत्वा नानास्तीर्यं सर्वतः। कृताकृतांस्तंडुलांश्च
पललौदनमेव च। मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव तु। पुष्पं चित्रं सुगंधं च सुरां च त्रिविधामपि। मूलकं पूरिकापूपांस्तथैवो
डेरकस्रजः। दध्यन्नं पायसं चैव गुडपिष्टं समोदकं। एतान्सर्वानुपाहृत्य भूमौ कृत्वा ततः शिरः। विनायकस्य जननीमुपतिष्ठे
त्ततो बिकां। कृताकृतोपहारद्रव्यजातं विनायकस्योपहृत्य सन्निधानात् जनन्याश्च शिरसा भक्तित्वात्। तत्पूरणाय ॐ हेवक्रतुंडाय
धीमहि। तन्नो दंती प्रचोदयादित्यनेन मंत्रेण विनायकं। सुभगायै विद्महे काममालिन्यै धीमहि। तन्नो गौरी प्रचोदयात्। इत्यनेनां

ग ४ म

बिकां नमस्कुर्यात्। ततः पुरस्तात्शेषमा स्तीर्णे कुशे सूर्पे निधाय चतुष्पथे निदध्यात्। बलिं गृह्णन्त्विमं देवा आदित्या
वसवस्तथा। मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः। असुरा यातुधानाश्च पिशाचा मातरो नगाः। शाकिन्यो यक्षवेता
लायोगिन्यः पूतनाः शिवाः। जृंभकाः सिद्धगंधर्वा मालाविद्याधरास्तथा। दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः।
जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः। मा विघ्नो मा च मे पापं मा संतु परिपंथिनः। सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावा

षं ८

हाः। इत्येतैर्मंत्रैः कृताकृताः सकृद्दलिताः तंडुलाः पललं तिलपिष्टं तन्मिश्र ओदनः पललौदनः। मत्स्याः पक्वा अपक्वाश्च मां
समेतावदेव तु। पक्वमपक्वं च। पुष्पं चित्रं रक्तपीतादिनानावर्णं। सुगंधं चंदनादिसुगंधिद्रव्यं। सुरा त्रिविधा गौडी माध्वी पैष्टी। मूलकं
कंदाकारो मूलविशेषः। पूरिकाः प्रसिद्धाः। अपूपाः स्नेहपक्वा गोधूमविकाराः। उंडेरिकाः स्रजः। उंडेरिका पिष्टादिमय्यः
स्रजः प्रोताः स्रजः। दध्यन्नं दधिमिश्रमन्नं पायसं क्षीरेयी। गुडपिष्टं गुडमिश्रं शाल्यादिपिष्टं। मोदकाः लड्डुकाः। अनंतरं विना

गतेन ४

यकं तज्जननीं चांबिकां वक्ष्यमाणमंत्रेणोपतिष्ठेत्। किं कृत्वेत्यत आह। दूर्वासर्षपपुष्पाणां दत्वार्घ्यं पूर्णमंजलिं। सकुसुमोदकेनार्घ्यं
दत्वा दूर्वासर्षपपुष्पाणां पूर्णमंजलिं च दत्वोपतिष्ठेतेति संबंधः (किं कृत्वेत्यत आह) रूपं देहि यशो देहि भगं भगवन् देहि मे। पुत्रान्देहि
धनं देहि सर्वान्कामांश्च देहि मे। उपस्थानमंत्रमाह। विनायकोपस्थाने प्रणवनिसृष्टं। ततः शुक्लांबरः शुक्लमाल्यानुलेपनः। ब्राह्म

षे २

घर ३

णान् भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि। ततो निकानंतरं यजमानः शुक्लांबरधरः शुक्लमाल्यानुलेपनो ब्राह्मणान् भोजयेत्। यथा
शक्ति गुरवे श्रुताध्ययवृत्तसंपन्नाय विनायकस्नपनविधिज्ञाय वस्त्रयुग्मं दद्यात्। अपिशब्दाद्यथाशक्ति दक्षिणां विनायकोद्देशेन ॥४९॥

104

कां॰ बिकार्या

ब्राह्मणेभ्यश्च॥ ॥छ॥ अत्रायं प्रयोगक्रमः। चतुर्भिर्ब्राह्मणैः साङ्गमुक्तलक्षणं गुरुर्भद्रासनस्य च नानंतरं तत्संनिध्यौ विनायकं तज्जननीं च
तन्मंत्राभ्यां गंधपुष्पादिभिः समभ्यर्च्य चरुं श्रपयित्वा भद्रासनोपविष्टस्य यजमानस्य पुण्याहवाचनं कृत्वा चतुर्भिः कलशैरभिषि
च्य शिरसि स्रुवा चरुहोमं विधायाभिषेकं कृत्वा न्यायांद्विश्चिंद्रादिलोकपाले [illegible] भ्यो बलिं दद्यात्। यजमानस्तु स्नानानंतरं शुक्लमाल्या
वरधरो गुरुणा सहितो विनाय [illegible] मुपहारं स्वशिरसा कृत्वाभिगत्वा कुसुमोदकेनार्घ्यं दत्वा दूर्वासर्षपपुष्पांजलिं दत्वा विनायकमं
बिकां चोपतिष्ठेत। गुरुरूपहारं त्रोपस्सर्पैः कृत्वा चत्वरे निदध्यात्। अनंतरं वस्त्रयुग्मं दक्षिणां ब्राह्मणभोजनं च दद्यादिति विनाय
कस्नपनविधिः॥ ॥छ॥ अस्यैव विनायकस्नपनस्योक्तोपसंहारेण संयोगांतरं दर्शयतुमाह। एवं विनायकं पूज्य ग्रहांश्चैव विधानतः।
कर्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमां॥ एवमुक्तेन प्रकारेण विनायकं संपूज्य कर्मणां फलमविघ्नेनाप्नोति। इत्युक्तोपसंहारः सं
योगांतरमाह। श्रियं चोत्कृष्टतमामाप्नोतीति। श्रीकामः स्नानेन विधानेन विनायकं पूजयेदित्यर्थः। आदित्यग्रहपीडाशांतिकामस्य च ग्रह
पूजादि कल्पं विधास्यन् ग्रहपूजामुपक्षिपति। ग्रहांश्चैव विधानत इति ग्रहानादित्यादीन् वक्ष्यमाणेन विधिना संपूज्य कर्म
णां सिद्धिमाप्नोति श्रियं चाप्नोति। नित्ये [illegible] स्य संयोगमाह। आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा। महागणपतेश्चैव कुर्वन् सि
द्धिमवाप्नुयात्। आदित्यस्य भगवतः सदा प्रतिदिवसं रक्तचंदनकुसुमादिभिः पूजां कुर्वन् तथा स्कंदस्य महागणपतेश्चैव नित्यं पू
जां कुर्वन् सिद्धिं मोक्षमात्मज्ञानद्वारेणाप्नोति। इति नित्यसंयोगः। आदित्यस्कंदमहागणपतीनां मन्यतमस्य सर्वेषां वा तिलकं
स्वर्णमयं रूप्यनिर्मितं वा कुर्वन् सिद्धिमभिलषितामाप्नोति। तथा च क्षुधी चेति काम्यसंयोगः॥ ॥छ॥ इति गणपतिकल्पः॥ ग्रहांश्चैव वि
धानतः॥ कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमां॥ इत्यनेन ग्रहपूजायाः कर्मणामविघ्नेन फलसिद्धिः॥ श्रीफलमित्यु
क्तमिदानीं फलांतराण्याह॥ श्रीकामः शांतिकामो वा ग्रहयज्ञं समारभेत्॥ वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्न
पि॥ श्रीकामद्रुति पूर्वस्यानुवादः। शांतिकाम आपदुपशांतिकामः सस्यादिवृद्ध्यर्थं प्रवर्षणं वृष्टिः। आयुरपमृत्युज

का॰ ८

दिसा ८

॥५०॥

येन दीर्घकालं जीवनं ॥ पुष्टिरेव च यशरीरं स्वं ॥ एताः कामयत इति कामदं धायुः पुष्टिकामः ॥ एते श्रीकामाद्यो ग्रहयज्ञं
ग्रहयज्ञनामवाप्यव समाचरेयुः ॥ तथाभिचरन्नपि अरिष्टोपायेन परपीडाभिचारः ॥ तं कामस्य ग्रहयज्ञमाच
रेत् ॥ ग्रहानाह ॥ सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः ॥ शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः ॥ एते
सूर्यादयो नव ग्रहाः ॥ ग्रहाः पूज्याः इसाकं किंकर्हेसाह ॥ ताम्रा स्फाटिका रक्तचंदनात्स्वर्णकावुभौ ॥ रजता दयसः
सीसाकाः स्युः कार्या ग्रहाः क्रमात् ॥ स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु वा ॥ सूर्यादीनां मूर्तयः ताम्रादिभिर्यथाक्रमं ॥
तदलाभे स्ववर्णैर्वर्णकैः पटे लेख्याः मंडलकेषु वा गंधैः रक्तचंदनादिभिर्यथावर्णं लेख्या इत्यन्वयः तद्विष्णु स्तु त्यादि विशेष
मत्स्यपुराणे कोऽइष्यः ॥ यथाहं पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥ सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्यात्स
दा रविः ॥ श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः ॥ गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥ रक्तमाल्यांबरध
रः शक्तिशूलगदाधरः ॥ चतुर्भुजो मेष गमो वा दः स्याद्धरासुतः ॥ पीतमाल्यांबरधरः कर्णिकारसमद्युतिः ॥
खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ ॥ दंडिनौ वरदौ कार्यौ साक्षसूत्र
कमंडलू ॥ इंद्रनीलद्युतिर्नीलांबरो गृध्रवाहनः ॥ बाणासनधरः कर्तव्योऽर्कसुतः सदा ॥ करालवदनः खड्गचर्म
शूली वरप्रदः ॥ नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते ॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः ॥ गृध्रासन रत
नित्यं केतवः स्युर्वरप्रदाः ॥ सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः ॥ स्वांगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदेति ॥
एतेषां स्थापनदेशश्च तत्रैवोक्तः ॥ मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ॥ उत्तरेण गुरुं विद्याद्बुधं पूर्वोत्तरेण तु ॥
पूर्वेण भार्गवं विद्यात्सोमं दक्षिणपूर्वके ॥ पश्चिमेन शनिं विद्याद्राहुं दक्षिणपश्चिमे ॥ पश्चिमोत्तरतः केतुं स्था
पयेच्छुक्लतंडुलैरिति ॥ पूजाविधिमाह ॥ ७ ॥ ॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥ गंधाश्च बलयश्चैव

२८

लीप

॥५०॥

106

॥५०॥

येन दीर्घकालं जीवनं ॥ पुष्टिः स्तनवधधारीरत्वं ॥ एताः कामयते इति कामयमानः श्रीआयुःपुष्टिकामः ॥ एते श्रीकामादयो ग्रहयज्ञं
ग्रहयज्ञनामकं यागं च समाचरेयुः ॥ तथाभिचरन्नपि अरष्टोपायेन परपीडनं अभिचारः ॥ तं कामयमानश्च ग्रहयज्ञं समाच
रेत् ॥ ग्रहानाह ॥ सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः ॥ शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः ॥ एते
सूर्यादयो नव ग्रहाः ॥ ग्रहाः पूज्याः ॥ ते किंरूपास्त आह ॥ ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ ॥ रजतादयसः
सीसात्कांस्यात्कार्या ग्रहाः क्रमात् ॥ स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु वा ॥ सूर्यादीनां मूर्तयः ताम्रादिभिर्यथाक्रमं ॥
तदलाभे स्ववर्णैः वर्णकैः पटे लेख्याः मंडलकेषु वा गंधैः रक्तचंदनादिभिर्यथावर्णं लेख्याः इत्यन्वयः ॥ द्विभुजत्वादि विशेष
मत्स्यपुराणे कोइ एष्वः ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥ सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्यात्स
दा रविः ॥ श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः ॥ गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥ रक्तमाल्यांबरध
रः शक्तिशूलगदाधरः ॥ चतुर्भुजो मेष गामी वरदः स्याद्धरासुतः ॥ पीतमाल्यांबरधरः कर्णिकारसमद्युतिः ॥
खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः ॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ ॥ दंडिनौ वरदौ कार्यौ साक्षसूत्र
कमंडलू ॥ इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः ॥ बाणबाणासनधरः कर्तव्योऽर्कसुतः सदा ॥ करालवदनः खड्गचर्म
शूली वरप्रदः ॥ नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते ॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः ॥ गृध्रासनगता
नित्यं केतवः स्युर्वरप्रदाः ॥ सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः ॥ स्वांगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदेति ॥
एतेषां स्थापनदेशश्च तत्रैवोक्तः ॥ मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ॥ उत्तरेण गुरुं विद्याद्बुधं पूर्वोत्तरेण तु ॥
पूर्वेण भार्गवं विद्यात्सोमं दक्षिणपूर्वके ॥ पश्चिमेन शनिं विद्याद्राहुं दक्षिणपश्चिमे ॥ पश्चिमोत्तरतः केतुं स्था
पयेच्छुक्लतंदुलैरिति ॥ पूजाविधिमाह ॥ ७२ ॥ ॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥ गंधाश्च बलयश्चैव ॥

२८

लीप

स्तुद्भ

॥५०॥

106

वधु पोदेयश्च गुग्गुलुः॥ कर्तव्या मंत्रवंतश्च चरवः प्रतिदैवतं॥ यथावर्णं यस्य ग्रहस्य यो वर्णस्तद्वर्णानि वस्त्रगंधपु
ष्पाणि देयानि॥ बलयश्च धूपश्च सर्वेभ्यो गुग्गुलुर्देयः॥ चरवश्च प्रतिदैवतं अग्निप्रतिष्ठापना धानादि पूर्वकं च
तुरश्चतुरो मुष्टीन्निर्वपेत्॥ अमुष्मै त्वा जुष्टं निर्वपामि इत्यादि विधिर्नाकार्यः॥ अनंतरं समिदुष्मादि आधाना ज्याघा
रांतं कर्म कृत्वा आदित्यादि ग्रहोद्देशेन यथाक्रमं वक्ष्यमाणमंत्रैर्वक्ष्यमाणाः समि वक्ष्यमाणप्रकारेण कृत्वा चरवो होत
व्याः॥ के मंत्रा नाह॥ आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः ककुत्॥ उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्तिताः॥ बृहस्प
ते अति यदर्यस्तथैवान्नात्परिस्रुताः॥ शं नो देवीस्तथा कांडात् केतुं कृण्वन्निमांस्तथा॥ आकृष्णेन रजसा इत्यादयो नव मं
त्राः॥ यथाक्रमम् आदित्यादीनां वेदितव्याः॥ इदानीं समिध आह॥ अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः॥ शमी
दूर्वा कुशाश्च समिधः क्रमात्॥ अर्कपलाशादयो यथाक्रमं सूर्यादीनां समिधो भवंति॥ ताश्च आर्द्रा अभग्नाः सत्व
चः प्रादेशमात्राः कर्तव्याः किंच॥ एकैकस्यात्राष्टशतमष्टाविंशतिरेव वा॥ होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः॥ आ
दित्यादीनामेकैकस्याष्टशतसंख्याता अष्टाविंशतिसंख्याता वा यथासंभवं मधुना सर्पिषा दध्ना वा युता अर्कादिसमिधो
होतव्याः॥ इदानीं भोजनान्याह॥ गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं॥ दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च॥
दद्याद् ग्रहक्रमादेतद् द्विजेभ्यो भोजनं बुधः॥ शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं॥ गुडेन मिश्र ओदनः गुडौ
दनः पायसं क्षीरेपाहविष्यम् मुन्यादि॥ क्षीरषाष्टिकं क्षीरमिश्रः षाष्टिकौदनः॥ दध्योदनः॥ घृतमिश्र ओदनः हविष्य
ओदनः चूर्णतिलचूर्णमिश्र ओदनः॥ मांसं भक्ष्यमांसमिश्र ओदनः॥ चित्रौदनो नानावर्ण ओदनः॥
एतानि ओदनादीनि यथाक्रमम् आदित्याद्युद्देशेन भोजनार्थं ब्राह्मणेभ्यो दद्यात्॥ ब्राह्मणसंख्या च यथाविभव
वं कर्तव्या॥ गुडौदनाद्यभावे तु यथालाभमोदनादि दद्यात् प्रक्षालनादि विधिपूर्वकं सत्कृत्य सम्मानपुरःसरं दद्यात्॥ ७
दक्षिणामाह॥ धेनुः शंखस्तथानड्वान् हेम वासो हयः क्रमात्॥ कृष्णा गौरौ सं छागः एता वै दक्षिणाः स्मृताः॥

ह१ य१

न्वा २ धो ४ रुं ५ उदुंबरः ७ वि ६
श ६ म्य ५ र्ण ४

धेनुर्दोग्ध्री। शंखः प्रसिद्धः। अनड्वान् भारसहो बलीवर्दः। हेम सुवर्णं। वासः पीतं। हयः पांडुरः। कृष्णा गौः। आयसं लोहस्त्रादि। छागः प्रसिद्धः। एता धेन्वादयो यथाक्रममादित्याद्युद्देशेन ब्राह्मणानां दक्षिणाः स्मृता उक्ता मन्वादिभिः। एतच्च संभवे सति। असंभवे तु यथाला भं शक्ति तो न्यदेवकिंचिद्देयं। शांतिकामेना विशेषेण सर्वे ग्रहाः पूजयितव्याः इत्युक्त्वा तत्र विशेषमाह। यस्य यश्च यदा दुःस्थः स तं यत्नेन पूजयेत्। ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ। यस्य पुरुषस्य यो ग्रहो यदा दुःस्थो दुष्टस्थाने स्थितः स तं ग्रहं तदा यत्नेन विशेषेण पूजयेत्। यस्मादेषां ग्रहाणां ब्रह्मणा पूर्वं वरो दत्तः। पूजिताः संतो यूयमिष्टप्रापणेनानिष्टनिरसनेन च पूजयितारं पूजयिष्यथेति। अविशेषेण द्विजानामभिधाय शांतिकपौष्टिकादीनि कर्माण्यनुक्रमेणानि तत्राभिषेकगुणयुक्तस्य राज्ञो विशेषणाधिकार इति। दर्शयति। ग्रहाधीना नरेंद्राणामुच्छ्रायाः पतनानि च। भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः। नरेंद्राणां अभिषिक्तक्षत्रियाणां ग्रहाः पूज्यतमाः। अनेनान्येषामपि पूज्या इति गम्यते। अन्यत्र कारणमाह। प्राणिनामभ्युदयविनिपाता ग्रहाधीना यस्मात्तस्मादधिकारिभिः पूज्याः। किंच। जगतः स्थावरजंगमात्मकस्य भावाभावौ उत्पत्तिनिरोधौ ग्रहाधीनौ। तत्र यथेते पूजिताः स्वस्वकाले दुःस्थितिनिरोधौ भवतोन्यथोत्पत्तिसमये नोत्पादो न काले निरोधश्च। जगदीश्वरत्वाच्च नरेंद्राणां तद्योगक्षेमकारिणां पूज्यतमा ग्रहा इति तेषां विशेषेण शां

ता६

107

हेतु३

कादिष्वधिकारः। तथाच गौतमेन राजा सर्वस्येष्टे ब्राह्मणवर्जमिति। राजानमधिकृत्य वर्णाश्रमांश्च न्यायतोऽभिरक्षेच्च ततश्चैता
न्स्वधर्मे स्थापयेदित्यादीनुक्त्वा क्रियाद्धर्मोनुक्ता याश्चि च देवोत्पातचिन्तकाः प्रब्रूयुस्तानाद्रियेततदधीनमपि ह्येके योगक्षेमं प्रति
जानते इति। शांतिपौष्टिकाद्यनुष्ठानमभिप्राय शांतिपुण्याहस्वस्त्ययनायुष्यमंगलसंयुक्तान्याभ्युदयिकानि विद्वेषणसंवननाभिचा
रद्विषद्व्युद्धियुक्तानि च शालाग्नौ कुर्यादिति शांतिकादीनि दर्शितानि। इति शांतिप्रकरणं॥ ७॥ साधारणानन्तरं सेवधर्मानुसारी
राज्याभिषेकादिगुणयुक्तस्याधिकृतस्य धर्मविशेषानाह। महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः। विनीतः सत्वसंपन्नः कुली
नः सत्यवाक् शुचिः। अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा। धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित्। स्वरंध्रगोप्ता न्वीक्षिक्यां
दंडनीत्यां तथैव च। विनीतस्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः॥ पुरुषार्थसाधनकर्मारंभाध्यवसायउत्साहः। महानुत्साहो य
स्यासौ महोत्साहः॥ बहुव्ययार्थदर्शी स्थूललक्षः। परकृतोपकारापकारौ न विस्मरतीति कृतज्ञः॥ तपोज्ञानादिवृ
द्धानां सेवकः॥ विनयेन युक्तो विनीतः॥ धनक्षयशोकेनाविरुद्धः॥ पूर्वोक्तस्मात धर्मपालक उच्यते॥ न संशयं प्रपद्येत
नाकस्मादप्रियं वदेदित्यादिनोक्तः॥ सत्वसंपन्नः॥ संपदापदोर्हर्षविषादरहितः। मातृतः पितृतश्चाभिजनवान् कुलीनः॥
सत्यवाक्। सत्यवदनशीलः॥ शुचिर्बाह्याभ्यंतरशौचयुक्तः॥ अवश्यकार्याणामारब्धानां आरंभोपायेप्रार नांच
समापने योऽविलंबते सोऽदीर्घसूत्रः॥ अनुगतार्थाविस्मरणशीलः स्मृतिमान्॥ अक्षुद्रो सद्गुणद्वेषी॥ अपरु
षः। परदोषाकीर्तनः॥ धार्मिको वर्णाश्रमधर्मान्वितः॥ न विद्यंते व्यसनानि यस्यासौ अव्यसनः॥ व्यसनानि चाष्टादश
यथाह मनुः॥ मृगयाक्षा दिवास्वप्नः परिवादः स्त्रियो मदः॥ तौर्यत्रिकं वृथाट्या च कामजो दशको गुणः॥ पैशुन्यं साहसं द्रोह
ईर्ष्यासूयार्थदूषणं। वाग्दंडजं च पारुष्यं क्रोधजोऽपि गुणोऽष्टकः॥ इति तेषु सप्तकष्टतमानि यथाह॥ पानमक्षाः स्त्रि
यश्चैव मृगया च यथाक्रमं॥ एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे॥ दंडस्य पातनं चैव वाक्पारुष्यार्थदूषणे॥ क्रोध
जेऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदेति॥ प्राज्ञो गंभीरार्थविधारणक्षमः॥ शूरो निर्भयः॥ रहस्यवित् गोपनीयार्थ
गोपनचतुरः॥ स्वरंध्रगोप्ता॥ स्वस्य सप्तसु राज्यांगेषु परप्रवेशार्हछिद्रं वृत्यंत स्वरंध्रं तस्य गोप्ता छादयिता

।५२॥ आन्वीक्षिक्यामात्मविद्यायां दंडनीत्यामर्थयोगक्षेमोपयोगिन्यां वार्तायां कृषिवाणिज्यापशुपालनरूपायां धनोपचयहेतुभूतायां त्रय्यामृग्यजुःसामाख्यायां च विनीतस्तत्तदभिज्ञैः प्रावीण्यं नीतः। यथाह मनुः॥ त्रैविद्येभ्यस्त्रयीं विद्यां दंडनीतिं च शाश्वतीम्। आन्वीक्षिकीं चात्मविद्यां वार्तारंभांश्च लोकतः॥ इति नराधिपो राज्येऽभिषिक्तः स्यादिति संबंधः॥ एवमभिषेकगुणयुक्तः स्यात् रंगानूध मुनि निधायेदानीं बहिरंगानाह॥ स मंत्रिणः प्रकुर्वीत प्राज्ञान् मौलान् स्थिरान् शुचीन्॥ तैः सार्द्धं चिंतयेद्राज्यं विप्रेणाथ ततः स्वयं॥ ३१२॥ महोत्साहादिगुणैर्युक्तो राजा मंत्रिणः प्रकुर्वीत। कथंभूतान्। प्राज्ञान् हिताहितविवेककुशलान्। मौलान् स्वकुलपरंपरागतान्। स्थिरान् महत्यपि हर्षविषादस्थाने विकाररहितान्। शुचीन् धर्मार्थकामभयोपधाशुद्धान्। ते च सप्ताष्टौ वा कार्याः। यथाह मनुः। मौलान् शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्गतान्। सचिवान् सप्त चाष्टौ वा कुर्वीत सुपरीक्षितान्॥ इति। एवं मंत्रिणः प्रकल्प्य तैः सार्द्धं राज्यं संधिविग्रहादिकार्यं चिंतयेत् समस्तैर्व्यस्तैश्च। अनंतरं तेषामभिप्रायं ज्ञात्वा सकलशास्त्रार्थविचारकुशलेन पुरोहितेन सह विचिंत्य ततः स्वयं स्वबुद्ध्या कार्यं चिंतयेत्। कीदृशं पुरोहितं कुर्यादित्यत आह। पुरोहितं प्रकुर्वीत दैवज्ञमुदितोदितं। दंडनीत्यां च कुशलमथर्वांगिरसे तथा। तथा पुरोहितं सर्वेषु दृष्टादृष्टेषु कर्मसु पुरःस्थितं दानमानसत्कारैरात्मसंबद्धं कुर्यात्। कथंभूतं दैवज्ञं ग्रहज्योतिषागमनाद्ये दितावेत्ति उदितोदितं। विद्याभिजनानुष्ठानादिभिरुदितैरुच्चैरुदितं संपन्नं। दंडनीत्यामर्थशास्त्रे कुशलं। अथर्वांगिरसे च शांत्यादिकर्मणि॥ ३१३॥ श्रौतस्मार्तक्रियाहेतोर्वृणुयादेव चर्त्विजः। यज्ञांश्चैव प्रकुर्वीत विधिवद्भूरिदक्षिणान्। श्रौताग्निहोत्रादि स्मार्तौपासनादिक्रियानुष्ठानसिद्ध्यर्थं ऋत्विजो वृणुयात्। किंच। भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च। अक्षयोऽयं निधी राज्ञां यद्विप्रेषूपपादितं। ब्राह्मणेभ्यो भोगान् सुखानि तत्साधनहारेण दद्यात्। वसूनि च सुवर्णरूप्यप्रभृतीनि नानाप्रकाराणि। यस्मादयं राज्ञां अक्षयो निधिः। विधिः। यद्ब्राह्मणेभ्यो दीयते। साधारणधर्मत्वेन दान प्राप्तौ सत्यां राज्ञो दानप्राधान्यप्रतिपादनार्थं पुनर्वचनं॥ ३१४॥ किंच। अस्कन्नमव्ययं चैव प्रायश्चित्तैरदूषितं। अग्नेः सकाशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते। अग्नेः सकाशाद्दर्शसाध्याद्भूरिदक्षिणात्तराजसूयादेरपि विप्राग्नौ हुतं श्रेष्ठमुच्यते। यत एतदस्कन्नं स्खलनरहितं। अव्ययं पशुहिंसादिरहितं। प्रायश्चित्तैश्चादूषितं। प्रायश्चित्तायासे ...

× यज्ञान् राजसूयादीन् विधिवद्यथाविधानं भूरिदक्षिणान् बहुदक्षिणानेव कुर्यात्॥ ५×

Margin (left): थ५ स्व८ — त्रै२

Margin (right): ज्ञे४ ... ।।५२।।

109

रि०

स्मनि विप्रेभ्यो रथादिस्तृतंक यापरिपाचाद्यादिस्याह ॥ अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत् ॥ पालितं वर्द्धये
न्नीत्या वृद्धं पात्रेषु निःक्षिपेत् ॥ अलब्धलाभाय च मन्त्रशास्त्रानुसारेण यतेत ॥ यत्नेन लब्धं स्वयमवेक्ष्य रक्षयेत् ॥ रक्षिते
न लब्धं तत्परिपालयेत् ॥ पालितं तत्परितयारक्षेच्च ॥ नीत्या वणिक्पथादिकया वृद्धिं नयेत् ॥ वृद्धं च पात्रेषु निक्षिपेत् ॥ त्रिषु ध
र्मार्थकामपात्रेषु निःक्षिपेद्दद्यात् ॥ छ ॥ पात्रे निक्षिप्य किं कुर्यादित्याह ॥ दत्वा भूमिं निबंधं वा कृत्वा लेख्यं तु कारयेत् ॥ आगा
मिभद्रनृपतिपरिज्ञानाय पार्थिवः ॥ यथोक्तविधिना भूमिं दत्वा स्ववृत्तिं निवृत्तिं कृत्वा निबंधं वा एकस्य कांडे भारकस्य इयंतो
रूपका एकस्य पर्णभारस्य इयंति पर्णानीति वा निबंधं कृत्वा लेख्यं तु कारयेत् ॥ किमर्थमागामिनरपतीये भद्राः साधवो नृपत
यो भूपतयस्तेषां प्रतिगृहीतमनेन दत्तमनेन परिगृहीतमिति परिज्ञानार्थं पार्थिवो भूपतिरनेन भूपतेरेव भूमिदाने निबंध
दाने वाधिकारो न भोगपतेरिति दर्शितं ॥ छ ॥ लेख्यं कारयेदित्युक्तं कथं कारयेदित्याह ॥ पटे वा ताम्रपट्टे वा स्वमुद्रोपरि चिन्हितं ॥
अभिलेख्यात्मनो वंश्यानात्मानं च महीपतिः ॥ प्रतिग्रहपरिमाणं दानच्छेदोपवर्णनं ॥ स्वहस्तकालसंपन्नं शासनं कारयेत्स्थिरं ॥ कार्पा
सिके पटे वा ताम्रपट्टे वा ताम्रफलके वा आत्मनो वंश्यान् प्रपितामहपितामहपितॄन् बहुवचनस्यार्थवत्वात् ॥ वंशावीर्यश्रुतादिगुणो
पवर्णनपूर्वकमभिलेख्यात्मानं च च शब्दात्प्रतिगृहीतारं प्रतिग्रहपरिमाणं दानच्छेदोपवर्णनं च अभिलिख्य प्रतिगृह्यत इति प्रति

नं६

ग्रहो निबंधस्तस्य रूपकादिपरिमाणं दीयत इति दानं क्षेत्रादि । तस्य च्छेदः छिद्यते नेनेति छेदो नद्याघावायेनिवर्तनपरिमाणं च ॥
तस्योपवर्णनं । अमुकनद्या दक्षिणतोयं ग्रामः क्षेत्रं वा पर्वतो मुकग्रामस्यैतावन्निवर्तन भिसादिनिवर्तनपरिमाणं च लेख्यमेव ॥ आ
घाटस्य नदी नगरवल्मीदेः संचारस्थान भूमेरन्यैर्नाधिकभावसंभवात्तल्लिखसर्थस्वहस्तेन स्वहस्तलिखितेन मतं तत्रमेत्र
मुकपुत्रस्य यदत्र परिलेखितं मिस्सनेन संपन्नं युक्तं कालेन च उद्भस्यैपरागादिना संपन्नं ॥ समुद्रपागरूडवराहरूपयोपरिबहि

न२

श्चिरकालेदृविध्येन शाकनृपातीतसंवत्सररूपेण दानेन चिन्हितं अंकितं स्थिरं दृढं शासनं एवं तोभविष्यतां नृपतयोनेनदा
नाश्रेयोनुपालनमिति शासनं कारयेन्महीपतिर्न भोगपतिः संधिविग्रहाधिकारिणान्येन केनचित् ॥ संधिविग्रहका

॥५३॥

रीतुम्भवेधरस्यलेखकं ॥ स्वयंराज्ञासमादिष्टः सन्धिविग्रहजः ॥ सन मितिस्मरणात् ॥ दानमात्रेणैव दानफले सिद्धे शासनकरणं त
त्रैव भोगाभिवृध्यापफलातिशयार्थे ॥ इदानीं राज्ञो निवास स्थानमाह ॥ रम्यं पशव्यमाजीव्यं जांगलं देशमावसेत् ॥ तत्र दुर्गा
णि कुर्वीत जनकोशात्मगुप्तये ॥ रम्यं रमणीयं । अरामकल्पकादिभिः । पशव्यं पशुभ्यो हितं । आजीव्यमुपजीव्यं । कंदमू
लपुष्पफलादिभिः ॥ जांगलं । यद्यपि स्वल्पोदकतरुपर्वतो देशो जांगलस्तथापि अत्र समजलतरुपर्वतो देशो जांगलशब्दे
नाभिधीयते ॥ तं देशमावसेत् ॥ अधिवसेत् । तत्र एवंविधे देशे जनानां कोशस्य सुवर्णादेरात्मनश्च रक्षणार्थं दुर्गं कु
र्वीत । तद्दुर्गं च षड्विधं ॥ यथाह मनुः ॥ धनुर्दुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च । नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरमिति ॥ ४ ॥
तत्र तत्र च निस्नातान् अध्यक्षान् कुशलान् शुचीन् ॥ प्रकुर्यादायकर्मांतव्ययकर्मसु चोद्यतान् ॥ तत्र तत्र धर्मार्थेस्त्र्यादि
षु अध्यक्षान् योग्यान् अधिकारिणः प्रकुर्यात् नियुंजीत ॥ यथाह ॥ धर्मप्रवृत्तेषु धर्मज्ञान् अर्थेष्वर्थेषु पंडितान् । स्त्रीषु
क्लीबान् नियुंजीत नीचान्नीचेषु कर्मस्विति । कीदृशान् निस्नातान् । अनन्यव्यापारान्कुशलान् । तत्तद्व्यापारचतुरान् । शुचीन् । रा
चतुर्विधोपधाशुद्धान् । आयकर्मसु सुवर्णाद्युत्पत्तिस्थानेषु व्ययकर्मसु सुवर्णादिदानस्थानेषु चोद्यतान् । अनलसान् ।
उक्तं च
च शौचशौर्यप्राज्ञत्वादिगुणयुक्तान् । प्राज्ञत्वमुपधाशुद्धिः प्रमादो नियुक्तेता । कारयेद्व्यसनाभाव स्वामिभक्तिश्च या
प्यताम् इति ॥ ६ ॥ भोगाश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च । इति सामान्येन स्वस्य दानमुक्तं इदानीं नृपाणीं विक्र
मार्जितस्य दानफलातिशयमाह ॥ नातः परतरो धर्मो नृपाणां यद्रणार्जितं । विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा ॥
नास्मादुत्कृष्टतरो धर्मो नृपाणां विद्यते यद्रणार्जितं द्रव्यं विप्रेभ्यो दीयते यच्च प्रजाभ्यो अभयप्रदानं ॥ ७ ॥ रणार्जि
तं देयमित्युक्तं द्रव्यार्जनाय रणे प्रवृत्तस्य विपत्तिरपि संभवतीति । न धर्मो नापयशः । ततो निवृत्तिरेव ज्यायसीत्यत आह ॥
य आहवेषु वध्यंते भूम्यर्थमपराङ्मुखाः । अकूटैरायुधैर्यांति ते स्वर्गं योगिनो यथा ॥ ये भूम्याद्यर्थमाहवेषु प्रवृत्ताः सं
तोऽपराङ्मुखा अपि मुखा वध्यंते मार्यंते ते स्वर्गं यांति योगाभ्यासरता यथा । पदि अकूटैरविषदिग्धैः । कर्णि

॥५३॥

१११

मिरायुधैर्वा द्वारो भवंति॥ ७॥ किंच [illegible] निवर्तिनां। राजा सुकृतमादत्ते हतानां विपलायिनां॥
स्वबलेषु करितुरंगरथपदातिषु भग्नेषु निवर्तिनां। परबलाभिमुखं ययायिनां पदानि क्रतुतुल्यानि अश्वमेधतुल्यानि॥ वि
पर्यये दोषमाह। विपलायितानां पराङ्मुखानां हतानां राजा सुकृतान्यादत्ते॥ ७॥ अपि च। नवास्म्यहं वाग्नि क्लीबं निर्हेतिं पर
संगतं। न हन्याद्विनिवृत्तं च युद्धप्रेक्षणकादिकं॥ नवाहमिति यो वदति तं क्लीबं नपुंसकं॥ निर्हेतिं निःशस्त्रं च। परस्य युतेरन्येन
सह युध्यमानं। युद्धान्निवृत्तं विनिवृत्तं। युद्धप्रेक्षणको युद्धदर्शी तं। न हन्यादिति सर्वत्र संबंधः। आदिशब्दाद्व्यश्वसारथ्या
दीनां ग्रहणं॥ ॥ यथाह गौतमः। न दोषो हिंसायामाहवेऽन्यत्र व्यश्वसारथ्यनायुधकृतांजलिप्रकीर्णकेशपराङ्मुखोपवि
ष्टस्थलवृक्षारूढदूतगोब्राह्मणवादिभ्य इति। तथा [illegible]। न पानीयं पिबंतं न भुंजानं नोपानहौ मुंचंतं न
वर्माणं न स्त्रियं न करेणुं न वाजिनं न सारथिनं सूतं न दूतं न ब्राह्मणं न राजानमराजा हन्यादिति॥ कृतरक्षः समुत्था
यपश्येदायव्ययौ स्वयं॥ व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुंजीत कामतः॥ कृतरक्षः परस्मादात्मनि कृतरक्षो विधाय प्रतिदिनं
प्रातःकाले कृत्यमेवायव्ययौ पश्येत्। ततो व्यवहारान् दृष्ट्वा मध्याह्नकाले स्नात्वा कामतो यथारुचि भुंजीत हिरण्यं

या०८ [illegible]पनानीतं भांडागारेषु निक्षिपेत्। पश्येच्चारांस्ततो दूतान् प्रेषयेन्मंत्रिसंगतः॥ तदैतरहिरण्यादिकं व्यवहृते हिरण्या नं८
धानयनयुक्तैरानीतं स्वयमेव निरीक्ष्य भांडागारे च निक्षिपेत्। ततश्चारान् स्वपरराष्ट्रात् प्रत्यागतान् पश्येत्। ये राजवृत्तांतप
रिज्ञानाय परिव्राजकतापसादिरूपेण गूढचारिणः प्रेषिताः तान् दृष्ट्वा किंचिन्निवेदयेत्। तदनंतरं दूतान् प्रेषयेत्। दूता

प्रति५ स्तु प्रकटमेव राजांतरं गतागतमाचरंति। ते च त्रिविधाः। निसृष्टार्थाः संदिष्टार्थाः शासनहस्ताश्च। तत्र निसृष्टार्थो
राजकार्याणि देशकालोचितानि स्वयमेव कथयितुं समर्थः। उक्तमात्रं ये परस्मै निवेदयंति ते संदिष्टार्थाः। शासनह
स्तास्तु ये राजलेखहारिणः। तान् पूर्वप्रेषितानागतान् मंत्रिभिः संगतः पश्येत्। दृष्ट्वा तद्वार्त्तामाकलय्य पुनः प्रेषयेत्।

नूर ततः स्वैरविहारी स्यान्मंत्रिभिर्वा समागतः। बालानां दर्शनं कृत्वा सेनान्या सह चिंतयेत्। तदनंतरमपराह्ने स्वैरं य
थेष्टमेवैकांतःपुरे विहारी स्यात्। मंत्रिभिर्वा विश्वासिभिः कलाकुशलैः परिहासवेदिभिः परिवृतः। स्त्रीभिश्च

112

॥५४॥

रूपयौवनवैदग्ध्यशालिनीभिः। भुक्तवान्विशेद्राजा स्त्रीभिरंतःपुरं स्वरं। विहृत्य च यथाकामं पुनः कार्याणि चिंतयेदिति मनुस्म
रणात्। ततो विशिष्टैर्वस्त्रकुसुमविलेपनालंकारैरलंकृतो हस्त्यश्वरथपदातिबलानि दृष्ट्वा सेनान्यासेनापतिना सहत
द्रक्षणादिदेशकालोचितं चिंतयेत्॥ छ॥ संध्यामुपास्य शृणुयाच्चाराणां गूढभाषितं॥ गीतनृत्यैश्च संप्रीतः पठेत्स्वाध्या
यमेव च। ततः सायंकाले संध्यामुपास्य सामान्यप्रासस्यापि पुनर्वचनं कार्यांकुरत्वादविस्मरणार्थं। अनंतरं ये पूर्व
दूताः कचित्स्थाने निवेशितास्तेषां चाराणां गूढभाषितं। अंतर्वेश्मेशस्त्रपाणिः शृणुयात्। उक्तं च संध्यां चोपास्य शृ
णुयादंतर्वेश्मनि शस्त्रभृत्। रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितमिति। ततोनृत्यगीतादिभिः कंचित्कालं क्रि
डित्वा कक्षांतरं प्रविश्य पश्चाद्भुक्त्वा। गत्वा कक्षांतरं च न्यस्तमनुज्ञाप्य तज्जनं। [illegible] प्रविशेद्भोजनार्थं स्त्रीभिरंतःपुरं स
हेति। ततो विस्मरणार्थं यथाशक्ति स्वाध्यायं पठेत्। संविशेत्तु यथाघोषेण प्रतिबुध्येत्तथैव च। शास्त्राणि चिंतयेद्बुध्वा
सर्वकर्तव्यतां तथा। तदनंतरं तु यत्रास्वादिघोषेण संविशेत्। स्वप्यात्। तथैव तु यदि घोषेणैव बुध्येत। प्रतिबुध्य च
शास्त्राणि चिंतयेद्धिद्विविश्वासिभिः सह एकाकी वा पश्चिमे यामे शास्त्राणि चिंतयेत्। सर्वकर्तव्यताश्च सर्वकार्याणि च।
एतच्च स्वस्थं प्रत्युच्यते। अस्वस्थः पुनः सर्वकार्येषु न्यनियोजयेत्। प्रेषयेच्च सदा चारान् स्वेषु न्येषु च सादरात्। ऋत्वि
क्पुरोहिताचार्यैराशीर्भिरभिनंदितः॥ दृष्ट्वा ज्योतिर्विदो वैद्यान्दद्याद्गाः कांचनं महीं॥ नैवेशिकानि [illegible] च तथा श्रोत्रियेभ्यो गृहा
णि च। अनंतरं तत्र स्थ एव विश्वस्तांश्चारान्दानमानसत्कारैः पूजितान् स्वेषु सामंताटविकादिषु अन्येषु च महीपतिषु प्रेषयेत्॥
तच्चिकीर्षितपरिज्ञानाय ततः प्रातः संध्यामुपास्याग्निहोत्रं च हुत्वा पुरोहितान् ऋत्विगाचार्यादिभिराशीर्भिरभिनंदितो ज्यो
तिर्विदो दृष्ट्वा तेभ्यश्च ग्रहादिस्थितिं विदित्वा शांतिकादि निपुरोहितायादिश्य वैद्यांश्च दृष्ट्वा तेभ्यः स्वशरीरस्थितिं विदित्वा
धप्रतिविधानं चादिश्य गा दोग्ध्रीः कांचनं महीं। नैवेशिकानि विवाहोपयोगीनि कन्यालंकारादीनि। गृहाणि च सुधा
धवलितादीनि श्रोत्रियेभ्यो वीतवेदेभ्यो ब्राह्मणेभ्यो दद्यादिति प्रत्येकं संबध्यते। छ॥ किंच। ब्राह्मणेषु क्षमी स्निग्धेषु

पु२ ॥५४॥

नि५
तु६
वप्रति२

113

जिह्मः क्रोधनोरिपुः॥ स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता॥ ब्राह्मणेष्वधिक्षिप्तस्त्वपि क्षमी क्षमावान्। स्निग्धेषु स्नेहवत्सु मित्रा
दिषु जिह्मः। अवक्रः। अरिषु क्रोधनः। भृत्यवर्गेषु प्रजासु च हिताचरणेन। हिताचरणेनाहितनिवर्त्तनेन च पितेव दयावान् स्यादि
ति प्रत्येकं संबध्यते॥ किंच पुण्यात्षड्भागमादत्ते न्यायेन परिपालयेत्। सर्वदानाधिकं यस्मात् प्रजानां परिपालनं। यस्मान्न्यायेन धर्म
शास्त्रोक्तमार्गेण प्रजाः परिपालयन्। परिपालितप्रजोपचितपुण्यात्षड्भागं षष्ठं भागमादत्ते। यस्माच्च सर्वेभ्यो भूम्यादिदाने
भ्यो प्रजानां परिपालनमधिकफलं। तस्मात्प्रजासु यथा पिता तथैव स्यात् इति गतेन संबंधः॥७॥ चाटतस्कर दुर्वृत्तमहासा
हसिकादिभिः पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः। चाटाः प्रतारकाः। विश्वास्य ये परधनमुपहरंति। प्रच्छन्नापहारिणस्तस्क
राः। दुर्वृत्ता ऐंद्रजालिककितवादयः। सहो बलं। सहसा बलेन कृतं साहसं। महच्च तत्साहसं च महासाहसं तेन वर्त्तंत इति महासाहसि
काः। प्रसह्यापहारिणः। आदिशब्दान्मौलिकुहकदुर्वृत्तयः। एतैः पीड्यमाना बाध्यमानाः प्रजा रक्षेत्। कायस्थाः लेखकाः। गणका
श्च तैः पीड्यमाना विशेषतो रक्षेत्। तेषां राजवल्लभतया अतिमायावितया च दुर्निवारत्वात्॥८॥ अरक्ष्यमाणाः कुर्वंति यत्किं
चित्किल्बिषं प्रजाः। तस्मात्तु नृपतेरर्द्धं यस्मात् गृह्णात्यसौ करान्। अरक्ष्यमाणाः प्रजा यत्किंचित्किल्बिषं चौर्यपरदारगमनादि कुर्वंति।
तस्मात्तत्पापादर्द्धं नृपतेर्भवति। यस्मादसौ राजा रक्षणार्थं प्रजाभ्यः करान् गृह्णाति॥९॥ ये राष्ट्राधिकृतास्तेषां चारैर्ज्ञात्वा विचेष्टितं। सा
धून् संमानयेद्राजा विपरीतांश्च घातयेत्॥ उत्कोचजीविनो द्रव्यहीनान् कृत्वा विवासयेत्। सद्दानमानसत्कारैः श्रोत्रियान्वासयेत्स
दा। राष्ट्रे ज्ञात्वाधिकारेषु ये नियुक्तास्तेषां विचेष्टितं। चरितं चारैरुक्तलक्षणैः सम्यक् ज्ञात्वा साधून् सुचरितान् सन्मानयेत्॥
दानमानसत्कारैः पूजयेत्। विपरीतान् दुश्चरितान् सम्यक् विदित्वा घातयेत्। अपराधानुसारेण पुनरुत्कोचजीविनस्तान् द्रव्य
हीनान् कृत्वा स्वराष्ट्रात्प्रवासयेत्। श्रोत्रियान् सद्दानमानैः सहितान् कृत्वा स्वराष्ट्रे सदैव वासयेत्। अन्यायेन नृपो राष्ट्रात् स्वको
शं योऽभिवर्द्धयेत्। सोऽचिराद्विगतश्रीको नाशमेति सबांधवः। योऽसौ राजा स्वराष्ट्रादन्यायेन धनमादाय स्वकोशं वर्द्धयति। सो
ऽचिरात् शीघ्रमेव विगतश्रीको [illegible] विनष्टलक्ष्मीको बंधुभिः सह विनाशं प्राप्नोति। प्रजापीडनसंतापात्समुद्भूतो हुताशनः॥
राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्त्तते॥ प्रजानां तस्करादिकृतपीडनेन यः संतापस्तस्मादुद्भूतो हुताशनोऽग्निः संतापकः

सत्कारैः ४

न३

चे५

॥७५५॥ धर्मेउ वाप निदे तथा

रित्वादपुण्यराशिर्लोकाशनशब्देनोच्यते सराज्ञः कुलं श्रियं प्राणानदग्ध्वा नाशमनीत्वा न निवर्त्तते नोपशाम्यति। यस्त्वन्नृपते धर्मेः स्व
राष्ट्रपरिपालनेन। तमेव कृत्स्नमाप्नोति परराष्ट्रं वशं नयेत् न्यायतः स्वराष्ट्रपरिपालनेन राज्ञो यो धर्मस्तं सकलं वक्ष्यमाणन्यायेन
परराष्ट्रं वशं नयन् आत्मसात्कुर्वन् प्राप्नोति षड्भागं च। किंच। यस्मिन् देशे ये य आचारो व्यवहारः कुलस्थितिः तथैव परिपाल्यो
सो यदा वशमुपागतः। यदा परदेशो वशमुपागतः तदा न स्वदेशाचारादिसंस्कारः कार्यः किंतु यस्मिन् देशे य आचारः कु
लस्थिति व्यवहारो वा यथैव प्रागासीत् तथैव सो परिपालनीयो यदि शास्त्रविरुद्धो न भवति। यदा वशमुपागेऽस्य नेन वशोप
गमनात् प्राग्... यम प्रतिदर्शितं यथोक्तं। उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत्। दूषयेच्चास्य सततं यवसान्नोदकेंधन
मिति। मंत्रमूलं यतो राज्यमतो मंत्रं सुरक्षितं कुर्याद्यथास्य न विदुः कर्मणामाफलोदयात्। यस्मात्तैः सार्द्धं चिंतयेद्राज्यमि
त्याद्युक्तं मंत्रमूलं राज्यं। तस्मान्मंत्रं यत्नेन सुरक्षितं कुर्यात्। यथास्य राज्ञः कर्मणां संधिविग्रहादीनामाफलोदयात् फल
निष्पत्तेः प्रागन्ये मंत्रं न जानंति। किंच। अरिमित्रमुदासीनोऽनंतरस्तत्परः परः। क्रमशो मंडलं चिंत्यं सामादिभिरुपक्रमैः।
अरिः शत्रुः मित्रं सुहृत् उभयविलक्षण उदासीनः। ते च त्रयस्त्रिविधाः। सहजाः कृत्रिमाः प्राकृताश्चेति। तत्र सहजो
रिः सापत्न■ पितृव्यतत्सुतादिः। कृत्रिमोरिः यस्यापकृतं येन वापकृतं। प्राकृतस्त्वनंतरदेशाधिपतिः। सहजं मित्रं भा
गिनेय पितृष्वस्रेयमातृष्वस्रेयादि। कृत्रिमं मित्रं येनोपकृतं यस्योपकृतं वा। प्राकृतं मित्रं एकांतरदेशाधिपतिः। सु
हृज्जकृत्रिमशत्रुमित्रलक्षणरहितो सहजकृत्रिमोदासीनो॥ प्राकृतोदासीनो ह्यंतरदेशाधिपतिः। अरिः पुनश्चतुर्वि
धः। यातव्योच्छेत्तव्यो पीड्यकर्शनीयभेदेन। तत्र यातव्योऽनंतरभूपतिर्व्यसनी हीनबलो विरक्तप्रकृतिः। विदुर्गो मित्रही
नो दुर्बलश्चोच्छेत्तव्यः। पीडनीयो मंत्रबलविहीनः। प्रबलमंत्रबलयुक्तः कर्शनीयः। निर्मूलनाशमुच्छेदं पीडनं बलनिग्रहः। क
र्शनं पुनः प्राहुः कोशदंडापकर्षणा■दिति। मित्रं च द्विविधं। बृंहणीयं कर्शनीयमिति। कोशबलहीनं बृंहणीयं। कोशबला
धिकं कर्शनीयं। अनंतरस्तत्परः पर इति प्राकृतारिमित्रोदासीनानाह। अनंतरः प्राकृतोरिः। तत्परः प्राकृतमित्रं। तस्मा

तु२ त५

॥५५॥

सत्त्वः प्राकृत उदासीनः। शेषाः पुनः प्रसिद्धत्वान्नोक्ताः। एतद्राजमंडलं चक्रमतः पूर्वादिदिक्क्रमेण चिंत्यं। तेषां चेष्टितं ज्ञातव्यं। ताश्चा
च सामादिभिरुपायैर्वक्ष्यमाणैरभिसंधेयाः। एवं [illegible] पुरतः पृष्ठतः पार्श्वतश्च त्रयस्त्रयः [illegible] आत्मा चैक इति। त्रयोदश राजकमिदं॥
राजमंडलं प्रभाकरं। पार्ष्णिग्राहाक्रंदासाराद्यौ स्वरिमित्रोदासीनेष्वेवांतर्भवंतीति। संज्ञाभेदमात्रं तत्रांतरे दर्शितमिति॥
योगीश्वरेण न पृथगुक्ताः। सामादिभिरुपायैरित्युक्तं इदानीं तानुपायानाह। उपायाः साम दानं च भेदो दंडस्तथैव च। स
म्यक्प्रयुक्ताः सिद्ध्येयुर्दंडस्त्वगतिका गतिः। साम प्रियभाषणं। दानं सुवर्णादेः। भेदो भेदनं। तत्सामंतादीनां परस्परतो वै
रस्योत्पादनेन। दंड उपांशुवधो धनापहारादिवधपर्यंतापकारः। एते च सामादयः परिपंथ्यादिसाधनोपायाः एते
च देशकालाद्यनुसारेण सम्यक्प्रयुक्ताः सिद्ध्येयुः। तेषां मध्ये दंडस्त्वगतिका गतिः। उपायांतरसंभवे सति न प्रयोक्तव्यः॥
एतच्चापीडनीयकर्षणीयाभिप्रायेण॥ योऽसु दंड एव मुख्यः। एते च सामादयो न केवलं राजव्यवहारविषयाः। अपि तु स
कललोकव्यवहारविषयाः। यथा। अधीष्व पुत्रक अधीष्व दास्यामि ते वमोदकान्। नो वा [illegible] न्यस्मै प्रदास्यामि कर्णावुत्पाट
यामि ते। इति। संधिं च विग्रहं यानमासनं संश्रयं तथा। द्वैधीभावं गुणानेतान्यथावत्परिकल्पयेत्। संधिर्व्यवस्था
करणं। विग्रहोऽपकारः। यानं परं प्रतियात्रा। आसनमुपेक्षा। संश्रयो बलवदाश्रयणं। द्वैधीभावः स्वबलस्य द्विधा
करणं। एतान् संधिप्रभृतीन् गुणान् यथावद्देशकालशक्तिमित्रादिवशेन कल्पयेत्। यानकालमाह। यदा सस्यगु
णोपेतं परराष्ट्रं तदा व्रजेत्। परश्च हीन आत्मा च हृष्टवाहनपूरुषः। यदा पुनः परराष्ट्रं सस्यैर्वीर्यादिगुणैश्च सम्पन्न
लंघनतृणादिरूपेतं संपन्नं राजा तु स्वतो हीनो बलादिभिरात्मा च हृष्टवाहनपुरुषः हृष्टा वाहनपुरुषा यस्य स तथोक्तः।
तथोक्तपरराष्ट्रमात्मसात्कर्तुं व्रजेत्। प्राणिनामभ्युदयविनिपातानां दैवायत्तत्वाद्यदि दैवमस्ति तदा स्वयमेव पररा
ष्ट्रादिकं श्रीरप्रविक्ष्यति॥ अथ नास्ति कृतेपि पौरुषे न तत्र विक्ष्यति। अतो व्यर्थ एवायं पराक्रमप्रयास इत्यत एवाह। दैवे पुरुष
कारे चैव कर्मसिद्धिर्व्यवस्थिता। तत्र दैवमभिव्यक्तं पौरुषं पौर्वदैहिकं। कर्मसिद्धिः फलप्राप्तिः इष्टानिष्टलक्षणा। सान

का६

उद्योगेन च यातव्य

पि४

॥पद्धे॥

केवलं दैवे व्यवस्थिता। अपि त्वा तत्पुरुषकारे ऽपि। लोके तथा दर्शनात् चिकित्सादिशास्त्रवैयर्थ्याच्च। अपि च पुरुषकाराभावे दैवमेव नास्ति। इत्याह। तच्च दैवमिति। यतः पूर्वदेहार्जितं पौरुषमेव दैवमुच्यते। अल्पपुरुषकारान्न महत्फलोदयामिव्यक्तं॥ तस्मात्पुरुषाकाराभावे न दैवमस्तीत्यर्थः। पुरुषकारे यत्नो विधातव्यः॥ ॥इदानीं मतांतरमाह॥ केचिद्दैवात्स्वभावाच्च कालात्पुरुषकारतः। केचिदिष्टमनिष्टलक्षणं फलं दैवादेवेच्छंति। केचित्स्वभावात्स्वयमेव भवंति। न कारणमपेक्षत इति। केचित्कालात्कर्मसिद्धिः फलप्राप्तिरिष्टानिष्टलक्षणा। सा न केवलं दैवे व्यवस्थिता केचित्पुरुषकारादेवेति। स्वमतमाह। संयोगे केचिदिच्छंति फलं कुशलबुद्धयः। दैवादीनां संयोगे समुच्चये फलं भवतीति कुशलबुद्धयो मन्वादयो मन्यंते। एकैकस्मात्फलं न भवतीत्यत्र दृष्टांतं फलमाह। तथा। यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत्। एवं पुरुषकारेण विना दैवं न सिध्यति। नात्र तिरोहितमस्ति। लाभायपरराष्ट्रं गंतव्यमित्युक्तं। लाभश्च त्रिविधः। हिरण्यलाभो भूलाभो मित्रलाभश्चेति। तेषु मित्रलाभो ज्यायान्। अतस्तत्प्राप्त्युपाये यत्नो विधातव्यः तत्प्राप्त्युपायश्च सत्यवचनमित्याह। हिरण्यभूमिलाभाभ्यां मित्रलब्धिर्वरा यतः। अतो यतेत तत्प्राप्तौ रक्षेत्सत्यं सौहितः। यस्माद्धिरण्यस्य भूम्यादिलाभेभ्यो मित्रलब्धिर्वरोत्कृष्टा। तस्मात्तत्प्राप्तौ यतेत तद्यत्नं कुर्वीत सामादिभिः सत्यं च रक्षेत्समाहितः। सावधानः सन्समलत्वान्मित्रलाभस्य। ॥इदानीं राज्यांगान्याह। स्वाम्यमात्यजनो दुर्गं कोशो दंडस्तथैव च। मित्राण्येताः प्रकृतयो राज्यं सप्तांगमुच्यते। महोत्साहादिसद्गुणलक्षणो महीपतिः स्वामी। अमात्यो मंत्रिपुरोहितादयः। जनो ब्राह्मणादिप्रजाः। दुर्गं धन्वदुर्गादि। कोशः सुवर्णादिद्रव्यराशिः। दंडो हस्त्यश्वरथपत्तिलक्षणं चतुरंगबलं। मित्राणि सहजकृत्रिम[illegible]प्राकृतानि। एताः स्वाम्याद्या राज्यस्य प्रकृतयो मूलकारणानि। एवं राज्यं सप्तांगमुच्यते। तदर्पयन्नृपो दंडं दुर्वृत्तेषु निपातयेत्। धर्मो हि दंडरूपेण ब्रह्मणा निर्मितः पुरा। तदेवं विधं राज्यं प्राप्य दुर्वृत्ते षु वंचकचौरशठधूर्तपरदारपरद्रव्यापहारिहिंसकादिषु नृपो दंडं पातयेत् प्रयोजयेत्। हि यस्माद्धर्म एव दंडरूपेण ब्रह्मणा निर्मितः। तस्यैव दंड इति यौगिकी संज्ञा। दंडो दमनादित्याहुस्तेनादांतान्दमयेदित्यादिगौतमवचनात्। ॥सम्यङ्नयति दंडश्चे

नि॰५ <मा॰८ त॰८ ति॰१ न॰६

॥पद्धे॥

117

नाकृतबुद्धिना। स पूर्वोक्तो दंडो लुब्धेन कृपणेनाकृतबुद्धिनान्यायतो न्यायानुसारेण नेतुं प्रयोक्तुं शक्यो [illegible] न भवति। कीदृशेन त
र्हि शक्यत इत्याह। सत्यसंधेन शुचिना सुसहायेन धीमता। सत्यसंधेनाप्रतारकेन शुचिना जितारिषड्वर्गेण सुसहायेन पूर्वोक्तस
हाय सहितेन धीमता नयापनयकुशलेन। स दंडो न्यायतो धर्मानुसारेण नेतुं शक्यः। यथाशास्त्रं प्रयुक्तः सन् सदेवासुरमा
नवं। जगदानंदयेत् सर्वमन्यथा तत्प्रकोपयेत्। स दंडः शास्त्रोक्तमार्गेण प्रयुज्यमानः सन् देवासुरमानवैः सहितं जगदानंद
येत्। हर्षयेत्। अन्यथा शास्त्रातिक्रमेण प्रयुक्तः सर्वं जगत्प्रकोपयेत्। ७॥ न केवलमधर्मदंडेन जगत्प्रकोपोऽपि तु प्रयोक्तुर्दृष्टा
दृष्टहानिरपीत्याह। अधर्मदंडनं स्वर्गकीर्त्तिलोकविनाशनं। सम्यक् तु दंडनं राज्ञः स्वर्गकीर्त्तिजयावहं। यः पुनः शास्त्रातिक्रमे
ण लोभादिना दंडः कृतः। स पापहेतुत्वात् स्वर्गकीर्त्तिलोकांश्च विनाशयति। शास्त्रमार्गेणानुकृतः सोऽपापहेतुत्वात् स्वर्गकीर्त्ति
जयानां हेतुर्भवति॥ ७॥ अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा। नादंड्यो नाम राज्ञोऽस्ति धर्माद्धि चलितः स्वकात्। अर्घ्यो
ऽर्घार्हः आचार्यादिः शेषं प्रसिद्धं। एते भ्रातृसुतप्रभृतयोऽपि स्वधर्माच्चलिता दंड्याः किंनु तान्ये यतः स्वधर्माच्चलितो दंड्यो
नाम राज्ञः कोऽपि नास्ति। एतच्च मातापित्रादिव्यतिरेकेण। तथा च स्मृत्यंतरं। अदंड्यौ मातापितरौ स्नातकपुरोहितपरिव्राज
कवानप्रस्थाः श्रुतिशीलशौचाचारवंतः ते हि धर्माधिकारिण इति॥ ७॥ किंच। यो दंड्यान् दंडयेद्राजा सम्यग्वध्यांश्च घातयेत्।
इष्टं स्यात् क्रतु[illegible]भिस्तेन समाप्तवरदक्षिणैः। यस्तु राजा दंड्यान् स्वधर्मचलितादिना दंडयोग्यान् सम्यक् शास्त्रदृष्टमार्गेण दं
डयति वध्यांश्च दंडो दिनादंडयति वध्यान् वधार्हान् घातयति। तेन राज्ञा वरदक्षिणैः क्रतुभिरिष्टं भवति। बहुदक्षिणक्रतुफलं प्राप्नोतीत्यर्थः।
न च फलश्रवणाद्दंडप्रणयनं काम्यमिति मंतव्यं। अकरणे प्रायश्चित्तश्रवणात्। यथाह वशिष्ठः। दंड्योत्सर्गे राजैकरात्रमुपवसेत्।
त्रिरात्रं पुरोहितः। कृच्छ्रमदंड्यदंडने पुरोहितस्त्रिरात्रं राजेति। दुष्टे सम्यक् दंडः प्रयोक्तव्य इत्युक्तं। दुष्टपरिज्ञानं च व्यव
हारदर्शनमंतरेण न भवतीति तत्परिज्ञानाय व्यवहारदर्शनं महत्त्वात् स्वयं कर्त्तव्यमित्याह॥ ७॥ इति संचिंत्य नृपतिः क्रतुतु
ल्यफलं पृथक्। व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहं। [illegible] एवमुक्तेन प्रकारेण क्रतुतुल्यफलं दंड्यदंडनेन स्वर्गादि
दर्शनं। वा दंड्यदंडनेन सम्यक् विविच्य पृथक् पृथक् वर्णादिक्रमेण सभ्यैर्वक्ष्यमाणलक्षणैः परिवृतः प्रतिदिनं व्यवहारान्
वक्ष्यमाणमार्गेण दुष्टादुष्टपरिज्ञानार्थं राजा स्वयं पश्येत्। कुलानि जातीः श्रेणीश्च गणान् जानपदानपि। स्वधर्माच्च

॥५७॥

लितान्राजा विनीय स्थापयेत्पथि। कुलानि ब्राह्मणादीनां जातयो मूर्द्धावसिक्तप्रभृतयः श्रेणयस्ताम्बलिकादीनां गणा हेलांबाकादीनां।
जानपदाः कारुकादयः। एतान् स्वधर्माच्चलितान् प्रच्युतान् राजा विनीय यथापराधं दंडयित्वा पथि स्वधर्मे स्थापयेत्। दंडं दुर्वृत्तेषु
निपातयेदित्युक्तं। स च दंडो द्विविधः॥ शारीरोऽर्थदंडश्च। यथाह नारदः। शारीरश्चार्थदंडश्च दंडो हि द्विविधः स्मृतः। शारीरस्ताडनादिस्तु ३
मरणांतः प्रकीर्तितः। काकिण्यादिस्त्वर्थदंडः सर्वस्वांतस्तथैव च। द्विविधोऽप्यपराधानुसारेणानेकधा भवति। आह स्म। शारीरो दश
धा प्रोक्तोऽर्थदंडस्त्वनेकधा। इति। तत्र कृष्णलमाषसुवर्णरूप्यादिशब्दैरर्थदंडो वक्तव्यः। ते च प्रतिदेशं भिन्नपरिमाणार्थाः। इत्ये
करूपापराधेऽपि देशभेदेन न्यूनाधिकदंडो माभूदिति कृष्णलादिशब्दानां नियतपरिमाणविषयत्वं दंडव्यवहारदर्शयितुमाह॥
जालसूर्यमरीचिस्थं त्रसरेणु रजः स्मृतं। तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते। गौरस्तु ते त्रयः षट् ते यवो मध्यस्त्रयस्तु ते। ५८
कृष्णलं पंच ते माषस्ते सुवर्णस्तु षोडश॥ पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितं। जालकांतरप्रविष्टादित्यरश्मिस्थितं यद्र
जस्तत्त्रसरेणुरित्युक्तं। योगीश्वरादिभिस्तत्त्वदर्शिभिः। ते त्रसरेणवोऽष्टौ लिक्षा स्वेदजयूकांडं। ता लिक्षास्तौलितास्तिस्रस्ता रा
जसर्षपो राजिकाः। ते राजसर्षपास्त्रयो गौरसर्षपः सिद्धार्थः। ते गौरसर्षपाः षट् यवो मध्यमो मध्यमो न स्थूलो न सूक्ष्मः। एते
न गौरसर्षपा अपि मध्यमा गम्यंते। तथा राजसर्षपा अपि मध्यशब्दादेव सर्षपादिशब्दा न केवलं उन्मानवचनाः किं तु तदुन्मि
तद्द्रव्यवचना इति गम्यते। यथा प्रस्थपरिमिता यवाः प्रस्था उच्यंते। एवं सर्षपाद्युन्मितं द्रव्यं सर्षपादिशब्देन। न च केवलोन्मानव
चनं त्रसरेणूनामुपसंहृत्योन्मातुमशक्यत्वात्। तद्द्वारेण कृष्णलादिव्यवहारो न स्यात्। तत्र स्थूलस्थूलतरस्थूलतमसूक्ष्म
सूक्ष्मतरसूक्ष्मतममध्यसर्षपाद्युन्मानभेदेन प्रतिदेशं व्यवहारभेदे स्थिते दंडव्यवहारे मध्य इति नियम्यते। ते मध्यमा यवा
स्त्रय एकः कृष्णलः। ते कृष्णलाः पंच एको माषः। ते माषाः षोडशैकः सुवर्णः। सुवर्णाश्चत्वारः पलं पंच वापि पलं प्रकीर्तितं।
नारदादिभिः। तत्र स्थूलयवैः कृष्णलपरिकल्पनया व्यावहारिकनिष्कस्य षोडशांशः कृष्णलो भवति। ते पंचभिर्माषः॥
षोडशभिः सुवर्णः। स च व्यावहारिकैः पंचभिर्निष्कैरेको सुवर्णो भवति ते चत्वारः पलमिति। निष्काणां विंशतिः पलं। यदा सू
क्ष्मैर्यवैः कृष्णलः परिकल्प्यते। व्यावहारिकनिष्कस्य द्वात्रिंशत्तमो भागः कृष्णलो भवति। तस्मिन् पक्षे सुवर्णः सार्द्धनिष्क ॥५७॥

सिं.र

इयं भवति पलं चदश निष्कं। यदा तु मध्ययुके स्थूलकल्पना तदा निष्कस्य विंशतितमो भागः स्थूलः। सुवर्णश्चतुर्निष्कः। षोडशनि
ष्कपलं। पंचसुवर्णपलमिति। पक्षे विंशतिनिष्कं पलं। एवमन्यदपि निष्कस्य चत्वारिंशो भागः स्थूलो द्विनिष्कः सुवर्णोष्टनिष्कपल
मित्यादि लोकव्यवहारानुसारेण अस्मादेव सूत्रादूहनीयं॥ ७॥ एवं सुवर्णस्य मानं प्रतिपाद्य इदानीं रजतस्याह॥ ७॥ द्विकृष्णलो रूप्य
माषो धरणं षोडशोच्यते। शतमानं तु दशभिर्धरणैः पलमेव च॥ निष्कः सुवर्णाश्चत्वारः। द्विकृष्णलेन पूर्वोक्तेन रूप्यमाषो रूप्यसंबं
धी माषस्ते रूप्यमाषाः षोडश धरणं। पुराणश्च रूप्यस्यैव संज्ञांतरं। ते षोडश स्याद्धरणं पुराणश्चैव राजत इति मनुस्मरणात्। द
शभिर्धरणैः शतमानं पलमिति चाभिधीयते। पूर्वोक्ताः सुवर्णाश्चत्वार एकीकृता राजतो निष्को भवति॥ ७॥ इदानीं ताम्रस्य मान
माह॥ कार्षिकस्ताम्रिकः पणः॥ पलचतुर्थांशः कर्ष इति लोकप्रसिद्धिः। कर्षेण संमितः कार्षिकस्ताम्रस्य विकारस्ताम्रिकः कर्ष
संमितस्ताम्रविकारः पणसंज्ञो भवति। कार्षापणसंज्ञश्च॥ कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः इति मनुवचनात्। पंच
सुवर्णपक्षे विंशतिमाषः पणो भवति। तथा सति माषो विंशतितमो भागः पणस्य परिकीर्तितः इत्यादि व्यवहारसिद्धो भवति। चतुःसु
वर्णपलपक्षे षोडशमाषः पणो भवति। अत्र पक्षे सुवर्णकार्षापणशब्दानां समानार्थत्वेपि पणकार्षापणशब्दौ ताम्रविषया
वेव। एवं तावद्धेमरूप्यताम्राणां उन्मानमुक्तं। दंडव्यवहारोपयोगित्वात् कांस्यरीतिकादीनामपि लोकव्यवहारांगभूतानां मेवोन्मा
नं द्रष्टव्यं॥ ७॥ इदानीं साहसपरिभाषामाह। साशीतिः पणसाहस्रो दंड उत्तमसाहसः। तदर्धं मध्यमः प्रोक्तो तदर्धमधमः स्मृतः।
पणानां सहस्रं तत् परिमाणमस्येति पणसाहस्रः। अशीत्या सह वर्तत इति साशीतिः। अशीत्यधिकपणसाहस्रपरिमितो यो दंडः स
उत्तमसाहससंज्ञो वेदितव्यः। तदर्धं मध्यमः। तस्य साशीतिपणसाहस्रस्यार्धं चत्वारिंशदधिकपणपंचशतपरिमितो मध्य
मसाहससंज्ञितः। तदर्धं मधमः। तस्य चत्वारिंशदधिकपणपंचशतस्यार्धं सप्तत्यधिकपणशतद्वयपरिमितो दंडोधमसाह
ससंज्ञः स्मृतः उक्तो मन्वादिभिः। यत्तु पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः। मध्यमः पंच विज्ञेयः सहस्रं त्वेव चोत्तमः॥
इति मनुनोक्तं तत्सक्षात्तरममतिरपराधविषयं द्रष्टव्यं॥ ७॥ दंडभेदानाह॥ धिग्दंडः स्वथ वाग्दंडो धनदंडो वधस्तथा।
योज्या व्यस्ताः समस्ता वाप्यपराधवशादिमे। धिग्दंडो धिग्धिगिति कुत्सनं। वाग्दंडस्तु परुषशापवचनात्मकः। धन

ण.५

120

॥५८॥

म०

दंडो धनापहारात्मकः। वधदंडः शरीरावरोधादिर्द्वी विवितांतः। एते चतुर्विधा दंडाव्यस्ता एकैकशः समस्ता वा एकद्वित्रास्त्रिचतुरो वा
पराधानुसारेण प्रयोक्तव्याः। उक्तक्रमेण पूर्वपूर्वासाध्य उत्तरउत्तरः प्रयोक्तव्यः। यथाह मनुः। धिग्दंडं प्रथमं कुर्याद्वाग्दंडं तदनं
तरं। तृतीयं धनदंडं तु वधदंडमतः परमिति। दंडव्यवस्थानिमित्तान्याह। ज्ञात्वापराधं देशं च कालं बलमथापि वा। वयः कर्म
च वित्तं च दंडं दंड्येषु पातयेत्। यथापराधं ज्ञात्वा तदनुसारेण दंडप्रणयिणा मेव देश कालबलवयः कर्मवित्तानि ज्ञात्वा तदनु
सारेण दंड्येषु दंडार्हेषु दंडप्रणयनं कुर्यात्। तथा बुद्धिपूर्वाबुद्धिपूर्वसकृदावृत्त्यनुसारेण चापराधिपराजानमधिकृत्यायं
रा
जधर्मकलापउक्तस्तथापि वर्णितरस्यापि विषयमंडलादिपरिपालनाधिकृतस्यायं धर्मो वेदितव्यः। राजधर्मान्प्रवक्ष्या
मि यथावृत्तो भवेन्नृपइति पृथकन्नृपग्रहणात्। करग्रहणस्यरक्षार्थत्वाद्रक्षणस्य दंडप्रणयनापहत्वाच्च॥ ७॥ ७॥
इति श्रीपद्मनाभमहोपाध्यायात्मज ... जस्य श्रीमत्परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां याज्ञ
वल्क्यधर्मशास्त्रविवृतौ प्रथमोध्यायः समाप्तः॥ ७॥ अस्मिन्नध्याये। उपोद्घात। ब्रह्मचारि विवाह। जातिवर्णविवेक। गृ
हस्थधर्म। स्नातकव्रत। भक्ष्याभक्ष्य। द्रव्यशुद्धि। दान। श्राद्ध। शांति। राजधर्म। प्रकरणानि द्वादश॥ ७॥ उक्तमोपपदस्यं
त्रिप्रस्यप्लुतिरा... त्मनः। धर्मशास्त्रस्य विवृतिर्विज्ञानेश्वरयोगिनः कृतौ॥ ७॥ याज्ञवल्क्यमुनिशास्त्रमता विवृतिर्नृकस्प
विहिता विदुषः। प्रमिताक्षरापि विपुलार्थवतीपरिषिंचतु श्रवणयोरमृतं॥ ७॥ प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थमर्थांतरव
र्णनमुपोद्घातः। प्रतिपाद्यं बहिरेव प्रतिभायतदर्थमर्थांतरवर्णनं प्रतिपादनमिति विशेषः। धात्वर्थः केवलं शुद्धो भावइत्यभि
धीयते। धर्मदेहव्यतिरिक्त आत्मज्ञानपूर्वकमाचार्यसंनिधौ ब्रह्मैकत्वप्रतिपादनशक्तितात्पर्यावधारणं। श्रवणेनोनि
र्द्धारितस्यार्थस्यासंभावनाविपरीतभावनानिवृत्त्यर्थं तर्कानुसंधानं मननं। श्रवणेन मननेन निर्द्धारितस्यार्थस्य एवमेवे
यपरोक्षीकरणं निदिध्यासनं॥ ७॥ ७॥ श्रीशाके द्विशरसप्तैकपरिमितवर्षे चंडाभिधे चैत्रमास्यसिते तिथौ खलु वस्वा
ख्ये सुनिब्रध्नजे। श्रीनारायण... भट्टविबुधश्रीभट्टनारायणेः पर्णसंलिखितं गतं विवरणं श्रीयाज्ञवल्क्यस्मृतेः॥ ७॥ ७॥

चं२

॥५८॥

॥ इदं पुस्तकं वैद्योपनामक गोविंदपंडितस्य याज्ञवल्कीयस्मृते ॥ ॥
॥ द्वितीयो व्यवहाराध्यायः ॥ श्री मराम । श्रीराम ॥ श्रीराम ॥ छ ॥ ७ ॥

1

॥श्रीमहागणाधिपतये नमः॥ अस्ति केकादिगुणयुक्तस्य प्रजापालनपरधर्मो यः। तच्च दुष्टनिग्रहमंतरेण न संभ
वति। दुष्टपरिज्ञानं च व्य[illegible]वहारमंतरेण न। तत्परिज्ञानाय व्यवहारदर्शनं मही[illegible] कर्तव्यमिह। तत्र व्यवहारात्स्वयं
परयोः स्वेः परिहृतोऽन्वहमिति। स च व्यवहारः कीदृशः कतिविधः कथं वेत्ता। इति कर्तव्यताकलापो नाभिहितः॥
तदभिधानाय द्वितीयोऽध्याय आरभ्यते॥ ॥ व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह। धर्मशास्त्रानुसारेण
क्रोधलोभविवर्जितः॥१॥ व्यवहारान् नृ अन्यविरोधेन स्वास्वसंबंधितया कथनं व्यवहारः॥ यथा केचिदिदं क्षेत्रं म
दीयमिति अन्यो पितद्विरोधेन मदीयमिति। तस्यानेकविधत्वं दर्शयति बहुवचनेन। नृप इति न क्षत्रियमात्रस्या
यं धर्मः। किंतु प्रजापालनेऽधिकृतस्यान्यस्यापीति दर्शयति। पश्येदिति एवोक्ते स्यादनुवादो धर्मविरोधविधा
नार्थं विद्वद्भिर्वेदव्याकरणधर्मशास्त्राभिज्ञैर्ब्राह्मणैर्न क्षत्रियादिभिः। ब्राह्मणैः सहेति तृतीयानिर्देशात्तेषाम
प्राधान्यं सहयुक्तेऽप्रधाने इति स्मरणात्। अत एव दर्शनेऽन्यथादर्शने च राज्ञो दोषो न ब्राह्मणानां। यथाह मनुः
अदंड्यान् दंडयन्राजा दंड्यांश्चैवाप्यदंडयन्। अयशो महदाप्नोति नरकं चाधिगच्छति। कथं। धर्मशास्त्रानु
सारेण नार्थशास्त्रानुसारेण। देशादिसमयधर्मस्यापि धर्मशास्त्राविरुद्धस्य धर्मशास्त्रविषयत्वात्। [illegible]पा
दानं। यथाह च बृहस्पतिः निजधर्माविरोधेन यस्तु सामयिको भवेत्। सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः इति
क्रोधलोभविवर्जित इति धर्मशास्त्रानुसारेणेति सिद्धे क्रोधलोभविवर्जित इति च नमादरार्थं। क्रोधो मर्षः लो
भो लिप्सातिशयः। श्रुताध्ययनसंपन्ना धर्मज्ञाः सत्यवादिनः। राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः॥२॥
श्रुतेन मीमांसाव्याकरणादिश्रवणेन अध्ययनेन च संपन्नाः। धर्मज्ञा धर्मशास्त्रज्ञाः सत्यवादिनः सत्यवद
नशीलाः रिपौ मित्रे च ये समाः द्वेषरागरहिताः। एवंभूताः सभासदः। सभायां यथा सीदंतस्तथा विशंतीति तथा दान

मानसत्कारैराज्ञा कर्त्तव्याः। यद्यपि श्रुताध्ययनसंपन्नाः इत्यविशेषेणोक्तं तथापि ब्राह्मणा एव। अथाह कात्याय-
नः। स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञैर्मौलैर्द्विजोत्तमैः। धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैः इति। ते च त्रयः कर्त्त-
व्याः। बहुवचनस्यार्थवत्त्वात्। यस्मिन्देशे निषीदंति विप्रा वेदविदस्त्रय इति मनुस्मरणात्। ते स्युस्तिस्रः सप्त
पंच त्रयोपि वा समासदो भवंतीत्याह। लोकवेदज्ञधर्मज्ञाः सप्त पंच त्रयोपि वा। यत्रोपविष्टा विप्राः स्युः सा यज्ञस-
दृशी सभेति। न च ब्राह्मणैः सहेतिपदर्वस्योक्तानां ब्राह्मणानां श्रुताध्ययनसंपन्ना इत्यादि विशेषणमिति मंत-
व्यं। तृतीयाप्रथमांतनिर्दिष्टानां विशेषणविशेष्यभावासंभवात् विद्वद्भिरिति अनेन पुनरुक्तिप्रसंगाच्च। अथ च
कात्यायनेन ब्राह्मणानां समासदां स्वरूपं तेषां दर्शितः। सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः। ससभ्यः प्रेक्षको राजा
स्वर्गे तिष्ठति धर्मतः। तत्र ब्राह्मणा अनियुक्ता नियुक्ताश्च समासद इति ते द्वेधा दर्शिताः। अतएवोक्तं अनियुक्तो नियुक्तो
वा धर्मज्ञो वक्तुमर्हति। यदि नियुक्ता न्यायतानुस्थितोर्थकथनेपि राजा अन्यथा करोति तदा [illegible] निवारणीयोन्यथा दो-
षः। उक्तं च कात्यायनेन। अन्यायेनापि तं यांतं येनुयांति समासदः। तेपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृपः। अ-
नियुक्तानां पुनरन्यथाभिधाने नभिधाने वा दोषो न तु राजा निवारणे। सभायां न प्रवेष्टव्यं वक्तव्यं वा समंजसं। अब्रुवन्
[illegible] विब्रुवन्वापि नरो भवति किल्बिषी इति मनुस्मरणात्॥ रिपौ मित्रे
चेति वचनाल्लोकरंजनार्थं वणिग्भिरप्यधिष्ठितं सदः कर्त्तव्यं। यथाह कात्यायनः। कु[illegible]लवयोवृत्तवित्त[illegible]वद्भिरमत्सरैः वणिग्भिः
स्यात्कतिपयैः कुलभूतैरधिष्ठितं। व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह॥ अपश्यत्कार्यवशाद्व्यवहारान्नृपेण तु सभ्यैः
सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्। कार्यांतरव्याकुलतया व्यवहारान्नपश्यता नृपेण पूर्वोक्तैः सभ्यैः सह सर्वधर्मवित् सर्वान्नुमान
रूपस्तोकान् सामयिकान् सर्वान्निविचारयतीति सर्वधर्मवित् ब्राह्मणो न [illegible] क्षत्रियादिर्नियोक्तव्यो व्यवहारदर्शिनो। तं च कात्यायनोक्तगु-
णाविशिष्टं कुर्यात्। यथाह॥ दांतं कुलीनं मध्यस्थमनुद्वेगकरं परं। [illegible]स्त्रभीरुं धर्मज्ञमुद्युक्तं क्रोधवर्जितमिति। एवंभूतब्राह्म

क्ष२

नस्वमतेस्थितः ३ विवक्तीतिवा ४

॥२॥ यं १ लेर

णासंसवेक्षत्रियंवैश्यंवानियोजित। नशूद्रं। यथाहकात्यायनः। ब्राह्मणोयत्रनस्यात्तुक्षत्रियंतत्रयोजयेत्। वैश्यंवाधर्मशास्त्रज्ञंशूद्रं
यत्नेनवर्जयेदिति॥ नारदेनतयमेवमुदस्यो नीतिः। धर्मशास्त्रंपुरस्कृत्यप्राड्विवाकमतेस्थितः। समाहितमतिःपश्येद्व्यवहाराननुक्र
मात्। इति। प्राड्विवाकमतेस्थितः। राजाचारंवसुधापूर्वसैन्यंपश्यतीतिवत्। तस्यचेयंयौगिकीसंज्ञा। अर्थिप्रत्यर्थिनौपृच्छतीतिप्रा
ट्। तयोर्वचनेविरुद्धेविविधंवसत्यैः सहविविनक्ति विवाकः। प्राट्चासौविवाकश्चेतिप्राड्विवाकः। उक्तंच। विवादानुगतंपृष्ट्वासस
भ्यस्तत्प्रयत्नतः। विचारयतियेनासौप्राड्विवाकस्ततःस्मृतः इति। अपिच। रागाल्लोभाद्भयाद्वापिस्मृत्यपेतादिकारिणः। सभ्याःपृथक्
पृथग्दंड्याविवादाद्द्विगुणंदमं॥४॥ पूर्वोक्तासभ्याःयस्योनिरंकुशत्वेनतदसिद्धस्ततारागात्स्नेहाद्विनयोलोभाद्वालिप्सा
तिशयात्। भयात्। त्रासात्। स्मृत्यपेतंस्मृतिविरुद्धं आदिशब्दादाचारापेतंकुर्वते। पृथक्पृथक्। एकैकशोविवादाद्विवादपरा
जयनिमित्ताद्दमात्द्विगुणंदमंदंड्याः। नपुनर्विवादास्पदीभूतात्द्रव्यात्। तथासतिस्त्रीसंग्रहणादिषुदंडाभाव प्रसंगः।
रागलोभभयानामुपादानंरागादिष्वेवद्विगुणोदमोनाज्ञानमोहादिष्वितिनियमार्थं। नचराजासर्वस्येष्टेब्राह्म पा
वर्जमितिगौतमवचनात्। नब्राह्मणादंड्याइतिमंतव्यं। तस्यप्रशंसार्थत्वात्। यत्तुषड्भिःपरिहार्योराज्ञाअ वध्य
श्चावंध्यश्चादंड्यश्चाबहिष्कार्यश्चापरिवाद्यश्चापरिहार्यश्चेतितदपिसएषबहुश्रुतोभवति लोकवेदवेदां त
विद्वाकोवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिश्चत्वारिंशतासंस्कारैःसंस्कृतस्त्रिषुकर्मस्वभिरतः ष
ट्सुवासामयाचारिकेष्वभिविनीतइतिप्रतिपादितबहुश्रुतविषयंनब्राह्मणमात्रविषयं॥ व्यवहारविषयमाह। स्मृत्याचार

पि ३

व्यपेतेनमार्गेणाधर्षितःपरैः। आवेदयतिचेद्राज्ञेव्यवहारपदंहितत्। धर्मशास्त्रसदाचारविरुद्धेनमार्गेणपरैराधर्षितोभि
भूतोयद्राज्ञेप्राड्विवाकायवावेदयतिविज्ञापयतिनिवेद्यदितदावेद्यमानंव्यवहारपदंप्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनि

य १ ॥२॥

३

र्यायप्रयोजनात्मकोव्यवहारस्तस्यपदंविषयः॥तस्यचेदंसामान्यलक्षणं॥सचद्विविधः॥शंकाभियोगस्तत्वाभियोगश्चेति॥यथाहनार

स२ दः॥अभियोगस्तुविज्ञेयःशंकातत्वाभियोगतः॥शंकासतांतुसंसर्गात्तत्वंहोढाभिदर्शनादिति॥होढोलोप्त्रलिंगमितियावत्॥तेनद

र्शनंसाक्षाद्दर्शनं॥होढाभिदर्शनं॥तस्मात्॥तत्वाभियोगोपिद्विधाप्रतिषेधात्मकोविध्यात्मकश्चेति॥यथामत्तोहिरण्यादिकं

गृहीत्वानप्रयच्छति क्षेत्रादिकंममापहरतीतिवा॥उक्तंचकात्यायनेन॥न्यायंस्वनेच्छयेनेकर्तुमन्यायंवाकरोतियदिति॥पुनश्चा

व्या५ ष्टादशा(?) भिधते॥ यथाहमनुः॥तेषामाद्यमृणादानंनिक्षेपोस्वामिविक्रयः॥संभूयचसमुत्थानंदत्तस्यानपकर्मचवेत

नस्यैवचादानंसंविदश्चव्यतिक्रमः॥क्रयविक्रयानुशयोविवादःस्वामिपालयोः॥सीमाविवादधर्मश्चपारुष्येदंडवाचिके॥स्तेयंच

साहसंचैवस्त्रीसंग्रहणमेवच॥स्त्रीपुंधर्मोविभागश्चद्यूतमाह्वयएवच॥पदान्यष्टादशैतानिव्यवहारस्थिताविहेति॥एतान्य

पिसाध्यभेदेनपुनर्बहुत्वंगतानि॥यथाहनारदः॥एषामेवप्रभेदोन्यःशतमष्टोत्तरंस्मृतं॥क्रियाभेदान्मनुष्याणांशतशा

खोनिगद्यत इति॥आवेदयतित्विवेदितेनेनस्वयमेवागत्यावेदयतिनराजप्रेरितस्तत्पुरुषप्रेरितोवेतिदर्शयति॥यथाहमनुः॥

नोत्पादयेत्स्वयंकार्यंराजानाप्यस्यपूरुषः॥नचप्रापितमन्येनग्रसेतार्थंकथंचनेति॥परेरितिपरेणापराभ्यांपरैरित्येकस्यैव

नद्वाभ्यांबहुभिर्व्यवहारोभवतीतिदर्शयतियत्तुनः एकस्यबहुभिःसार्द्धंस्त्रीणांप्रेष्यजनस्यच॥अनादेयोभवेद्वादोधर्मविद्भि

ह३ रुदाहृत इतिनारदवचनं॥तद्भिन्नसाध्यविषयं॥आवेदयतिराज्ञइत्यत्र नैवराज्ञापृष्टोविनीतवेषआवेदयेत्॥आवेदितंच युक्तं

चेन्मुद्रादिनाप्रत्यर्थ्याह्वानमकल्यादीनांचानाह्वानमित्याद्यर्थसिद्धमितिनोक्तं॥स्मृत्यंतरेतुस्पष्टार्थमुक्तंयथा॥कालेकार्यार्थिनंपृ

च्छेत्प्रणतंपुरतःस्थितं॥किंकार्यंकाचतेपीडामाभैषीर्ब्रूहिमानव॥केनकस्मिन्कदाकस्मात्पृच्छेदेवंसभागतं॥एवंपृष्टःसय

क६

नृपान्समस्यैर्ब्राह्मणैः सह । विमृश्य कार्यं न्याय्यं चेदाह्वानार्थमतः परं । मुद्रां वा निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत् ॥ अकल्पबालस्थविर
विषमस्थक्रियाकुलान् । कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलान् ॥ मत्तोन्मत्तप्रमत्तार्त्तभृत्यान्नाह्वानयेन्नृपः ॥ न हीनपक्षां युवतिं कु
ले जातां प्रसूतिकां ॥ सर्ववर्णोत्तमां कन्यां ताज्ञातिप्रभुकाः स्मृताः । तदधीनकुटुंबिन्यः स्वैरिण्यो गणिकाश्रयाः । निष्कुलाया श्च पतितास्तासा
माह्वानमिष्यते । कालं देशं च विज्ञाय कार्याणां च बलाबलं ॥ अकल्पादीनपि शनैर्यानैराह्वानयेन्नृपः । ज्ञात्वाभियोगं येपि स्युः वने प्रव्रजि
तादयः । तानप्याह्वानयेद्राजा गुरुकार्येष्वकोपयन्निति । आसेधव्यवस्थाप्यर्थसिद्धे वनारदेनोक्ता ॥ वक्तव्येर्थे ह्यतिष्ठंतमुत्क्रामंतं च तद्वचः ।
आसेधयेद्विवादार्थी यावदा[...]नदर्शनं । स्थानासेधः काल[...]तः प्रवासात्कर्मणस्तथा ॥ चतुर्विधः स्यादासेधस्तेनासिद्धस्तं विलंघयेत् । आसे
धकाल आसिद्ध आसेधं यो निवर्त्तते । स विज्ञेयोन्यथाकुर्वन्नासेद्धा दंड्यभाक् भवेत् । नदीसंतारकांतारदुर्देशोपप्लवादिषु । आसिद्धस्तं परासे
धमुत्क्रामन्नापराध्नुयात् । निर्वेष्टुकामो रोगार्त्तोपि च क्षुद्व्यसने स्थितः । अभियुक्तस्तथान्येन राजकार्योद्यतस्तथा । गवां प्रचारे गोपालाः
सस्यावापे [...]षीवलाः । शिल्पिनश्चापि तत्कालमायुधीयाश्च विग्रह इति । आसेधो राजाज्ञया अवरोधः । अकल्पादयः पुत्रादिकम
न्यं सुहृदं वा प्रेषयंति न च ते परार्थवादिनः । यो न भ्राता न च पिता न पुत्रो न नियोगकृत् । परार्थवादी दंड्यः स्यात् व्यवहारेषु विब्रुवन्निति
नारदवचनात् । प्रत्यर्थि[...]नि मुद्रालेख्यपुरुषाणामन्यतमेनानीते किं कुर्यादित्याह । प्रत्यर्थिनोग्रतो लेख्यं
यथावेदितमर्थिना । समामासतदर्द्धाहर्नामजात्यादिचिह्नितं ॥ ६ ॥ अर्थ्यत इत्यर्थः । सोस्यास्ती
ति अर्थी तत्प्रतिपक्षः प्रत्यर्थी । तस्याग्रतः पुरतो लेख्यं लेखनीयं । यथा येन प्रकारेण पूर्वमावेदनकाले आवेदितं तथा न पुनरन्य
था । अन्यथावादित्वे संगाप्रसंगात् । अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः । आहूतन्यपलापी च हीनः पंचविधः स्मृतः इति । आ
वेदनकाल एवार्थिवचनस्यालिखितत्वात्पुनर्लेखनमनर्थकमित्यत आह ॥ समामासेत्यादि । संवत्सरमासपक्षतिथिवारदिन अर्थिप्रत्य
र्थिनाम ब्राह्मणजात्यादिचिह्नितं । आदिशब्देन द्रव्यसंख्यास्थानवेलाक्षमादि निगृह्यंते ॥ यथोक्तं । अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलं ।

का६ नृ८ न२ पा६ न९ न९

साध्यवद्वाचकपदं प्रकृतार्थानुबंधि च । वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवत् । प्रसिद्धमविरुद्धं च निश्चितं साधने क्षमं । संक्षिप्तं निखि
लार्थं च देशकालाविरोधि च । स्थानावसथसाध्याख्याजात्याकारवयोयुतं । साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनामवत् । परा
त्मपूर्वजानेकराजनामभिरंकितं । क्षमालिंगात्मपीडावत्कथिताहर्तृदायकं । यदावेदयते राज्ञे तद्भाषेत्यभिधीयते इति । साध्यप्र
तिज्ञापक्षइत्यनर्थांतरं । आवेदनसमये कार्यमात्रं लिखितं प्रत्यर्थिनोग्रतः समामासादि विशिष्टं लिख्यत इति विशेषः । संवत्सरेति
विशेषणं यद्यपि सर्वव्यवहारेषु नोपयुज्यते । तथाप्याधिप्रतिग्रहक्रयेषु निर्णयार्थमुपयुज्यते । आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्त
रेति वचनात् । अर्थव्यवहारेप्येकस्मिन्वत्सरे यत्संख्याकं यद्द्रव्यं त्वया मया गृहीतं प्रत्यर्पितं च पुनरन्यस्मिन्वत्सरे तद्द्रव्यं तत्संख्याकं
तत्स्तेन गृहीतं याच्यमानो यदि ब्रूयात्सत्यं गृहीतं प्रत्यर्पितं चेति वत्सरांतरे गृहीतं प्रत्यर्पितं नास्मिन्वत्सरे इत्युच्यते इति । एवं मा
साद्यपि योज्यं । देशस्थानादयः पुनः स्थावरेष्वेवोपयुज्यंते । देशश्चैव तथा स्थानं संनिवेशस्तथैव च । जातिसंज्ञाधिवासश्च प्रमाणं
क्षेत्रनाम च । पितृपैतामहं चैव पूर्वराजानुकीर्तनं । स्थावरेषु विवादेषु दशैतानि निवेदयेदिति स्मरणात् । देशो मध्यदेशादिः ।
स्थानं वाराणस्यादिः । संनिवेशस्तत्रैव पूर्वापरदिग्भागपरिच्छिन्नः सम्यग्निविष्टो गृहक्षेत्रादिः । जातिरर्थिप्रत्यर्थिनो ब्राह्मणत्वा
दिः । संज्ञा च देवदत्तादिः । अधिवासः समीपदेशनिवासी जनः । प्रमाणं निवर्तनादिप्रमाणं । क्षेत्रनाम शालिक्षेत्रं अमुकक्षेत्रं कुसुभ
मःपां ह्वसइति पितुः पितामहस्य नाम अर्थिप्रत्यर्थिनोः पूर्वेषां त्रयाणां राज्ञां नामकीर्तनं चेति समामासादीनां यस्मिन्व्यवहारे यथा
वदुपयुज्यते ॥ तत्र तावल्लेखनीयमिति तात्पर्यार्थः । एवं पक्षलक्षणे स्थिते पक्षलक्षणरहितानां पक्षवदवभासमानानां पक्षाभा
सत्वं सिद्धमेवेति योगीश्वरेणानपेक्षस्य पक्षाभासा उक्ताः । अन्ये तु स्पष्टार्थमुक्ताः । अप्रसिद्धं निराबाधं निरर्थं निःप्रयोजनं ।
असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेदिति ॥ अप्रसिद्धं मदीयं शशविषाणं नप्रयच्छतीत्यादि निराबाधं मम स्वगृहप्रदीपप्रकाशे

रा ६

उ ४

6

६॥

नायं स्वप्ने व्यवहरतीत्यादि । निरर्थमभिधेयरहितं चटतकं पंजडदगबमित्यादि । निःप्रयोजनं यथायं देवदत्तोस्मद्गृहसंनिधौ सरस्वरम
धीत इत्यादि । असाध्यं यथाहं देवदत्तेन सशृंगं शशमुपहसित इत्यादि । एतत्साधनासंभवात् साध्यं अल्पकालत्वान्न साक्षिसंभवोलि
खितं दूरतोल्पत्वान्न दिव्यमिति । विरुद्धं यथाहं मूकेनत्रास इत्यादि पुरराष्ट्रादिविरुद्धं वा । राज्ञा च वर्जितो यश्च यश्च पौरविरोधकृत्
राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च ॥ अन्ये वा ये पुरग्राममहाजनविरोधकाः । अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिता इति ।
यत्तु । अनेकपदसंकीर्णः पूर्वपक्षो न सिध्यतीति तत्र यद्यनेकवस्तुसंकीर्ण इत्युच्यते । तदा न दोषः । अनेकपदसंकीर्णः ।
अनेकवस्तुसंकीर्णः । किं वा अनेकऋणादानादिपदसंकीर्णः । तत्र प्रथमं दूषयति । तत्रेति ॥ मदीयमनेन हिरण्यं वासो रूपकादिर्वाप
हृतमित्येवंविधस्याद्दुष्टत्वात् । ऋणादानादिपदसंकरे पक्षाभास इति चेत्तदपि न मदीया रूपका अनेन वृद्ध्या गृहीताः सुवर्णं वास्य ह
स्ते निक्षिप्तं मदीयं क्षेत्रमयमपहरतीत्यादीनां पक्षत्वमिष्यत एव । किंतु क्रियाभेदात्क्रमेण व्यवहारो न युगपदित्येतावत् । यथाह
कात्यायनः । बहुप्रतिज्ञं यत्कार्यं व्यवहारेषु निश्चितं । कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति । तस्मादनेकपदसंकीर्णः पूर्वपक्षो यु
गपन्न सिध्यतीति तस्यार्थः । अर्थिग्रहणात्पुत्रपित्रादीनां ग्रहणं तेषामेकार्थत्वात् । नियुक्तस्यापि नियोगेनैव तदेकार्थत्वाक्षेपात् । अर्थि
नासंनियुक्तो वा प्रत्यर्थिप्रहितो वापि । यो यस्यार्थे विवदते तयोर्जयपराजयाविति स्मरणात् । नियुक्तपराजयौ मूलस्वामिनोरेव । एतच्च
स्मौ फलके वा पांडुलेखेन लिखित्वा अवापोढशोधितं पश्चात्पत्रे निवेशयेत् । पूर्वपक्षं स्वभावोक्तं प्राड्विवाकोभिलेखयेत् । पांडुले
खेन फलके तत्तः पत्रे विशोधितमिति कात्यायनस्मरणात् । शोधनं च यावदुत्तरदर्शनं कर्तव्यं । नातः परमनवस्थाप्रसंगात् । अत एव
नारदेनोक्तं । शोधयेत्पूर्ववादं तु यावन्नोत्तरदर्शनं । अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेदिति । पूर्वपक्षमशोधयित्वैव यदोत्तरं दापयं
ति सभ्यास्तदा रागाल्लोभात्फलाद्दंडेन सभ्यान्दंडयित्वा पुनः प्रतिज्ञापूर्वकं व्यवहारः प्रवर्तनीयो राज्ञेति । एवं शोधिते पत्रारूढे पूर्वपक्षे
किं कर्तव्यमित्याह ॥ श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसंनिधौ । श्रुतो भाषार्थो येन प्रत्यर्थिना

ऋ६ स्मृ५ पे५ जय६ दि

व३

अ सो ऽकृतार्थस्तस्योत्तरं पूर्वपक्षादूनातिरिक्तवर्ती सुत्तरं लेख्यं लेखनीयं। पूर्ववेदकस्याधिनः संनिधौ सभापौ उत्तरं नयस्तैर्वोक्तस्य निराकरणं तदुच्यते। यथाह पक्षस्य व्यापकं सारमसंदिग्धमनाकुलं। अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुरिति। पक्षस्य व्यापकं निराकरणसमर्थं सारं। न्याय्यं। असंदिग्धं संदेहरहितं। अनाकुलं पूर्वापराविरुद्धं। अव्याख्यागम्यम प्रसिद्धपदप्रयोगेण दुःश्लिष्टविसक्तिसमासाध्याहारेषावादेन। साषाभि नेनुवाय ध्यारव्येयार्थं न भवति। तदुत्तरं। तच्चतुर्विधं। प्रतिपत्तिर्मिथ्या प्रत्यवस्कंदनं पूर्वन्यायश्चेति। यथाह कात्यायनः। सत्यं मिथ्योत्तरं चैव प्रत्यवस्कंदनं तथा। पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधमिति॥ तत्र सत्योत्तरं यथा रूपकशतं महं धारयति। सत्यं सत्यं धारयामीत्युत्तरमाह। साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृता। मिथ्योत्तरं न त्वहं धारयामीति॥ तथाह कात्यायनः। अभियुक्तोऽभियोगस्य यदि कुर्यादपह्नवं। मिथ्या तत्तु विज्ञानीयादुत्तरं व्यवहारत इति। तच्च मिथ्योत्तरं चतुर्विधं मिथ्यैतन्नाभिजानामि तदा तत्र सन्निधिः। अजातश्चास्मि तत्काले इति मिथ्या चतुर्विधं इति। प्रत्यवस्कंदनं नाम॥ सत्यं गृहीतं प्रतिदत्तं प्रतिग्रहेण लब्धमिति वा॥ यथाह नारदः। अर्थिना लिखितो योऽर्थः प्रत्यर्थी यदि तं तथा। प्रपद्य कारणं ब्रूयात्प्रत्यवस्कंदनं स्मृतमिति॥ प्राङ्न्यायोत्तरं तु। यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थेऽनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित इति। उक्तं च कात्यायनेन। आचारेणावसन्नोऽपि पुनर्लेखयते यदि। सोऽभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते। एवमुक्तलक्षणैः स्थितेऽउत्तरे लक्षणरहितानामुत्तरवदवभासमानानामुत्तराभासत्वमर्थसिद्धं। स्पष्टीकृतं च स्मृत्यंतरे। संदिग्धमन्यत्प्रकृतादत्यल्पमतिभूरि च। पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत्। यद्व्यस्तपदमव्यापि निगूढार्थं तथाकुलं॥ व्याख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धये॥ तत्र संदिग्धं। सुवर्णशतमनेन गृहीतमस्मत्त इत्युक्ते सत्यं गृहीतं सुवर्णशतं माषकशतं वेति। प्रकृतादन्यत् यथा सुवर्णशताभियोगे पणशतं धारयामि। अत्यल्पं सुवर्णशताभियोगे पंचाशतं धारयामीति अतिभूरि। द्विशतं धारयामीति। पक्षैकदेशव्यापि हिरण्यवस्त्राद्यभियोगे हिरण्यं गृहीतं

व्या ४

यं

र ३

इग्या ८

णे ५

8

॥५१॥

नान्यदितिं व्यस्तपदं [ ]णादानाभियोगे पदांतरेणोत्तरं। यथासुवर्णशताभियोगेऽनेनाहंताडित इति। अव्यापिदेशस्थानादिविशेषणाव्या
पि। यथा मध्यदेशे वाराणस्यां पूर्वस्यां दिशि क्षेत्रमनेनापहृतमिति पूर्वपक्षे लिखिते क्षेत्रमपहृतमिति। निगूढार्थं सुवर्णशताभियोगे
किमहमेव धारयामीति अत्र ध्वनिना प्राड्विवाकः सभ्यो वा अन्यस्मै धारयतीति सूचयतीति निगूढार्थं। आकुलं पूर्वापरविरुद्धं। यथा
सुवर्णशताभियोगे कृते सत्यं गृहीतं धारयामीति। व्याख्यागम्यं दुःश्लिष्टविभक्तिसमा[ ]साध्या[ ]हारेणासिधमेनेन व्याख्यागम्यं ॥
अदेशभाषाभिधानेन वा। यथासुवर्णशतविषये पितृकरणादभियोगे गृहीतं शतवचनात्सुवर्णानां पितुर्न जानामीति। अत्र पितुर्वचन
सुवर्णानां शतं गृहीतमिति। न जानामि इति। असारं न्यायविरुद्धं। यथासुवर्णशतमनेन वृद्ध्या गृहीतं वृद्धिरेव दत्ता न मूलमित्यभियोगे
सत्यं वृद्धिर्दत्ता न मूलं गृहीतमिति। उत्तरमित्येकवचननिर्देशादुत्तराणां संकरो निरस्तः॥ यथाह कात्यायनः। पक्षैकदेशे यत्सत्यमेक
देशे च कारणं मिथ्यावैकदेशे च संकरात्तदनुत्तरमिति। अनुत्तरत्वे च कारणं तेनैवोक्तं। नचैकस्मिन् विवादे तु क्रियास्याद्वादिनो
र्द्वयोः। नचार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयमिति। मिथ्याकारणोत्तरयोः संकरेऽर्थिप्रत्यर्थिनोर्द्वयोरपि क्रियाप्राप्नोति। मिथ्याक्रिया
पूर्ववादे कारणे प्रतिवादिनीतिस्मरणात्[ ]भयमेकस्मिन् व्यवहारे विरुद्धं। यथासुवर्णशतं[ ]रूपकशतं च अनेन गृहीतमित्यभि
योगे सुवर्णशतं न गृहीतं रूपकशतं गृहीतं प्रतिदत्तं चेति कारणप्राङ्न्यायसंकरे तु प्रत्यर्थिन एव क्रियाद्वयं। प्राङ्न्यायकारणोक्तौ तु प्र
त्यर्थिनि दिव्योक्रियां इति यथा सुवर्णशतं प्रतिदत्तं। रूपकशते व्यवहारमार्गेण पराजित इत्यत्र प्राङ्न्याये जयपत्रेण वा प्राङ्न्यायदर्शि
भिर्वा भावयितव्यं कारणोत्तरे तु साक्षिलेख्यादिभिर्भावयि[ ]तव्यमिति विशेषः। [ ] एवमुत्तरत्रयसंकरेऽपि द्रष्टव्यं। यथानेन सुवर्णरू
पैः शतं वस्त्राणि च गृहीतानीत्यभियोगे सत्यं सुवर्णं गृहीतं प्रतिदास्यामि रूपैः शतं तु न गृहीतं वस्त्रविषये पूर्वं न्यायेन जित एवं च तु संक
रेऽपि। एतेषां चानुत्तरत्वं यौगपद्येन। तस्य तस्यां शास्य तेन तेन विना सिद्धेः क्रमेणोत्तरत्वमेव। क्रमश्चार्थिनः प्रत्यर्थिनः सभ्यानां च
यथा भवति। यत्र पुनरुभयोः संकरे यस्य प्रभूतार्थविषयत्वं तत्क्रियोपादानेन पूर्वं व्यवहारः प्रवर्त्तयितव्यः। पश्चादल्पविषयोत्तरे

ना६ उ७ क३ क३ क३

॥५१॥

ग०

मिति [illegible]ष्यते। नञ्चोत्तरत्राविवेचयिष्यते। अथ प्रतिज्ञातार्थसाधनं लेखयेदिति वदतायस्य साध्यमस्ति स
प्रतिज्ञातार्थसाधनं लेखयेदित्युक्तं। अतः प्राङ्न्यायोत्तरे प्राङ्न्यायस्यैव साध्यसाधनसमर्थत्वात्प्राङ्न्यायत
इति स एव साधनं लेखयेत्॥ मिथ्योत्तरे तु पूर्ववाद्येवार्थीति स एव साधनं निर्दिशेत। तेनार्थी लेखयेदि
ति [illegible] वदतार्थ्येव लेखयेत् अन्यत्सुगमम् तत्रश्च संप्रतिपत्त्युत्तरे साध्याभावेन भाषोत्त
रवादिनोर्द्वयोरप्यर्थित्वाभावात्साधननिर्देश एव [illegible]नास्तीति तावतैव व्यवहारः परिसमाप्यत इ
ति गम्यते। एतदेव हारीतेन स्पष्टमुक्तं। प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियां मिथ्योक्तौ पूर्ववादी तु
प्रतिपत्तौ न सा भवेदिति॥ ततः किम्भवत्याह॥ तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा। तस्य साधन
प्रमाणस्य वक्ष्यमाणलिखितसाक्ष्यादिलक्षणस्य सिद्धौ निर्वृत्तौ सत्यां सि[illegible] साध्यस्य जयलक्ष
णां प्राप्नोतीति। अतोऽस्मात्प्रकारादन्यथाप्रकारान्तरे साधनासिद्धौ विपरीतं साध्यस्यासिद्धिं प
राजयलक्षणमाप्नोतीति संबन्धः। एवं व्यवहारस्वरूपमभिधायोपसंहरति॥ चतुष्पाद्व्य
वहारोऽयं विवादेषूप[illegible]दर्शितः। व्यवहारार्थपञ्चादिकक्रो व्यवहारः सोयं सिद्धं च
तुष्पाच्च[illegible]रंशाकल्पनया विवादेषु ऋणादानादिषु उपदर्शितो वर्णितः॥ ॥ तत्र

तु

इदं त्रोध्यपत्रं अनंकपृष्ठषष्ठपत्रस्य द्वादशपंक्तेः

द्वि ५

ग०

भितिँ [illegible] ष्यते। नञो नरत्रावि वेचयिष्यते। अर्थश् प्रतिज्ञातार्थसाधनं लेख्ये दिति वदताऽस्य साध्यमस्ति स प्रतिज्ञातार्थसाधनं लेख्ये दित्युक्तं। अतः प्राङ्न्यायो नरे प्राङ्न्यायस्ये वसाध्य सा [illegible] सर्थे [illegible] इनायत इति स एव साधनं लेख्येत। मिथ्या नरे तु पूर्वपाधेवार्थ [illegible] सएव साधनं निर्दिश्येत। तन्नार्थरूले ख्ये दिति [illegible] वदतार्थ्यवलेख्ये आन्यरुक्तमतश्च संप्रतिपत्त्या नरे साध्याभावेन भाषोत्तरवादिनोर्द्वयोरप्यर्थि त्वाभावात् साधन निर्देश एव [illegible] नास्तीति तावते व्यवहारः परिसमाप्यत इति गम्यते। एतदेव हारीतेन स्पष्टमुक्तं। प्राङ्न्याय कारणोक्तौ तु परस्य [illegible] निर्दिशेत् क्रियां मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेदिति॥ ततः किमित्याह॥ तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा। तस्य साधनप्रमाणस्य वक्ष्यमाणलिखितसाक्ष्यादिलक्षणस्य सिद्धौ निर्वृत्तौ सत्यां सि [illegible] साध्यस्य जयलक्षणां प्राप्नोतीति। अतोऽस्मात् प्रकारादन्यथा प्रकारां नरे साधनासिद्धौ विपरीतं साध्यस्यासिद्धिं पराजयलक्षणामाप्नोतीति संबंधः। एवं व्यवहारस्वरूपमभिधायोपसंहरति॥ चतुष्पाद्व्यवहारोऽयं विवादेषूप [illegible] दर्शितः। व्यवहारोऽपरः पक्षे दिस्युक्तो व्यवहारः सोऽयमिह च तुष्पाच्चँ [illegible] रणाकल्पनया विवादेषु ऋणादानादिषूपदर्शितो वर्णितः॥ ॥ तत्र

तु०

इदं नोध्यपत्रं अनंकपृष्ठपृष्ठपत्रस्य द्वादशापंक्तेः

दि० ५

पादानेनैव यत्र च संप्रतिपत्तेरुत्तरांतरस्य च संकरस्तत्रोत्तरांतरोपादानेन व्यवहारो द्रष्टव्यः। संप्रतिपत्तौ क्रियाभावात् यथाहारीतेन
मिथ्योत्तरं कारणं च स्यातामेकत्र चेद् दुष्टे। सत्यं वापि सहान्येन तत्र ग्राह्यं किमुत्तरं इत्य[illegible]कं। यत्प्रभूतार्थविषयं यत्र वास्याक्रियाफलं।
उत्तरं तत्र तत् ज्ञेयमसंकीर्णमतोऽन्यथा। संकीर्णं भवतीति शेषः। ऐक्यक्रमं भवतीत्यर्थः। तत्र प्रभूतार्थविषयं यथा नेन सुवर्णरूपकशतं वस्त्रा
णि गृहीतानि इत्यभियोगे सुवर्णरूपकशतं न गृहीतं। वस्त्राणि तु गृहीतानि प्रतिदत्तानि चेति। अत्र मिथ्योत्तरस्य प्रभूतविष
यत्वात् अर्थिनः क्रियामादाय प्रथमं व्यवहारः प्रवर्तयितव्यः। पश्चाद्वस्त्रविषयो व्यवहारः। एवं मिथ्याप्राङ्न्याय संकरे कारणप्राङ्न्या
यसंकरे च योजनीयं। तस्मात्तस्मिन्नेवाभियोगे सत्यं सुवर्णरूपकशतं गृहीतं दास्यामि। वस्त्राणि तु न गृहीतानि प्रतिदत्तानीति वा।
वस्त्रविषये रूपरजित इति चोत्तरे संप्रतिपत्तेर्भूरिविषयत्वेपि तत्र क्रियाभावात् मिथ्याकृत्तरे क्रियामादाय व्यवहारः प्रवर्तयितव्यः।
यं तु मिथ्याकारणोत्तरयोः कृत्स्नपक्षव्यापित्वे। यथा कंचनग्राहिकया कश्चिद्वदतीयं गौर्मदीया मुकस्मिन् कालेनष्टा अस्य गृहे दृष्टे
ति। अन्यस्तु मिथ्येत[illegible]सदन्निति कालात् पूर्वमेवास्मद्गृहे स्थिता मम गृहे जातावेति वदति। इदं तावत् सकलनिराकरणसमर्थत्वान्न
नुत्तरं। नापि मिथ्यैव कारणोपन्यासात्। नापि कारणमेकदेशस्याभ्युपगमाभावात्तस्मात्सका[illegible]रणं मिथ्योत्तरमिदं। अत्र च प्रतिवादिनः
क्रियाकारणे प्रतिवादिनीति वचनात्। ननु मिथ्याक्रियापूर्ववादे इति पूर्ववादिनः कस्मात् क्रिया न भवति। तस्य शृणु मिथ्याविषयत्वात्
कारणे प्रतिवादिनी सैतदपि कस्मात् शुद्धकारणविषयं न भवति नैतत्। प्रत्यर्थिनोग्रतो लेख्यमिति भाषापादः प्रथमः। श्रुतार्थस्यो
त्तरं लेख्यमित्युत्तरपादो द्वितीयः। ततो र्थलेख्य इत्यस्य इति क्रियापादस्तृतीयः। तत्सिद्धौ सिद्धिमाप्नोतीति साध्यसिद्धिपादश्च
तुर्थः॥ यथोक्तं॥ परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु। वाक्यान्न्यायाद्व्यवस्थानं व्यवहार उदाहृतः। प्रतिज्ञोत्तरक्रिया साध्यसिद्धिश्चेति
पादके। आक्षिप्तश्चतुरं त्रास्तु चतुष्पाद भिधीयत इति। संप्रति पश्चात्तरे तु सौनिर्दिष्टाभाषार्थस्य साध्यत्वाद्वचनसाध्यसिद्धिलक्षण।
पादोनास्ति द्विपात्समेव। उत्तराभिधानानंतरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रियास्यादिति परामर्शलक्षणस्य प्रत्याकलितस्य योगाश्चरे

ध्या २ सिद्धि ३

॥६॥

पाद्व्यवहारपादत्वेनानभिधानाद्व्यवहारहेतुसंबंधाभावाच्च न तद्व्यवहारपादत्वमिति स्थितं ॥ एवं सर्वव्यवहारोपयोगिनीं व्यवहारमातृकामभि
ध याधुनाष्टविधव्यवहारविशेषे कथंचिद्विशेषं दर्शयितुमाह ॥ अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् ॥ अभियुक्तं च नान्येन नोक्तं वि
प्रकृतं नयेत् ॥ अभियुज्यत इत्यभियोगोऽपराधस्तमभियोगमनिस्तीर्यापरिहृत्य एनमभियोक्तारं न प्रत्यभियोजयेत् ॥ यद्यपि प्रत्यव
स्कंदनं प्रत्यभियोगरूपं तथापि स्वापराधपरिहारात्मकत्वान्नास्य प्रतिषेधस्य विषयः ॥ अतः स्वाभियोगानुपमर्दनरूपस्य प्रत्य
भियोगस्यायं निषेधः ॥ इदं प्रत्यर्थिनमधिकृत्योक्तं ॥ अथार्थिनं प्रत्याह ॥ अभियुक्तं च नान्येन ॥ अन्येनाभियुक्तं अनिस्तीर्णाभियो
गमन्योऽर्थी नाभियोजयेत् ॥ किंच ॥ उक्तमावेदनसमये यदुक्तं तद्विप्रकृतिं विरुद्धस्वभावं न नयेत् ॥ न प्रापयेत् ॥ एतदुक्तं भवति ॥ यद्वस्तु
येन रूपेणावेदनसमये निवेदितं तद्वस्तु तथैव भाषाकाले लेखनीयं नान्यथेति ॥ ननु प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिनै स
वेदमुक्तं ॥ किं पुनरुच्यते नोक्तं विप्रकृतिं नयेत् इत्युच्यते ॥ यथावेदितमर्थिनेत्यनेन आवेदनसमये यद्वस्तु निवेदितं तदेव भाषासम
ये लेखनीयं ॥ एकस्मिन्नपि पदे न वस्त्वंतरमित्युक्तं ॥ यथाने रूपकशतं वृद्ध्यागृहीतमित्यावेदनसमये प्रतिपाद्य प्रत्यर्थिसन्निधौ भाषासम
ये वृद्ध्या रूपकशतं गृहीतमिति न वक्तव्यं ॥ तथा सति पदांतरगमने पि वस्त्वंतरगमने हीनवादी दंड्यः स्यादिति नोक्तं विप्रकृतिं नयेदित्य
नेनैकवस्तुन्यपि पदांतरगमनं निषिध्यते ॥ यथा रूपकशतं वृद्ध्यागृहीतं त्वायं न प्रयच्छतीत्यावेदनकालेऽभिधाय भाषाकाले रूपकशतं
बलादपहृतवानिति वदतीति तत्र वस्त्वंतरगमनं निषिद्धमिह तु पदांतरगमनं निषिध्यत इति न पौनरुक्त्यं एतदेव स्पष्टीकृतं नारदेन ॥
पूर्ववादं परित्यज्य योऽन्यमालंबते पुनः ॥ वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नर इति ॥ हीनवादी दंड्यो न तदर्थाद्धीयते ॥ अतः प्रत्यर्थिनो
ऽर्थिनश्च प्रमादपरिहारार्थ एवायमभियोगमनिस्तीर्येत्याद्युपदेशो न प्रकृतासिद्धसिद्धिविषयः ॥ अत एव वक्ष्यति ॥ छलं निरस्य भूतेन व्य
वहारान्नयेन्नृप इति तत्रार्थं व्यवहारे द्रष्टव्यं ॥ अन्यकृते तु व्यवहारे प्रमादाभिधाने प्रकृतादपि व्यवहाराद्धीयत एव ॥ यथाह नारदः ॥

६०

न६

॥६॥

13

स्मृ॰ सर्वेष्वर्थविवादेषु वाक्छलेनावसीदति ॥ परस्त्रीभूषणादाने शास्त्रोपपन्नन्निहीयतेति । अस्यार्थः ॥ सर्वेष्वर्थविवादेषु न मन्युकृतेषु वाक्छले प्रमा
दाभिधाने पिनावसीदति न पराजीयते । न प्रकृतादर्थाद्धीयत इत्यर्थः । अत्रोदाहरणं परस्त्रीत्यादि ॥ परस्त्रीभूषणादाने प्रमादाभिधानेनदं
डोपि यथाप्रकृतार्थादेर्न्न हीयते एवं सर्वेष्वर्थविवादेषु ग्रहणामन्युकृतविवादेषु प्रमादाभिधाने प्रकृतादप्यर्थाद्धीयत इति गम्यते । यथाहमनेन
प्रारसि पादेन ताडित इत्यावेदनसमये भि य भाषाकाले हस्तेन पादेताडित इति वदन्न केवलं दंड्यः पराजीयते च ॥ ७ ॥ अभियोगमनिस्तीर्य
पो॰ ४ नैनं प्रत्यभियोजयेत् उत्तरस्यापवादमह ॥ कुर्यात्प्रत्यभियोगं च कलहे साहसेषु च ॥ कलहे वाग्दंडपारुष्यात्मके साहसेषु विषशस्त्रादिनि
मित्तप्राणिव्यापादनादिषु प्रत्यभियोगसंभवे स्वाभियोग मनस्तीर्यापि अभियोक्तारं प्रत्यभियोजयेत् । नन्वत्रापि पूर्वपक्षानुपमर्द
नरूपत्वेनानुत्तरत्वात्प्रत्यभियोगस्य प्रतिज्ञांतरत्वे युगपद्व्यवहारासंभवः समानः ॥ सत्यं नात्र युगपद्व्यवहाराय प्रत्यभियोगोपदेशः ॥ अपि
तु न्यूनदंडप्राप्तये अधिकदंडनिवृत्तये वा । तथा ह्यनेनाहं ताडितः शप्तो वेत्यभियोगे पूर्वमहमनेन ताडित इत्युक्तो वेति प्रत्यभियोगे दंडाल्पत्वं
यथाह नारदः ॥ पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक् । पश्चाद्यः सोप्यसत्कारी पूर्वे तु विनयो गुरुरिति । यदा तु पुनर्युगपत् द्वयोस्ताड
नादिप्रवृत्तिः तत्राधिकदंडनिवृत्तिः । पारुष्ये साहसे वापि युगपत्संप्रवृत्तयोः । विशेषश्चेन्न लभ्येत विनयः स्यात्समस्तयोरिति । एवं युगपद्व्य
वहारप्रवृत्त्यसंभवेपि कलहादौ प्रत्यभियोगोर्थवान्नर्णादिषु निरर्थक एव ॥ ८ ॥ अर्थिप्रत्यर्थिनोर्विधिमुक्त्वा सभ्यस्य सभापतेः कर्तव्यमाह ॥
भेउ उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ॥ उभयोरर्थिप्रत्यर्थिनोः सर्वेषु विवादेषु निर्णयस्य कार्यकार्यनिर्णयः ॥ आहिताग्न्यादिषु पा
ठात्कार्यशब्दस्य पूर्वनिपातः ॥ निर्णयस्य कार्यं साधितधनदानं दंडदानं च तस्मिन् प्रतिभूः स इति भवतीति कार्येतत्क्षवती ति प्रतिभूर्ग्राह्यः
सभ्येन सभापतिना । तस्यासंभवे अर्थिप्रत्यर्थिनो रक्षणे पुरुषा नियोक्तव्याः ॥ तेभ्यश्च ताभ्यां प्रतिदिनं वेतनं देयं । यथाह कात्यायनः ॥
अथ चेत्प्रतिभूर्नास्ति कार्ययोग्यस्तु वादिनः । स रक्षितो दिनस्यांते दद्याद्भृत्याय वेतनं । अर्थिप्रत्यर्थिनोर्निर्णयकार्ये सभ्येन सभा

पतिनाप्रतिभूर्ग्राह्यः इत्युक्तं कितन्निर्णयं कार्यं यस्मिन्प्रतिभूर्ग्रहीतव्यः इत्यपेक्षित आह॥ निन्हवे भावितो दद्याद्धनं राज्ञे च तत्समं।
मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत्॥ अर्थिना निवेदितस्याभियोगस्य प्रत्यर्थिनापन्हवे कृते यद्यर्थिना साक्ष्यादिभिर्विभावितो का-
रितः प्रत्यर्थी तदा दद्याद्धनं प्रकृतमर्थिने राज्ञे च तत्सममपलापदण्डं॥ अथार्थी भावयितुं न शक्नोति तदा मिथ्याभियोगी अभियु-
ज्यत इत्यभियोगः॥ अभियोगादभियुक्ताद्धनाद्द्विगुणं धनं दद्यात् राज्ञे। प्राग्न्याये प्रत्यवस्कन्दने चैतदेव योजनीयं। तत्रार्थिना-
पन्हववादीति प्रत्यर्थिना भावितो राज्ञे प्रकृतधनसमं दण्डं दद्यात्। अथ प्रत्यर्थी प्राग्न्यायं कारणं वा भावयितुं न शक्नोति तदा स ए-
व मिथ्याभियोगीति राज्ञे द्विगुणं धनं दद्यात्। अर्थिने च प्रकृतं धनमिति। संप्रति पक्षोत्तरेषु दण्डाभाव एव। एतच्च [illegible]र्णादौ विष-
यमेव। पदान्तरेषु दण्डाभिधानाद्धनव्यवहारेष्वस्यासंभवाच्च। न सर्वविषयत्वं। राज्ञाधमर्णिको दाप्य इत्यस्य ऋणादानविषयत्वे-
पि तत्रैव विशेषं वक्ष्यामः। एतदेव सर्वव्यवहारविषयत्वेनापि योजनीयं॥ कथमभियोगस्य निन्हवेऽभियुक्तेन कृते यद्यभियोक्ता साक्ष्यादि-
भिर्भावितोऽभियुक्तस्तदा तत्समं तन्न तत्र प्रतिपदोक्तमेव। चतुर्गुणादौ वा धारणे धनदण्डं दद्याद्राज्ञ इत्यनुवादः। अथाभियोक्ताभियोगं भावयितुं न
शक्नोति तदा मिथ्याभियोगी प्रतिपदोक्तं धनदण्डं द्विगुणं दद्यादिति विधीयते॥ अत्रापि प्राङ्न्याये प्रत्यवस्कन्दने च पूर्ववदेव योजनीयं।
ततो यस्तेरवयेसच अविज्ञातार्थसाधनमिति वदनोत्तरलेखने कालप्रतीक्षणं दर्शितं तत्रापवादमाह॥ साहसस्तेयपारुष्यगोऽभिशाप-
त्यये स्त्रियां। विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः। साहसं विषशस्त्रादिभिः प्राणिव्यापादनादि। स्तेयं चौर्यं पारुष्यं वाग्दण्डपारु-
ष्यं वक्ष्यमाणलक्षणं। गोदोग्ध्री। अभिशापः पातकाभियोगः॥ अत्ययः प्राणधनातिपातः तस्मिन् द्वन्द्वैकवद्भावात्कृतवचनं स्त्रियां कुल-
स्त्रियां दास्यां च। कुलस्त्रियां चरित्रविवादे दास्यां चैतेषु विवादेषु विवादयेदुत्तरं दापयेत्। सद्य एव न कालप्रतीक्षणं कुर्यात्। अन्यत्र विवादे-
तरे तु काल उत्तरदानकाल इच्छया अर्थिप्रत्यर्थिसभ्यसभापतीनां स्मृत उक्तः॥ दुष्टलक्षणमाह॥ देशाद्देशान्तरं याति सृक्किणी परिले-

८७

न८
त्रा
त५

॥८॥

15

ऽिच । ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च । परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते । वाक्चक्षुः पूजयति नो तथोष्ठौ निर्लिहत्यपि । स्वभा
वाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः । अभियोगे च साक्ष्ये वा दुष्टः स परिकीर्तितः । मनोवाक्कायकर्मभिः स्वभावादेव भयादिनिमित्ता
त् विकृतिं विकारं याति गच्छति असौ अभियोगे च साक्ष्ये वा दुष्टः परिकीर्तितः । तां विकृतिं विभज्य दर्शयति । देशाद्देशान्तरं याति न क्वचि
द्व तिष्ठते । सृक्किणी [illegible] परिलेढि जिह्वाग्रेण घट्टयति । कर्मणो विकृतिः । अस्य ललाटं स्विद्यते स्वेदबिंदुचितं भवति मुखं वैवर्ण्यं विव
र्णतां पांडुत्वं कृष्णत्वं वा एति [illegible] गच्छति । इति कायस्य विकृतिः । परिशुष्यत्स्खलद्वाक्यः परिशुष्यत्स्खलद्गद्गदं । स्खलद्ग्रस्तं वाक्यं यस्य स
तथोक्तः । विरुद्धं पूर्वापरविरुद्धं । बहु भाषत इति वचो विकृतिः । परोक्तां वाचं प्रतिवचनदानेन न पूजयति चक्षुर्वा प्रतिवीक्षणेन न
पूजयतीति मनसो विकृतेर्लिंगं । तथा [illegible]ष्ठौ निर्भुज निवक्रयतीत्यपि कायस्य विकृतिः । न च दोषसंभावनमात्रमुच्यते ॥ न दोषनिश्चया
य स्वाभाविक नैमित्तिक विकारयोर्विवेकस्य दुर्ज्ञानत्वात् ॥ अथ कश्चिन्निपुणमतिर्विवेकं प्रतिपादयेत तथापि न पराजयनिमित्तं कार्यं
भवति । न हि मरिष्यतो लिंगदर्शनेन नष्टकार्यं कुर्वन्नेव मस्य पराजयो भविष्यतीति लिं[illegible]दवगतोऽपि न पराजयनिमित्तकार्यप्रसंगः ॥ ७ ॥
किंच । संदिग्धार्थं स्वतंत्रो यः साधयेद्यश्च निष्पतेत् । न चाहूतो वदेत्किंचिद्धीनो दंड्यश्च स स्मृतः । संदिग्धमर्थमधमर्णेनानंगीकृत
मेव यः स्वतंत्रः साधननिरपेक्षः साधयत्यासेधादिना स हीनो दंड्यश्च भवति । यश्च स्वयं संप्रतिपन्नं साधनेन वा साधितं वाच्यमानो
निष्पतेत् पलायते । यश्चाभियुक्तो राज्ञा चाहूतः सदसि न किंचिद्वदति सोऽपि हीनो दंड्यश्च स्मृत इति संबध्यते ॥ अभियोगे च सा
क्ष्ये वा दुष्टः स परिकीर्तित इति प्रस्तुतत्वात् [illegible] हीनपरिज्ञानमात्रमेव माभूदिति दंडग्रहणं । दंड्यस्यापि स्यास्योऽप्यथ नहीयत इति
अभवदहीनत्वदर्शनादत्र तन्माभूदिति हीनग्रहणं । अथ यत्र द्वावपि युगपद्धर्माधिकरणं प्राप्तौ भाषावादिनौ । न च यथा कश्चित्प्र
तिग्रहेण क्षेत्रं लब्ध्वा कंचित्कालमुपभुज्य कार्यवशात्सकुटुंबो देशांतरं गतोऽपि अन्यो तद्वदेव क्षेत्रं प्रतिग्रहेण लब्ध्वा कंचित्कालमुपभुज्य
देशांतरं गतस्ततो द्वावपि युगपदागत्य मदीयमिदं क्षेत्रं मदीयमिदं क्षेत्रमिति परस्परं विवदमानौ धर्माधिकरणं प्राप्तौ न तत्र क

16

स्यत्रियेसाक्षिन आह॥ साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः। पूर्वपक्षे धरीभूते भवंत्युत्तरवादिनः॥ उभयत उभयोरपि
वादिनोः साक्षिषु संभवत्सु साक्षिणः पूर्ववादिनः पूर्वस्मिन् काले मया प्रतिगृहीतमुपभुक्तं चेति यो वदत्यसौ पूर्ववादी तत् पूर्वं निवे
दयति तस्य साक्षिणः प्रष्टव्याः। यदा त्वन्य एवं वदति स सम्यक् तेन पूर्वं प्रतिगृहीतमुपभुक्तं च किंतु राज्ञेदमेव क्षेत्रमस्मादेव क्रये
णलब्धा मह्यं दत्तमनेन वा प्रतिग्रहेणालब्धा मह्यं दत्तमिति तत्र पूर्वपक्षोऽसाध्यतया धरीभूतस्तस्मिन् पूर्वपक्षे धरीभूते भवंत्युत्त
रवादिनः उत्तरकालं प्रतिगृहीतमुपभुक्तं चेति वादिनः साक्षिणः प्रष्टव्याः संति। इदमेव व्याख्यानं युक्ततरं। मिथ्योत्तरे पूर्ववादिनः
साक्षिणो भवंति। प्राङ्न्यायकारणोक्तौ पूर्वपक्षे धरीभूते उत्तरवादिनः साक्षिणो भवंतीति व्याख्यानमयुक्तं। अस्यार्थस्य तेनोपलेख
यिसद्धः प्रतिज्ञातार्थसाधनमित्यनेनोक्तत्वात्। पुनरुक्तिप्रसंगात्। पूर्वव्याख्यानमेव स्पष्टीकृतं नारदेन। मिथ्याक्रिया पूर्ववादे
कारणे प्रतिवादिनि। प्राङ्न्यायविधिसिद्धौ तु जयपत्रं क्रिया भवेदित्यत्र द्वयोर्विवदतोरर्थद्वयोः सत्सु च साक्षिषु पूर्वपक्षो भवेद्य
स्य भावयुक्तस्य साक्षिण इति वदतैतस्य सर्वव्यवहारविलक्षणत्वात् भेदेनोपन्यासः। अपि च॥ सपणश्चेद्विवादः स्यात्तत्र हीनं तु
दापयेत्। दंडं च स्वपणं चैव धनिने पक्षमेव च। यदि व्यवहारः सपणः पणनं पणस्तेन सह वर्त्तत इति सपणः स्यात्तदा तत्र तस्मिन् स
पणे व्यवहारे हीनं पराजितं पूर्वोक्तं दंडं स्वकृतं च पणं राज्ञे अर्थिने च विवादास्पदीभूतं धनं दापयेद्राजा। यत्र पुनरेकः कोपावेशाद्व्याघ
घहमत्र पराजितो भवामि तदा पणशतं दास्यामीति प्रतिजानीतेऽन्यस्तु न किंचित्प्रतिजानीते। तत्रापि व्यवहारः प्रवर्त्तते। तस्मिंश्च प्रव
त्ते पणप्रतिज्ञावादी यदि हीयते तदासौ एव सपणं दंडं दाप्यः। अन्यस्तु पराजितो दंडं दाप्यो न पणं स्वपणमिति विशेषोपादानात्॥
तः॥ किंच॥ छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः॥ भूतमप्यनुपन्यस्तं हीयते व्यवहारतः। छलं प्रमादाभिहितं हीयते। हानिमु
१× निरस्य परित्यज्य भूतेन वस्तुतत्त्वानुसारेण व्यवहारान्नयेदिति नृपः॥ यस्माद्भूतमपि वस्तुतत्त्वमपि अनुपन्यस्तं अन ×१
× मिहितं ×१

पुनर्वि॰ २

17

पगच्छतिव्यवहारतोव्यवहारेणसाक्ष्यादिभिस्तस्माद्भूतानुसरणंकर्त्तव्यं। यथार्थिप्रत्यर्थिनौसत्यमेववदतस्तथासस भ्येनसभापतिनायतितव्यं सामादिभि

रुपायैस्तथासतिसाक्ष्यादिनैरपेक्ष्येणैवनिर्णयोभवति। अथसर्वथाभूतानुसारेणनशक्यतेकर्त्तुंनेयासाक्ष्यादिभिर्निर्णयःकार्यइत्यनु कल्पः यथोक्तं। भूतच्छलानुकारित्वात्द्विगतिःसमुदाहृतः भूतंतत्वार्थसंयुक्तंप्रमादाभिहतंछलंइति। तत्रभूतानुसारीव्यवहारोमुख्यः छलानुसारीअनुकल्पः साक्षिलेख्यादिभिर्व्यवहारनिर्णयेकदाचिद्वस्तुनुसरणंभवतिकदाचिन्नभवतिसाक्ष्यादीनांव्यभिचारस्यापिसं भवात्। भूतमप्यनुपन्यस्तंहीयतेव्यवहारतइत्यत्रोदाहरणमाह। ध। निह्नुतेलिखितंनैकमेकदेशविभावितः। दाप्यःसर्वंनृपेणार्थंनग्राह्य स्त्वनिवेदितः। नैकमनेकंसुवर्णरजतवस्त्रादिलिखितमभियुक्तमर्थिनाप्रत्यर्थ्यपदिसर्वमेवनिह्नुतेपजानाते। तदार्थिनैकदेशोहिरण्येसा क्ष्यादिभिःप्रत्यर्थ्यभावितोंगीकारितः। सर्वरजतादार्थपूर्वलिखितंदाप्योर्थिनानृपेणनग्राह्यस्त्वनिवेदितः पूर्वभाषाकालेनिवेदितः। पश्चादर्थिनापूर्वमयाविस्मृतइतिनिवेद्यमानोनग्राह्योनदातव्योनृपेण। एतच्चनकेवलंवाचनिकैकदेशेप्रत्यर्थिनोमिथ्यावादित्वनिश्च यादेकदेशांतरेपिमिथ्यावादित्वसंभवात्। अर्थिनश्चैकदेशेसत्यवादित्वनिश्चयादेकदेशांतरेपिसत्यवादित्वसंभवात्। एवंकेपिवनाम संभावनाप्रत्ययानुगृहीतादस्मादेवयोगीश्वरवचनात्संवदाप्नोतीयंनृपेणेतिनिर्णयः। एवंतर्कवाक्यानुसरणेननिर्णयेक्रियमाणेव [illegible]न्यथात्वेपिव्यवहारद्रष्टॄणांनदोषः। तथाचगौतमेनान्याधियोगमनेनतर्कोभ्युपायस्तेनाभ्यूह्यथार्थस्थानंगमयेदित्युक्तातस्माद्य ज्ञात्वाचार्यविनिंद्याविकल्पसंहरति। नचैकदेशविभावितोनुपाद्येयवचनःप्रसज्यतइत्येतावदिहगम्यते। एकदेशविभावितोनृपेणसंवदाप्य इतिवचनांतात्। यत्तुकात्यायनेनोक्तं। अनेकार्थाभियोगेपिवपावत्संसाधयेद्धनी। साक्षिभिस्तावदेवासौलभतेसाधितंधनमिति। तत्पुत्रादिदे यपित्राद्यृणविषयं।तत्रहिबहूनर्थानभियुक्तःपुत्रादिर्नजानामीतिप्रतिवदन्नह्नववादीनभवतीत्येकदेशविभावितोपिनकश्चिदसत्यवादीति

मौ२

॥१९॥

निह्नुते लिखितं नैकमेकमितिशास्त्रं न वर्त्तते। निह्नवासावादपेक्षितनर्काभावाच्च। अनेकार्थाभियोगेपीतिकात्यायनवचनं सामान्यविषयं विशेषशास्त्र
विषयं निह्नवोत्तरं परित्यज्याज्ञानोत्तरे प्रवर्त्तते। नन्वृणादिषु विवादेषु स्थिरप्रायेषु निश्चितं। तु नेवाप्यधिकेवार्थे प्रोक्ते साध्यं न सिध्यति
त्यक्तं। तथासत्येकदेशे भाविते भावितैकदेश सिद्धिः कुतस्त्या॥ उच्यते सर्वार्थसंधनतयोपन्यस्तेः साक्ष्यादिभिरेकदेशासिधाने धिकाभि
धानेवा कृत्स्नमेव साध्यं न सिद्धतीति तस्यार्थस्तत्रापि निश्चितं न सिध्यतीति वचनात् पूर्वसंन्यायएवेति प्रमाणांतरस्यावसरो स्त्येव।
सादेः सिद्धत्वात्कात्यायनवचनाच्च। साध्यार्थांशेपि गादितेसाक्षिभिः सकलं सवेत् स्त्री संगोसाहसेचौर्यये साध्यं परिकल्पितमिति। ननु नि
नुते लिखितं नैकमितार्थं स्मृतिस्तथानेकार्थाभियोगेपीतीयं स्मृतिरेव तथानयोः स्मृत्योः परस्परविरोधेसतीतरेबाधनादप्रामाण्ये
कस्मान्न भवति विषयव्यवस्था किमित्याश्रीयत इत्यत आह। स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः॥ यत्र स्मृत्योः परस्परतो विरोधस्त
त्र विरोधपरिहाराय विषयव्यवस्थापनादावुत्सर्गापवादलक्षणो न्यायो बलवान् समर्थः स च न्यायः कुतः प्रत्येतव्य इत्यत आह॥ व्यवहारत इति॥
व्यवहाराद्वृद्धव्यवहारादन्वयव्यतिरेकलक्षणादवगम्यते। अतश्च प्रकृतोदाहरणे विषयव्यवस्थैव युक्ता। एवमन्यत्रापि विषयव्यवस्थापना
विकल्पादियथासंभवं योज्यं। एवं सर्वत्र प्रसंगे पवादमाह॥ अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः॥ धर्मशास्त्रानुसारेणोत्पन्ने नैवोक्त
नसाधर्मशास्त्रस्य निरस्तत्वाद्धर्मशास्त्रांतरगतमेव राजनीतिलक्षणमर्थशास्त्रमिह विवक्षितं। अर्थशास्त्रस्मृत्योर्विरोधे धर्मशास्त्राद्धर्मशास्त्रं
बलवदिति स्थितिर्मर्यादा। यद्यपि समानकर्त्तृकतया धर्मशास्त्र [illegible] धर्मशास्त्रयोः स्वरूपगतो विशेषो नास्ति तथाप्यप्रमेयस्य धर्मस्य
प्राधान्याद्धर्मशास्त्रं बलवदित्यभिप्रायः। धर्मस्य प्राधान्यं शास्त्रादौ दर्शितं। तस्माद्धर्मशास्त्रार्थशास्त्रयोर्विरोधे धर्मशास्त्रस्य बाधएव। न
विषयव्यवस्थानापि विकल्पः। किमत्रोदाहरणं। न तावत् गुरुं बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं। आततायिनमायांतं हन्यादेवाविचारयन्।
नाततायिवधे दोषो हंतुर्भवति कश्चन॥ प्रकाशं वाप्रकाशं वा मन्युस्तं मन्युमृच्छतीति॥ तथाच॥ आततायिनमायांतमपि वेदांतगं रणे। जिघांसंतं

या० ८ — तर ६ — धर्म ५ — कृ ४ — धर्मशास्त्र ५ — र्व ४

जिघांसुयान्न तैर्ब्रह्महा भवेदित्याद्यर्थशास्त्रं । इयं विष्णुद्भिरुदिताप्रमाप्याकामतो द्विजं । कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते । इत्यादि धर्मशास्त्रं ।
तयोर्विरोधे धर्मशास्त्रं बलवदित्युक्तं । अनयोरेकविषयत्वासंभवेन विरोधाभावान्न बलाबलचिंतावतरति । तथाहि शास्त्रं द्विजातिभिः ग्राह्यं
धर्मो यत्रोपरुध्यते इत्युपक्रम्यात्मनश्च परित्राणे दक्षिणानां च संगरे । स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मो न दुष्यतीति । आत्मरक्षणे दक्षिणादानां यज्ञो
पकरणानां च रक्षणे युद्धे च स्त्रीब्राह्मणहिंसायां चाततायिनमकूटशस्त्रेण घ्नन् अदंड्यभागित्युक्ता तस्यार्थवादार्थमिदमुच्यते । गुरुं वा बाल
वृद्धौ वा स्यादि गुर्वादीन्यतावध्यानपि आततायिनो हन्यात् किमुतान्यानिति । वा शब्दश्रवणादपि वेदांत गामित्यत्रापि शब्दश्रवणान्न गुर्वा
दीनां वध्यत्वप्रतीतिः । नाततायिवधे दोषोऽन्यत्र गोब्राह्मणवधादपि सुमंतुवचनाच्च । आचार्यं प्रवक्तारं पितरं मातरं गुरुं ।
न हिंस्याद्ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विन इति मनुवचनाच्च । आचार्यादीना
माततायिनां हिंसाप्रतिषेधेनेदं वचनमर्थवन्नान्यथा । हिंसामात्रप्रतिषेधस्य सामान्यशास्त्रेणैव सिद्धत्वात् । नाततायिवधे दोषो हंतुर्भव
तीत्यनेनैतदपि ब्राह्मणादिव्यतिरिक्तविषयमेव । यतोऽग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिनः ॥
इति । उद्यतासिर्विषाग्निश्च शापोद्यतकरस्तथा । आथर्वणेन हंता च पिशुनश्चापि राजनि । भार्यातिक्रमकारी च रंध्रान्वेषणतत्परः । एवमाद्या
न्विजानीयात्सर्वानेवाततायिन इति सामान्येनाततायिनो दर्शिताः । अतश्च ब्राह्मणादय आततायिन आत्मादित्राणार्थं हिंसानभिसंधि
ना निवार्यमाणाः प्रमादाद्यदि विपद्येरन् । तत्र लघुप्रायश्चित्तं राजदंडाभावश्चेति निश्चयः । तस्मादन्यदेव उदाहरणं वक्तव्यं तदुच्यते ॥
हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः । अतो यतेत तत्प्राप्त्यै इत्यर्थशास्त्रं धर्मशास्त्रानुसारेण क्रोधलोभविवर्जित इति धर्म
शास्त्रं । तयोः क्वचिद्विषये विरोधो भवति । यथा चतुष्पाद्व्यवहारे प्रवर्तमाने एकस्य जये व्यवधार्यमाणे मित्रलब्धिर्भवति । न धर्मशा
स्त्रमनुसृतं भवति । अन्यस्य जये व्यवधार्यमाणे धर्मशास्त्रमनुसृतं भवति मित्रलब्धिविपरीता । तत्रार्थशास्त्राद्धर्मशास्त्रं बलवत्
तदेव धर्मार्थसंनिपातेऽर्थग्राहिण एतदेवेति प्रायश्चित्तस्य गुरुत्वं दर्शितमापस्तंबेन । एतदेवेति द्वादशवार्षिकं प्रायश्चित्तं

॥५०॥ परामृश्यते। ततोऽथ उत्तरे लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमित्युक्तं। किंतत्साधनमित्यपेक्षित आह। प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति
कीर्त्तितं। एषामन्यतमाभावे दिव्यान्यतममुच्यते। प्रमीयते परिच्छिद्यतेऽनेनेति प्रमाणं तच्च द्विविधं। मानुष्यं दिव्यं चेति तत्र मानुषं
प्रमाणं त्रिविधं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितं महर्षिभिः। तत्र लिखितं द्विविधं शासनं चीरकं चेति। शासनमुक्तलक्षणं।
चीरकं तु वक्ष्यमाणलक्षणं। भुक्तिरुपभोगः। साक्षिणो वक्ष्यमाणस्वरूपप्रकाराः। ननु लिखितस्य साक्षिणां च शब्दाभिव्यक्तिद्वारे
ण शाब्देऽन्तर्भावात् युक्तं प्रामाण्यं। भुक्तेस्तु कथं प्रामाण्यं। उच्यते। भुक्तिरपि कैश्चिद्विशेषणैर्युक्ता स्वत्वहेतुभूत क्रयादिकमव्यभिचा
राद् अनुमापयति। अनुपपद्यमाना वा कल्पयतीत्यनुमानेऽर्थापत्तौ वान्तर्भवतीति प्रमाणमेव। एषां लिखितादीनां त्रयाणामन्यतमस्याप्य
भावे दिव्यानां वक्ष्यमाणस्वरूपभेदानामन्यतमत् जातिदेशकालद्रव्याद्यपेक्षया प्रमाणमुच्यते। मानुष्याभाव एव दिव्यस्य प्रामाण्यमस्मा
देव वचनादवगम्यते। दिव्यस्य स्वरूपप्रामाण्ययोरागमगम्यत्वात्। अतश्च यत्र परस्परविवादे न युगपद्धर्माधिकरणप्राप्तयोरेको मानु
षीं क्रियामपरस्तु दैवीमवलंबते तत्र मानुष्येव ग्राह्या॥ यथाह कात्यायनः॥ यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीं। मानुषीं तत्र गृह्णीयान्न तु दै
वीं क्रियां नृपः इति। यत्रापि प्रधानैकदेशसाधनं मानुषं संभवति। तत्रापि न दैवमाश्रयणीयं। यथा रूपकशतमनया वृद्ध्या गृहीतमयं न प्रयच्छ
तीत्यभियोगापन्हवे ग्रहणे साक्षिणः सन्ति नो संख्यायां वृद्धिविशेषे वा ततो दिव्येन भावयतीत्युक्ते तत्रैकदेशविभावितन्यायेन नापि संख्यावृद्धि
विशेषसिद्धेर्न दिव्यस्यावकाशः। उक्तं च कात्यायनेन। यद्येकदेशप्राप्तापि क्रिया विद्येत मानुषी। सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणामि
ति। यत्तु गूढसाहसिकानां तु प्राप्तं दिव्यैः परीक्षणमिति तदपि मानुषसंभवे न नियमार्थं। यदपि नारदेनोक्तं। अरण्ये निर्जने रात्रावंतर्वेश्म
नि साहसे। न्यासस्यापन्हवे चैव दिव्या संभवति क्रियेति। तदपि मानुषासंभव एव। तस्मान्मानुषाभाव एव दिव्येन निर्णय इत्यौत्सर्गिकमस्या
पवादोऽभिधीयते। प्रक्रांते साहसे वादे पारुष्ये दंडवाचके। बलोद्भवेषु कार्येषु साक्षिणो दिव्यमेवेति। तथा लेख्यादीनामपि क्वचिन्नियमोऽनूद्यते।
यथा पूगश्रेणिगणादीनां या स्थितिः परिकीर्त्तिता। तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः। तथा द्वारमार्गक्रियाभोगवाहोदकादिषु क्रिया।

ज१ ५०

स्वामिनां १

मुक्तिरेवतुगुरुस्यान्नदिव्यंनचसाक्षिणः। तथाँदत्तादत्तेथभृत्यानाँनिर्णयेसतिँविक्रयादानसंबंधेक्रीत्वाधनमनिच्छतिँद्यूतेसमाह्वयेचै
वविवादेसमुपस्थिते। साक्षिणःसाधनंप्रोक्तंनदिव्यंनचलेख्यकमिति। उभयत्रप्रमाणसद्भावेप्रमाणगतबलाबलविवेकेचासति
विपरयोः कार्ययोःकस्यबलीयस्त्वमित्यतआह॥ सर्वेष्वर्थविवादेषुबलवत्युत्तराक्रिया। क्रियतइतिक्रियाकार्यंबलवती। उत्तरका
र्येसाधितेतद्वादजयीभवति। पूर्वकार्येसिद्धेपितद्वादपराजीयते। तद्यथा॥ कश्चिद्ग्रहणेनधारणंसाधयतिकश्चित्प्रतिदाने
नाधारणं। तत्रग्रहणप्रतिदानयोःप्रमाणसिद्धयोःप्रतिदानंबलवदितिप्रतिदानवादीजयति। तथापूर्वंदृष्टिकंन्यातं गृहीकाला
तरेत्रिकंन्यातमंगीकृतवान्। तत्रोभयप्रत्रेमाणसद्भावेपित्रिकन्यातग्रहणं बलवत्। पश्चाद्भाविनात्पूर्वबाधेनानुसत्तेः। उक्तंच
काः। पूर्वबाधेननोसन्तिरुत्तरस्यहिसेत्स्यतीति। अस्यापवादमाह॥ आधौप्रतिग्रहेक्रीतेपूर्वातुबलवत्तरा। आध्यादिषुत्रिषुपूर्व
मेवकार्यंबलवत्। तद्यथाएकमेवक्षेत्रमेकस्याधिंकृत्वा किमपिगृहीत्वापुनरन्यस्याप्याधाय्यकमपिगृह्णाति। तत्रपूर्वस्यैवभवति।
नोत्तरस्यैँएवंप्रतिग्रहेक्रयेचैनन्वाहितस्यतदानीमस्वत्वात्पुनराधानमेवनसंभवतिएवंदत्तस्यचक्रीतस्यचदानादानक्रियेनो
पपद्यते। तस्माददिंवचनमनर्थकं॥ उच्यते। अस्वत्वेपिमोहात्कश्चिल्लोभाद्वापुनराधानादिकंकरोति। तत्रपूर्वबलवदितिन्या
यमूलमेवेदंवचनमित्यचोद्यं। भुक्तेःकेश्चिद्दोषेणोयुक्तोप्रामाण्यंदर्शयिष्यन्कस्याश्चिद्भुक्तेः कार्यान्तरमाह। पश्यतोब्रुवते
भूमेर्हानिर्विंशतिवार्षिकी। परेणभुज्यमानायाधनस्यदशवार्षिकी। परेणासंबंधेनभुज्यमानांभुवंधनंवापश्यतोब्रुवतः
मदीयेयंभूःस्वयानभोक्तव्येत्यप्रतिषेधतस्तस्याभूमेर्विंशतिवार्षिकी। अप्रतिरवविंशतिवर्षेपिभोगनिमित्ताहानिर्भव
ति। धनस्यहस्त्यश्वादेर्दशवार्षिकीहानिः। नचेदमुपपन्नंनह्यप्रतिषेधात्स्वत्वमपगच्छति। अप्रतिषेधस्य दान
विक्रयादि वत्स्वत्वनिवृत्तिहेतुत्वस्यलोकशास्त्रयोरप्रसिद्धत्वात्। नापिविंशतिवर्षेपिभोगात्स्वत्वं। उप
भोगस्यस्वत्वप्रमाणत्वात्। प्रमाणस्यचप्रमेयंप्रत्यननुवादकत्वात्। क्रयादिषुस्वत्वकारकहेतुष्वपाठाच्च। तथाहि॥

रिक्थ १

२८

त्याः ५

याः ६

22

क्ष० स्प

॥११॥ स्वामीति॥ त्रयस्वविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरित्यष्टावेव स्वत्वकारकहेतून् गौतमः पठति न भोगं। न चेदमेव वचनं विंशतिवर्षोपभोगस्य स्वत्वापत्तिहेतुत्वं प्रतिपादयतीत्युक्तं। स्वत्वस्य स्वत्वहेतूनां च लोकप्रसिद्धत्वेन शास्त्रैकसमधिगम्यत्वाभावात्। एतच्च विभागप्रकरणे निपुणतरमुपपादयिष्यते। गौतमवचनं तु नियमार्थं। अपि च। अनागमं तु यो भुंक्ते बहून्यब्दशतान्यपि। चोरदंडेन तं पापं दंडयेत्पृथिवीपतिरिति सेनद नागमोपभोगस्य स्वत्वहेतुत्वे विरुध्येत न चानागमं तु यो भुंक्ते इत्येतत्सरोक्षभोगविषयं परत्यतो ब्रवत इति प्रेक्षविषयमिति युक्तं वक्तुं अनागमं तु यो भुंक्त इत्य विप्रोषाभिधानात्। नोपभोगे बलं कार्यमाहर्त्रा तत्सुतेन वा। पशुस्त्रीपुरुषादीनामिति धर्मो व्यवस्थित इति कात्यायन वचनाच्च। सम क्षभोगे च हानिकारणाभावेन हानेर संभवात्। नन्वेतन्मंतव्यं। आ ग्रहक्रयेषु पूर्वस्याः क्रियायाः प्राबल्यापवादेन भूम्येविंशतिवर्षोपभोगयुक्ताया धनविषये तु दश वर्षोपभोगयुक्ताया उत्तरस्याः क्रियायाः प्राबल्यमनेनोच्यत इति। यतस्तेषत्तेर्वक्रियातत्वतो नोपपद्यते। स्वमेव ह्याधेयं देयं विक्रेयं च भवति। न चाहितस्य दत्तस्य विक्रीतस्य वा स्वत्वमस्ति। अस्वस्य दानेप हि स्व दंडः स्मर्यते। अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति। उभौ तौ चोरवच्छास्यौ दाप्यौ चोत्तमसाहसमिति। अथाध्यादीनां त्रयाणामेवादत्ते स्य श्लोकस्याधिसीमादीनामुत्तरश्लोके पवादो नोपपद्यते॥ तस्मादस्यादीनां हानिरनुपपन्नैव। नापि व्यवहारहानिः। सायतः। उपेक्षां कुर्वतस्तस्य तूष्णीं भूतस्य तिष्ठतः। काले विपन्ने पूर्वोक्ते व्यवहारो न सिध्यतीति। नारदेनोपेक्षालिंगभावकृताव्यवहारहानिरुक्ता। न स्वभावकृता। न घामनुनापि। अजडश्चेदपौगंडो विषये चास्य भुज्यते। भग्नं तद्व्यवहारेण भोक्ता तद्धनमर्हति। व्यवहारतो संगोदभूति नवस्तुतः। व्यवहारभंगश्च भोक्ता किलवदति। अजडोयमपौगंडोऽस्य संनिधौ विंशतिवर्षाण्यप्रतिरवं मया भुक्तं न च हि न साक्षिणः संति। यद्यस्य स्वमन्यायेन मया भुज्यते। तदायं किमित्येतावंतं कालमुदास्त इति तत्र चायं निरुत्तरो भवतीत्येवं निरुक्तैस्यापि वास्तव्यो व्यवहारो भवत्येव छलं निरस्य भूतेन व्यवहारान्नयेन्नृप इति नियमात्। अथ मतं।

नं ३

प्रिप्रति

२६ वं ३ २१

॥...११॥

23

यद्यपि न वस्तुहानिर्नापि व्यवहारहानिस्तथापि प्रत्यर्थिनोऽप्रतिषेधतो व्यवहारहानिशङ्का भवतीति तन्निरन्तये तूष्णींनस्थातव्यमित्युप
दिश्यत इति तन्न नैरन्तर्येण स्मार्तकालोपभुक्तेर्हि निःशङ्काकारणत्वाभावात् । तूष्णीं न स्थातव्यं इत्येतावन्मात्राभिधित्सायां विंशतिग्र
हणमविवक्षितं स्यात् । अथोच्यते । विंशतिग्रहणमूर्ध्वं पत्रदोषोद्भवेन निराकरणार्थं । यथाह कात्यायनः । प्रत्यक्षस्य संनिधाव
र्थयस्य लेख्येन भुज्यते । विंशतिवर्षाणि त्यक्तं तत्पत्रं दोषवर्जितमिति । तदपि न । आध्यादिष्वपि विंशतेरूर्ध्वं पत्रदोषोद्भावनेन नि
राकरणस्य समत्वेनापवादासंभवात् । यथाह कात्यायनः । अथ विंशतिवर्षाणि आधिभुक्तिः सुनिश्चितः । तेन लेख्येन तत्सिद्धि
र्लेख्यदोषविवर्जिता तथा । सीमाविवादे निर्णीते सीमापत्रं विधीयते । तस्य दोषः प्रवक्तव्यो यावद्वर्षाणि विंशति [illegible] रिति ।
एतेन धनस्य दशवार्षिकीत्येतदपि प्रत्युक्तं । तस्मादस्य श्लोकस्यार्थो वक्तव्यः । उच्यते । भूमेर्धनस्य च फलहानिरिह विव
क्षिता । न वस्तुहानिर्नापि व्यवहारहानिः । तथा हि निराक्रोशे विंशतिवर्षोपभोगादूर्ध्वं यद्यपि स्वामी न्यायतः क्षेत्रं लभते । तथा
पि फलानुसरणं न लभते । अप्रतिषेधलक्षणात्स्वापराधात् स्मार्त्तेर्वचनात् । परोक्षभोगे तु विंशतेरूर्ध्वमपि फलानुसरणं लभ
त एव पश्यत इति वचनात् । प्रत्यक्षभोगे च साक्रोशे अब्रुवत इति वचनात् विंशतेः प्राक् प्रत्यक्षे निराक्रोशेऽपि च लभते विंशतिग्र
हणात् । ननु तदुत्पन्नस्यापि फलस्य स्वत्वात् तद्धारणं न उपपन्नेव । बाढं । तस्य स्वरूपाविनाशेन तथैवावस्थाने यथा तदुत्पन्नस्य पुनः स
वक्षादानीयते पुनस्तदुत्पन्नमुपभोगान्नष्टं तत्र स्वरूपनाशादेव स्वत्वनाशे अनागमं तु यो भुङ्क्त इत्यादिवचने न निग्रहरूपेण
गणयित्वा चौरवत्तत्समद्रव्यदानं प्राप्तं हानिर्विंशतिवार्षिकीत्यनेन अपवादः क्रियते । राजदण्डः पुनरस्त्येव विंशतेरूर्ध्वमप्यनाग
मोपभोगादपवादाभावाच्च । तस्मात्स्वाम्युपेक्षालक्षणस्वापराधात् स्मार्त्तवचनाद्विंशतेरूर्ध्वं नष्टं न लभत इति स्थितं । एते
न धनस्य दशवार्षिकीत्येतदपि व्याख्यातं । अस्यापवादमाह ॥ आधिसीमोपनिक्षेपजडबालधनैर्विना । तथोपनिधिराजस्त्रीश्रोत्रि
याणां धनैरपि । आधिश्च सीमा च उपनिक्षेपश्च आधिसीमोपनिक्षेपाः । जडश्च बालश्च जडबालौ तयोर्धनं जडबालधनं । आधिसी

स्य ६

व २८

24

मोपनिक्षेपाश्च जडबालधनेच। अधिसीमोपनिक्षेपजडबालधनैर्विनाउपनिक्षेपोनामरूपसंख्याप्रदर्शनेनरक्षणार्थंपरस्यहस्तेनि
हितंद्रव्यं। यथाहनारदः। स्वंद्रव्यंयत्र विस्रंभान्निक्षिपत्यविशंकितः। निक्षेपोनामतत्प्रोक्तंव्यवहारपदंबुधैरिति। उपनिधानमु
पनिधिः। आध्यादिषुपश्यतोब्रुवतोभूमेर्विंशाते धनस्यदशाभ्योवर्षेभ्य दुर्द्धमपितुपचयहानिर्भवति। पुरुषापराधस्य
तथाविधस्यैभावादुपेक्षाकारणस्यतत्रतत्रसंभवात्। तथाहि। आधेराधितोपाधिकएवभोगइत्यपेक्षायामपिनपुरुषापराधः।
सीमाश्चिरकृततुषांगारादिचिन्हैः सुसाध्यत्वादुपेक्षासंभवति। उपनिक्षेपोपनिध्योर्भुक्तेः प्रतिषिद्धत्वात्प्रतिषेधातिक्रमोपभो
गेचसोदयत्वादुपेक्षोपपत्तिः। जडबालयोर्जडत्वाद्बालत्वादुपेक्षायुक्तैव। राज्ञेर्बहुकार्यव्याकुलत्वात्स्त्रीणामज्ञानादप्रागल्भ्याच्च।
श्रोत्रियस्याध्ययनाध्यापनतत्वविचारानुष्ठानव्याकुलत्वादुपेक्षायुक्तैव। तस्मादाध्यादिषुसर्वत्रोपेक्षाकारणसंभवात्समस्त
भोगे निराक्रो[illegible]चनकदाचिदपिफलहानिः। आध्यादिषुदंडविशेषप्रतिपादनार्थमाह। आध्यादीनांविहर्त्तारंधनिनेदापयेद्ध
नं। दंडंचतत्समंराज्ञेशक्त्यपेक्षमथापिवा। आध्यादीनांश्रोत्रियद्रव्यपर्यंतानांचिरकालोपभोगबलेनापहर्त्तारंविवादास्पदीभू
तंद्रव्यंस्वामिनेदापयेदित्यनुवादः। दंडंचतत्समंविवादास्पदीभूतद्रव्यसमंराज्ञेदापयेदितिविधिः। यद्यपिग्रहक्षेत्रादौतत्समो
दंडोनसंभवति। तथापि मर्यादायाःप्रभेदेचसीमातिक्रमणेतथेत्यादिनावक्ष्यमाणोदंडोद्रष्टव्यः। अतत्समदंडेनअपहर्त्तुर्द
मनंनभवतिवक्तृत्वेनतदाशक्त्यपेक्षंधनंदापयेत्। यावतातस्यदर्पोपशमोभवतितावद्दापयेत्। दमनादित्याकुत्स्नेनादातान्
दमयेदितिदंडस्यरूस्यदमनार्थत्वात्। यस्यतुतत्सममपिद्रव्यंनास्तिसोपियावतापीड्यतेतावद्दाप्यः। यस्यपुनःकिमपिधनं
नास्तिअसौधिग्दंडादिनादमनीयः। तथाचमनुः। धिग्दंडंप्रथमंकुर्यात्वाग्दंडंतदनंतरं। तृतीयंधनदंडंतुवधदंडमतःप
रमितिवधदंडेविप्रब्राह्मणव्यतिरिक्तानांनवधादर्शितः। यथाहमनुः। दशस्थानानिदंडस्यमनुःस्वायंभुवोब्रवीत्। त्रिषुवर्णेषु
यानिस्युरक्षतोब्राह्मणोव्रजेत्। उपस्थमुदरंजिह्वाहस्तौपादौचपंचमं। चक्षुर्नासाचकर्णौचधनंदेहस्तथैवच। एषांचयन्निमि

नोपराधस्तत्रोपस्थादौ निग्रह कार्य इति द्रष्टव्यं । कर्मना कारयितव्यो बंधनागारं वा प्रवेशयितव्यः । तत्रोक्तं कात्यायनेन ॥ धनदानास
हं बुध्वा स्वाधीनं कर्म कारयेत् । अशक्तो बंधनागारं प्रवेश्यो ब्राह्मणाद्दतेइति । ब्राह्मणस्य पुनर्द्रव्याभावे कर्मवियोगादीनि प्रयोज्यानि ।
यथाह गौतमः ॥ कर्मवियोगविख्यापनान्निर्वासनांककरणान्य लाविति । नारदोपि वध सर्वस्वहरणं पुरान्निर्वासनांकने । तदंग
छेद इत्युक्तो दंड उत्तमसाहसः । अविशेषेण सर्वेषामेष दंडविधिः स्मृत इत्युक्त्वोक्तं । वधादृते ब्राह्मणस्य न वधं ब्राह्मणोर्हति । शि
रसो मुंडनं दंडो ततो निर्वासनं पुरात् । ललाटे वाभिशस्तांकः प्रयाणं गर्दभेन चेति । अंकनेच व्यवस्थाद्रिति । गुरुतल्पे भगः
कार्यः सुरापाणे सुराध्वजः । स्तेये तु श्वपदं कार्यं ब्रह्महण्य शिराः पुमानिति । तुर्ये चक्षुर्निरोधो ब्राह्मणस्येत्यापस्तंबेनोक्तं । ब्राह्म
णस्य पु रान्निर्वासनसमये वस्त्रादिना चक्षुर्निरोधः कर्त्तव्य इति तस्यार्थो न चक्षुषोरुद्धरणं । अक्षतो ब्राह्मणो व्रजेत् । न शारी
रो ब्राह्मणो दंड इत्यादि मनुगौतमवचनविरोधादिसलं प्रसंगेन ॥ स्वत्वाव्यभिचारत्वेन भोगस्य स्वत्वे प्रमाणमुक्तं भोगमात्रस्य
स्वत्वव्यभिचारात् कीदृशो भोगः प्रमाणमित्यत आह ॥ आगमोभ्यधिको भोगाद्विना पूर्वक्रमागतात् । स्वत्वहेतुः प्रतिग्रहक्रयादिराग
मः । स भोगादभ्यधिको बलीयान् । स्वत्वबोधने भोगस्यागमसापेक्षत्वात् । यथाह नारदः । आगमेन विशुद्धेन भोगो याति प्रमा
णतां । अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छतीति । न च भोगमात्रात् स्वत्वावगमः । परकीयस्याप्युपहारादिना भोगसंभवात् ॥
अतएव । भोगं केवलतो यस्तु कीर्त्तयेन्नागमं क्वचित् । भोगच्छलापदेशेन विज्ञेयः स तु तस्कर इति स्मर्यते । अतश्च । सागमो दीर्घ
कालो निरंतरो निराक्रोशः । प्रत्यर्थिप्रत्यक्ष श्चेति पंचविशेषणयुक्तो भोगः प्रमाणमित्युक्तं भवति । तथा च स्मर्यते । अतश्च । सा
गमो दीर्घकालश्च विच्छेदापरवोज्झितः । प्रत्यर्थिसंनिधानश्च परिभोगोपि पंचधेति । क्वचिदागमनिरपेक्षस्यापि भोगस्य प्रामाण्यं
इत्याह । विना पूर्वक्रमागतादिति पूर्वेषां पित्रादीनां त्रयाणां क्रमः पूर्वक्रमस्तेनागतो यो भोगस्तस्माद्विना आग ... भ्यधि
क इति संबंधः । स पुनरागमादभ्यधिकः । आगमेन निरपेक्षः प्रमाणमित्यर्थः । तत्राप्यागमज्ञान निरपेक्षो न सत्ता निरपेक्षः ।

तु०८

21

सन्तानुतेनैवागम्यतइतिवो द्ध्यं। विनापूर्वक्रमैतौ दिसेतच्चा स्मार्त्तकालप्रदर्शनार्थं आगमोभ्यधिको भोगादि तिस्मार्त्तकाल
विषयं। अतश्चस्मरणायोग्येकालेयोग्यानुपलब्ध्या आगमाभावनिश्चयसंभवादागमज्ञानेनोक्षस्यैव भोगस्य प्रामाण्यं।
अस्मार्त्तकालेयोग्यानुपलब्ध्याभावेनागमाभावनिश्चयासंभवादागमज्ञाननिरपेक्ष एव संततोपभोगः प्रमाणं तदेवस्पष्टी
कृतं कात्यायनेन। स्मार्त्तकालेक्रियाभूमेः सागमाभुक्तिरिष्यते। अस्मार्त्तेनुगमाभावात्क्रमात्त्रिपुरुषागते तिस्मार्त्त
श्च कालो वर्षशतपर्यंतः शतायुर्वैपुरुषइतिश्रुतेः। अनुगमाभावादितियोग्यानुपलब्ध्यभावेनागमाभावश्च निश्चया
भावादिति अतश्च वर्षशताधिको भोगः प्रमाणमतएव अनाश्वागमाभावेन निश्चितव्यभिचारादाक्षिप्तागमं स्वतं
गमयति। अस्मार्त्तेपिकाले नागमस्मरतिपरं परायांसत्यां न भोगः प्रमाणमतएव अना गम नुयो भुंक्ते इत्याद्युक्तं॥
ना ८ नचागमं तुयो भुंक्ते इत्येकवचननिर्देशाद्बहुन्यवद् ग्रानान्यपाति अपिशब्दप्रयोगात् प्रथमस्यपुरुषस्यनिरागमेचिर
कालोपभोगेपिदंडविधानमितिमंतव्यं। द्वितीये त्वत्तौ पुरुषे निरागमस्य भोगस्य प्रामाण्यप्रसंगान्नचेतदिष्यते। आ येन
दोनुकारणंदानं मध्ये भुक्तिस्तु सागमेतिनारदस्मरणात्॥ तस्मात्सर्वत्र निरागमोपभोगे नागमनंतुयोभुंक्ते इत्येतद्
ष्टव्यं। यद्यपि। अन्यायेनापि यद्भुक्तं पित्रा पूर्वतरैस्त्रिभिः। नतच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतं इति पित्रासहपूर्वत
पि ४ रैस्त्रिभिरितियोज्यं। तत्रापि क्रमात्त्रिपुरुषागतमिति अस्मार्त्तकालोपलक्षणं। त्रि पुरुषविवक्षायामेकवर्षा
भ्यंतरेपि पुरुषत्रयातिक्रमसंभवात् द्वितीयेवर्षे निरागमस्य भोगस्य प्रामाण्यप्रसंगः। नचास्ति स्मार्त्तकालेक्रिया
भूमेः सागमाभुक्तिरिष्यत इति स्मृतिविरोधः। अन्यायेनापि यद्भुक्तमित्येतत्रान्यायेनापि भुक्तमपहर्तुं न शक्यं
किं पुनरन्यायानिश्चय इति व्याख्येयं। अपिशब्दश्रवणात्। यथोक्तं। यद्विनागममत्यंतं भुक्तं पूर्वैस्त्रिभि भवेत्॥

नतच्छस्यमपाहस्तुक्रमात्त्रिपुरुषागतमि [illegible] नितत्राप्यत्वं
नमागमं विनेत्यं तमुपलभ्यमानमागमं विनेतिव्याख्येयं न पुनरागमस्वरूपं विनेति। आगमस्वरूपाभावे भोगत्र
तेनापि न स्वत्वं भवतीत्युक्तं। क्रमात्त्रिपुरुषागतमित्येतदुक्तार्थं। ननु स्मरणयोग्यकाले भोगस्यागमसापेक्षस्य प्रामाण्य
मनुपपन्नं। तथाहि यद्यागमः प्रमाणांतरेणावगत [illegible] स्वदानेनैव स्वत्वावगमान्न भोगस्य स्वत्वे आगमे वा प्रामाण्यं।
अथ प्रमाणांतरेणागमो नावगतः कथं तद्विशिष्टो भोगः प्रमाणमुच्यते। प्रमाणांतरेणावगतागमसहित एव निरंतरो भोगः
कालांतरे स्वत्वं गमयति। अवगतोप्यागमो भोगरहितो न कालांतरे स्वत्वं गमयितुमलं। मध्ये दानविक्रयादिना स्वत्वापग
मसंभवादिति सर्वमनवद्यं। आगमसापेक्षो भोगः प्रमाणमित्युक्ते आगमस्तर्हि भोगनिरपेक्ष एव प्रमाणमित्यत आ
ह॥ आगमेपि बलं नैव भुक्तिः स्तोकापि यत्र नो। यस्मिन्नागमे स्वल्पापि भुक्तिर्भोगो नास्तीति तस्मिन्नागमे बलं संपूर्णता
नैवास्तीत्ययमभिसंधिः। स्वत्वनिवृत्तिः परस्वत्वापादनं च [illegible] परो यदि स्वीकरोति तदा संपद्यते।
नान्यथा। स्वीकारश्च त्रिविधो मानसो वाचिकः कायिकश्चेति। मानसो ममेदमिति संकल्परूपः। वाचिकस्तु ममेदमिति
घभिव्याहारोल्लेखी सविकल्पकः प्रत्ययः। कायिकः पुनरुपादानाभिमर्शनादिरूपोनेकविधस्तत्र नियमः स्मर्यते।
दद्यात्कृष्णाजिनं पुच्छे गां पुच्छे करिणां करे। केसरेषु तथैवाश्वं दासं शिरसि दापयेदिति॥ आश्वलायनोप्याह। अनुमंत्रयत
प्राण्यभिमृश्येदप्राणिकन्यां चेति। तत्र हिरण्यवस्त्रादावुदकदानानंतरमेवोपादानादिसंभवात् त्रिविधोपि स्वीका
रः संपद्यते। क्षेत्रादौ पुनः [illegible] पत्रला भोगव्यतिरेकेण स्वीकारासंभवात् स्व [illegible] ल्पेनाप्युपभोगेन विना न स्वीकारः संपूर्णतां भवतीति फलोपभोगलक्षणकायिकस्वीकारविकल आगमो दुर्बलो भवति। न स्वहितादागमादेव॥
तत्र द्वयोः पूर्वापरकालापरिज्ञाने पूर्वापरकालपरिज्ञाने तु त्रिगुणोपि पूर्वकालागम एव बलीयानिति। अथवा लिखितं

न२

२७ ध५ प३ प३

साक्षिणो भुक्तिः प्रमाणमित्युक्तमेतेषां समवाये कुत्र कस्य प्राबल्यमित्यत्रेदमुपतिष्ठते। आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमा
गतात्। आगमेऽपि बलं नैव भुक्तिस्तोकापि यत्र नो इत्ययमर्थः। आद्ये पुरुषे साक्षिभिर्भावित आगमो भोगादभ्यधिको बल
वान्। पूर्वक्रमागतो भोगाद्विना स पुनः पूर्वक्रमागतो भोगश्चतुर्थे पुरुषे लिखितेन भावितादागमाद्बलवान्। मध्यमे तु
भोगरहितादागमात् स्तोकभोगसहितोऽपि आगमो बलवानिति एतदेव स्पष्टीकृतं नारदेन॥ आदौ तु कारणं दानं मध्ये
भुक्तिस्तु सागमा। कारणं भुक्तिरेवैका संतता या चिरंतनीति। पत्नं यतो ब्रूवत इत्यत्र विंशतिवर्षभोगा[illegible]नस्यापि
दशवर्षभोगादूर्ध्वं फलानुसरणं न भवतीत्युक्तं तत्र फलानुसरणवत् दंडानुसरणमपि न भविष्यतीत्यागमस्य पुरुषव्यव
स्थया प्रमाणव्यवस्थया दंडव्यवस्थां दर्शयितुमाह॥ आगमस्तु मे कृतो येन सोऽभियुक्तस्तमुद्धरेत्। न तत्सुतस्तत्सुतो
वा भुक्तिस्तत्र गरीयसी। येन पुरुषेण भूम्यादेरागमः स्वीकारः कृतः स पुरुषः कुतस्ते क्षेत्रादिकमित्यभियुक्तस्तमा
गमं प्रतिग्रहादिकं लिखितादिभिरुद्धरेत्। भावयेदनेन चाद्यपुरुषस्यागममनुद्धरतो दंड इत्युक्तं भवति। न तत्सुतो द्वि
तीयोऽभियुक्तो नागममुद्धरेत्। किं तु विच्छिन्नाप्रतिरवसमक्षभोगं। अनेनागममनुद्धरतो द्वितीयस्य न दंडोऽपि तु विशि
ष्टं भोगमनुद्धरतो दंड इति प्रतिपादितं। तत्सुतस्तृतीयो नागमं नापि विशिष्टं भोगमुद्धरेदपि तु क्रमागतं भोगमात्रं।
अनेनापि तृतीयस्य क्रमायातभोगानुद्धरणे दंडो नागमानुद्धरणे विशिष्टभोगानुद्धरणे चेति अभिहितं। तत्र तयो
र्द्वितीयतृतीययोर्भुक्तिरेव गरीयसी। तत्रापि द्वितीये गुरुस्तृतीयेऽपि गरीयसीति विवेक्तव्यं। त्रिष्वप्यागमानुद्धरणेऽर्थहा
निः समानैव। दंडेषु विशेष इति नास्त्यर्थः॥ उक्तं च॥ आगमस्तु कृतो येन स दंड्यस्त[illegible]मनुद्धरन्। न तत्सुतस्तत्सुतो वा
भोग्यहानिस्तयोरपीति। अस्मार्तकालोपभोगस्यागमज्ञाननिरपेक्षस्य प्रामाण्यमुक्तं विना पूर्वक्रमेणागतादित्यचलस्यापि
वादमाह॥ यो [illegible] अभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत्। न तत्र कारणं भुक्तिरागमेन विना कृता। यदा पुनर्व्यवहर्ताभि

वि॰ ४८

ना ७

हे ७

पुक्तोऽकृतव्यवहारनिर्णय एव परेतः स्यात् परलोकं गतो भवेत् तदा तस्य रिक्थी पुत्रादिस्तमागममुद्धरेत्। तस्मात्तत्र त
स्मिन् व्यवहारे भुक्तिरागमरहिता साक्ष्यादिभिः साधितापि न प्रमाणं पूर्वाभियोगेन भोगस्य सापवादत्वात्॥ ना
रदेनाप्युक्तं। तथारूढविवादस्य प्रेतस्य व्यवहारिणः। पुत्रेण सोऽर्थः संशोध्यो न तं भोगो निवर्तयेदिति। अनिर्णीतव्यवहारे व्यवहर्त
रि प्रेते व्यवहारो न निवर्तत इति स्थितं निर्णीतेपि व्यवहारे स्थिते च व्यवहर्तरि व्यवहारः क्वचित्प्रवर्तते क्वचिन्न प्रवर्तत इति
व्यवस्थासिद्धये व्यवहारदर्शिनां बलाबलमाह॥ नृपेणाधिकृताः पूगाः श्रेणयोथ कुलानि च॥ पूर्वं पूर्वं गुरु ज्ञेयं व्यवहा
रविधौ नृणां। नृपेण राज्ञाधिकृताः व्यवहारदर्शने नियुक्ता राज्ञा सभासदः [illegible] दिनोक्ताः। पूगाः समूहा भिन्नजातीनां
भिन्नवृत्तीनां एकस्थाननिवासिनां यथा ग्रामनगरादयः। श्रेणयो नाना[illegible]मेकजातीनामप्येकजाति कर्मोपजीविनां सं
घाताः यथा हेडाबुकानां ताम्बूलिककुविन्दकचर्मकारादीनां च कुलानि ज्ञातिसंबंधिबंधूनां समूहाः एतेषां नृ
पाधिकृतादीनां चतुर्णां पूर्वं पूर्वं यत् सूर्वपठितं तत्तद्गुरु बलवदिति वेदितव्यं। नृणां व्यवहर्तृणां व्यवहारविधौ व्यवहार
दर्शने कार्ये एतदुक्तं भवति। नृपाधिकृते निर्णीते व्यवहारे पराजितस्य यद्यप्यसंतोषः कुदृष्टबुद्ध्या भवति। तथापि न पू
गादिषु पुनर्व्यवहारो भवत्येवं पूगनिर्णीतेपि न श्रेण्या
दिगमनं पूगनिर्णीतेन्नृपा
धिकृतगमनं भवतीति नारदेन पुनर्नृपाधिकृतैर्निर्णीतेपि व्यवहारे नृपगमनं भवतीत्युक्तं। कुलानि श्रेणयश्चैव गणाश्चा
धिकृता नृपाः। प्रतिष्ठा व्यवहाराणां गुर्वेषामुत्तरोत्तरमिति। तत्र च नृपगमने सोत्तरसभेन राज्ञा पूर्वैः सभ्यैः सह स्वयं पु
नर्व्यवहारे निर्णीयमाने यद्यसौ कुदृष्टवादी पराजितस्तदासौ दंड्यः। अथासौ जयति तदाधिकृताः सभ्यादंड्याः। दुर्बली

४ तथा श्रेणीनिर्णीते कुलगमनं न भवति॥ कुलनिर्णीतेपि श्रेण्यादिगमनं। श्रेणिनिर्णीते पूगादिगमनं ×४

30

॥१९॥

व्यवहारदर्शि भिर्द्दृष्टो व्यवहारः परावर्त्तते। प्रबलदृष्टस्तु न निवर्त्तत इत्युक्तं। इदानीं प्रबलदृष्टोपि व्यवहारः कश्चिन्निवर्त्तत इत्याह। बलोपधिविनिवृत्तान्व्यवहारान्निवर्त्तयेत्। स्त्रीनक्तमंतरागारबहिः शत्रुकृतांस्तथा। बलेन बलात्कारेणोपधिना भयेन विनिवृत्तान् निष्पन्नान् व्यवहारान्निवर्त्तयेत्। तथा स्त्रीभिर्नक्तं रात्रौ च स्त्रीभिरपि अंतरागारे गृहाभ्यंतरे बहिर्ग्रामादिभ्यः शत्रुभिश्च कृतान् व्यवहारान्निवर्त्तयेदिति संबंधः॥ अपि च मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः। असंबद्धकृतश्चैव व्यवहारो न सिध्यति। मत्तो मदनीयद्रव्येण। उन्मत्तः उन्मादेन पंचविधेन वातपित्तश्लेष्मसंनिपातग्रहसंभवेनोपसृष्टः। आर्त्तो व्याधिना। व्यसनमिष्टवियोगानिष्टप्राप्तिजनितदुःखं तद्वान्व्यसनी। बालो व्यवहारायोग्यः। भीतो राजभ्यः। आदिग्रहणात् पुरराष्ट्रादिविरुद्धः। पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विवर्जितः। अनादेयो भवेद्वादो धर्मविद्भिरुदाहृत इति स्मरणात्। तैर्योजितः कृतो व्यवहारो न सिध्यतीति। अनियुक्तासंबंधकृतो व्यवहारो न सिध्यतीति संबंधः॥ यत्तु स्मरणं। गुरोः शिष्ये पितुः पुत्रे दंपत्योः स्वामिभृत्ययोः। विरोधे तु मिथस्तेषां व्यवहारो न सिध्यतीति। तदपि गुरुशिष्यादीनां अत्यंतिकव्यवहारप्रतिषेधपरं न भवति। तेषामपि कथं चिद्व्यवहारात्स्पष्टत्वात्। तथा हि शिष्यश्चिरवधेनाशक्तौ रज्जुवेणुविदलाभ्यां तनुभ्यामन्येन घ्नन् राज्ञा शास्य इति गोतमस्मरणात्। नोत्तमांगे कथंचनेति मनुस्मरणात्। यदि गुरुः कोपावेशवशात् महता दंडेनोत्तमांगे ताडयति तदा स्मृतिव्यपेतेन मार्गेणाधर्षितः शिष्यो यदि राज्ञे निवेदयति तदा भवत्येव व्यवहारपदं। तथा भूर्या पितामहोपात्तेत्यादिवचनात् पितामहोपात्ते भूम्यादौ पितापुत्रयोः स्वाम्ये समाने यदि पिता विक्रयादिना पितामहोपात्तं भूम्यादि नाशयति तदा पुत्रो यदि धर्माधिकरणे प्रविज्ञापयति तदा पितापुत्रयोरपि भवत्येव व्यवहारः। तथा दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके गृहीतं स्त्रीधनं भर्त्ता नाकामो

॥१९॥

दातुमर्हतीति स्मरणाद्बहुभिः स्त्र्यादिव्यतिरेकेण यदि स्त्री धनं भर्त्रायियीकृत्य विद्यमानधनोऽपि याच्यमानो न दद्यादिति तदा दंपत्योरप्येष एव व्यवहारः। तथा भक्तदासस्य स्वामिना सह व्यवहारपदं वक्ष्यति। गर्भदासस्यापि गर्भदासादीधिकस्य

न२

शेषांस्वामिनं क्लिन्मोचयेत्प्राणसंशयात्। दासत्वात्स विमुच्येत पुत्रभागं लभेत चेति नारदोक्तवचनात्। तदामोचने पुत्रभागादानेच स्वामिना सह व्यवहारः केन वार्यते। तस्मादृष्टादृष्टयोः श्रेयस्करो न भवति गुर्वादिभिर्व्यवहार इति प्रथमं शिष्यादयो निवारणीया राज्ञा सभ्यैश्चेति। गुरोः शिष्य इत्यादेः श्लोकस्य तात्पर्यार्थः। अत्यंतनिर्बंधे तु शिष्यादीनामप्यक्तनीत्या प्रवर्त्तनीयो व्यवहारः। यदप्येकस्य बहुभिः सार्द्धं स्त्रीणां प्रेष्यजनस्य च। अनादेयो भवेद्वादो धर्मविद्भिरुदाहृत इति नारदवचनं। तत्रैकस्यापि गणद्रव्यं हरेद्यस्तु संविदं लंघयेच्च यः। तथा एकं घ्नतां बहूनां चेत्यादिस्मरणादेकार्थैर्बहुभिः सार्द्धं व्यवहार इष्यत एवेति भिन्नार्थैर्बहुभिरेकस्य युगपद्व्यवहारो न भवतीति इष्टव्यं। स्त्रीणामित्यपि गोपस्त्री शौंडिकादिस्त्रीणां स्वातंत्र्याद्व्यवहारे भवत्येवेति तदन्यासां कुलस्त्रीणां पतिपुत्रजीवत्सु तत्सारतंत्र्यादनादेयो व्यवहार इति व्याख्येयं। प्रेष्यजनस्य चेत्येतदपि प्रेष्यजनस्य स्वामिपारतंत्र्यात् स्वार्थव्यवहारेऽपि स्वाम्यनुज्ञयैव व्यवहारो नान्यथेति योजनीयं। परावर्त्यव्यवहारमुक्त्वेदानीं परावर्त्यद्रव्यमाह॥ प्रनष्टाधिगतं देयं नृपेण धनिने धनं। विभावयेन्न चेल्लिंगैस्तत्समं दंडमर्हति। प्रनष्टं हिरण्यादिशौल्किकस्थानपालादिभिरधिगतं राज्ञे समर्पितं यत्तद्राज्ञा धनिने दातव्यं। यदि धनी रूपसंख्यादिभिर्लिंगैर्भावयति तदा तत्समं दंड्योऽसत्यवादित्वात्। अधिगाम्यस्यस्व निमित्तत्वात्। स्वत्वप्राप्तेतसाव स्थिरनेनोक्ता। अत्र च कालावधिं वक्ष्यति शौल्किकैरित्यादि। मनुना संवत्सरत्रयमवधित्वेन निर्दिष्टं। प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत्। अर्वाक्त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरेदिति। तत्र वर्षत्रयपर्यंतं अवश्यं रक्षणीयं

त्रि४

न३

व

32

॥१६॥

संवत्सरं५

तत्र यदि संवत्सरादर्वाक् स्वाम्यागच्छेत् । तदा कृत्स्नमेव दद्यात् । यदा पुनः संवत्सरादूर्ध्वमागच्छति तदा कंचिद्भागं रक्षार्थमल्पं गृ
हीत्वा शेषं स्वामिने दद्यात् । यथाह । औदद्यात्षड्भागं प्रनष्टाधिगतान्नृपः । दशमं द्वादशं वापि सतां धर्ममनुस्मरन् इति ।
तत्र प्रथमे वर्षे कृत्स्नमेव दद्यात् । द्वितीये द्वादशं भागं तृतीये दशमं चतुर्थादिषु षष्ठं भागं गृहीत्वा शेषं दद्यात् । राज्ञाराज
भागस्य चतुर्थो शोऽधि गंत्रे दातव्यः स्वाम्यनागमे नुकृत्स्नस्य धनस्य चतुर्थं शमधिगंत्रे दत्वा शेषं राजा गृह्णीयात् ।
यथाह गौतमः । प्रनष्टस्वामिकमधिगम्य राज्ञा ब्रूयुर्विख्याप्य संवत्सरं राज्ञा रक्ष्यमूर्ध्वमधिगंतुश्चतुर्थं राज्ञः शेष इत्यत्र संवत्सरमित्येकवचनमविव
क्षितं । राजा त्र्यब्दं निधापयेदिति स्मरणात् । हरेत परतो नृप इत्येतदपि स्वामिन्यनागते त्र्यब्दात् ऊर्ध्वं कार्यमनु
ज्ञानपरं । आगते तु स्वामिनि व्ययी भूतेऽपि राज्ञा स्वांशं तावता यन्तस्मै दद्यात् ॥ एतच्च हिरण्यादि विषयं । गवादि विषये व
स्यति पणानेकशफे दद्यादित्यादिना । रक्षार्थं शुल्कमाक्षादिनिमित्ततस्य सुवर्णादिर्नष्टस्याधिगमे विधिमुक्त्वाधुना भूमौ
चिर निखातस्य निधिरित्याख्यायमानस्याधिगमे विधिमाह ॥ राजा लब्ध्वा निधिं दद्याद्विजेभ्योऽर्धं द्विजः पुनः । विद्वानशेषमा
दद्यात्स सर्वस्य प्रभुर्यतः । इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् । अनिवेदित विज्ञातो दाप्यस्तं दंडमेव च । उक्तलक्ष
णं निधिं राजा लब्ध्वार्धं ब्राह्मणेभ्यो दत्वा शेषं कोशे निवेशयेत् । ब्राह्मणस्तु विद्वान् श्रुताध्ययनसंपन्नः सदाचारो यदि
निधिं लभेत तदा सर्वमेव गृह्णीयात् । यस्मादसौ सर्वस्य जगतः प्रभुः । इतरेण तु राजविद्वद्ब्राह्मणव्यतिरिक्तेनाविद्वद्ब्रा
ह्मणाक्षत्रियादिना निधौ लब्धे राजा षष्ठांशं अधिगंत्रे दत्वा शेषं निधिं स्वयमाहरेत् ॥ यथाह वसिष्ठः । अप्रज्ञायमानं
वित्तं योऽधिगच्छेद्राजा तद्धरेदधिगंत्रे षष्ठमंशं दद्यादिति । गौतमेनापि निध्यधिगमो राज्ञधनं न ब्राह्मणस्याभिरूपस्य ब्राह्म
णोऽप्याख्याता षष्ठमंशं लभेतेत्येक इति । अनिवेदितइतिकर्तरि क्तः । अनिवेदितश्चासौ विज्ञातश्च राजेत्यनिवेदित विज्ञातः

ण१

र्वे६

६४

॥१६॥

८८५

नाश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राज्ञा स सर्वं निधिं दाप्यो दण्डं च नात्यपेक्षया ॥ अथ निधेरपि स्वाम्यागत्य रूप
कसंख्यादिभिः स्वत्वं भावयति तदा तस्मै राज्ञा निधिं दत्वा षष्ठं द्वादशं वांशं स्वयमाहरेत् । यथाह मनुः । ममायमिति यो ब्रूया
न्निधिं सत्येन मानवः । तस्याददीत षड्भागं राजा द्वादशमेव वेति । अत्र विकल्पस्तु वर्णकालाद्यपेक्षया वेदितव्यः ॥ ७॥ चौरैर्हृतं
प्रत्याह ॥ देयं चोर हृतं द्रव्यं राज्ञा जानपदाय तु । अददद्धि समाप्नोति किल्बिषं यस्य तस्य तत् । चौरैर्हृतं द्रव्यं चौरेभ्यो विजित्य जान
पदाय स्वदेश निवासिने यस्य तद्द्रव्यं तस्मै राज्ञा दातव्यं हि यस्माद् अप्रयच्छन् यस्य तदपहृतं द्रव्यं तस्य किल्बिषमाप्नोति तस्य चौर
स्य वा । यथाह मनुः । दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनं । राजा तदुपयुंजानश्चौरस्याप्नोति किल्बिषं इति । यदि चौरहस्ताद्दा
यस्स्वयमुपभुंक्ते तदा चौरस्य किल्बिषमाप्नोति । अथ चौरकृतमुपेक्षते तदा जानपदस्य किल्बिषमथ चोरहृतमाहर्तुमशक्तस्तदा
नोपि न च्याकुर्याद् आहर्तुं न दाता वद्धनं स्वकोशाद्दद्यात् ॥ यथाह गोतमः । चौरहृतमविजित्य यथास्थानं गमयेत् कोशाद्वा दद्यादिति ॥
कृष्णद्वैपायनोपि ॥ प्रत्याहर्तुमशक्तस्तु धनं चौरैर्हृतं यदि । स्वकोशात्तद्धि देयं स्यादशक्तेन महीक्षिता इति साधारणा साधारणस्य
व्यवहारस्य नाम अभिधायाधुना ऋणादानाख्यव्यवहारपदानामाद्यमृणादानं दर्शयिष्यति ॥ अत्रापि भागो वृद्धिस्या [illegible] दिनामोच्य आ
धिस्तदुत्सन्ने प्रविष्टे द्विगुणो धनेत्येवमेतेन तत्र ऋणादानं सप्तविधमादानमृणं देयमादानमदेयं अनेनाधिकारिणा देयमस्मि
न् समये देयमनेन प्रकारेण देयमित्यधमर्णे पंचविधमुत्तमर्णे दानविधिरादानविधिश्चेति द्विविधमित्येतन्नारदेन स्प
ष्टीकृतं । ऋणं देयमदेयं च येन यत्र यथा च यत् । दानग्रहणधर्मश्च ऋणादानमिति स्मृतमिति । तत्र प्रथममुत्तमर्णस्य दान
विधिमाह । न स्पूर्वकत्वादितरेषां । अशीतिभागो वृद्धिः स्यान्मासि मासि सबंधके । वर्णक्रमाच्छतं द्वित्रिचतुःपंचकमन्यथा ॥
मासि मासि प्रतिमासं बंधकं विश्वासार्थं यदाधीयते आधिरिति । यावत् बंधकेन सह वर्त्तत इति सबंधकः प्रयोगः तस्मिन् सबं

34

॥९६॥

धके प्रयोगे प्रयुक्तस्य द्रव्यस्याशीतितमो भागो वृद्धिः धर्म्या भवति। अन्यथा बंधकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्वित्रिचतुःपंच
कं शतं धर्म्यं भवति। ब्राह्मणे अधमर्णे द्विकं शतं। क्षत्रिये त्रिकं। वैश्ये चतुष्कं। शूद्रे पंचकं। मासि मासि सैव वृद्धिः त्रयो वा चत्वारो वा पं
च वा द्वित्रिचतुष्पंचाः। अस्मिन् शते वृद्धिर्दृश्यते इति द्वित्रिचतुष्पंचकं। तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते इति कन्।
इयं च वृद्धि[?] मासि मासि गृह्यत इति कालिका। इयमेव वृद्धिः दिवसगणनया विभज्य प्रतिदिनं संगृह्यमाणा कायिका भवति।
तथा च नारदेन। कायिका कालिका चैव कारिता च तथापरा। चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधेत्याद्युक्तं। कायावि[?]रो
धिनी स्वल्पपणाद्यावर्तिका कायिका। प्रतिमासं स्रवंती या वृद्धिः सा कालिका मता। वृद्धिः सा कारिता नाम या ऋणिकेन स्वयं कृता। वृद्धेरपि पु
नर्वृद्धिश्चक्रवृद्धिरुदाहृतेति। [illegible] विशेषाच्छेदः प्रकारांतरेण [illegible]॥ कांतारगास्तु दशकं सामुद्रा विंशकं शतं। कांतारमरण्य
तद्गच्छंतीति कांतारगा ये वणिजो धनं गृहीत्वा अधिकलाभार्थमतिगहनं प्राणधनविनाशशंकास्थानं प्रविशंति॥ ते दशकं शतं
दद्युः। ये च समुद्रगास्ते विंशकं शतं मासि मासि एव। एतदुक्तं भवति। कांतारगेभ्यो दशकं शतं सामुद्रेभ्यो विंशकं उत्तमर्ण आददानः प्य
लधिनाशस्यापि शंकितत्वादिति। इदानीं कारितां वृद्धिमाह। दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु। सर्वे ब्राह्मणादयो ऽधमर्णा अबं
धके सबंधके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्वासु जातिषु दद्युः। क्वचिद्दत्तापि वृद्धिर्भवति। यथाह नारदः। न वृद्धिः प्रीतिदत्तानां स्या
दनाकारिता क्वचित्। अनाकारितमप्यूर्ध्वं वत्सरार्द्धाद्विवर्द्धत इति। यत्तु याचितकं गृहीत्वा देशांतरं गतस्तत्प्रति कात्यायनेनोक्तं। यो याचि
तकमादाय तददत्वा दिशं व्रजेत्। ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयादिति। यश्च याचितकमादाय याचितोप्यदत्वा देशांतरं गतस्तं
प्रति तेनैवोक्तं। कृतोद्धारमदत्वा यो याचितस्तु दिशं व्रजेत्। ऊर्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयादिति। यः पुनः स्वदेश एव स्थितः ए
व याचितो याचितकं न ददाति तं याचनकालादारभ्य वृद्धिं दापयेद्राजा तामाह। स्वदेशेपि स्थितो यस्तु न दद्याद्याचितः क्व
चित्। तं ततोकारितां वृद्धिमनिच्छंतं च दापयेदिति। अनाकारितवृद्धेरपवादो नारदोक्तः। पण्यमूल्यं भृतिन्यासो दंडो यश्च प्र

॥९६॥

॥१८॥

सांप्रतं प्रयुक्तधनस्य ग्रहणे धर्म उच्यते । प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत् । साध्यमानो नृपं गच्छन् दंड्यो दाप्यश्च तद्धनं ।
प्रपन्नमभ्युपगतमधमर्णेन धनं साक्ष्यादिभिर्भावितं वा साधयन् प्रत्याहरन् धर्मादिभिरुपायैरुत्तमर्णो नृपतेर्न वाच्यो
निवारणीयो न भवति । धर्मादयश्चोपाया मनुना दर्शिताः । धर्मेण व्यवहारेण छलेनाचरितेन वा ॥ प्रयुक्तं साधयेद
र्थं पंचमेन बलेन वेति ॥ धर्मप्रीतियुक्तेन सत्यवचनेन व्यवहारेण साक्षिलेख्याद्युपन्यासेन । छलेन उत्सवादिव्याजेन भू
षणादिग्रहणेन । आचरितेन अभोजनेन पंचमेनोपायेन बलेन निगडबंधादिना उपचयार्थं प्रयुक्तं द्रव्यमेतैरुपायै
रात्मसात्कुर्यादिति । प्रपन्नं साधयन्नर्थं न वाच्य इति वदन् अप्रतिपन्नं साधयन् राज्ञा निवारणीय इति दर्शयति । ए
तदेव स्पष्टीकृतं नारदेन । पीडयेद्यो धनी कश्चिद्दणिकं न्यायवादिनं । तस्मादर्थात्स हीयेत तत्समं चाप्नुयाद्दममिति । यस्तु ध
र्मादिरुपायैः प्रपन्नमर्थं साध्यमानो याच्यमानो नृपं गच्छेद्राजानमभिगम्य साधयंतमभियुंक्ते स दंड्यो भवति । शक्त्य
नुसारेण धनिने तद्धनं दाप्यश्च राज्ञा । दापने च प्रकारा दर्शिताः ॥ राजा तु स्वामिने विप्रं सांत्वेनैव प्रदापयेत् । देशाचा
रेण चान्यांस्तु दुष्टान् संपीड्य दापयेत् । रिक्थिनं सुहृदं वापि छलेनैव प्रदापयेत् इति साध्यमानो नृपं गच्छेदित्येतत्स
माचारव्यपेतेनास्येत्युदाहरणं बोध्यव्यं । बहूनां युगपत्प्राप्तेषु एकोधमर्णकः केन क्रमेण दाप्य इत्यपे
क्षित आह ॥ गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः । दत्वा तु ब्राह्मणायैव नृपतेस्तदनंतरं । समानजातीयेषु धनिषु ये
न क्रमेण धनं गृहीतं तेनैव क्रमेण अधमर्णिको दाप्यो राज्ञा । भिन्नजातीयेषु ब्राह्मणादिक्रमेण । यस्तु पुनरुत्तमर्णो दुर्बलः
प्रतिपन्नमर्थं धर्मादिभिरुपायैः साधयितुमशक्नुवन् राज्ञा साधितार्थी भवति तदाधमर्णस्य दंडमुत्तमर्णस्य भृतिदानमाह ।

॥१८॥

राज्ञाधमर्णकोदाप्यः साधितादृशकं शतं। पंचकं चेतु शतं दाप्यः प्राप्तार्थेहिकृतमर्णकः। अधमर्णको राज्ञा प्रतिपन्नार्थत्वात् साधित
दृशकं शतं दाप्यः प्रतिपन्नस्य साधितस्यार्थस्य दशमभंशं राजा धमर्णकाद्दंडरूपेण गृह्णीयादित्यर्थः। उत्तमर्णकस्तु प्रा
प्तार्थः पंचकं शतं भृतिरूपेण दाप्यः साधितस्यार्थस्य विंशतितमं भागं उत्तमर्णाद्राजा भृत्यर्थं गृह्णीयादित्यर्थः। अप्रति
पन्नार्थसाधने तु दंडभागो दर्शितो निन्हवे भावितो दद्याद्दित्यादिना। स धनमधमर्णिकं प्रसक्तमधुना निर्धनमधमर्ण
कं प्रत्याह। हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्। ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयं। ब्राह्मणादिर्जातिरुत्तमर्णो
हीनजातिं क्षत्रियादिजातिं परिक्षीणं निर्द्धनमृणार्थं ऋणनिर्यातनार्थं कर्म स्वजात्यनुरूपं कारयेत्। कुटुंबाविरोधेन। ब्राह्मणः
पुनः परिक्षीणो निर्द्धनः शनैः शनैर्यथोदयं। यथासंभवमर्णं दाप्यः। अत्र हीनजाते ग्रहणं समानजातेरप्युपलक्षणम
तश्च समजातिमपि परिक्षीणं यथोचितं कर्म कारयेत्। ब्राह्मणग्रहणं च श्रेयोजातेरुपलक्षणं तेन क्षत्रियादिरपि परि
क्षीणो वैश्यादेः शनैः शनैर्दाप्यो यथोदयं॥ एतदेव मनुना स्पष्टीकृतं। कर्मणापि समं कुर्याद्धनिकेनाधमर्णिकः। समाप
कृष्टजातिश्च दद्याच्छ्रेयांस्तु तच्छनैरिति। उत्तमर्णेन समं निवर्त्तोत्तमर्णाधमर्णव्यपदेशमात्मानमधमर्णः कर्मणा कुर्यादि
त्यर्थः॥ किंच दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनं। मध्यस्थस्थापितं यस्याद्वर्द्धते न ततः परं। उपचयार्थं प्रयुक्तं धनमध
मर्णेर्दीयमानमुत्तमर्णो वृद्धिलोभाद्यदि न गृह्णाति। तदाधमर्णेन मध्यस्थहस्ते स्थापितं यदि स्यात्तदा ततः स्थापनादूर्द्ध्वं
न वर्द्धते। अस्थापितमपि याच्यमानो न ददाति ततः पूर्ववर्द्धत एव। इदानीं देयम [illegible] पायदाये न त्वदेयं तदाह। अविभक्तैः
कुटुंबार्थे यदृणं तु कृतं भवेत्। दद्युस्तदृक्थिनः प्रेते प्रोषिते वा कुटुंबिनि। अविभक्तैर्बहुभिः कुटुंबार्थमेकेन वा यदृणं कृतं तद्
कुटुंबार्थे यदृणं तु कृतं भवेत्। दद्युस्तदृक्थिनः प्रेते प्रोषिते वा तदृक्थिनः सर्वदृक्थः। येन देयमित्यस्य प्रसक्तदाहरणमाह। न योषित्पतिपुत्राभ्यां न पुत्रेणकृ
णं कुटुंबाद्यात्। तस्मिन्प्रेते प्रोषिते वा तदृक्थिनः सर्वदृक्थः। येन देयमित्यस्य प्रसक्तदाहरणमाह। न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता। पुत्रेणकृतं योषिन्माता न दद्यात्।
तं पिता॥ [illegible] दद्यादृतकुटुंबार्थान्न पतिः स्त्रीकृतं तथा पत्या कृतमृणं योषिद्भार्या नैव दद्यात्।

न॰३

न॰५

न॰२

६४

37

॥१९१॥ स७

तथापुत्रेण कृतं पिता न दद्यात्। तथा भार्याकृतं पतिः कुटुंबार्थादृते इति सर्वविशेषमतश्च कुटुंबार्थं येन केनापि कृतं तन् कुटुंबिना
देयं। तदभावे तद्दाय हरैर्देयमित्युक्तमेव। पुत्रपौत्रैरृणं देयमिति वक्ष्यति तस्यापुरस्तादपवादमाह। सुराकामद्यूतकृ
तं दंडशुल्कावशिष्टकं। वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकं॥ सुरापानेन यत्कृतमृणं कामकृतं स्त्रीव्यसननिवृत्तं द्यूते
पराजय निमित्तं दंडशुल्कयोरवशिष्टं वृथादानं धूर्तबंदि मल्लादिभ्यः प्रतिज्ञातं धूर्ते बंदिनि मल्ले च कुवैद्ये कि
तवे शठे। चाटचारणचौरेषु दत्तं भवति निष्फलमिति स्मरणात्। एतद्दत्तं पित्राकृतं पुत्रादिः शौंडिकादिभ्यो न दद्यात्। अ
वदंडशुल्कावशिष्टकमिति सवशिष्टग्रहणात् सर्वं दातव्यमिति न मंतव्यं। दंडं वा दंडशेषं वा शुल्कं तच्छेषमेव वा। न दातव्यं तु
पुत्रेण यच्च न व्यावहारिकं इत्योशनसस्मरणात्। गौतमेनाप्युक्तं। मद्यशुल्कद्यूतदंडान् पुत्रान् अध्यावहेयुरिति। न पुत्रस्यापवा
दस्य भवतीत्यर्थः। अनेनादेयमृणमुक्तं। न पतिः स्त्रीकृतं तदपेतस्यापवादमाह॥ गोपशौंडिकशैलूषरजकव्याधयोषि
तां। ऋणं दद्यात् पतिस्तासां यस्माद्वृत्तिस्तदाश्रया। गोपो गोपालः। शौंडिकः सुराकारः। शैलूषो नटः। रजको वस्त्राणां र
जकः। व्याधो मृगयुः। एतेषां योषिद्भिर्यदृणं कृतं तत् पतिर्दद्यात्। यस्मात्तेषां वृत्तिर्जीवनं तदाश्रया योषिदधीना। यस्मा
द्वृत्तिस्तदाश्रयेति हेतुव्यपदेशादन्येऽपि योषिदधीनजीवनास्तेऽपि योषित्कृतमृणं दद्युरिति गम्यते। पतिकृतं भार्या न दद्या
दित्यस्यापवादमाह। प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतं। स्वयं कृतमृणं यद्वा नान्यत् स्त्री दातुमर्हति। मुमूर्षुणा प्रव
स्यता वा पत्या नियुक्ता ऋणदाने यत्प्रतिपन्नं तत्पतिकृतमृणं देयं। यच्च पत्या सह भार्ययाऋणं कृतं। तदपि भर्त्रभावे भार्यया अ
पुत्रया देयं। यच्च स्वयमेव कृतं तदृणं तदपि देयं। ननु प्रतिपन्नादि त्रयं स्त्रिया देयमिति न वक्तव्यं संदेहाभावात्। उच्यते भार्यापुत्रश्च दासः
त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छंति यस्य ते तस्य तद्धनमिति वचनात् निर्धनत्वेन प्रतिपन्नादिषु दानाशंकायामिदमुच्यते। प्रतिपन्नं स्त्रिया

त६ ॥१९१॥

38

॥मि॰ग॰॥ ॥श्री॥

५१

यात्रप्रतिपादनपरत्वात्॥ एतच्च विभागप्रकरणे स्पष्टीकरिष्यते॥ ननु स्त्रीधनकर्महीति तदेव तर्हि न वक्तव्यं॥ विधानेनैवान्यत्र
प्रतिषेधसिद्धेः॥ उच्यते॥ प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतमित्येतदपोद्घातार्थमुच्यते॥ अन्यस्तु राजकामादिकन्य
नोपात्तं प्रतिपन्नमपि पत्या सह कृतमपि न देयमिति॥ पुत्रैरपि यद्दातव्यं येन च दातव्यं यत्र काले दातव्यं
तत्त्रितयमाह॥ पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽथवा॥ पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितं॥ पिता यदि द
शवर्षमण मरस्था प्रेतो दूरदेशं गतो चिकित्सनीयव्याध्याद्यभिभूतो वा॥ तदा तत्कृतमृणमवश्यं देयं॥ पुत्रेण पौत्रेण
वा॥ पितृधनाभावेपि॥ पुत्रत्वेन पौत्रत्वेन च॥ तत्र क्रमोप्ययमेव॥ पित्रभावे पुत्रः पुत्राभावे पौत्रः इति॥ पुत्रेण पौ
त्रेण वा निह्नवे ऋणेनार्थिना साक्ष्यादिभिर्भावितमृणं देयं॥ पुत्रपौत्रैरिति स्वरूपः॥ अत्र पितरि प्रोषिते दूरस्थेनावधुक्तो
कालविशेषस्तु नारदेनोक्तो द्रष्टव्यः॥ नार्वाक् संवत्सराद्विंशात् पितरि प्रोषिते सुतः॥ ऋणं दद्यात्पितृव्ये वा ज्येष्ठे भ्रा
तर्यथापि वेति॥ प्रेतेप्यप्राप्तव्यवहारकालो न दद्यात्॥ प्राप्तव्यवहारकाले दद्यात्॥ स च कालस्तेनैव दर्शितः॥ गर्भ
स्थैः सदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः॥ बालस्त्वाषोडशाद्वर्षात् पौगण्डश्चेति शब्द्यते॥ परतो व्यवहारज्ञः स्वतन्त्रः पितरा
वृते॥ यद्यपि पितुर्मरणादूर्ध्वं बालोपि स्वतन्त्रो जातस्तथापि नर्णभाक् भवति॥ यथाह॥ अप्राप्तव्यवहारस्त्वस्व
तन्त्रोपि हि नर्णभाक्॥ स्वातन्त्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतमिति॥ तथा आसेधाह्वाननिषेधश्च प्राप्
ते॥ अप्राप्तव्यवहारस्य कृतो दत्तो न सम्मुखी क्रतौ॥ विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृप इति तस्मात्॥ जातश्च
पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः। ऋणात्पिता मोचनीयो यथा न नरकं व्रजेत्॥ इति पुत्रेण व्यवहारज्ञ तथा
जातेन निष्पन्नेनेति व्याख्येयं॥ क्रोडे तु बालस्याप्यधिकारः॥ न ब्रह्माभिव्याहरयेदन्यत्र स्वधानिनयनादृते इति
स्मरणात्॥ पुत्रपौत्रैरिति बहुवचननिर्देशाद्बहवः पुत्रा यदि विभक्ताः स्वांशानुरूपेण ऋणं दद्युः। अविभ

व्यवहा ८

39

ना५ ना१

॥२०॥

विष्मना २

स्य५

कांश्रे संस्य समुच्चयेन गुणप्रधानभावेन वर्त्तमानां प्रधानभूत एव दद्यादिति गम्यते॥ यथाह नारदः॥ अतऊर्ध्वं पितुः पुत्रा
ऋणं दद्युर्यथांशतः॥ अविभक्ता विभक्ता वा यस्तां चोद्वहते धुरमिति। अत्र च यद्यपि पुत्रपौत्रैर्ऋणं देयमित्यविशेषेणोक्तं तथा
पि पुत्रेण यथा पिता सवृद्धिकं ददाति। तथैव देयं पौत्रेण तु समं तुल्यमेव दातव्यं न वृद्धिरिति विशेषोऽवगंतव्यः॥
ऋणमात्मीयवत्पित्र्यं पुत्रैर्देयं विभावितं॥ पैतामहं समं देयमदेयं तत्सुतस्य तु॥ इति बृहस्पतिवचनात्॥ अत्र
विभावितमिति सविशेषोपादानं साक्षिविभावितमित्र साक्षिग्रहणं प्रमाणोपलक्षणम्॥ समं यावद्गृहीतं तावदेव
देयं न वृद्धिः॥ तत्सुतस्य प्रपौत्रस्यादेयमगृहीतधनस्य। एतच्चोत्तरश्लोके स्पष्टयिष्यते। ऋणापाकरणे न-
न्तीवः पुत्रः पौत्र इति त्रयः कर्त्तारो दर्शिताः तेषां च समवाये क्रमोपि दर्शितः इदानीं कर्त्रंतरसमवाये च क्रम-
माह। रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च। पुत्रोनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः॥ अन्यदीयं द्रव्य-
मन्यस्य क्रियादिव्यतिरेकेण यत्स्वीभवति तद्रिक्थं विभागद्वारेण रिक्थं गृह्णातीति रिक्थग्राहः स ऋणं दाप्यः॥
एतदुक्तं भवति। योऽपुत्रीयं द्रव्यमघरूपेण गृह्णाति स तत्कृतमृणं दाप्यो न चौरादिः। योषितं भार्यां तां गृह्णाती-
ति योषिद्ग्राहः॥ स तथैव दाप्यो यदीयां योषितं यो गृह्णाति स तत्कृतमृणं दाप्यः॥ योषितो विभाज्यद्रव्यत्वे-
न रिक्थव्यपदेशानर्हत्वाद्भेदेन निर्देशः॥ पुत्रश्चानन्याश्रितद्रव्यः ऋणं दाप्यः। अन्यमाश्रितमन्याश्रितं अन्याश्रि-
तं मातृपितृसंबंधि द्रव्यं यस्यासावन्याश्रितद्रव्यः न अन्याश्रितद्रव्यः अनन्याश्रितद्रव्यः पुत्रहीनस्य
रिक्थिन ऋणं दाप्य इति संबंधः। एतेषां समवाये क्रमश्च पाठक्रम एव। आह ऋणं दाप्यस्तदभावे योषि-
द्ग्राहस्तदभावे पुत्र इति॥ नन्वेतेषां समवाय एव नोपपद्यते॥ न भ्रातरो न पितरः पुत्रा रिक्थहरा पितुरि-
ति पुत्रे सत्यन्यस्य रिक्थग्रहणासंभवात्। योषिद्ग्राहोऽपि नोपपद्यते न हि तीयस्य ... स्त्रीणां कश्चिद्गृह्णाती

स२

स्मृ३

॥२०॥

११

परिरक्ष्यत इति स्मरणात् । त[illegible]र्णं पुत्रो दायहरः सएव पुत्रः । पुत्रपौत्रैर्ऋणं देयं इत्युक्तत्वात् । अनन्याश्रितद्रव्य इत्यपि वि
शेषणमप्यनर्थकं ॥ पुत्रे सति द्रव्यस्यान्याश्रयत्वासंभवात् । संभवे च रिक्थग्राही सएव नैव गतार्थत्वात् । पु
त्रहीनस्य रिक्थिन इत्येतदपि न [illegible] वक्तव्यं ॥ पुत्रे सत्यपि रिक्थग्राहणं दायहर इति स्थित [illegible] असति पुत्रे रिक्थग्राही
सुतरां दायहर इति सिद्धमेवेति । अत्रोच्यते । पुत्रे सत्यपि असत्यपि रिक्थग्राही संभवति । क्लीबांधबधिरा
दीनां पुत्रत्वे कुत्रेपि रिक्थहरत्वाभावात् ॥ तथा क्लीबादीननु भर्त्तव्यास्त्व निरंशाका इति वक्ष्यति । तथा सव
र्णो पुत्रोऽप्यन्यायवृत्तो न लभते केषामिति गौतमवचनात् ॥ अतश्च क्लीबादिषु सत्स्वपि अन्यायप्रवृत्ते च
सवर्णे पुत्रे सति रिक्थग्राही पितृव्यतत्सुतादिः यो विहितो होयद्यपि [illegible] विरोधेन न संभवतीत्यपव्यति
क्रांतनिषेधः पूर्वपक्षे उक्त [illegible] र्णापाकरणाधिकारी भवत्येव । यस्मात्तलक्षणं स्वैरिणीनामतिमांग [illegible] ति
यस्य पुनः [illegible] तिलक्षणं प्रथमं । यथाह नारदः ॥ परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमं । पुनर्भूस्त्रिविधा
तासां स्वैरिणी च चतुर्विधा ॥ कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता । पुनर्भूः प्रथमा प्रोक्ता पाणिग्रहण
कर्मणा ॥ देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते । उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्तिता ॥ उत्पन्न
साहसा । उत्पन्नव्यभिचारा । असत्सु देवरेषु स्त्री बांधवैर्या प्रदीयते सवर्णाय सपिंडाय [illegible] तृतीया प्र
कीर्तिता ॥ स्त्री प्रसूता [illegible] प्रसूता वा पत्यावेव तु जीवति । कामात् समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा ॥
कौमारं पतिमुत्सृज्य यात्वन्यं पुरुषं श्रिता ॥ पुनः पत्युर्गृहं यायात् सा द्वितीया प्रकीर्तिता ॥ मृते च भर्त्तरि प्रा
प्तान् देवरादीनपास्य या । उपगच्छेत्परं कामात् सा तृतीया प्रकीर्तिता ॥ प्राप्ता देशाद्धनक्रीता क्षु[illegible] पिपासार्त्ति

न ति
पुर्वा ७
६ च

नर

तानुया॥ तथाह मिस्रूपगमा सानुगुणं स्वरूपिता॥ अंतिमास्वैरिणी नाया प्रथमास्तु पुनर्भुवः। ऋणं तयोः पति
कृतं दद्याद्यस्तामुपासते। तथान्यो पि यो रिक्थग्राह ऋणाभाक् स्त्रीधनं चेत्तेनैव दर्शितः। यानुस्यप्रधनैव स्त्री
स्वापत्या यान्यमाश्रिता॥ सोस्याः दद्याद्दणं भर्तुरुत्सृजेद्वा तथैव तां। प्रकृष्टेन धनेन सह वर्त्तते इति सप्रधना
बहुधना इति। अधनस्य सपुत्रस्य मृतस्योपैति यः स्त्रियं॥ ऋणं वोढुः स भजते सैव चास्य धनं स्मृतं इति
पुत्रस्य पुनर्वचनं क्रमार्थं। अनन्याश्रितद्रव्य इति महत्पुत्रेषु रिक्थाभावे स्त्रीग्रहण योग्यस्यैव एली
पाकरणे धिकारो नाय योग्यस्त्रीं आदेरिसेवमर्थः॥ पुत्रहीनस्य रिक्थिन इत्येतत् पिपुत्रपौत्रहीनस्य प्रपौत्र
स्यो यदि रि[illegible] ग्रहेति तदृणं तत्संपानाम्यथैव मर्थः॥ पुत्रपौत्रौ तु रिक्थग्रहणाभावेपि दाप्यौ। इत्युक्तं
यथाह नारदः॥ क्रमादव्याहतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतं॥ दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्तते। इति स
र्वे निरवद्यं। यद्यपि रिक्थाभावे तु पुत्रो दाप्य इत्युक्तं। पुत्राभावे यो रिक्थग्राही स दाप्य इत्युच्यते। पुत्रहीनस्य
रिक्थिन इति। रिक्थग्राहेन योपि देवोच्यते॥ सैव चास्य धनं स्मृता मिति स्मरणात्॥ योपस्य हरते दारान्
स तस्य हरते धनं इति च। ननु येपि रिक्थाभावे पुत्र ऋणं दाप्यः पुत्राभावे यो रिक्थग्राह इति परस्परविरुद्धं
उभयसद्भावेन कश्चिद्दाप्य इति नैष दोषः। अंतिस्वैरिणीग्राहिण : प्रथमपुनर्भूग्राहिणः सप्रधनस्त्री
हारिणश्चाभावे पुत्रो दाप्यः पुत्राभावे तु निर्धननिस्पृहयो यो रिक्थग्राही दाप्य इति। एतदेवाह नारदः॥
नस्त्रीहारि[illegible] पुत्राणामृणभाग्यो धनं हरेत्। पुत्रोसतोः स्त्रीधनि[illegible] नोः स्त्रीहारी धनिपुत्रयोः। ध
नस्त्रीहारिपुत्राणां समवाये यो धनं हरेत्स ऋणभाक्। स्त्रीधनिनोः स्त्री च धनं च स्त्रीयत्नेते विद्वे

म४

ध२

र्वे

तेषयोरसतोः स्त्रीधनिनोस्तयोः स्त्रीधनिनोरसतोः पुत्र एव ऋणभाक्। धनिपुत्रयोरसतोः स्त्रीहार्येव ऋणभाक्॥
स्त्रीहार्यभावे पुत्र ऋणभाक्। पुत्राभावे स्त्रीहार्यभावे च धनी ऋणभाक्। पुत्राभावे स्त्रीहारीति विशेषप्रति
भासः परिहृतः। पूर्ववत् पुत्रहीनस्य ऋक्थिन इत्यस्याप्यन्याख्या॥ एते च न स्त्रीहारिपुत्राः ऋणं कस्य दाप्या
इत्यपेक्षायां उत्तमर्णस्य दाप्याः॥ तदभावे तत्पुत्रादेः। पुत्राद्यभावे कस्य दाप्या इत्याद्यपेक्षायां इदमुप
तिष्ठते॥ पुत्रहीनस्य ऋक्थिन इति पुत्राद्यन्वयहीनस्योत्तमर्णस्य यः ऋक्थी ऋक्थग्रहणयोग्यः सपिण्डादि
स्तस्य ऋक्थिनो दाप्याः। तथा च नारदेन ब्राह्मणस्य त्वयं देयं सान्वयस्य न चास्ति चेत्। निर्वपेत्तत्सकुल्ये
षु तदभावेस्य बन्धुषु इत्यभिधायाभिहितं यदा तु न सकुल्याः स्युर्न च संबन्धिबान्धवाः। तदा दद्याद्द्विजेभ्य
स्तु तेष्वसत्स्वप्सु निक्षिपेत्॥ अधुना पुरुषविशेषेण गु णग्रहणं प्रतिषेधयन् प्रसंगादन्यदपि प्रतिषेध
ति। भ्रातृणामथ दंपत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतं॥ प्रतिभुवो भावः
प्रातिभाव्यं। भ्रातृणां दंपत्योः पितापुत्रयोश्चाविभक्ते द्रव्ये द्रव्यविभागात् प्राक् प्रातिभाव्यमृणं साक्ष्यं
न चेत् स्मृतं॥ मन्वादिभिरपि प्रतिषिद्धं साधार णधनत्वात्॥ प्रातिभाव्यसाक्षित्वयोः पक्षे द्रव्यव्ययावस्य
न त्वात्॥ ऋणस्य चावश्यप्रतिदेयत्वात्। एतच्च परस्परानुमति व्यतिरेकेण परस्परानुमत्या अविभक्ताना
मपि प्रातिभाव्यादिषु भवत्येव। विभागादूर्ध्वं परस्परानुमति व्यतिरेकेणापि भवति। ननु दंपत्योर्विभागा
त् प्राक् प्रातिभाव्यादिप्रतिषेधो न युज्यते। तयोर्विभागाभावेन विशेषणानर्थक्यात् विभागाभावश्चाप
स्तंबेन दर्शितः। जायापत्योर्न विभागो विद्यत इति स्मृत्यौ। तस्मात् प्रातिभाव्यादिषु कर्मसु तत्फलेषु
च विभागाभावो न पुनः कर्मसु द्रव्येषु वा। तथा हि जायापत्योर्न विभागो विद्यत इत्युक्त्वा दिभिर्तिन विद्ये

सर्वं

43

निरपेक्षायां हेतुमुक्तवान्। पातिव्रत्यं सहत्वं कर्मसु तथा पुण्यफलेषु चेति। हि यस्मात् साहित्यमह
दारभ्य कर्मसु सहत्वं श्रूयते जायापती अग्नीनादधीयातामिति। तस्मादाधाने सहाधिकारस्तालोभा
धानसिद्धाग्निसाध्येषु कर्मसु सहाधिकारः। तथा धर्मस्यार्थे विवाहात् मो इत्यादिस्मरणात् विवाहसिद्धा
ग्निसाध्येष्वपि कर्मसु सहाधिकार एव। अतश्चोभयविधाग्निनिरपेक्षेषु कर्मसु पूर्तेषु जायापत्योः पृथगे
वाधिकारः संपद्यते तथा पुण्यफलेषु स्वर्गादिषु जायापत्योः सहैक्यमतो दिवि ज्योतिरजरमारम्भेतामि
त्यादिषु पुण्यकर्मसु सहाधिकारस्तत्फलेषु सहत्वमिति बोद्धव्यं॥ न पुनः पूर्तानां भर्त्रननुज्ञया अनुष्ठिता
नां फलेष्वपि न तु द्रव्यस्वामित्वेऽपि सहत्वमुक्तं द्रव्यपरिग्रहेषु च॥ नहि भर्तुर्विप्रवासे नैमित्तिके दानं स्तेय
मुपदिशन्तीति॥ स्वयं द्रव्यस्वामित्वं पत्न्या दर्शितं अनेन न पुनर्विभागाभावः॥ यस्माद्द्रव्यपरिग्रहेषु च
सहत्वं तत्र कारणमुक्तं। भर्तुर्विप्रवासे नैमित्तिके वश्यकर्तव्ये दानेतिथिभोजनभिक्षाप्रदाना
दिषु स्मान्न स्तेयमुपदिशन्तीति मन्वादयस्तस्माद्भार्याया अपि द्रव्यस्वामित्वमस्ति॥ अन्यथा स्तेयं स्या
दिति। तस्माद्भर्तुरिव भार्याया अपि द्रव्यविभागो भवत्येव। न त्वेवं कुर्यात् यथा वक्ष्यति यदि कुर्यात् समा
न्यगुणसमांशाः कार्याः॥ ॥ अधुना प्रातिभाव्यं निरूपयितुमाह। दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते॥
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि। प्रातिभाव्यं नाम विश्वासार्थं पुरुषान्तरेण समयः॥ तच्च
विषयभेदात्त्रिधाभिधीयते॥ यथा दर्शने दर्शनापेक्षायामेनं दर्शयिष्यामि प्रत्यये विश्वासेन तस्य स
चिनास्य धनं त्वत्प्रयुक्तं नायं वञ्चयिष्यते ... यतोऽमुकस्य
पुत्रोयमुर्वरा प्रायोऽस्य ग्रामवरोऽस्तीति। दाने यद्ययं न ददाति तदाहमेव दास्यामीति प्रा

समांशकाः ५

पु ६ · तू ८ · तं ५

44

मि ७

ति भाव्यं विधीयत इति प्रसंगात् संबंधः। आद्यौ दर्शनप्रत्ययप्रतिभुवौ वितथे अन्यथाभावे दर्शने विश्वासे च व्यभि
चारे च तयोः राज्ञा प्रस्तुतं धनमुत्तमर्णस्य। इतरस्य तु सुतेन प्रतिभुवः सुता अपि दाप्याः। वितथ इत्येवं दान
न निर्धनत्वेन नाधमर्णं प्रति कुर्वीति॥ इतरस्य सुता अपि बद्धाः पूर्वयोः सुता न दाप्या इत्युक्तं। सुता इति वदता
न पौत्रा दाप्या इति दर्शितं॥ एतदेव स्पष्टीकर्तुमाह॥ दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा। न तत्सुता ऋणं
दद्युर्दद्युर्दानाय ये स्थिताः॥ यदा दर्शनप्रतिभूः प्रात्ययिको वा प्रतिभूर्दिष्टं गतः। तदा तयोः पुत्राः प्रातिभा
व्यायातं पैतृकमृणं न दद्युः। यस्तु दानाय स्थितः प्रतिभूर्दिष्टं गतः तस्य पुत्रा दद्युर्न पौत्रा ते च मूल्यमेव दद्युर्न
वृद्धिः। ऋणं पैतामहं पौत्रः प्रातिभाव्यागतं सुतः। समं दद्यात्तत्सुतौ न दाप्याविति निश्चयः। इति व्यासवचनात्

ति ७

प्रातिभाव्यव्यतिरिक्तं पैतामहमृणं पौत्रः समं यावद्गृहीतं तावदेव दद्यात् न वृद्धिं। तथा सुतोऽपि प्रातिभाव्यागतं पित्र्यमृणं
सममेव दद्यात्॥ तयोः पौत्रपुत्रयोः सुतौ प्रपौत्रपौत्रौ प्रातिभाव्यायातं ऋणं यथाक्रमं गृहीतधनौ न दाप्याविति॥ य
त्त्वारको वित्तहीनः स्याल्लग्नको वित्तवान् यदि। मूलं तस्य भवेद्देयं न वृद्धिं दातुमर्हति॥ तदपि लग्नकः प्रतिभूः
स्वारको ऽधमर्णिकः। लग्नको यदि वित्तवान् मृतः तस्य पुत्रेण मूल्यमेव दातव्यं न वृद्धिरिति व्याख्येयं॥ यत्र दर्शनप्रतिभूः
प्रत्ययप्रतिभूर्वा बंधकं पर्याप्तं गृहीत्वा प्रतिभूर्जातः। तत्र तत्सुता अपि तस्मादेव बंधकात् प्रातिभाव्यायातमृ
णं दद्युरेव॥ यथाह कात्यायनः। गृहीत्वा बंधकं यत्र दर्शनेऽस्य स्थितो भवेत्। विना पित्रा धनात्तस्मात् दाप्यः
स्यात्तद्धनं सुतः। इति दर्शनग्रहणं प्रत्ययस्योपलक्षणं॥ विना पित्रा पितरि प्रेते दूरदेशं गते वेति॥ यस्मिन् ऋणे प्राति
भाव्ये बहवः तत्र कथं दातव्यमित्याह॥ ५५॥ बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम्॥ एकच्छायाश्रितेषु धनिक
स्य यथारुचि॥ यद्येकस्मिन् प्रयोगे द्वौ बहवो वा प्रतिभुवस्तदा ऋणं विभज्य स्वांशेन दद्युः॥ एकच्छायाश्रितेषु एकस्या

॥२३॥

२०॥

अधमर्णस्य छायासादृश्येनामात्रिताः एकच्छायाश्रिताः॥ अधमर्णो यथा द्रव्यदानायस्थित [illegible] स्तथा तत्प्रतिभुवोपि ये
स्मिन् क्षणे दानाय स्थिताः एवं दर्शने प्रत्यये च [illegible] ते एकच्छायाश्रितेषु प्रतिभूषु सत्सु प्रतिभूस्य [illegible] कृत्यमर्णस्य यथा रुचि तथा
कामं। अन्यतमं धनिको वित्ताप्येक्षयार्थं यं प्रार्थयते स एव कृत्स्नं दद्यात्॥ एकच्छायाश्रितेषु यदि कश्चिद् देशान्तरं गतस्तत्पुत्र-
स्य सन्निहितस्तदा धनिकेच्छया सर्वं दाप्यः॥ मृते तु कस्मिंश्चित् [illegible] स्वपितृत्राणवत् इत्यर्थं दाप्यः॥ यथाह कात्यायनः॥ एकच्छाया-
प्रतिष्ठानो दाप्येव स्वात्रेव इष्यते॥ प्रोषिते तु हेतुतः सर्वे पितृभ्यं तु मृते तु सशति॥ ४५॥ प्रातिभाव्येण दानविधिमुक्त्वा प्रतिभू-
तस्य प्रतिक्रियाविधिमाह॥ प्रतिभूर्दापितो यत्तु प्रकाशं धनिनो धनं। द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत्॥ यद्-
णं प्रतिभूस्तत्सुतो वा धनिकेनोपपीडितः प्रकाशं सर्वजनसमक्षं यद्धनं धनिनो दापितो न पुनर्द्वैगुण्यक्रमेण स्व-
यमुपेत्य दत्तं॥ यथाह नारदः॥ यं चार्थं प्रतिभूर्दद्याद् धनिकेनोपपीडितः॥ ऋणिकं तत्प्रतिभूर्द्विगुणं प्रतिदापयेदिति॥
ऋणिकैरधमर्णैस्तस्य प्रतिभुवस्तद्द्रव्यं द्विगुणं प्रतिदातव्यं स्यात्॥ तच्च कालविशेषमनपेक्ष्य सद्य एव द्विगुणं दातव्यं॥
वचनारंभसामर्थ्यात्॥ एतच्च हिरण्यविषयं॥ न चेदं वचनं द्वैगुण्यमात्रं प्रतिपादयतीति तत्पूर्वोक्तकालक्रमला-
क्रमाबाधेनापि उपपद्यते॥ यथा जातेष्टिविधानं शुचित्वाबाधेन॥ अपि च॥ सद्यः सवृद्धिकदानपक्षे पशुस्त्रीणां संघ-
संतत्यभावात् मूल्यदानमेव प्राप्नोतीति। तदसत्॥ वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणपरमत्वे नैव कालक-
क्रमेण द्वैगुण्यादिसिद्धेः द्वैगुण्यमात्रविधानं इदं वचनमनर्थकं स्यात्॥ पशुस्त्रीणां तु कालक्रमपक्षेपि संतत्यभावे स्वरू-
पदानमेव॥ यदा प्रातिभाव्ये द्रव्यदानानंतरं कियता कालेनाधमर्णे न संघटेत। तदा संततिरपि संभवत्येव॥ यद्यपूर्व-
सिद्धसंततया सह पशुस्त्रियो दास्यतीति न किंचिदेवतत्॥ अथ प्रातिभाव्यप्रीतिकृतमन्यप्रतिभुवा दत्तं प्रीतिद

या ३

वि ८

॥२३॥

46

त्नमेव॥ न च प्रीतिदत्तस्य याचनाभावान् वृद्धिरस्तीति॥ यथाह॥ प्रीतिदत्तं न वर्धेत यावन्न प्रतियाचितं॥ याच्यमानमदत्तं चेद्वर्धते पंचकं
शतमिति॥ अतश्चास्य प्रीतिदत्तस्य याच्ञितस्यापि दानदिवसादारभ्य यावद्द्विगुणं कालक्रमेण वृद्धिरिति सेनेन वचनेनोच्य-
त इति न दृष्यमसत्॥ अस्यार्थस्यास्माद्वचनादप्रतीतेः द्विगुणं प्रतिदातव्यमित्येतावदिह प्रतीयते॥ तस्मात्कालक्रममनपेक्ष्यै-
व द्विगुणं प्रतिदातव्यं वचनारंभसामर्थ्यादिति सुष्ठूक्तं॥ ५४॥ प्रतिभूरसत्यस्य सर्वत्र द्वैगुण्यप्राप्तेः पवादमाह॥ संततिस्त्री पशू-
ष्वेव धान्यं त्रिगुणमेव च॥ वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणस्तथा॥ हिरण्ये द्वैगुण्यवचनात् नारदेनैव स्त्रीपश्वादयः
प्रतिपादितव्याख्याताः॥ श्लोकस्तु व्याख्यात एव॥ यस्य द्रव्यस्य यावती वृद्धिः परा काष्ठोक्ता तद्द्रव्यं प्रतिभूरदत्तं स्वादकेन तया
वृद्ध्या सह कालविशेषमनपेक्ष्य दातव्यमिति तात्पर्यार्थः॥ यदा तु दर्शनप्रतिभूः संप्रतिपन्ने काले धमर्णं दर्शयितुमस-
मर्थः स्तत्पुत्रश्चान्वेषणाय तस्य पक्षत्रयं दातव्यम्॥ तत्र यदि दर्शयति तदा मोक्तव्यो न्यथा प्रस्तुतं धनं दाप्यः॥ न चास्या-
न्वेषणार्थं तु दाप्यपक्षत्रयं परं पक्षसो दर्शये तत्र मोक्तव्यः प्रतिभूर्भवेत्॥ कालेव्यतीते प्रतिभूर्यदि तं नैव दर्शयेत् नि-
बंधं दापयेत्तं तु प्रेते चैष विधिः स्मृत इति कात्यायनवचनात्॥ लग्नकविशेषे निषेधमाह नैवउक्तः॥ न स्वामी न च
शत्रुः स्वामिनाधिकृ नस्तथा॥ निरुद्धो दंडितश्चैव संदिग्धश्चैव न क्वचित्॥ नैव रिक्थी न मित्रं च न चैवा-
त्यंतवासिनः॥ राजकार्यनियुक्तश्च ये च प्रव्रजिता नराः॥ नाशक्तो धनिने दातुं दंडं राज्ञे तु तत्समं॥ नाविज्ञातो ग्रही-
तव्यः प्रतिभूः स्वक्रियां प्रतीति॥ संदिग्धोभिशस्तः अस्वतंत्रास्तिनो नैष्ठिक ब्रह्मचारिप्रभृति प्रतिभूविधिः॥
वीर धनप्रयोगे विश्वासहेतुः प्रतिभूराधिश्च॥ यथाह नारदः॥ विश्रंभहेतू द्वावत्र प्रतिभूराधिरेव च इति॥ तत्र प्रतिभूर्नि-
रूपितः दानीमाधिर्निरूप्यते॥ आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थं मधमर्णेन तु उत्तमर्णेन गृह्यते॥

विज्ञा०

॥२४॥

आधीयत इत्याधिः स च द्विविधः कृतकालोऽकृतकालश्च पुनरेकैकशो द्विविधः गोप्यो भोग्यश्च यथाह नारदः अधिक्रियत इ-
त्याधिः स विज्ञेयो द्विलक्षणः। कृतकालोपनेयश्च यावद्देयोद्यतस्तथा॥ स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव चेति।
कृतकाल आधानकाल एवामुष्मिन्काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते काले
उपनेयः आसमीपं नेतव्यो मोचनीय इत्यर्थः देयं दानं देयमनतिक्रम्य यावद्देयमुद्यतो नियतः स्थापित इत्यर्थः॥
यावद्देयमुद्यतो यावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः॥ गोप्यो रक्षणीयः॥ एवं चतुर्वि-
धस्याप्याधेर्विशेषमाह। आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते॥ काले कालकृतो नश्येत्फलभोग्यो न नश्यति॥ गु-
प्तधने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन न मोक्ष्यते। न तदा नश्यत्युत्तमर्णस्य
न प्रयोक्तुः स्वं भवति कालकृतः कृतकालः आहितान्याहिद्विगुणात्प्राक्कालः तस्य एव निपातनं। सकुकाले निरूपिते प्राप्ते न
रूपते। द्विगुणे प्राप्ते ऽर्ध्वं वा। फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः॥ क्षेत्रारामादिः स न कदाचिदपि न नश्यति।
कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाशमुक्त्वा काले कालकृतो न नश्येदिति अकृतकालस्य भोग्यस्य न-
शाभावमुक्तः फलभोग्यो न नश्यतीति। याज्ञवल्क्याधिः प्रणश्येद्द्वि सेत्रारकृतकालो गोप्याधिर्विषयमवति
ष्ठेव। द्विगुणप्रातिक्रमेण निरूपितकालातिक्रमे पञ्चविंशतिरात्रं चतुर्दशदिवसप्रतीक्षणं कर्तव्यं। बृहस्पतिवच-
नात्॥ हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधौ। बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च॥ तदन्तरा धनं दत्त्वा
ऋणी बन्धमवाप्नुयात् इति। नन्वाधिः प्रणश्येदित्ययुक्तं॥ अधमर्णस्य स्वत्वनिवृत्तिहेतोर्दानवि-
क्रयादेरभावात्। उत्तमर्णस्य च स्वत्वहेतोः प्रतिग्रहक्रयादेरभावात्॥ मनुवचनविरोधाच्च। न चाधिः कालसं

॥२४॥

48

रोधान्निसर्गोऽस्ति न विक्रय इति॥ कालेन संरोधः कालसंरोधश्चिरकालमवस्थानं॥ तस्मात्कालसंरोधाच्चिरकालाव
स्थानादाधेर्न निसर्गोऽस्ति॥ नाप्यत्राधीकरणमस्ति॥ न च विक्रयो वा आधीकरणं विक्रयप्रतिषेधाद्धनिनः
स्वत्वाभावो वगम्यत इत्युच्यते॥ आधीकरणमेव लोके कारणं साधनाव्यापकत्वे सति साध्यसमव्याप्तिरूपाधिस्व
त्वे निश्चितहेतुः॥ आधिरखंडस्य सोपाधिके स्वत्वोत्पत्तिहेतुः प्रसिद्धः तत्र धनद्वैगुण्ये निरूपितकालप्राप्तौ
च द्रव्यदानस्यासंतनिवर्तनेनेन वचनेनाधमर्णिकस्यां सति दीर्घस्वत्वनिवृत्तिरुत्तमर्णस्य चात्यंतिकस्वत्वं भव
ति। न च मनुवचनविरोधः। यत्नेनैवाधौ सोपकारे सौदोयं वृद्धिमाप्नुयादिति भोग्याधिं प्रस्तुत्येदमुच्यते।
न चाधेः कालसंरोधान्निसर्गोऽस्ति न वि क्रय इति भोग्यस्याधेश्चिरतरकालावस्थानेऽप्याधीकरण
विक्रयनिषेधेन धनिनः स्वत्वं नास्तीति। इहाप्युक्तं फलभोग्यो न नश्यति वै गोप्याधौ तु पद्यगारथ्यं
मनुना। न भोक्तव्यो बलादाधिर्भुंजानो वृद्धिमुत्सृजेदिति॥ इहापि वक्ष्यते॥ गोप्याधिभोगे नो वृद्धिरिति॥
आधिः प्रणश्येद्द्विगुण इति तु गोप्याधिं प्रस्तुत्य तदिति समविरुद्धं॥ [illegible]॥ किंच॥ गोप्याधिभोगे नो वृद्धिः सो
पकारे ध हापिते। न ष्टो देयो विनष्टश्च देवराजहृता दृते। गोप्याधेस्ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति॥ अ
ल्पेष्युपभोगे महत्यपि वृद्धिर्हातव्या॥ समयातिक्रमात्॥ तथा सोपकारे उपकारिणि बलीवर्दताम्रकटाहादेर्गो
प्याधौ सवृद्धिके हापिते हानिं व्यवहाराक्षमत्वं गमिते नो वृद्धिरिति संबंधः॥ न ष्टो विलनिंगत ताम्रकटाहादिः
छिद्रमेदनादिना एव व कर्तव्यादेयः॥ तत्र गोप्याधिर्नष्ट [illegible] तु पूर्ववत्कर्तव्या देयः॥ उपभुक्तोऽपि वृद्धिरहि
तत्वो गोप्याधिर्यदि नष्टस्तदा पूर्ववत्कृत्वा देयो वृद्धिसक्रांते वृद्धिर्वा हातव्या॥ विनष्टश्चात्यंतिकं नाशं प्राप्तः॥

त २

सापिदेयो मूल्यादि हरेण। तद्दोषेण तद्धाने सवृद्धिकं मूल्यं लभेत॥ यदि न दद्यात्॥ तदा मूलनाशः॥ विनष्टे मूल्यनाशः स्यात् देवराजस्य
नाहनइति नारदवचनात् देवराजकृता हेतो। देवमनुष्योपप्लवादि। देवकृता ह्निमाइम। छिन्नो नियत्वाच्चापरा धरहिता
राजकृताः॥ देवराजकृते तु विनाशो सवृद्धिकं मूल्यं दातव्यमधमर्णेनाधिं तरेत्॥ यथा स्रोतसापहृते तत्क्षे
त्रे राजा चैवापहारिते॥ आधिरन्योधमर्णैर्वाप्यो देयं वा धनिने धनमिति॥ नन्वत्स्रोतसापहृत इति दैवकृतोपलक्षणम्
अपि च। आधेः स्वीकरणात्सिद्धी रक्ष्यमाणोप्यसारतां॥ यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत्॥ आधेर्गो
प्यस्य भोग्यस्य च स्वीकरणादुपभोगात् आधिग्रहणसिद्धिर्न साक्षिलेख्यमात्रेण नाप्युपदेशमात्रेण॥ यथाह ना
रदः॥ आधिस्तु द्विविधः प्रोक्तो जंगमः स्थावरस्तथा॥ सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथेति॥ अस्य च
फलमाधौ प्रति ग्रहे क्रीते पूर्वा तु बलवत्तरेति॥ या स्वीकारान्ता क्रिया सा पूर्वा बलवती स्वीकाररहिता तु पूर्वापि
न बलवती स चाधिः प्रयत्नेन रक्ष्यमाणोपि कालवशेन यद्यसारतामविकृत एव सवृद्धिकमूल्यद्रव्यापर्याप्त
तां गतस्तदाधिरन्यः कर्तव्यो धनिने वा धनं देयं॥ रक्ष्यमाणोप्यसारतामिति वदताधिः प्रयत्नेन रक्षणीयो
धनिनेति ज्ञापितं। आधिः प्रणष्टोपि द्विगुणः स्यादित्यपवादमाह॥ चरित्रं बंधकृतं सवृध्या दापयेद्धनम्॥ सत्य
कारकृतं द्रव्यं द्विगुणं प्रतिपादयेत्॥ चरित्रं शोभनचरित्रं चरित्रेण बंधकं चरित्रबंधकं तेन यद्द्रव्यमात्मसात्कृ
तं पराधीनं वा हितम्॥ एतदुक्तं भवति धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमल्पमूल्यात्कृ
मेव द्रव्यमौल्यात्कृतम्॥ यदि वाधमर्णस्य स्वच्छाशयत्वेनाल्पमूल्यमाधिं कृत्वा बहुद्रव्यमेव धनिनाधमर्णाय
धीनं कृतमिति॥ तद्धनं सवृद्धिकं नपोरध्या सत्यकारपयेदयमाशयः॥ एवं रूपे बंधके द्विगुणीभूते दिद्रव्येन नश्यन्

क५

सम०२

१२५

50

द्वि३

तिकिं तु द्रव्यमेव द्विगुणं दातव्यमिति॥ तथा सत्संकारकृतं करणं कारो भावे घञ् सस्य कारः सत्संकारः॥ सारेस्त्या गद्
स्येति सुं॥ सत्संकारेण कृतं सत्संकारकृतं॥ अयमभिसंधिः॥ यदा बंधकार्पणसमय एव वृद्धं परिभाषितं द्विगुणीभूते
पि द्रव्यमर्णगुणं द्रव्यमेव दातव्यं नाधिनाश इति तदा तद्विगुणं दापयेदिति॥ अन्योर्थः चरित्रमेव बंधकं चरित्र
बंधकं चरित्रबंधकेन गंगास्नानाग्निहोत्रादिजनितापूर्वमुच्यते॥ यत्र तदेवाधी कृत्य यद्द्रव्यमात्तं सात्कृतं तत्र तदे
व द्विगुणीभूतं दातव्यं॥ नाधिनाश इति॥ आधिप्रसंगादन्यदुच्यते॥ सत्संकारकृतमिति॥ क्रयविक्रयादिव्यवस्था
निर्वाहाय परं गुलीयकादि परहस्ते कृतं न मयव्यवस्थातिक्रमे द्विगुणं दातव्यं॥ तत्रापि येनांगुलीयादर्पितं सएव चेद्व्यवस्था
तिवर्तीतेन तदेव हातव्यं॥ इतरश्चेद्व्यवस्थातिवर्ती तदा तदेवांगुलीयकादि द्विगुणं प्रतिपादयेदिति॥ ॥छ॥ किंच॥ उपस्थितस्य
मोक्तव्य आधिस्तेनो न्यथा भवेत्॥ प्रयोजकेसति धनं कुले नास्याधिमाप्नुयात्॥ धनदानेनाधिमोक्षणाय उपस्थितस्य
आधिर्मोक्तव्यो धनिना न चेद्विलोभेन स्थापयितव्यः॥ अन्यथा अमोक्षणे स्तेनचोरवद्दंड्यो भवेत्॥ असन्निहितेतुन
प्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधायाधमर्णः स्वीयं बंधकं गृह्णीयात्॥ अथ प्रयोक्ता परासन्निहितः तद
ताश्च धनस्य ग्रहीतारो न संति यदि वा सन्निहिते प्रयोक्तरि आधिविक्रयेण धनदित्साधमर्णस्य तत्र किं कर्तव्य
मित्यपेक्षित आह॥ तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः॥ तस्मिन्काले यत्तत् [illegible] स्याधेर्मूल्यं तत्परिकल्प्य तत्रैव
निर्णीतमाधिं वृद्धिरहितं स्थापयेत् ततः [illegible] द्धतैयावद्धनं नैगृहीत्वा तमाधिं मुंचति यावद्धनं तन्मू
ल्य द्रव्यमधमर्णो प्रवेतु यो दाति॥ यदा तु द्विगुणीभूतेपि धने द्विगुणं धनमेव ग्रहीतव्यम् नत्वाधिनाश इ

ति विचारितम् ऋणग्रहणकालादूर्ध्वं तदा द्विगुणीभूते द्रव्ये संनिहिते वा धमर्णे धनिना आधिः कर्तव्य इति स्मृतं भागः ॥ ६१ ॥ विना धारणकाद्वापि
विक्रीणीत ससाक्षिकं । धारणकाद् धमर्णाद् विना धमर्णे असंनिहिते साक्षिभिस्तत्सदैर्वा सह तमाधिं विक्रीय स्वं गृह्णीयाद्धनी ॥ ना
शाद्वेदय नास्ति न विकल्पार्थः यदृणं ग्रहणकाले द्विगुणीभूते पि धने धनमेव गृहीतं वा आधिना अस्त्विति न विचारितं ॥ तदाधिः
प्रणश्येद्द्विगुणे ... आधिनाशो विचारिते स्वयं परस इति ॥ भोग्याधौ विशेषमाह ॥ यदा तु द्विगुणीभूतमृणमाधौ तत्पुनरुच्यते ॥
मोक्षमाधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ॥ यदा प्रयुक्तं धनं स्वकृतया वृद्ध्या द्विगुणीभूतं तदाधौ कृतं तदुत्पन्ने द्रव्ये
द्विगुणे धनिनः प्रविष्टे आधिर्मोक्तव्यः ॥ यदि वा आधौ दत्ते द्विगुणीभूते द्रव्ये स आधिर्मोक्तव्य इति भाष्यकार
णांतरे । भोग्याभावे न यद्वा द्विगुणीभूतमृणं तदाधौ भोग्यार्थं ... विप्रविष्टे तत्समुत्पन्ने द्रव्ये द्विगुणे समस्ताधिर्मो
क्तव्यः ॥ अधिकोपभोगेन तदपि देयं सर्वथा सवृद्धिकमूल्यापाकरणार्थोपभोगविषयमिदं वचनं । तेन मेवं
क्षयाधिमाच सतो लौकिकाः ॥ यत्र तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा । तत्र द्विगुण्यातिक्रमे पि यावन्मूल्यदानं
तावदुपभुंक्त एवाधिं ॥ एतदेव स्पष्टीकृतं बृहस्पतिना ॥ धाविष्टमूल्ये धनिनि ऋणी बंधमवाप्नुयात् ॥ फलभोग्यं पूर्णका
लं दत्त्वा द्रव्यं च सामकं ॥ यदि प्रकर्षितं तस्मात्तदा न धनभाग्धनी । ऋणी च न लभेद्बंधं परस्परमते स्थिते ॥ अस्यार्थः
फलं भोग्यं यस्यासौ फलभोग्यो बंधः आधिः स च द्विविधः ॥ सवृद्धिमूल्यापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च ॥ त
त्र सवृद्धिमूल्यापाकरणार्थं बंधं पूर्णकालं पूर्णः कालो यस्य सो पूर्णकालः ॥ तमाप्नुयादृणी । यदा सवृद्धिकं मूल्यं फलद्वा
रेण धनिनः प्रविष्टं तदा बंधमवाप्नुयादित्यर्थः । वृद्धिमात्रापाकरणार्थं तु बंधं सामकं दत्त्वाप्नुयादृणी समं मूल्यं सममेव

सामकं ॥ अस्यापवादमाह ॥ यदि प्रकर्षितं न स्यात् ॥ तद्बंधकं प्रकर्षितं अतिशायितं वृद्धेरभ्यधिकं मूलं यदि स्यात्तदा नश्य
न धारयेत् ॥ सा मर्वं न लभेत धनी मूल्यमस्यैव ऋणी बंधमाप्नुयादिति यावत् ॥ अथ चेत् प्रकर्षितं तद्बंधकं वृद्ध्येध
वर्धितं तदा सामकं दत्त्वापि बंधं न लभेताधमर्णः ॥ वृद्धिशेषमपि दत्त्वैव लभेते सर्वः ॥ पुनरुक्तप्रपत्रापवादमाह ॥ परस्प
रमतं विना । उत्तमर्णाधमर्णयोः परस्परानुमतस्य भावे यदि प्रकर्षितमपि सारवत्कं परस्परानुमतौ तु तत्कृष्टमपि
बंधकं मायत्र मूल्यदानमुपभुंक्ते धनिनि निकृष्टमपि मूल्यमात्रे दाने नैवाप्यमर्णो लभत इति ॥६४॥ ॥ इति ऋणादा
नप्रकरणं ॥ ॥ अथोपनिधिं प्रस्तौति ॥ वासनस्थमनाख्याय हस्तेन्यस्य यदर्प्यते ॥ द्रव्यं तदौपनिधिकं प्रतिदेयं त
थैव तत् ॥ निक्षेप्य द्रव्यस्याधारभूतं द्रव्यान्तरं वासनं करंडादि तत्स्थं वासनस्थं यद्द्रव्यं रूपसंख्यादिविशेषमना
ख्यायाकथयित्वा मुद्रितमन्यस्य हस्ते रक्षणार्थं विश्रंभादर्प्यते स्थाप्यते ॥ तद्द्रव्यमौपनिधिकमुच्यते ॥ यथाह ना
रदः ॥ असंख्यातमविज्ञातं समुद्रं यन्निधीयते ॥ तज्जानीयादुपनिधिं निक्षेपं गणितं विदुरिति ॥ प्रतिदेयं तथैव तत् ॥
यस्मिन्नस्थापितं यथैव सर्वं मुद्रादिचिह्नितं अर्पितं तथैव स्थापकाय प्रतिदेयं प्रत्यर्पणीयं ॥ प्रतिदेयमित्यस्यापवा
दमाह ॥ न दाप्योपहृतं तं तु राजदैविकतस्करैः ॥ तमुपनिधिं राज्ञा दैवेनोदकादिना तस्करैर्वापहृतं न दाप्यः सोऽय
स्मिन्नुपहिते धनिन एव तदुनं नष्टं यदि जिह्मकारितं न भवति ॥ यथाह नारदः ॥ ग्रहीतुः सह यो र्थेन नष्टो नष्टः स दायि
नः ॥ दैवराजकृते तद्वन्न चेत्तज्जिह्मकारितमिति ॥ तस्यापवादमाह ॥ भ्रेषश्चेन्मार्गितेऽदत्ते दाप्यो दंडं च तत्समं ॥ स्वा
मिना मार्गिते याचिते यदि न ददाति ॥ तदा तदुत्तरकालं यद्यपि राजादिनाशे यो नाशः संजातस्तथापि तद्द्रव्यं मूल्य
कल्पनया धनिने गृहीता दाप्यो राज्ञे च तत्समं दंडं ॥ भोक्तारं प्रत्याह ॥ आजीवन् स्वेच्छया दंड्यो दाप्यस्तं चापि सो
दयं ॥ यः स्वेच्छया स्वाम्यननुज्ञया उपनिहितं द्रव्यमाजीवत्युपभुंक्ते व्यवहरति वा प्रयोगादिना लाभार्थमसावुप

53

२७॥ भोगानुसारेण च द्रव्यस्तश्चोपनिधिः सो द्रव्यमुपभोगे सवृद्धिरव्यवहारे सत्याः [illegible] धनिने दाप्यः॥ वृद्धिप्रमाणं च कात्याय
नोक्तं॥ निक्षेपवृद्धिर्दोषस्त्वयं विश्लेषमेव च॥ मान्यमानेन चेद्द्रव्यं वर्द्धते पंचकं शतमिति॥ एतच्च भक्षिते द्रव्ये। उपेक्षा
ज्ञानेन नष्टे तु तेनैव विशेषो दर्शितः॥ भक्षितं सोदयं दाप्यः समं दाप्यमुपेक्षितं। किंचिन्न्यूनं प्रदाप्यः स्याद्द्रव्यमज्ञाननाशि
तमिति॥ किंचिन्न्यूनमिति चतुर्थांशहीनं। उपनिधेर्धर्मान्याचितादिष्वतिदिशति॥ याचितान्वाहितन्याससनिक्षेपादिष्वयं
विधिः॥ विवाहाद्युत्सवेषु वस्त्रालंकारादि याचितानीतं याचितं। यदेकस्य हस्ते निहितं द्रव्यं तेनाप्यनु पश्चादन्यस्य हस्ते स्वा
मिने देहीति निहितं तदन्वाहितं। न्यासो नाम गृहस्वामिने दर्शयित्वा तत्परोक्षमेव गृहजनहस्ते प्रक्षेपो गृहस्वामिने समर्पणी
यमिति॥ समक्षं तु समर्पणं निक्षेपः॥ आदिशब्देन सुवर्णकारादिहस्ते कटकादिनिर्माणाय न्यस्तस्य सुवर्णादेः प्रतिन्यास
स्य च परस्परप्रयोजनाभेदस्या त्वयेदं मदीयं रक्षणीयं मदेये त्वदीयं रक्षतमिति न्यासस्य ग्रहणं॥ यथाह नारदः॥ एष एव विधि
र्दृष्टो याचितान्वाहितादिषु॥ शि[illegible]ल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव चेति॥ एतेषु याचितादिष्वयं विधिः॥ उपनिधेर्यः प्र
तिदानादिविधिः स एव वेदितव्यः॥ २॥ इति निक्षेपप्रकरणम्॥ प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितमित्युक्तम्॥
तत्र भुक्तिर्निरूपिता। संप्रति साक्षिस्वरूपं निरूप्यते॥ साक्षी च साक्षाद्दर्शनाच्छ्रवणाच्च भवति॥ यथाह मनुः॥ समक्षदर्शनात्
साक्ष्यं श्रवणाच्चैव सिध्यतीति॥ स च द्विविधः॥ कृतोऽकृतश्च॥ साक्षित्वे निरूपितः कृतः॥ अनिरूपितोऽकृतः। तत्र कृतः पंच
विधो लेख्यो कृतश्चैव षड्विधः सोऽकृतो विधः॥ यथाह नारदः॥ एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः। कृतः पंचविधो
ज्ञेयः षड्विधोऽकृत उच्यते॥ तेषां च भेदः स्मृतिनैव दर्शितः॥ लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च॥ गूढश्चोत्तरसाक्षी च
साक्षी पंचविधः स्मृतः॥ लिखितादीनां स्वरूपं कात्यायनेनोक्तम्। अर्थिनास्य

यमाचीर्णो यो लेख्ये संनिवेश्यते॥ स साक्षि द्विविधो नाम स्मारितः [illegible]॥ स्मारितः पत्रकारेत इति अस्य विवरणं तेनैव कृतं॥ यस्तु
कार्यवशात् अर्थं दृष्ट्वा कार्यं पुनः पुनः॥ स्मार्यते ह्यर्थिना साक्षी स स्मारित इहोच्यते इति॥ यस्तु पुनः यदृच्छया आगतः साक्षी क्रियते स
यदृच्छाभिज्ञः [illegible] तयोः पत्रानारूढे पि भेदस्तेनैव दर्शितः प्रयोजनार्थमानीतः प्रसंगादागतश्च यः॥ द्वौ साक्षिणौ त्वलिखितौ
पूर्वपक्षस्य साधकाविति॥ तथा॥ अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटं। यः श्राव्यते स्थितो गूढो गूढसाक्षी स उच्यते॥
तथा॥ साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते॥ श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञित इति। अयं च स्याप्य कृतस्यापि भे
दो नारदेनोक्तः॥ ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणां। कार्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः॥ कुल्याः कुल
विवादेषु विज्ञेयास्तेऽपि साक्षिण इति॥ प्राड्विवाकग्रहणं लेख्यक-सभ्योपलक्षणार्थं लेख्यकः प्राड्विवाकश्च सभ्याश्चैव यथा
नुपूर्वशः॥ नृपे पश्यति तत्कार्यं साक्षिणः समुदाहृता इति। ते साक्षिणः कीदृशाः कियन्तश्च भवंतीत्यत आह॥ तपस्विनो दान
शीलाः कुलीनाः सत्यवादिनः। धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः॥ त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः॥
यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः॥ तपस्विनस्तपःशीलाः। दानशीला दाननिरताः। कुलीना महाकुलप्रसूताः॥ हा
सत्यवादिनः सत्यवचनशीलाः। धर्मप्रधाना अर्थकामप्रधानाः ऋजवोऽकुटिलाः। पुत्रवन्तः। धनान्विताः सुवर्णादिधनयु
क्ताः। श्रौतस्मार्तक्रियापराः नित्यनैमित्तिकानुष्ठाननिरताः। एवंभूतास्त्र्यवराः साक्षिणो भवंति॥ त्रयो वरा न्यूना येषां ते त्र्यवराः
त्रिभ्यो वा न्यूना न भवंति॥ परतस्तु यथाकामं भवंतीत्यर्थः॥ जातिमनतिक्रम्य यथाजाति जातयो मूर्धावसिक्ताद्या अनुलोमजाः
प्रतिलोमजाः। मूर्धावसिक्तानां मूर्धावसिक्ताः साक्षिणो भवंतीत्येवं अंबष्ठादिष्वपि द्रष्टव्यं॥ वर्णमनतिक्रम्येति यथावर्णं
वर्णा ब्राह्मणादयः। तत्र ब्राह्मणानां ब्राह्मणा एव [illegible] साक्षिणो भवंतीत्येवं क्षत्रियादिष्वपि द्रष्टव्यं॥
तथा स्त्रीणां साक्ष्यं स्त्रियः कुर्युः॥ यथाह मनुः। स्त्रीणां साक्ष्यं स्त्रियः कुर्युरिति। सजातिसवर्णासंभवे सर्वे मूर्धावसिक्ताद्या

55

॥६९॥ आसन्नाद्यपत्र सर्वे सर्वेषु सर्ववर्णेषु स्त्रियोऽपि स्त्रीषु वृषा संभवं साक्षिणो भवंति ॥ उक्तलक्षणानां साक्षिणाम् मसंभवे
प्रतिषेधरहितानामन्येषामपि साक्षित्वं प्रतिपादनार्थं मसाक्षिणो न कल्प्याः ॥ ते च पंचविधा नारदेन दर्शिताः ॥ असाक्ष्यपि
॥७०॥ हि शास्त्रेषु दृष्टः पंचविधो बुधैः ॥ वचनाद्दोषतो भेदात्स्वयमुक्तो मृतांतर इति ॥ वेदवन्ने वचनात्साक्षिणः कृताः ॥ श्रोत्रि
यास्तापसा वृद्धा ये च प्रव्रजिता दयः ॥ असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृत इति ॥ लोपसाधानमत्युआदिदोषेन दिष्टाश्च
दृष्टानादीनो प्रदर्शम् यथा ॥ स्तेनाः ॥ विप्रा विवदमानगुरुकुलवासिपरिव्राजसक्तयानगस्तु निर्ग्रंथाः असाक्षिण इति दोषा
दसाक्षिणो दर्शिताः ॥ स्तेनाः साहसिकाश्चंडाः कितवा वधकास्तथा ॥ असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यते ॥ चंडाः कोप
॥७१॥ नाः ॥ कितवा द्यूतकृताः ॥ भेदं साक्षिणां च स्वरूपं ते भेद दर्शितं साक्षिणां ॥ साक्षिवानां विनिर्दिष्टानां च वादिनां यदि भेदो
यथा वादीभेदात्सर्वे न साक्षिण इति तथा स्वयमुक्तिस्वरूपं चैतन्ने व दर्शितम् ॥ स्वयमुक्तिरनिर्दिष्टः स्वयमेवैत्य
यो वदेत् ॥ स्मृते सूचकः सत्त्वैस्तस्य सत्त्वा साक्षित्वमर्हतीति मृतांतरस्यापि लक्षणमुक्तम् ॥ योर्थः श्रावयितव्यः स्यात्तस्मि
न्मुमूर्षति चार्थिनि ॥ अतद्दर्शने तत्साक्षिसमिति साक्षी मृतांतरः ॥ इति येनार्थिना श्रुतः स्वार्थिनावा साक्षिणो योऽर्थः आवृ
तयोऽभवत् ॥ एवमन्यार्थे साक्षिणा इति तस्मिन्नर्थिनि परस्मिन्निवाजसति मृते वा यदि वेदितेसाक्षी कृतस्मिन्नन्य
र्थे ऽस्य वा कृते साक्ष्यं वदति इति मृतांतरः साक्षी न भवतीत्यत्र मुमूर्षुरस्य स्वयं नवा पितृवादयः श्राविताः अस्मिन्नर्थे
मी साक्षिण इति तत्र मृतान्तरोपि साक्षी ॥ यथाह नारदः ॥ मृतांतरोर्थिनि प्रेते मुमूर्षुश्राविताहते ॥ तथा ॥ श्रावि
तो नातुरेणापि यस्त्वर्थो धर्मसंहितः ॥ मृते पि तत्र साक्षी स्यात्षट्सु चान्वाहितादिषु ॥ तानेतानसाक्षिणो दर्शय
ति ॥ स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः ॥ रंगावतारिपाखंडिकूटकृद्विकलेन्द्रियाः ॥ पतितासार्थसंबं

॥७२॥

॥१२८॥

पुत्रा

56

साहसीर्दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः॥ स्त्री प्रसिद्धा॥ बालोऽप्राप्तव्यवहारः॥ वृद्धोऽशीति

रा: ९ धिकवयः ... तत्रगतैः॥ साहसी दृष्टदोषश्च निर्धूताद्यानामन्येषामनामपि स्त्रीप्रभृतीनामुपलक्षणार्थं। कितवो अक्षदेवी मत्तः पानादिना

व्यवहारः॥ ... ग्रहणेऽस्य नानिषिद्धानामन्येषामपि ... उन्मत्तो ग्रहाविष्टः॥ अभिशस्तो ब्रह्महत्यादिना। रङ्गावतारी चारणः। पाषण्डिनो निर्ग्रन्थप्रभृतयः॥ कूटकृत् कपटले

ख्यादिकारी॥ विकलेन्द्रियः श्रोत्रादिरहितः। पतितो ब्रह्महादिः। आप्तः सुहृत्॥ अर्थसंबंधी विप्रतिपद्यमानार्थसंबंधी॥

... सहायः एककार्यः। रिपुः शत्रुः। तस्करः स्तेनः। साहसी स्वबलावष्टंभकारी। दृष्टदोषो दृष्टवचनविरुद्ध वचनः। निर्धूतो बं

धुत्यक्तः॥ आद्यग्रहणाद्दृष्टव्यनामपि स्वस्यतरो ... साक्षिणं भेद साक्षिणो स्वयमुक्तेष्वं तांतरस्य ग्रहणं॥ एते

... आपद्यन्यायाद्येषामपि ... साक्षिणो ज्ञेया ... उभयानुमतः साक्षी भवत्येकोऽपि ...

स्त्री बालादयः साक्षिणो न भवंति। ... धर्मवित्॥ स एको ... उभयानुमतश्चेत् साक्षी भवति अपि ...

नि: ८ मे विदुः॥ ... तथापि तेषामुभयानुमतस्याभावेऽपि साक्षित्वं

... तस्मात् ... अवरग्रहणं। ... भवत्येकस्य ... उभयानुमतस्यैव साक्षित्वं भवति सर्वेषां॥ ... वक्ष्यमाणलक्षणानि तेषु सर्वे वचनानि विरुद्धानि तत्र प्र ...

णे: ५ सर्वः साक्षी संग्रहे चौर्यपारुष्यसाहसेषु ... साक्षिणो भेददसाक्षिणोऽप्यनुक्तेष्वप्यसाक्षिणो न भवंति॥

... साक्षिणो भवंति। ... पारुष्यमुभयं चेति साहसस्याप्यनुविधमिति ... यद्यपि ...

मनुष्यमारणं चौर्यं परदाराभिमर्शनं॥ पारुष्यमुभयं चेति साहसं ... स्त्रियमा

ण चौर्यपारुष्याणां साहसत्वे तथापि तेषां ... जनसमक्षं क्रियमाणानां साहसत्वं। रहसि क्रियमा

णानां नुसंग्रहणादि ... तेषां साहसादपृथगुपादानं॥ ७२॥ साक्षिश्रावणमाह॥ साक्षिणः श्रावयेद्वा

॥१२९॥

दैवति वादिसमीपमास॥ अर्थिप्रत्यर्थिसंनिधौ साक्षिणः समवेतान्नासमवेताः पृष्टा नु पृच्छेदिति स्मरणात्॥ वक्ष्यमाणं
श्रावयेत्॥ न त्वापि पूर्वसापनेन। विशेषो दर्शितः॥ समागतः साक्षिणः सर्वानर्थिप्रत्यर्थिसन्निधौ प्राड्विवाको नियुंजीत विधिना
नेन सांत्वयत्॥ देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्॥ उदङ्मुखान् प्राङ्मुखान् वा पूर्वाह्णे वै शुचिः शुचीन्॥ आह
यसाक्षिणः पृच्छेन्नियम्य शपथैर्भृशम्॥ समस्तान्विदिताचारान्विज्ञातार्थान्पृथक्पृथक्॥ तथा ब्राह्मणादिषु श्राव
णमनुनामिमाया दर्शितम्॥ सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः। गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः। इति बास
णं अन्यथा ब्रुवतः सत्यं नेनस्यतीति शापयेत्। क्षत्रियं वाहनायुधानि तव विफलानीति गोबीजकांचनानि तव विफला
नीति वैश्यं शूद्रं अन्यथा ब्रुवतस्तव सर्वाणि पातकानि भविष्यंतीति शापयेत्॥ कृतचापवादस्तेन वदर्शितः॥ गोरक्षकान्
वाणिजकांस्तथा कारुकुशीलवान्॥ प्रेष्यान्वार्धुषिकांश्चैव विप्रान्शूद्रवदाचरेत्॥ इति विप्रप्रसंगं च्चापि यत्रैवं रूपं पो
रूपलक्षणार्थं कुशीलवा गायकाः॥ प्रतिवादिना साक्षिदूषणे दोषसद्भावे प्रदूषणेषु वा व्याद्यादिषु तथैव निर्णयः॥ अयो
२६९ नेषु तु नु च नास्ति दोषेषु निर्णयो न साक्ष्यं तरेणेति नानवस्था॥ परिसमाप्तिरेवमुक्त्वा स्मसाधयितुं नशक्नोति प्रतिवादी
नतसौ सारतत्सारेण दंड्यः॥ अथ साधयति तत्यागं न साक्षिणः॥ तथाह॥ अभाववंदर्मं तत्तयो दूषणं साक्षिणां स्फुटं॥ भा
विते साक्षिणोऽथ स्युः साक्षिधर्मनिराकृता॥ इति॥ उद्दिष्टेषु च सर्वेषु साक्षिषु दुष्टेषु पृथक्पृथक् प्रतो पातरनिरस्ते स्वसादन
राजितेभवति॥ त्रितः सावनयं साक्ष्यं साक्ष्यदुष्टे नकर्म ण्यं घरि वादीनि राकांक्षः साक्षिसत्येषु विहित इति स्मरणात्॥
साक्षी सत्येव क्रियांतर मवलंबेतेत्यभिप्रायः॥ ॥ अपनायये दिसाह॥ ये पातककृतां लोका महापातकिनां तथा॥
अग्निदानां च ये लोका ये च स्त्रीबालघातिनां॥ स तान् सर्वान् वाप्नोति यः साक्ष्यमनृतं वदेत्॥ सुकृतं यत्त्वया किं
चित् जन्मांतरशतैः कृतं तत्सर्वं तस्य जानीहि यं पराजयसे मृषा॥ पातकोपपातक महापातककारिणां अग्निदा
नां स्त्रीबालघातिनां च ये लोकास्तान् सर्वान् स प्राप्नोति यः साक्ष्यमनृतं वदति तथा जन्मांतरशतैर्यत्सुकृतं
तत्सर्वं तस्य भवति। यस्तेनानृतवचनेन पराजितो भवतीति श्रावयेदिति संबंधः॥ एतच्च सत्यवचनेदर्शनं॥

॥१२९॥

58

१४ वाणिजकानियुक्तत्वात्॥ अनेकजन्मार्जितसुकृतसंक्रमणस्य महापातकादिफलप्राप्तेश्चानृतवदनमात्रेण प्राप्तेः साक्षिसंत्रासार्थमिदमुच्यते॥ यथाह नारदः पुराणैर्ध

[illegible] सर्वं सफ्यातके [illegible] सर्वपातकस्यावनस्य [illegible] तस्मात्सत्यं [illegible] साक्ष्यमन्यो [illegible]

[illegible] सर्वप्रत्यय [illegible] यः साक्ष्यमं [illegible] सर्वं [illegible]

[illegible] सहस्रं [illegible] भवति। [illegible] साधिता [illegible]

१४ [illegible] एतच्च सद्बुद्धिं [illegible] विदितव्यं॥ ततो [illegible] वस्तु [illegible]॥ [illegible]

यथाह मनुः॥ त्रिपक्षादब्रुवन् साक्ष्यमृणादिषु नरोऽगदः॥ तदृणं प्राप्नुयात्सर्वं दशबन्धं च सर्वतः॥ इति॥ अगद इति राजदैवो

पप्लवविरहो [illegible] साक्ष्यमेव [illegible] इति [illegible] न ददाति [illegible] साक्ष्यं [illegible]

सकूटसाक्षिणां पापैस्तुल्यो [illegible] दंडनीयः [illegible] विप्रतिपत्तौ [illegible] साक्ष्यं [illegible]

[illegible] सकूटसाक्षिणां तुल्यः पापैः [illegible] दंडं [illegible] कूटसाक्षिणां च दंडं वक्ष्यति। कूटसाक्षिणां [illegible]

प्रवर्तनीयः॥ [illegible] कूटसाक्ष्ये [illegible] निवर्तनीयः॥ यथाह मनुः॥ यस्मिन्यस्मिन् विवादे तु कूटसाक्ष्यं कृतं भवेत्॥

तत्तत्कार्यं निवर्तेत कृतं चाप्यकृतं भवेत्॥ इति॥ साक्षिविप्रतिपत्तौ [illegible] निर्णयमाह॥ [illegible] समेषु [illegible]

[illegible] तथा गुणि [illegible] वचनं ग्राह्यं ये गुणवत्तमाः॥ साक्षिणां [illegible] प्रतिपत्तौ [illegible] समेषु [illegible]

[illegible] गुणि [illegible] वचने प्रमाणं॥ यदा [illegible] गुणिनां विप्रतिपत्तिस्तदा ये गुणवत्तमाः॥ [illegible]

[illegible] गुणसंपन्नाः तेषां वचनं ग्राह्यं॥ यत्र गुणिनः प्रतिपद्ये [illegible] गुणि

मेव वचनं ग्राह्यं॥ [illegible] साक्षी [illegible] धर्मवदिति [illegible] यस्य [illegible] साक्षि

[illegible]॥ [illegible] विशेषविषयं॥ [illegible]

[illegible] साक्षिणः [illegible] प्रतिज्ञा [illegible]॥ अन्यथा [illegible] यस्य [illegible] यस्य [illegible] प्र

॥३०॥ तिज्ञां द्रव्यजातिसंख्यादिविशिष्टां साक्षिणः सत्यां वदंति सत्यमेवं जानीमो वयमिति मन्तव्यो भवेत् ॥ यस्य पुनर्वादिनः प्रतिज्ञामन्यथा
वैपरीत्येन मिथ्येति वदंति तस्य पराजयो ध्रुवो निश्चितः ॥ यत्र तु प्रतिज्ञातार्थस्य विस्मरणादिना भावाभावो साक्षिणो न प्रतिपाद्ये
ति तत्र प्रमाणांतरेण निर्णयः कार्यः ॥ न च राज्ञा साक्षिणः पुनःपुनः प्रष्टव्याः स्वभावोक्तवचनं ग्राह्यं ॥ यथाह स्वभावोक्तं वचस्तेषां ग्राह्यं
यद्दोषवर्जितं ॥ उक्ते तु साक्षिणो राज्ञा न प्रष्टव्याः पुनः पुनरिति ॥ अन्यथावादिनो यस्य ध्रुवस्तस्य पराजय इत्यस्यापवादमाह ॥ उक्ते पि सा
क्षिभिः साक्ष्ये यद्यन्ये गुणवत्तमाः ॥ द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः ॥ पूर्वोक्तलक्षणैः साक्षिभिः साक्ष्ये स्वाभिप्राये प्रतिज्ञातार्थ
वैपरीत्ये नाभिहिते यद्यन्ये पूर्वेभ्यो गुणवत्तमाः ॥ द्विगुणा वान्यथा प्रतिज्ञातार्थानुगुण्येन साक्ष्यं ब्रूयुः स्यात्तदा पूर्वसाक्षिणः कूटा मिथ्यावादि
नो भवेयुः ॥ नन्वेतदनुपपन्नं ॥ अर्थिप्रत्यर्थिसभ्यसभापतिभिः परीक्षितैः प्रमाणभूतैः साक्षिभिः निर्णये दत्ते प्रमाणांतरान्वेषणे ऽ
नवस्थादोषप्रसंगात् ॥ निर्लिखितव्यवहारे तु प्रमाणमफलं भवेत् ॥ लिखितं साक्षिणो वापि पूर्वमावेदितं न चेत् ॥ यथा पक्षे तु धा
न्ये पुनिष्फलाः प्राक्तनो गुणाः ॥ निर्लिखितव्यवहाराणां प्रमाणमफलं तथेति नारदवचनात् ॥ उच्यते ॥ यथार्थप्रतिज्ञातार्थस्या
न्ये पुनिष्फलाः प्राक्तनो गुणाः ॥ निर्लिखितव्यवहाराणां प्रमाणमफलं ... पि साक्षिणां वचनमर्थविसंवादित्वेन प्रमाणमन्यमानः साक्षिदूषणदोषं कल्पयति
तदा तस्य साक्षित्वेना नाविष्कृतदोषाणामपि साक्षिणां वचनमर्थविसंवादित्वेना प्रमाणं मन्यमानः ... ॥ उक्तं च ॥ यस्य च करणं दुष्टं यत्र च मिथ्येति प्रत्ययः ॥ स एव समीचीनः इति ॥ यथा चक्षुरादिकरणा
तदा प्रमाणांतरान्वेषणं केन वार्यते ॥ ... सामेव्यर्थविसंवादाज्जनितस्य ज्ञानस्याप्रामाण्येन करणदोष कल्पना तथेहापि साक्षिपरीक्षातिरेकेण वाक्यपरीक्षो
पदेशाच्च साक्षिभिर्भाषितं वाक्यं सहसभ्यैः परीक्षयेदिति ॥ कात्यायनेनाप्युक्तं ॥ यदा शुद्धक्रिया न्यायात्तदा तद्वाक्यशोधनं ॥ शुद्धाच्च
वाक्याद्यः शुद्धः स शुद्धोर्थ इति स्थितिरिति ॥ क्रियासाक्षिलक्षणा नार्थसंबंधिनो नामात्र इति न्यायात्पदाशुद्धा तदा तद्वाक्यशोधनं साक्षिवाक्य
शोधनं कर्तव्यम् ॥ वाक्यशुद्धिश्च यस्यार्थप्रतिपादनं संवेनश्रूयते तत्तमिति स्मरणात् ॥ एवं शुद्धायाः क्रियायाः ... वाक्यार्थः
शोधनीयार्थः सम्यक् यस्या भूतसत्त्वस्थितिरीदृशीमर्थादा न्यायमिदं करणदोषबाधकमत्यप्रमाणायेत सविस्तरार्थाद सर्थः ॥ ननु

पृ ४

चरु

नेत्र

या २

॥३०॥

60

स्वयमर्थिना प्रमाणीकृतान् साक्षिणोऽतिक्रम्य कथं क्रियान्तरं प्रमाणीक्रियते। नैष दोषः॥ यतः क्रियां बलवतीं मुक्त्वा दुर्बलां यो वलंबते। स जये
धृते ऽपि सभ्यैः पुनस्तान्नाप्नुयात्क्रियामिति कात्यायनेन जयावधारणोत्तरकालं क्रियान्तरस्य निषेधाज्जयावधारणात् प्राक् क्रियां
तरपरिग्रहो दर्शितः॥ नारदेनापि निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेदिति वदता जयावधारणोत्तरकालमेव प्रमाणान्तरं निषि
द्धं न प्रागपि। तस्मादुक्तैरपि साक्षिभिः साक्ष्ये परितुष्यता क्रियान्तरमंगीकर्तव्यमिति सिद्धम्॥ एवं स्थिते यद्यभिहितं वचनेभ्यः साक्षि
भ्योऽन्यूनवचनाद्भिन्ना याया पूर्वनिर्दिष्टास्ते सन्निहिताः साक्षिणः सन्ति। तदा त एव प्रमाणीकर्तव्याः स्वभावेनैव यैर्दृष्टः स तत्र संव्यावहा
रिकमिति॥ अस्य सर्वव्यवहारशेषत्वात्॥ निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत्॥ लिखितं साक्षिणो वापि पूर्वमावेदितं न चेत्॥
इति नारदवचनाच्च॥ पूर्वनिर्दिष्टानामसंभवे त्वनिर्दिष्टा अपि तथाविधाः साक्षिण एव याह्याः॥ नदिव्यं॥ संभवे साक्षिणां प्राज्ञो
दैविकीं वर्जयेत्क्रियामिति स्मरणात्॥ तेषामसंभवे दिव्यं प्रमाणीकर्तव्यम्॥ अतः परम परितुष्यतार्थिना न प्रमाणान्तरमन्वे
षणीयमवचनादिति परिसमापनीयो व्यवहारः॥ यस्तु प्रत्यर्थिनः स्वप्रत्ययविसंवादित्वेन साक्षिवचनस्याप्रामाण्यं मन्यमानस्य
साक्षिषु दोषारोपणेनापरितोषः॥ तत्र प्रत्यर्थिनः क्रियोपन्यासावसराभावात् सप्ताहावधिकदैविकराजव्यसनोद्भवेन साक्षिप
रीक्षणं कर्तव्यम्॥ तत्र च दोषावधारणे साक्षिणो विवादास्पदीभूतं ऋणं दाप्याः॥ मासानुसारेण दण्डनीयाश्च॥ अथ दोषानवधारणं
तदा प्रत्यर्थिना तावत् वासं नोद्वेष्टव्यम्॥ यथाह मनुः॥ यस्य दृश्येत सप्ताहा दुक्तवाक्यस्य साक्षिणः। रोगोऽग्निर्ज्ञातिमरणमृ
णं दाप्यो दमं च सः इति॥ एतच्च। यस्याहुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्। इत्यस्यापरितुष्यत्प्रत्यर्थिविषये अपवादः दैवः॥
केचित्तु केऽपि साक्षिभिः साक्ष्यमस्येत त्वचनमर्थिनानिर्दिष्टेषु साक्षिष्वर्थानुकूलमभिहितवत्सु यदि प्रत्यर्थिगुणवचनमानुकूल्येन गुणान्या
साक्षिणः पूर्वोक्तविपरीतं वादयति॥ तदा पूर्ववादिनः साक्षिणः कूटा इति व्याचक्षते॥ तदसत् प्रत्यर्थिनः क्रियानुपपत्तेः। तथाप्यर्थ
नामसाध्यस्यार्थस्यानिर्दिष्टः॥ न प्रतिपक्षस्त्वभाववादी प्रत्यर्थी। तत्राभावस्याभावसिद्धिसापेक्षत्वात् सिद्धिन्याय॥ भावस्य चाभाव

व॰
त्या॰२

तू५

ष

क्रिया

॥३१॥ सिद्धिनिरपेक्षसिद्धत्वात्॥ भावस्यैव साध्यत्वं युक्तम्॥ अभावस्य स्वरूपेण साध्यादिभिरभावात्॥ अतः स्वार्थिन एव युक्ता॥ प्रतिज्ञोत्तरानुसारेण स्वं वेति क्रियानियता स्मर्यते॥ प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियां॥ मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न साध्यं वदिति॥ न चैकस्मिन्व्यवहारे द्वयोः क्रिया न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोरिति स्मरणात्॥ तस्मात्प्रतिवादिनः साक्षिणो गुणवत्तमाः द्विगुणा वा स्युः तथा पूर्वपक्षस्तूपपन्नः॥ अयमर्थः॥ यत्र तु वदि प्रतिज्ञावादिनो मदीयमिदं दायादप्राप्तमिति पूर्वपक्षः तद्विभागो नाकलितमेवं द्वितः तत्र द्वयोः साक्षिषु सत्सु कस्य साक्षिणो ग्राह्या इत्याकांक्षायां॥ द्वयोर्विवदतोः पूर्वे द्वयोः सत्स्वपि च साक्षिषु। पूर्वपक्षो भवेद्यस्य भवेयुस्तत्र साक्षिण इति स्वेनेनपः पूर्वनिवेदयैतस्य साक्षिणो ग्राह्या इति स्थिते तस्य अयमपवादः। उक्तेऽपि साक्षिभिः साध्य इति अतस्य पूर्वोत्तरयोर्वादिनोः समस्तेष्वपि समगुणेषु च साक्षिषु सत्सु पूर्ववादिनः साक्षिणः प्रष्टव्याः यदा तूत्तरवादिनः साक्षिणो गुणवत्तमा द्विगुणा वा तदा प्रतिवादिनः साक्षिणः प्रष्टव्याः॥ एवं च यत्राभावस्य साध्यते। उभयोरपि भाववादित्वात्। चतुर्विधोत्तरविलक्षणत्वाच्च॥ प्रत्युदाहरणेन क्रियापाल्पनस्ता॥ एकस्मिन्व्यवहारे यत्र प्रत्यर्थिनः क्रियाद्वयं पत्र तत्थावादि प्रतिवादिनो क्रियाद्वयस्य विरोधात्॥ तदयमाचार्यो नानुमन्यते। उक्तेऽपि साक्षिभिः साक्ष्ये इत्युत्तरार्थस्य प्रकरणाद् अस्यार्थस्य अनवगमादित्यलं प्रसंगेन॥ ८१॥ कूटसाक्षिणां दर्शितानि लिंगानि इदानीं दंडमाह॥ पृथक्पृथग्दंडनीयाः कूटकृत्साक्षिणस्तथा॥ विवादाद्विगुणं दंडं विवास्यो ब्राह्मणः स्मृतः॥ यो धनलोभादिना कूटं तत्साक्षिणः वदति स कूटकृत्साक्षिलक्षणे विनिथा कूट तेन विवादस्य राजये यो विशेषापरिज्ञानेन स्यात्सिद्धदंडः। लोभादिकारणविशेषपरिज्ञाने अन्यो दंडो मनुनोक्तः। लोभात्सहस्रं दंड्यस्तु मोहात्पूर्वं तु साहसं। भयाद्द्वौ मध्यमौ दंड्यौ मैत्र्यात्पूर्वं चतुर्गुणं। कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परं। अज्ञानाद्द्वे शते पूर्णे बालि

व ५ ति ८

62

४२

स्वयं कुर्वाणां स्त्रीन्वर्णानू धार्मिकोन्नृपः ॥ प्रवासयेद्दंडयित्वा ब्राह्मणं विवासयेदिति ॥ एतच्चाभ्यासविषयं ॥ कुर्वाणानिति वर्त्तमाननिर्देशात् ॥ प्रवासयेत्

स्याच्छतमेव स्थितिः । तत्र लोभोऽर्थलिप्सा मोहो विपर्ययज्ञानं भयं त्रासः । मैत्री स्नेहः तत्रिभयः । कामः स्त्रीव्यतिकराभिला
षः । क्रोधोऽमर्षः अज्ञानमस्फुट ने । आदिग्रहणाज्ञानानुसारः सहस्याद्दिगृह्यन्ते पर्याय एते । तथा कौटिल्यो
पि सा प्रवासयेत् । मारयेद्दर्पेण स्त्री प्रमासंग्रा... प्रयोगा ... रूपत्वात् । तत्र विप्र
वासनं मोह... नेजिह्वाच्छेदने प्राणवियोज नेन कूटसाक्षिविषयानुसारेण द्रष्टव्यं । प्रासनं तु
दंडयित्वा विवासयेत् राष्ट्रान्निष्कासयेत् । पद्दविवास्यते ... विवासाः विवासं ...
... कुर्यादित्यर्थः । अथवा ...
... कुर्यादित्यर्थः । इति ... कारणविशेषापरिज्ञानेनाभ्यासेन तत्र तत्र लोभार्थं दंडएव । अभ्यासे
... विवासनेन च तत्रापि ... विवासनं · तत्रीकरणं ... निर्वासनं ... चेति
... कारणविशेषापरिज्ञानेनाभ्यासे ... त्रिया
दिव ... महाविषये तु ... निर्वासनमेवाप्य अभ्यासे सर्वेषामेव ...
... नास्तीति मतं ...
... करणविप्रवासनं दंडाभावो ... चतुर्णामपि ... प्रायश्चित्तमकुर्वताम् ...

63

॥३२॥

धनसंधुके दंड धर्म्मध्वल्वितीदिति स्मरणादतथा सहस्रं आत्मलोगं स्रोतु शो विशेवस्ता हुजारिति स्मरणात्॥
मनुरोस्वव नेनं। त्रयाद्गणां वर्णानां धनापहारवधवं धोक्विपाविवासनानां करणं आसत्ता स्पेति॥ तत्र
धनापहारं सर्वस्यापहारो वि धास्तिनो वधस्याहस्थपान्॥ स्मारी रस्य वरो धारिणी वितोनः मध्री तितः
माक्किल्पाति स्वर्थ दंड: सर्वस्वांत स्यांधेव चेति॥ वधस्सर्वस्वहरणयो: सहपाठात्॥ पदप्तुकमूः॥
राष्ट्रादेनं बहि: कुर्यात् समग्रधनमक्षतमिति॥ तस्मात्तस्य हसविषयमूः नस्सर्वस्वविषयं। राजा
रस्त्वा सस्पेणे नक्षत्रा विदुवतीं न जातु ब्राह्मणं हन्यात् सर्वपापेष्वपि स्थितमिति सामान्येन नम
नुस्मरणात्॥ तथा नगा सरणवधादूधान धर्मो विद्यते भुवि। तस्माद्दस्य वधं राजा मनसापिन
चिंतयेदिति। अभिचार: सोऽष्टं त्राहितोन्येभ्यो विनुनेतन मोक्षत:। सत धर्मेषु वर्णं दंडं ब्राह्मण
नुविवासयेत्॥ यस्तु साक्षि तयंगीकृत्य स्य: साक्षिभि: सह साक्ष्यं आचिरे: सन्निगर्हालेव
मोरनो रागा या स्नां ताच्चिन स्तान्सोक्ष्यमन्येभ्य: साक्षिभ्यो निनुतेनाहमत्रसाक्षी भवामीति
सविवादपराजये योदंडस्तं दंडमष्ट गुणं दाप्य:। आत्मनं तु पुरस्थ्यणदव्यं तनासमर्थं विवास
सयेत्॥ विवासनं चनग्नीकरणमहसेनगस्यानिर्जमनरूपणं विषमस्तु सारेण द्रष्टव्यं। दं ३२ ॥३२॥

९३

64

दुनरेषां तत्प्रत्युत्तरं अन्यैरागासंवर्गे चेत्स्यात्स्मृतिचितकर्मकरसा निगडबंधनकारागृहप्रवेशनादि दण्डव्यं ॥ एतच्च
पूर्वश्लोके व्यक्तं सर्वत्र ॥ यत्र सर्वे साक्ष्यं निह्नुवते । तत्र सर्वे समानदोषाः । यत्तु साक्ष्यं तु [illegible] पुनर
स्य भावे दण्ड्याः । तत्र सर्वे समानदोषाः । तत्तु बंधात्पूर्वस्य यादृशाः ॥ यथाह [illegible] सा यत्नः । उक्तान्यथा
गुणात्मकं दृश्याः स्युः सर्वं [illegible] विना दृष्टि न चान्ये नो [illegible] साक्षिणो न्येन रहस्यं तु सर्वं स्याः ।
यथाह नारदः । न परेण समुद्दिष्टमुपेयात्साक्षिणं रहः । भेदयेन्नैव चान्येन हीयेतैवं समाचरन्
नित्ति ॥ साक्षिणामनवचनेन सत्यवचनेन च सर्वत्र प्रतिषिद्धे [illegible] दण्डमाह ॥ [illegible] र्लिनां हि
वधोपपत्तत्र साक्ष्यन्नं तं वदेद्वा ॥ यत्र वर्णिनां शूद्रविट्क्षत्रियविप्राणां सत्यवचनेन वधः संभाव्यते ॥ तत्र साक्ष्यं नृतं वदेद्वा ॥ अनेन च
सत्यवचनप्रतिषेधेन साक्षिणः एवं प्रतिषिद्धे सत्यवचनमवचनं चाभ्यनुज्ञायते ॥ यत्र शूद्राभियोगादौ सत्यवचनेन वर्णिनो
वधो न स्यात् वचनेन कस्यापि वधः स्यात्तत्रास्य वचनं सम्यगनुज्ञायते ॥ यत्र तु सत्यवचनेऽर्थिप्रत्यर्थिनोरन्यतरस्य वधोऽसत्यव
चनेऽन्यतरस्य वधस्तत्र तूष्णींभावो भ्यनुज्ञातो राज्ञा यत्तु मन्यते । अथ राजाकथमपि अप्रश्नेन न मुंचति तदा भेदस्सा
क्षितं कर्त्तव्यं ॥ तस्याप्यसंभवे सत्यमेव वदितव्यं ॥ नसत्यवचने वर्णिवधदोषो ऽसत्यवचनदोषः स्यात् सत्यवचने तु वर्णि
वधदोषश्च । तत्र च यथा सत्यं प्रायश्चित्तं कर्त्तव्यं । तर्हि सत्यवचनेन तूष्णींभावेन वा अभ्यनुज्ञाता सत्यवायाभावे इस
लआह ॥ तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः । तत्पावनायानृतवचनभावचननिमित्तप्रत्यवायपरिहाराय सार
स्वतश्चरुः दुर्जैरेकैकशो निर्वाप्यः कर्त्तव्यः ॥ सरस्वती देवता यस्येति सारस्वतः अनवस्त्राविनां तद्रूपम् [illegible] देने चरुः

अ०

अ

को० १

65

यम० नुना ८

राद्धः प्रसिद्धः॥ इह वैभिसंधिः॥ साक्षिणामनृतवचनमवचनं च यन्निषिद्धं तदिहेऽभ्यनुज्ञातं। यत्तु नानृतं वदेद् ध्रुवन्निध्रुवन्वापि न
तेन वदितिकिल्बिषीति च सामान्येनानृत वचनमवचनं प्रतिषिद्धं। तदनिकमनिमित्तमिदं प्रायश्चित्तं नैव साक्षिणामनृतव
चनावचनाभ्यनुज्ञानेपि साधारणानृतवचनावचनप्रतिषेधातिक्रमनिमित्तप्रत्यवायस्यता दवस्थ्यदभ्यनुज्ञावचन
मनर्थकमिति मंतव्यं॥ यतः साक्ष्यनृतवचनावचनयोर्भेषां न्यस्य यायथा साधारणानृतवचनावचनयोरल्पीयानिस्यर्थ
॥३३॥ बाभ्यनुज्ञावचनेन॥ यद्यपि स्व सः प्रत्यवायस्य निवृत्त्यानुपपत्तिकस्याल्पीयसः प्रत्यवायस्य निवृत्तिरन्यत्र तथापीह
भ्यनुज्ञावचनात् प्रायश्चित्तविधानाच्च भूयसोनिवृत्त्याल्पीयानप्यानुषंगिकोपि प्रत्यवायेन निवर्तितइतिगम्यते॥ एतेद्
निमित्तान्तरेण कालांतरे थैतत्या वगमेपि साक्षिणामन्येषां चरं प्रायो नास्मादेव वचनाद वगम्यत इति॥ ३३॥ ॥ इति साक्षिप्रक
रणासूत्र॥ युक्तिसाक्षिणो निरूपितो संप्रति लेख्यं निरूप्यते। तत्र लेख्यं द्विविधम्॥ नृपस जानपदं चेति। जानपदं निरूपितं जा
पद ८ नैमभिधीयते॥ तच्च द्विविधम्॥ स्वहस्तकृतमन्यकृतं चेति। तत्र स्वहस्तकृतं असाक्षिकमन्यकृतं ससाक्षिकं मनयोस्त्वदे ग्राम्या
नुसारेण प्रामाण्यं॥ यथाह नारदः॥ लेख्यं तु द्विविधं ज्ञेयं स्वहस्तान्यकृतं तथा॥ असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोरिति॥
तत्रान्यकृतमाह॥ यः कश्चिदर्थो निष्णातः स्वरुच्यानुपर स्परं॥ लेख्यं तु साक्षिमत्कार्यं तस्मिन्धनिकपूर्वकं॥ धनिकाधमर्णयो
धैर्यैर्हि रण्यादिः परस्परं स्वरुच्याऽध्यतां कालेन एतावद् दृयमियती च प्रतिमासं वृद्धिरिति निष्णातो व्यवस्थित स्तस्मिन्
वकु अर्थे कालांतरे विप्रतिपत्तौ चैतत्स्वनिर्णयार्थं लेख्यं साक्षिमदुक्तलक्षणसाक्षियुक्तं धनिकपूर्वकं धनिकः पूर्वो यस्मिन् तद्धनिक
पूर्वकं। धनिकनामलेखनपूर्वकमिति यावत्कार्यं कर्तव्यमुक्तलक्षणैः साक्षिभिर्वा कर्तव्याः
कर्त्रानुपकृतं कार्यमित्यर्थः तस्य साक्षिणः॥ प्रवर्तने विवादेषु स्वकृतं वाप्यलेख्यकमिति स्मरणात्॥ आदिप। समानास ॥३३॥

66

२४

नामधनिकर्णिकयोः॥ जातिर्ब्राह्मणत्वादिः॥ स्वगोत्रं वसिष्ठादिगोत्रं॥ एतैः समादिभिश्चिह्नितं॥ तथा सब्रह्मचारिकं बह्वृचादिशाखापुरस्कं॥ गुणना

म धर्महर्नामजातिस्वगोत्रकं॥ सब्रह्मचारिकात्मीयपितृनामादिचिह्नितं॥ समा संवत्सरः॥ मासश्चैत्रादिः तदर्द्धं पक्षः शुक्लः कृष्णो

त८२ वा अहस्तिथिः। प्रतिपदादिः नामधनिकर्णिक पितृनाम आदिग्रहणं द्रव्यजातिसंख्या वाधादेर्ग्रहणं॥ एतैश्चिह्नितं लेख्यं

कार्यमिति गतेन संबंधः॥ किंच समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्॥ मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितं॥ धनिका

धमर्णयोर्योऽर्थः स्वरूप्या व्यवस्थितस्तस्मिन्नर्थे समाप्ते लिखिते ऋणी अधमर्णो नामाली पं स्वहस्तेनास्मिन् लेख्ये यदुपरि

लिखितं तन्मयामुकपुत्रस्य मतमभिप्रेतमिति निवेशयेत्सत्रे लिखेत्॥ ८९॥ तथा। साक्षिणश्च स्वहस्तेन पितृनामकपूर्व

कं अत्राहममुकः साक्षीति लिखेयुरिति समाः॥ अस्मिन्लेख्ये ये साक्षिणस्ते लिखिताः स्ते पात्मीयपितृनामलेखनपूर्वकम

कै८७ स्मिन्नर्थे हममुको देवदत्तः साक्षीति स्वहस्तेनैकैकशो लिखेयुः॥ ते च समाः संख्याता गुणतस्त्वकर्त्तव्याः॥ यदा धमर्णः साक्षी वा

लिपिज्ञो न भवति। तदा धमर्णोन्येन साक्षी च साक्ष्यंतरेण सर्वसाक्षिसन्निधौ स्वमतं लेखयेत्॥ यथाह नारदः॥ अलिपि

स्या८ ज्ञ ऋणी यः स्यात्स्वमतं तु स लेखयेत्॥ साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपत इति॥ अपिच॥ उभयाभ्यर्थितेनैतन्म

या ह्यमुकसूनुना॥ लिखितं ह्यमुकेनेति लेखकोंऽते ततो लिखेत्॥ ततो लेखको धनिकर्णिकाभ्यां प्रार्थितेन मया

मुकेन देवदत्तेन विष्णुमित्रसूनुनैतल्लेख्यं लिखितमित्यंते लिखेत्॥ सांप्रतं स्वकृतं लेख्यमाह॥ विनापि साक्षिभिर्ले

ख्यं स्वहस्तलिखितं तु यत्। तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते॥ यल्लेख्यं स्वहस्तेन लिखितमधमर्णेन त

त्साक्षिभिर्विनापि प्रमाणं स्मृतं मन्वादिभिः बलोपधिकृतादृते। बलेन बलात्कारेण उपधिना लोभक्रोधभयमोहादि

लक्षणेन यत्कृतं तस्माद्विनान्नारदोप्याह॥ मत्ताभियुक्तस्त्रीबालबलात्कारकृतं च यत्॥ तदप्रमाणं लिखितं

भयोपधिकृतं तथेति॥ तच्चैतत्स्वहस्तकृतं परकृतं च लेख्यं देशाचारानुसारेण सबंधकव्यवहाराबंधकव्यव

लिप्यक्षराण्यपरिलोपेन च लेख्यमिश्रोनाव्यवहृतः साधुस्थैरेकेन ग्राहितेन्येकोदत्तं भावयापि लेख्यनीयम्॥ यथाह नारदः॥
देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणं॥ तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरमिति॥ विधानेविविदादेवि विवाद
करणे तस्य लक्षणं नोपाधिमोग्याविभिन्नालक्षणमित्यादि तथा स्पष्टं यस्मिंस्तत्पव्यक्ताधिविधिलक्षणं॥ अथ
नानुक्रमः क्रमव्युत्क्रमाक्षराणि न क्रमाक्षराणि अविलुप्तानि क्रमाक्षराणि यस्मिंस्तदविलुप्तक्रमाक्षरं तदेवंभूतं लेख्यं
लेख्यं प्रमाणं॥ नारदवचनसाधुसाधुनियमो ... संगेनेलख्यात ... मध्याणं त्रिपिरेववदे
मपि साह ... णलेख्यमेते देयं पुरुषैस्त्रिभिरेव तु॥ यथा साक्ष्यादिकृतमध्यं त्रिपिरेववदेयं। तथा लेख्यकृत
मप्याहर्ते न सुत न सुतैस्त्रिभिरेव देयं॥ न च तुर्थादिभिर्द्दितिनियम्यते॥ ननु पुत्रपौत्रैः ऋणं देयमित्यविशे
षेलेवर्णमात्रे त्रिभिरेव देयमिति नियतमेवा॥ बाढम स्मैको हार्गस्य पत्रारूढम् ऋणमित्ययं यस्य संतर व्रमेवाम
नं पितृणां दीयते ऋणमिति॥ इह पत्रारूढ ऋणमतिक्रांतकालमपि पितृणां संबंधिदाप्यते॥ अत्र पितृणामिति ब
हुवचननिर्देशात्कालमतिक्रांतमिति वचनाच्चतुर्थादिर्दाप्यते इति प्रतीयते॥ तथा हारीतेनापि लिखितस्य स्वल्पवेक्ष
स्तेलाभं तु स्वविनिर्दिष्टे अत्रापि मस्य हस्ते पत्रमसितस्यर्णलाभ इति सामान्येन चतुर्थादिभ्यो ऋणलाभो सि
नीयम्॥ अस्यापवादमाह॥ ८९॥ आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते॥ अर्थयकेपि पत्रारूढं ऋणे त्रिभि

68

देव देयमिति नियमार्थं पाठः ऋणानधिकारिणः अध्याहरणे यन्न अधिकार प्राप्ता विदमुच्यते॥ यावत्स्वल्पोर्थे

नयच्चमेन यात्रणं न दीयते॥ तावद्देयापि स्त्वर्थ इति वदता मेव वचनेन ऋणापाकरणे चतुर्थस्य अधिकारो दर्शि

तः॥ नन्वेतदस्तु ऋणमेव पकृत्नोपयोगे न ऋणमिति॥ सत्यं॥ तदप्येतस्मिन्न सत्यपवादवचने पुत्रपौत्रय विषयमेतस्या

दिति सर्वमनवद्यम्॥ प्रासंगिकं परिसमाप्य प्रकृतमेवानुसरति॥ देशांतरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा॥

भिन्ने दग्धे अथ छिन्ने लेख्यमन्यत्तु कारयेत्॥ व्यवहाराक्षमे पत्रे पत्रांतरं कुर्यादिति विधीयते॥ व्यवहा

६ पत्रे

राक्षमत्वं चास्य तत्र व्यवहितदेशांतरस्थे दुर्लेख्ये दुष्टानि संदिग्धमानानि अवाच्यकानि यल्लेख्यानि लिप्यक्ष

राणि पदानि वा यस्मिंस्तद् दुर्लेख्यं तस्मिन्न दुर्लेख्ये नष्टे कालवशेन उन्मृष्टे मषी दौर्बल्यादिना मृदितलिप्य

क्षरे हृते तस्करादिना भिन्ने विदलिते दग्धे प्रज्वलिते छिन्ने द्विधा कृते सति। एतच्चार्थिप्रत्यर्थिनोः परस्य

रानुमतेन संविभक्तसांतव्यवहारप्राप्तौ देशांतरस्थे पत्रानयनाद्यपेक्षया कालो लभ्यते॥ दुर्गदेशांतरा

स्थिते न ष्टेवा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्यः॥ यथाह नारदः॥ लेख्ये देशांतरन्यस्ते शीर्णे दुर्लि

खिते हृते॥ सतस्तत्कालकरणमसतो द्रष्टृदर्शनम्॥ तिमिसतोपि धमानस्य पत्रस्य देशांतरस्थस्य मन्यमत्र

लकरणं कालावधिर्दातव्यः॥ असतः पुनरर्थिप्रमाणस्य द्रष्टृदर्शनं ये द्रष्टारः साक्षिणस्तेषां दर्शनं व्यवहारपरिसमा

पनं कार्यं॥ यत्र तु साक्षिणो न संभवंति तत्र दिव्येन निर्णयः कार्यः॥ अलेख्यसाक्षिके दैवी व्यवहारे विनिर्दिशे

दिति स्मरणात्॥ एतच्च ज्ञातपरे अव्यवस्थापत्रे॥ राजकीयमपि व्यवस्थापत्रमीदृशमेव भवति॥ इयांस्तु

विशेषः॥ राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितं तथा॥ राजकीयं स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमदिति। तथा

67

धि.द्रा०

॥३५॥

न्यदपि राजकीयं जयपत्रं च द्युपत्तिहेनोक्तम्॥ यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियं। सावधारणकं चैवं जय
पत्रकमिष्यते॥ प्राड्विवादिहस्ताङ्कं मुद्रितं राजमुद्रया॥ सिद्धेऽर्थे वादिने दद्याज्जयिने जयपत्रकमिति॥ तथा सभा
सदोपि मतो मेमुकपुत्रस्येति स्वहस्तं दद्युः। सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः। यथा लेख्यविधौ
तद्वत्स्वहस्तं दद्युरेव त इति स्मरणात्॥ सभासदां च परस्परानुमतिव्यतिरेकेण न व्यवहारो निःशल्यो भवति।
यथाह नारदः। यत्र सभ्यो जनः सर्वः साध्वेतदिति मन्यते॥ स निःशल्यो विवादः स्यात्सशल्यस्त्वन्यथा भवे
दिति। एतच्चानुध्यानाद्यहारादेव। साधयेत्साध्यमर्थं यत्स्वमुख्यापार्थितं चतत्॥ राजमुद्राङ्कितं चैव जयपत्र

नया८

दूति। एतच्चानुध्याद्यहारादेव। साधयेत्साध्यमर्थं यत्सुप्राप्तान्वितं चतत्॥ राजमुद्राङ्कितं चैव जयपत्र
कमिष्यत इति स्मरणात्॥ यत्रानुहीनता अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः। आहूतश्च पलायी च हीनः
पंचविधः स्मृत इति न तत्र जयपत्रकमस्ति। अपितु हीनपत्रमेव॥ न च कालान्तरे दण्डप्राप्त्यर्थं जयपत्रेणु प्रास्याय वि

द:८

विसिध्यर्थमिति विशेषः॥ एवं लेख्यसंदेहे निर्णयनिमित्तमाह॥ संदिग्धे लेख्यशुद्धिः स्यात्स्वहस्तलिखितादि
भिः॥ युक्तिप्राप्तिक्रियाचिह्नैः संबंधागमहेतुभिः॥ प्रत्यर्थिमुखमुक्तं वेति संदिग्धे लेख्यस्य शुद्धिः स्वहस्तलिखितादि

॥४॥

स्यात्॥ स्वहस्तेन लिखितं पत्रं लेख्यांतरं तेन शुद्धिः॥ यदि सदृशान्यक्षराणि भवंति तदा शुद्धिः स्यादित्यर्थः। आदि
ग्रहणात्साक्षिलेख्यकस्वहस्तलिखितांतरसंवादात् शुद्धिरिति। युक्त्याप्तिः युक्तिप्राप्तिः। देशकालपुरुषाणां द्र
व्येण सह संबंध कथनं प्राप्तिः। अस्मिन्देशे स्मिन्काले स्य पुरुषस्येदं घटत इति युक्तिप्राप्तिः। क्रियाऽनयोः स्व
पक्षसाक्षिकमसाधारणं श्रीकारादि संबंध अर्थिप्रत्यर्थिनोः पूर्वमपि परस्परविश्वासेन दानग्रहणादि संबंधः। आ
गमोऽस्यैतावतोऽर्थस्य संभावितः प्राप्त्युपायः। एतदुद्वहेतवः। एभिर्हेतुभिः संदिग्धलेख्यशुद्धिः स्यादित्यन्वयः॥

॥३५॥

70

॥श्रीमं०१०

यदा तु लेख्यस्य संदेहे निर्णयो न जायते॥ तदा साक्षिभिर्निर्णयः कार्यः॥ यथाह कात्यायनः॥ दूषिते पत्रके वादी तदारूढं तु संश्रितैः साक्षि
संभवविषयमिदं साक्ष्यसंभवविषयं तु हारीतवचनं॥ न मृतैस्तु लेख्ये तेपत्रे कूटमेते न कारितं। अधरीकृतं तत्संग्रामर्थे यैन
निर्णयकृति॥ एवं सोपि [illegible] लेख्यस्य [illegible] तदभावेप्यत्र स्वमेव [illegible] दातुम समर्थस्तदा किं कर्त्तव्यमित्यत आह॥ लेख्यस्य पृ
ष्ठेभिलिखेद्दत्वा दत्वा र्णिकोपनं धनिको पगतं दद्यात् स्वहस्तपरिचिन्हितं॥ यदा धनमर्णिकः सकलमृणं दातुमसमर्थः
स्तदा यथाशक्त्या सारेण दत्वा पूर्वकृतस्य लेख्यस्य पृष्ठेभिलिखेत्॥ एतावन्मया दत्तमिति॥ उत्तमर्णो वा उपगतं सात्धनेन से
व लेख्यस्य पृष्ठे दद्यात् दर्शितं देतावन्मया लब्धमिति किंच स्वहस्तपरिचिन्हितं॥ स्वहस्तलिखितं ताक्षरचिन्हितं यद्वोपगतं प
त्रे द्वे पत्रे स्वहस्तलिखितं चिन्हिते अधम र्णो यो त्तम र्णे दद्यात्॥ कैर्येनुके वैरतो लेख्य किं कर्त्तव्यमित्यत आह॥
दत्वर्णं पाटयेल्लेख्यं शुध्यै वान्यत्तु कारयेत्॥ कृमेण स्वहृदेव बालकस्तम र्णं दत्वा त्वेवं कृतं लेख्यं पाटयेत्॥ यदा तु दुर्ग
देशगवसितं तु लेख्यं न दृश्यते तदास्तु ध्येन्य धमर्णो विश्वसार्थमन्य ल्लेख्यं कारयेत्तु त्तमर्णमधमर्णः॥ पूर्वोक्तक्रमेण णो
त्तमर्णो विशुद्धिपत्रमधम र्णाय दद्यादित्यर्थः॥ ससाक्षिके मणे का स्तेयत्त त्येकिं कर्त्तव्यमित्यत आह॥ साक्षिमत्वधम
र्वेध दत्तं दातव्यं ससाक्षिकं॥ यत्तु ससाक्षिकमृणं तत्सर्वं साक्षि समक्षमेव दद्यात्॥ इतिलेख्यप्रकरणम्॥ छ॥
लिखितसाक्षिभुक्तिलक्षणं त्रिविधं मानुषं प्रमाणमुक्तमथा वसरप्राप्तं दिव्यं प्रमाणमभिधास्यन्तुलादीन्याप
दशादिमिराह॥ पंचभिः [illegible] कोदिव्यमातृकां कथयति॥ तत्र नारदेनाधिव्यान्युपदिश्यति॥ तुलाद्याग्निविषं कोशादि
व्यानीह विशुद्धये॥ स्लादीनि कोशान्तानि पंच दिव्यानीह धर्मशास्त्रे विशुद्धये॥ संदिग्धस्यार्थस्य संदेह निवृत्तये

लि ६

तु १

॥३६॥ कर

शतमप्यानीति। नन्वस्याप्यपितंडुलादीनि दिव्यानि संति। घटोग्निरुदकंचैवविषंकोशस्तथैवच। तंडुलाश्चैव दिव्यानि सप्तमस्तप्त
माषकइति पितामहस्मरणात्। ततः कथमेतावंत्येवेत्यत आह॥ महाभियोगेष्वेतानि एतानि महाभियोगेष्वेव नान्यत्रेति नि
यम्यते। नतु न हि मानेन दिव्यानीति महत्त्वावधिं वक्ष्यति। नन्वल्याभियोगेपि कोशस्यैव। कोशमल्पेपि दापयेदिति स्म
रणात्। कोशस्य तुलादिवत्पाठेन महाभियोगेष्वेवेति नियमार्थः। किंतु सावष्टंभाभियोगे प्राप्त्यर्थः। अन्यथाल्पाभि
योग एव स्यात्॥ अवष्टंभाभियुक्तानां घटादीनि विनिर्दिशेत्। तंडुलाश्चैव कोशश्च शंकास्वेतानि संशयइति स्मर
णात्॥ महाभियोगेष्वप्यशंकिषु सावष्टंभेषु चाभियोक्तुरपि शापमपवादमाह॥ शीर्षकस्थेभियोक्तरि एतानि तुलादीन्यभि
योक्ता शिरोवर्तस्थे अभियुक्तस्य भवंति। शीर्षकं शिरो व्यवहारस्य चतुर्थः पादो जयपराजयलक्षणस्तेन च दंडो लक्ष्यते त
त्तिष्ठतीति शीर्षकस्थः। ततश्च दंडभागी सर्वथा। [illegible] स्वयः प्रतिज्ञातार्थसाधनमिति भावः प्रतिज्ञा
वादिनएवाभियोक्ता इति व्यवस्था दर्शिता तत्रेदमपवादमाह॥ रुच्यावान्यतरः कुर्यादितरो वर्तयेच्छिरः। रुच्याभियोक्ताभि
युक्तो वा परस्परसंप्रतिपत्त्यान्यतरोभियोक्तावाभियुक्तो वा दिव्यं कुर्यादितरोभियुक्तः शिरः शारीरमर्थदंडं वा वर्तयेदंगीकु
र्यात्। अयमभिसंधिः। समानुपपन्नार्थवादिव्ये प्रमाणाभावे [illegible] गोचरं॥ अपितु भावाभावावविनिर्णयेन गोचरयति॥
अतस्तमभियुक्तेनेर प्रसवरूपे [illegible] प्रसर्पिनो दन्यतरस्य [illegible] दिव्यं भवतीति॥ अल्पाभियोगे महाभियो
गे वंदानां सावष्टंभयोरप्यविनिर्णयेन कोशो भवतीकल्पम्। तुलादीनि विविक्तानि तु महाभियोगेष्वेव सावष्टंभेष्वेवेति च नि
यमो दर्शितः॥ तत्रावष्टंभाभियोगेष्वेवरस्याप्यवादमाह॥ विना पि शीर्षकात्कुर्यात् नृपद्रोहेथ पातके॥ राजद्रोहाभिशंकायां हार
ब्रह्महत्यादिपातकाभिशंकायां च शिरःस्थानीयाभिनापि तुलादीनि कुर्यात्। महत्त्वोपाभिशंकायां च। यथाह। राज

पि ४ व६

72

भिः शंकितानां च निर्दिष्टानां च दस्युभिः ॥ आत्मशुद्धिपराणां च दिव्यं देयं त्रि

वं विनेति । तदुक्तं पुनरल्पचौर्यादिशंकायामेव चौर्येषु तदुक्ता देयानात्यन्तं विनिश्चयः इति पितामहवचनात् । तत्र मारक

त्व महाचौर्या तोषीकृत न कानिचाद्देवतापित्र पादां स्त्रस्नानि तु स्तानि च । स्पर्शेषु शंकितेषु राजां दाराणां सुहृदी त

था । अभियोगेषु सर्वेषु कोशपानमथापि वा ॥ दृष्टे तेन पथाः प्रोक्ता मनुना स्वल्पकादिणइति नारदस्मरणात् ॥ येषु

च मानुषप्रमाण निर्णयस्य निर्णये यकं यत्तदिव्यमिति लोके प्रसिद्धा शपथानामपि दिव्यत्वं ॥ तथापि प्रकारान्तरनि

र्णयनिमित्तत्वेन समनंतर निर्णयनिमित्तेभ्यो घटादिभ्यो दिव्येभ्यो भेदेन व्यपदेशो ब्राह्मणपरिव्राजकवत् ॥ कोशा

स्पष्टशपथत्वेपि धटादिषु पाठो महाभियोगविषयत्वेन अवयंभाभियोगविषयत्वेन च घटादिसाम्यानु समनंतर निर्णयनि

मित्तत्वेनैतदुक्तं तदमात्यकस्य च समनंत निर्णयनिमित्तत्वमल्पविषयत्वेन शंकाभिविषयत्वेन च घटादिभे

लक्षणं बाधत्तेषु पाठ इति संक्षेपः ॥ एतानि चाहि व्यानि भूपर्यवशात्कर्यथा संभव महत्स्वादिषु विवादेषु प्रयोक्तव्यानि ॥ यत्तु पि

तामहवचनं । स्थावरेषु विवादेषु दिव्यानि परिवर्जयेदिति । तदपि लिखित सामंतादिसद्भावे दिव्यानि परिवर्जयेदिति

व्याख्येयम् ॥ ननु विवादांतरेष्वपि प्रमाणांतर संभवे दिव्यानामनवकाशः एवं सत्यस्मरणादिषु च योविशेष लक्षणस्य स्थ

न्यासे थिनालतेपि प्रसक्ते इदं ग्राम्यपगमा च तेन दिव्यमवलं व्यते ॥ तदा दिव्यमपि भवति । साक्षिणामात्मा

दोष संभवादिव्यस्य च निर्दोषत्वेन वस्तुतत्व विषयत्वात्तल्लक्षणत्वात् धर्मस्य यथाह नारदः ॥ तत्र सत्ये स्थितो धर्मो

व्यवहारस्तु सत्ये स्थितः । दैवसाध्ये पौरुषेयीं न लेख्यं वा प्रयोजयेदिति । स्थावरेषु विवादेषु प्रत्यक्षे मात्र इव वंशे

न दिव्यावलंबने लेते पि सामंतादिरूप प्रमाणसद्भावेन दिव्यं ग्राह्यमिति विकल्पनिराकरणार्थं स्थावरेषु

73

॥१७०॥

विवादे हि सति पितामहवचनेनास्ति कृद्दिव्यनिराकरणार्थं मूले लिखितसामं [illegible] नाप्यभावे स्थावरविवादेऽपि निर्ण
य प्रसंगात् ॥ [illegible] किंच । सचैलं स्नातमाहूय सूर्योदय उपोषितं ॥ कारयेत् सर्वदिव्यानि नृपब्राह्मणसन्निधौ ॥ इति पूर्वेद्यु
रुपोषितं उदिते सूर्ये सचैलं स्नातं दिव्यग्राहिणमाहूय नृपस्य सभ्यानां च ब्राह्मणानां सन्निधौ सर्वाणि दिव्यानि
कारयेत् प्राड्विवाकः । शिरोवर्त्यपि पितामहस्मृतेरर्थोऽपि तावद्या । निरस्तं निंद्या । [illegible] वेयं चाद्ये यास स [illegible] उपवास सर्वे दिव्या ४
पितामहेनोक्तो बलवद्बलमामहा कार्यल्प कार्यविषयत्वेनाप्यस्थितो द्र[illegible]ष्टव्यः । उपवासनियमस्त्वकार्यिणः प्रा
ड्विवाकस्यापि । दिव्येषु सर्वकार्याणि प्राड्विवाकः समाचरेत् ॥ अध्वरेषु यथाध्वर्युः सोपवासो नृपाज्ञया ॥ इति पितामहवचनात् ॥
अत्र च पि स्मर्यते दिव्यस्य विशेषेणोक्तं । तत्र पितृसमाचारात् [illegible] दिव्यानि देयानि ॥ तत्रापि पूर्वाह्ने [illegible] दिव्य
दिव्यान्स्यात् [illegible] पूर्वाह्ने च प्रदेयं भवेत् ॥ मध्याह्ने तु जलं देयं धर्मतत्त्वमभीप्सता । दिवसस्य तु पूर्वाह्ने कोशशुद्धिर्वि
धीयते ॥ रात्रौ तु पश्चिमे यामे विषं देयं सुशीतलं इति । पितामहोक्तो विशेषो द्रष्टव्यः । अनुक्ते वेलाविशेषाणां तु
लतप्तमाषप्रभृतीनां पूर्वाह्ण एव प्रदानं । पूर्वाह्णे सर्वदिव्यानां प्रदानं परिकीर्तितमिति सामान्येन नारदवचनात् ॥
अहनि त्रिधा विभक्ते प्रथमो भागः पूर्वाह्णो मध्यमो मध्याह्नस्तृतीयोऽपराह्णः ॥ तथा परोऽपि कालविशेषो विधिप्रति
षेधमुखेन दर्शितः । विषादिदिव्यसंबन्धे नाज्ञेनाग्निर्हेमन्ते वर्षास्वेव प्रशस्तः । [illegible] शरद्ग्रीष्मे तु सलिलं हेमन्ते शि
शिरे विषं । चैत्रो मार्गशीर्षश्चैव वैशाखश्च तथैव च ॥ एते साधारणा मासा दिव्यानामविरोधिनः । कोशस्तु सर्व
दा देयस्तुला स्यात् सार्वकालिकी ॥ कोशग्रहणं सर्वदिव्यानामुपलक्षणम् ॥ तुलावत्पुनः [illegible] विशेषानभि
धानात् सार्वकालिकः । संप्रति [illegible] तेनायमुक्तिः स्यात् [illegible] ॥ ७० ॥

74

दयावत्प्रभावेनतुल्यं तथा॥ नावरानैवसंख्यायां नमध्याने क्रमाच्चनेति। नहीनेतो पमन्तुः स्याद्स्य नहीनाङ्गानेन हीनेन
नत्रिस्वर्णालं ग्रहणं। [illegible] नोच्छ्रायते अभिशेषाचनमिसन्नोप्राण्य नालनानेन च प्रोष्य प्रानतो विधा
नमन्यस्यापि तुल्याद्येषय आद्यर्थः। प्रयोजनं नतुवक्ष्यते। [illegible] काशिख्यवस्था मातः [illegible] तुल्यास्त्री मातृव क्षेपः
गुणाह्मण रोगिणं। अभिजलं नाम दुस्त्ययवाः सप्तविंशस्यच। स्त्री स्त्री मात्रे जातिर्वस्त्राविक्रोषाणी इदेण॥
नालआषोडशा दृष्टी जातिवित्रिपार्णादरेण। वज्रं मोतिन्नावरः। जंघोने त्रविकलः। पंगुः पादविकलः। ब्राह्मणो
जातिमात्रे रोगी व्याधितः। एते वाक्रोधमार्थं तुल्ये वेति नियम्यते॥ अभिः पालस्तम्भ माषकृत्र क्षत्रियस्यैव
तुल्यमेव वैश्यस्य। शूद्रो वचारलो विषस्य वा ऊर्ध्वपरिमाणः सप्तैवमर्दस्यहो धनार्थं भवति ब्राह्मणस्य तुल्या
भिर्भीत मध्य दुस्त्ययवाः सप्तविंशस्य वेति विषविधाना पञ्चिर्जलं वेतिक्ष त्रियवैश्यविषये युक्तं। एतदेव
स्पष्टीकृतं पितामहेन। ब्राह्मणस्य घटो देयः क्षत्रियस्य तुलाग्निः। वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेदिति। यत्तु स्मादीनां द्विव्याणां वस्मर [illegible] णां॥ [illegible] सर्वतानां यत्कार्यानां अधिमायां नपाविना॥ स्त्री
लंगंच नमवेद्द्विजं यदि मीस्तं वेक्षितं तदा॥ तदुवा नान्यतरः कुर्यादितिविकल्पनितु सर्वे एतद्दुष्ठं भवति॥ अ
नवृभातिमोगे तु स्मादीनां नमभियो [illegible] क्तः त्वेभियोगानामेव दिव्यमेतेषां अभियोगस्येति। अनियोक्षण
मेवदिव्यं। परस्य शक्तिपयोजनेनु चिक ल्प एव। नत्रापितुल्ले वस्तने नमयचेवनन्नियमस्तेन तत्यामहलाम नारदीये
का भियोगिनां स्मादीनां तुल्ले वेति॥ एतच्च वचनं सर्वदिव्यसाधारणे पुमार्गशीरस्य त्र वैश्यारवेषु स्मादी
नां सर्वदिव्य सम्भवे प्राप्ते नियामक तयार्थवारः। नच्यसर्व कालेस्त्री तां तुल्ले वेति॥ स्त्री णानुतनविषमो [illegible]

वयो४

ना०८य८
ना-८

75

१०८ ॥

नचाविमर्दितेकस्यतम् ॥ पञ्चमो सुरादिभिः साक्षसमन्तस्तत्र विचारयेदिति विषसलिलस्य नित्यं च पञ्चमो ग्राम्यादिभिर्भु
द्धिविधा नाह ॥ एवं बालादि धूपियोजनीयं ॥ तथाश्रावणेद्रानामपि नस्याः वेकालिकं स्तुलनियमः ॥ सर्वे
षामिव वर्णानां कोशशुद्धिर्विधीयते ॥ सर्वाण्येतानि सर्वेषां भालेण स्यविषयविनेति पितामहस्मरणं ॥
तस्मात्साधारणे भाले कृदिव्यसमवधानेतुलादिनियमार्थमेवेदं वचनं ॥ कालांतरे तुतत्कालविहितं सर्वे
षां ॥ तथाहि वर्षास्वग्निरेवस्य वैषां हेमंत शिशिरयोः सलिलं त्रिपादिव्यायाणमग्निविषयोर्विकल्पः ॥ ना
मृण्ग्नस्यवाग्निरेव नकदाचिदपिविषं । ओं मणस्य विषं विनेति प्रतिषेधात् ॥ ग्रीष्मशरदोः सलिलमेव ॥
एषं तुव्याधितनुशेषग्रस्यादिनिषेधः ॥ कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनां ॥ पित्तश्लेष्मवतां नि
त्यं विषं तु परिवर्जयेदिति ॥ तेषामस्मादिकालेऽविसाधारणं तुलाचैव दिव्यं भवति ॥ तथा तोयमग्निर्विषं
चैव दत्तव्यं बलिनां नृणामिति वचनात् ॥ दुर्बलानामपि सर्वथापि विधिप्रतिषेधादुल्कालानतिक्रमे
ण जाति वयोवस्था [illegible] नानि दिव्यानि देयानि ॥ ७ ॥ महाभियोगेष्वेतानी शीर्षकस्थे ॥ तत्राभियोगस्य य स्वेषः सं महत्वं
तद्दिदर्शयिमाह ॥ नासहस्राद्धरेत्फालं न विषं न तुलां तथा ॥ पणसहस्राद्दर्वाक्फालं न विषं तुलां न ग्राह्येत् ॥ मध्ये
वर्त्ति जलमपि यथोक्तं ॥ तुलादीनि विधीनतानि गुरुष्वर्थेषु दापयेदिति ॥ अत्र कोशस्याग्रहणं ॥ कोशमल्पेपि दाप
येदित्यल्पाभियोगेपि तस्य स्मरणात् ॥ एतानि च तानि दिव्यानि पणसहस्राद्दूर्ध्वमेव स्युरिति नार्वागर्थः ॥
नन्वेवंजलस्यादीनि पितामहेन दर्शितानि ॥ सहस्रे तु घटं दद्यात् सहस्रार्द्धे तथायसं ॥ अर्धस्यार्द्धे तु सलिलं तस्मा
र्द्धे तु विषं स्मृतमिति ॥ सत्यं ॥ तत्रेदं व्यवस्थीयते द्रव्यापहारे पातिसंभवति तद्विषयं पितामहवचनमितरद्व्यभि

॥ ७८ ॥

76

यं योगी व्यवहारवचनमिति। एतद्वचनद्वयं स्तेयमहासाहसविषयं। अपन्हवे तु विशेषो दर्शितः। साधने निर्देशस्यापन्हवे तु
त्रप्रमाणं तत्र कस्य देयं। स्तेयसाहसयोर्दिव्यं स्वल्पेऽप्यर्थे तु दातव्यं। सर्वद्रव्यप्रमाणं तु ज्ञात्वा हेम प्रकल्पयेत् [illegible] येत्। हेम
प्रमाणयुक्तं तु तदा दिव्यं नियोजयेत्। ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतं। अशीतेस्तु विनाशे वै दद्याच्चैव
हुताशनं। [illegible] पादाज्जलं देयं चत्वारिंशद्विनिर्णये घटः। त्रिंशद्धस्तविनाशे तु कोशपानं विधीयते। पंचविंश
त्यधिनाशे ततो ऽर्धस्य तंडुलाः। ततो ऽर्धार्धविनाशे हि स्पृशेत्पुत्रादिमस्तकान्। ततो ऽर्धार्धविनाशे तु लौकिकाश्च क्रियाः स्मृताः॥
एवं विचारयन् राजा धर्मार्थाभ्यां न हीयते। इति। हासंख्या सुवर्णानामित्यत्र सुवर्णशब्दः षोडशमाषाः सुवर्णशब्दः
परिमाणवचनः। नानाद्रव्यस्यापन्हववचनः। नाश सहस्राद्धरेद्दिव्य च तु ताम्रिकपणसहस्रं बोद्धव्यं। ननु
पञ्चाद्धेतु पातकेषु नानि दिव्यानि। तत्र कथं नाश सहस्राद्धरेत् स्वल्पमित्येन आह। नृपार्थेष्वभिशापे च वहेयुः शु
चयः सदा। नृपद्रोहे सुमहापातकाभियोगे च सदा दिव्यं संख्यामनपेक्ष्यैव दिव्यानि कुर्युः। उपनासान्निकृष्ट
पः संतः। तथा सिद्धो विशेषोऽपि नारदेनोक्तः। सभाराजकुलद्वारे देवतायतनचत्वरे। निर्देयानि चलः कृत्वा पूर्वमा
त्या तुलेपमेरिति। निर्देयो घटः। व्यवस्थानिकासायनेनोक्तः॥ इन्द्रस्थाने प्रिंगुस्थानां महापातकिनां नृणां॥
नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत्। प्रातिलोम्यप्रवृत्तानां दिव्यं देयं चतुष्पथे॥ अतोऽन्येषु तु कार्येषु सभामध्ये
विदुर्बुधाः। अस्पृश्याधमदासानां म्लेच्छानां पापकारिणां। प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि। तत्सासिद्ध
दिव्या [illegible] नि संश्रूयते तेषु निर्दिशेदिति॥ २२। इति दिव्यमातृकां। एवं सर्वदिव्योपयोगिनीं दिव्यमातृकामभिधाय
दानीं घटादिदिव्यानां प्रयोगमाह। तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः। प्रतिमानसमीभूतो रेखां कृ

77

४४ सैंतेविंत्रोनप्रतिमा नैंदशायां दिशस्थतत्ले ऽवस्थितस्तस्मिन् पांडुल्लेखेनांकयित्वा। वतारितस्तुलामभिमंत्रयेत्। प्रार्थयेतानेन मंत्रेण॥ त्वं तुले सत्यधामा

समीकरण

॥७३९॥ सावतारिता॥ त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता। तत्सत्यं वद कल्याणि संशयान्मां विमोचय॥ यद्यस्मि पापकृन्मातः ततो मां त्वमधो नय। शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमंत्रयेत्॥ तुला या धारणं तोलनं येविंदंति सुवर्णं शार प्रभृतय स्तेः प्रतिमाने नमस्तादिना समीभूतः समीस्थित तुला मामित्रो धिरूढे पि पुरुषो भियोक्ता वादिश्च कारीते संवाह्य सायेन विनिर्मिता। तत्सत्यं वद कल्याणि संशयान्मां विमोचय। यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय। शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमंत्रयेत्॥ हे तुले त्वं सत्यस्य स्थानमसि। पुरा आदिसृष्टौ देवैर्हिरण्यगर्भादिभिर्नि मिता प्रादिता॥ तत्तस्मात्सत्यं संदिग्धार्थस्य स्वरूपं वद दर्शय॥ कल्याणि शोभने अस्मात्संशयान्मां विमोचय। हे मातर्यद्यहं पापकृदस्मि वा यद्यस्मि ततो मां त्वं अधो नय। अथ शुद्धः सत्यवादी स्थितस्ततो मामूर्ध्वं गमय। प्राड्विवाक

ग

न८
इदं८

स्य तुलाभिमंत्रणमंत्राः समस्तं तरो लाभ श्चैयतु दिव्यकारिणः जयपराजयलक्षणं मंत्र लिंगादवगम्यते इति नष्टधर्तुलेष्वट निर्मार्पणं पुनरारोहणाद्यर्थसिद्धमेव पितामहनारदादिभिः स्पष्टीकृतमेवा॥ तद्यथा॥ पितामह तुलानियं वक्ष्यं प्रवक्ष्यामि सर्वदा। प्रणम्य लोकपालेभ्यस्तत्कार्यामनीषिभिः। मंत्रः सोमपीवानस्यस्य वेदने लाकार्या मादोस्वोपरिन समो॥ अंतरं नुतयोर्हस्तो भवेद्दश कुमेव वा॥ हस्तद्वयं निखेयं तु पादयोरुभयोर पि॥ तोरणे च तथा कार्ये पार्श्वयोरुभयोरपि॥ धर्मतस्तेभ्यो नान्ति संदर्शमिरंगुलैः। अवलंबी चकर्त्तव्यौ तोरणात्पाम धोमुखौ॥ मन्मयौ सूत्र संबद्धौ पटमस्तकसुविनौ॥ प्राङ्मुखं निश्चलः कार्यः शुचौ देशे घट स्यथा॥ शिक्यद्वयं समासज्यं पार्श्वयोरुभयोरपि। प्राङ्मुखान् कल्पयेत्प्राज्ञः शिक्ययोरुभयोरपि। पश्चिमे तोल

॥७३९॥

78

विस्तारे मण्डपस्येष्य त्रिकोणं शुभं ॥ पिटकं हस्तयेन त्रिमिनिष्कमात्रा वपांशुभिः ॥ अन्नचयस्तिके हैमावं ... पांसुनांविकल्पः ॥ परीक्ष का० ९

कानि युक्त्या ... तुलामान विस्तारतः ॥ यत्लिङ्गोरे ... कांस्य ... मात्रायैव च ॥ मार्गः परीक्ष केनि समवर्णसमोधयः ॥

उदकं चयपात्र ... परस्योपरि पूजितेः ॥ ... ततोलयित्वा नरं हर्षं पश्चात् ... तार्पयेत् ॥

यद्रंतु कारयेत्रित्यं पताका ... ध्वजतोरणैः ॥ ततआवाहयेद्देवान् विधिनानेन मंत्रवित् ॥ मादित्र ... तु दत्वि पेषि गंध

माल्यानुलेपनैः ॥ प्राङ्मुखः प्राञ्जलिर्भूत्वा ... ॥ एह्येहि भगवन् मेऽत्र स्थित्यर्थमद्भुत ... सहितो लोक

पालैश्च वरुणादित्य मरुद्गणैः ॥ आयातस्तु ततो धर्म पश्यन् दृग्ना निविन्यसेत् ॥ इंद्र पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा

वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा । अग्न्यादि लोकपालांश्च कोणभागेषु विन्यसेत् ॥ इंद्रः पीतो यमः श्यामो वरुणः

स्फटिकप्रभः ॥ कुबेरश्च सुवर्णाभ अग्निश्चापि सुवर्णभः ॥ तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रकाश्यते । ईशानस्तु ...

... अनन्तं मादिमानं । इंद्रस्य दक्षिणे पार्श्वे वसवोऽष्टौ ... ध्रुवो ... धरस्तथा सोम आपश्चैवानिलो नलः ॥

प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः । देवेशी ईशानयोर्मध्ये मादित्या ... ॥ धाता अर्यमा च मित्रश्च वरुणोंऽशु

र्भगस्तथा । इंद्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः । ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥ इत्येते द्वादशादित्या

नामभिः परिकीर्तिताः ॥ अग्नेः पश्चिमभागे तु रुद्रान् स्थापन मिष्यते ॥ वीरभद्रश्च शंभुश्च गिरिशश्च महायशाः ॥ अजैक

पादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भुवनाधीश्वरश्चैव कपाली च विशांपतिः ॥ स्थाणुर्भगश्च भगवान् रुद्रास्त्वेकादश स्मृ

ताः ॥ वैतेत्र रक्षो मध्येत्र मातृस्थानं प्रकल्पयेत् ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही चैव माहेन्द्री

चामुण्डा गणसंयुता ॥ निर्ऋते रुत्तरे भागे गणेशं स्थापनं विदुः ॥ वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ॥ ग

१४०८

गनस्पर्शो नोपस्पृशेल्लोमरन्ध्रस्था धा।। प्राणः प्राणेषु जीवेषु मरुतो ष्ठौ प्रकीर्तिताः।। यः स्पोत्तरभागे तु दुर्गामावाहयेद्बु
धः।। एता सां देवतानां च स्वनाम्ना पूजनं विदुः।। पूजानसानं चर्मा य दत्त्वा चार्घ्यादिकं क्रमात्।। अर्घ्यादि पञ्चदेवानां स
तां तं परिकल्पयेत्।। गंधादिकं नैवेद्यान्तं पश्चिन्त्य परिकल्पयेदिति।। अत्र च तु तोपनाको पूजा लक्षतां विधायत स्या
भा इहीति मंत्रेण धर्मस्य वा इह धर्मो धार्यकल्पयामि नमइत्यादि प्रयोगेणार्घ्यपाद्याच मनीय मधुपर्कं स्नानीयपुनरा
च मनस्त्रय मनोप वीताच यनी यमुकुटकटकादि भूषांतं दत्त्वा इदा दीनां दुर्गांतानां प्रणवादीन्नामभिश्च नुर्थ्यंतैर्न
मोंतैर्घ्याॅदि भूषान्तं पञ्चर्थीतु समयैर्दद्याद् धर्मादयो पञ्चव्यदीपनैवेद्यानि दद्यात् इंद्रादीनां गंधादीनि पूर्वेण हृदाल
गं च तु व्याणि च धन्यत्र जायां दत्त्वानि का पीति।। यथाऽह नारदः।। दत्त्वैर्गंधैस्तथा ल्पैश्च दूपाद्युपासितादिभिः।। अर्चयेत्तु
परं सर्वं नतः क्षिपेत् स्कंदपूजयेदिति।। इंद्रादीनां तु विशेषो नभिधानात् यथा लाभं दत्त्वै पूज्यो वीप्रजनमिति। पूजाक्र
मः।। एतत्सर्वं प्रातुरिहाकुः कुर्यो ऽक्षधोक्तम्।। प्रातु ... यात्सतोऽविप्रो वेदवेदांगपारगः।। मृतवृत्तोपसंतः शांत
चित्तो विमत्सरः।। सत्यसंधः सुनिर्दक्षः सर्वप्राणिहिते रतः।। उपोषितः शुद्धवासाः कृतदंतानुधावनः।। सर्वासां दे
वतानां च पूजां कुर्याद्यथाविधि।। तथा च वसिष्ठस्तु विश्वतस्तु दिक्षु लोकिकाग्नौ होमः कार्यः।। यथाह।। चतु
र्दिक्षु तथा होमः कर्तव्यो वेदपारगैः।। आज्येन हविषा चैव समिद्भिर्होमसाधनैः।। सावित्र्या प्रणवेनाथ स्वाहांतेनैव
व होमयेत्।। प्रणवादिर्गायत्री उच्चार्य पुनः स्वाहाकारांतं प्रणवमुच्चार्य समिदाज्य चरून् प्रत्येकमष्टोत्तरशतं जु
हुयादित्यर्थः।। एवं हवनांतो देवपूजां विधायानंतरमभिषु तमर्थं वक्ष्यमाणमंत्रसहितं पत्रे ... लिखित्वा तस्य त्रं
त्रो पश्चिमे गतं कुर्याद्।। यं चार्थमभिप्सुः स्वर्णादिषु लिखित्वा तेषु पत्रके।। मंत्रेणाने न सहितेन स्थापयेच्छिरोगतं।। मंत्र

न८

पं८

११५०

80

विज्ञाने॰ ॥कृष्णा॥

त्ता। आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च॥ अहश्च रात्रिश्च उभे च संध्ये धर्मो हि जानाति नरस्य
वृत्तं इति। एवं च धर्मावाहनादि शिरसि पत्रारोपणांतमनुष्ठानकांडं सर्वदिव्यसाधारणं॥ यथोक्तं॥ इमं मं-
त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत्॥ आवाहनं च देवानां तथैव परिकल्पयेदिति॥ अनंतरं प्राड्विवाको घटमा-
मंत्रयते॥ घटमामंत्रये शेषविधिना नैऋत्यामिति स्मरणात्॥ मंत्रश्च दर्शितो नारदेन॥ त्वं घट ब्रह्मणा सृष्टः परी-
क्षार्थं दुरात्मनां॥ धकारो धर्ममूर्तिः स्यात् टकारः कुटिलं नरं। धृतो भावयसे यस्माद्धटस्तेनाभिधीयते॥ त्वं वेत्सि
सर्वभूतानां पापानि सुकृतानि च॥ त्वमेव देव जानीषे न विदुर्यानि मानवाः॥ व्यवहाराभिशस्तोयं मानुषः
शुद्धिमि[illegible]ति॥ तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसीति॥ [illegible]। तेन तुले इत्यादिना पूर्वोक्तेन मंत्रेण तुला-
मामंत्रयते॥ अनंतरं प्राड्विवाकः शिरोगतपत्रकं शोध्यं यथास्थानं यथासन्निवेशं घटमारोपयेत्॥ पुनस्तोयप-
य सस्मिं [illegible] शिरोवस्थितपत्रकमिति स्मरणात्॥ आरोपिते च विनाडीपंचकं यावत्तथैवावस्थापयेत्॥ त-
त्कालपरीक्षां च ज्योतिःशास्त्राभिज्ञः कुर्यात्॥ ज्योतिर्विद्ब्राह्मणः श्रेष्ठः कुर्यात्कालपरीक्षणं॥ विनाड्यः पंचवि-
ज्ञेयाः परीक्षाकालकोविदैरिति स्मरणात्॥ दशगुर्वक्षरोच्चारणकालः प्राणः षट्प्राणो विनाडी॥ उक्तं च दशगु-
रुवर्णः प्राणः षट्प्राणाः स्याद्विनाडिका॥ तासां [illegible] घटी दीनां [illegible] आह [illegible] द्विप-
रीक्षार्थं [illegible] पुरुषा [illegible] कथयंति॥ यथोक्तं पितामहेन॥ साक्षिणो ब्राह्मणाः श्रेष्ठाः यथादृष्टार्थ-
वादिनः॥ ज्ञानिनो [illegible] सर्वे [illegible] इति॥ शुद्धिनिर्णय-
कारणं चोक्तं॥ तुलितो यदि वर्धेत स शुद्धः स्यान्न संशयः॥ समो वा हीयमानो वा न विशुद्धो भवेन्नरः॥ पितामहवचनं

न४

छ

81

ये कर्त्तव्य मन्यस्मिन्नस्त्रितिकं शुभं ॥ पिटकं दृढयेन स्मिन्निघ्नाया वपांसुभिः ॥ अन्न च च्छिद्रे हिं ग्राव ... पांसूनां विकल्पः ॥ परीक्ष
कानि शुल्कध्या ... तुल्यामानविधारतः ॥ यत्किंचिन्नोरेखयानास्य कोप्य सायास्तथैव च ॥ कार्यः परीक्षकैर्नित्यमवधं बल्मोपदः ॥
कुदकं च प्रमतन्यं अष्टस्योपरि पंक्तिते ॥ यस्मिन्न सुप्रतेतोयं रुचिरिद्येषः समोधरः ॥ तोलयित्वा नरं पूर्वं पश्चात् चभवेत् तार्पयेत् ॥
घटं तु धारयेन्नित्यं पताका ... ध्वजशोभितं ॥ ततो ब्राह्मणदेवान् विधिनानेन मंत्रवित् ॥ गंधैः ... तु पुष्पैर्धूपैर्गंध
माल्यानुलेपनैः ॥ प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥ एह्येहि भगवन् धर्म अस्मिन् दिव्ये समाविश ॥ सहितो लोक
पालैश्च वस्वादित्यमरुद्गणैः ॥ आवाह्य तु ततो धर्मं पश्चाद्यंगानि विन्यसेत् ॥ इन्द्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा ॥
वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा ॥ अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥ इन्द्रः पीतो यमः श्यामो वरुणः
स्फटिकप्रभः ॥ कुबेरस्तु सुवर्णाभ ... अग्निश्चापि सुवर्णाभः ॥ तथैव निर्ऋतिः श्यामो वायु ... ईशः शस्यते ॥ ईशानस्य
... इन्द्रस्य दक्षिणे पार्श्वे वसूनाराधयेद्बुधः ॥ ध्रुवो ... धरस्तथा सोम आपश्चैवानिलोऽनलः ॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥ देवेशीशानयोर्मध्ये मादित्यानां तथा ... यजेत् ॥ धातार्यमा च मित्रश्च वरुणों
भगस्तथा ॥ इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ॥ ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥ इत्येते द्वादशादित्या
नामभिः परिकीर्त्तिताः ॥ अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ॥ वीरभद्रश्च शंभुश्च गिरिशश्च महायशाः ॥ अजैक
पादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भुवनाधीश्वरश्चैव कपाली च विशांपतिः ॥ स्थाणुर्भर्गश्च भगवान् रुद्रास्त्वेकादश
स्मृताः ॥ प्रेतेशरक्षोमध्ये च मातृस्थानं प्रकल्पयेत् ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही चैव माहेन्द्री
चामुण्डा गणसंयुता ॥ निर्ऋतेरुत्तरे भागे गणेशाय ... ॥ वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ॥ ग

का १

82

तेहं स्तौ सप्तभिः सूत्रैर्नंतुभिरिति नारदस्मरणात्॥ तथा सप्तमी पत्राणि सप्तैव दूर्वापत्राणि चाक्षतांश्च दध्यक्तानक्षतांश्चाश्वत्थपत्रा
णां सुपरि विन्यसेत्॥ सप्त पिप्पलपत्राणि शमीपत्राण्यथाक्षतान्। दूर्वाः सप्त पत्राणि दध्यक्तान्याक्षतान्सप्त दिति स्मरणात्॥
तथा कुसुमानि च विन्यसेत्॥ सप्त पिप्पलपत्राणि अक्षतान्कुसुमानि दधि। हस्तयोर्निक्षिपेत् तत्र सूत्रेणावेष्टनं तथेति पितामह
महस्मरणात् ॥ ... पुष्पाणि वदपि स्मरणात् अपस्तंत्रं तु पा णिभ्यामर्कपत्रैः सह सप्तभिः। अंतर्हितं रक्तं कुर्यादक्षतं दध्यः सप्त
पत्रा ५ मेषप्रदति। तत्र सन्त्यक्षतां ... कं पत्र विषयं वैदितव्यं॥ अश्वत्थपत्राण्यपि तामहमुद्रां साधनेनमुख्यत्वाद्गमात्॥
पिप्पलाज्जायते वह्निः पिप्पलो वृक्षराट् स्मृतः॥ अतस्तत्पत्राणि हस्तयोर्निक्षिपेद्बुधः इतीकर्तव्यमपि मंत्र पापात्॥
त्वमग्ने सर्वभूतानामंतश्चरसि पावक। साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं करे मम॥ हे अग्ने त्वं सर्वभूतानां जरायुजा
ण्डज स्वेदजोद्भिजानामंतः शरीराभ्यंतरे चरसि उपयुक्तान्नपानादीनां पाचकत्वेन वर्तसे। पावकशुद्धिहेतो कवे। क्रांत
पु ८ दर्शिनः साक्षिवत्पुण्यपापेभ्यो सत्यं ब्रूहि पुण्यपापेभ्य इति ल्यब्लोपे पंचमी॥ पुण्यपापेभ्य उद्दिश्य सत्यं ब्रूहि दर्शयेत्यर्थः। अयःपिंडं पा ८
त्रिभिस्तापैस्तप्तं संदंशेन पुरत आनीते कर्मपश्चिममंडले प्राङ्मुखस्तिष्ठन्ननेन मंत्रेणाग्निमभिमंत्रयेत्। यथाह नारदः
अग्निवर्णमयःपिंडं सस्फुलिंगं सुरंजितं तापेत्तृतीये संताप्य बुधा सम्यक् पुरस्कृतमिति नारदस्याद्यः। लोहस्य धर्मलोहपिंडं सुतप्तं प ५
उदकेन क्षिप्य पुनः संताप्यादके निक्षिप्य तृतीयतापे संतप्तं संदंशेनाहृत्यादुरत आनीतेस्मिन्पुरस्कृतं सत्यमुक्तं त्वमग्ने
सर्वभूतानामित्यादि मंत्रं कर्ता ब्रूयात्। दिव्यकारी प्राड्विवाकस्तु मंडलभूभागाद्दक्षिणप्रदेशे लौकिकमग्निमुपसमाधायाग्नये पाव रं ३
काय स्वाहेत्साज्यं नाज्येनाष्टोत्तरशतं वा रंजु कुर्यात्। शांत्यर्थं जुहुयादित्यौत्य तमष्टोत्तरं वा तमिति स्मरणात्कृत्वा तस्मिन्न
ग्नावयःपिंडं प्रक्षिप्य तस्मिंस्तप्यमाने धर्मावाहनादि हवनांतं पूर्वोक्तं विधिं कृत्वा तृतीयतापे वर्तमानेयःपिंडं स्थमग्नि
मभिमंत्रे रक्षिमंत्र पते त्वमग्ने वेदाश्च त्वा रस्त्वं नयसे गुह्यते॥ त्वमुत्स सर्वदेवानां त्वमुखं ब्रह्मवादिनां॥ जठरस्थो हि भूतानां

॥४२॥

ततो वेत्सि मुखाम्बु ॥ पापं पुनासि वेदस्मात् तस्मात्पावक उच्यसे ॥ पावेषु दर्शयात्मानं मर्त्तिमान् नवपावक ।
सुशीतो भव कृतादाने ॥ त्वमग्ने सर्वभूतानामंतश्चरसि साक्षिवत् । त्वमेव देव जानीषे न विदुर्यानि मानुषाः ॥ अथ वा मुखिका वे
यं मानुषः शुद्धिमिच्छति । तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि रति ॥ अस्मिन् तत्रैतस्मिन् तद्वतो लोहं पंचाशत्पलिकं समं ॥ अ
ग्निवर्णं न्यसेत्पिंडं हस्तयोरुभयोरपि । तस्य कर्तुरिप्सुः कृतवताद्वमग्ने सर्वभूतानामिति यथाभिमंत्रणं कृत्वा ततो लोहं लोहवि
कारं पिंडं पंचाशत्पलिकं पंचाशत्पलमिति तंत्राग्निरहितं सर्वतः समवर्त्तिनं लक्षणं तत्पाष्टांगुलायामं । अस्त्रिहीनं समपंक्ता
अष्टांगुलमयोमयं पिंडं तु तापयेदग्नौ पंचाशत्पलिकं समम् इति पितामहस्मरणात् । अग्निवर्णमग्निसदृशं उभयोर्हस्तयोरा
रश्चत्थपत्रैः धिक्कुर्वीत घंतरितयोः न्यसेत् सप्तपत्रप्रादौ वाक्यं ॥ तत्र मिश्रुमोदस्मत आह ॥ तप्रमादायसप्तैव मंडलानि शनैर्व्रजेत्
सउरुषस्तमं लोहपिंडं अंजलिनारहा ॥ त्यासप्तमंडलानि शनैर्व्रजेत् । एकारेण मंडलेषु नवपद न्यासं मंडलानतिक्रमणं चरपि
ति ॥ यथाह पितामहः ॥ न मंडलमतिक्रामेन्नाप्यर्वाक् स्थापयेत्पदं इति । सप्तैव मंडलानि त्वा तेनायो व्रजेदित्युक्तं ॥ तत्रैकैकमंडल
किं प्रमाणकं मंडलयोरंतरं च किंप्रमाणमित्यत आह ॥ षोडशांगुलकं ज्ञेयं मंडलं तावदंतरं ॥ षोडशांगुलानि यस्य तत् षोडशांगु
लकं ॥ षोडशांगुलप्रमाणमेवो द्वयं मंडलयोरंतरं मध्यं च तावदेवैकांगुलमेव । सप्तमंडलान्यानि जेदिति वदता प्रथमं सप्तम
नमंडलमेकमुक्तमतः पाश्च मंडलानि षोडशांगुलकानि मंडलांतराणि तु सप्ततावन्मात्राणि । एतदेव नारदेनपरिसं
ख्यायोक्तं ॥ द्वात्रिंशदंगुलमाकुर्मंडलान्मंडलांतरं ॥ अष्टाभिर्मंडलैरेवमंगुलानां शतद्वयी ॥ चत्वारिंशत्समधिकं भूमेरंगुलमानतः इति
अयमर्थः ॥ अवस्थानमंडलात्षोडशांगुलान्मंडलांतरमन्यन्मंडलं द्वितीयाद्येकमेकं द्वात्रिंशदंगुलं सांतरालं तदेवमवस्थानमंडल
षोडशांगुलं ॥ गंतव्यानि च सप्तमंडलानि सांतरालानि द्वात्रिंशदंगुलानि एवं अष्टाभिर्मंडलैश्चत्वारिंशदधिकं शतद्वयं भूमेरंगुलमा
नतोंगुलमानमिति सार्वविभक्तिकस्तसिः । अस्मिंस्तु पक्षे प्रस्थानमंडलं षोडशांगुलं विधाय द्वात्रिंशदंगुलप्रमाणप्रमाणानां

ल ४ ॥४२॥

८४

सांतरालमंडलस्य भागा नामेकमेकं भस्मांगंहि भाविमज्यांतरालभूभागान्षोडशांगुलैन्तर्विहायमंडलभूभागेषु षोडशांगुलप्र
माणेषु गतं पदप्रमाणमिष्ट समंडलानिकार्याणि ॥ तथा तेनैवोक्तं ॥ मंडलस्य प्रमाणं तु कुर्यान्तत्सदृशं मित मिति । प्रथमं तामरुना
कं । कारयेन्मंडलान्यष्टौ पुरस्तान्नरमंतथा । आग्नेयं मंडलं चाथ द्वितीयं वारुणं स्मृतं । तृतीयं वायुदैवत्यं चतुर्थं यमदैवतं । पंचमं
त्रिंदैवत्यं षष्ठं कौबेरमुच्यते । सप्तमं सोमदैवत्यं सावित्रं त्वष्टमं तथा । नवमं सर्वदैवत्यं मिति दिक्षु विदिक्षु ॥ दाक्षिणात्यं दक्षु
भाकुमंडलानां मंडलान्तरं अष्टानां मंडलैरेवमंगुलानां शतद्वयं ॥ षट् चात्र समधिके सूर्येकपरिकल्प्यते । कर्तुः पदसमं कार्यं मंडलं
तुप्रमाणतः । मंडले मंडले देयाः कुशाः शास्त्रप्रणोदिताः इति । तत्र च मंसर्वदैवसमप [illegible] मितांगुलप्रमाणं विहाया मिर्मंडलैरष्टाभि
स्थांतरा [illegible] लैः प्रत्येकं प्रत्येकं षोडशांगुलप्रमाणैरंगुलानां षट्चात्रा दधिकं शतद्वयं संपद्यते । तत्रापि गंतव्यानि सप्तैव मंडलानि यतः
प्रथमे तिष्ठति नवमे क्षिपति इति न विरुध्यते ॥ अंगुलप्रमाणं च तिर्यग्यवोदराण्यष्टावूर्ध्वा व्रीहयस्त्रयः । प्रमाणमंगुलस्योक्तं
वितस्तिर्द्वादशांगुला । हस्तो वितस्तिद्वितयं दंडो हस्तचतुष्टयं । तत्सहस्रद्वयं क्रोशो योजनं तच्चतुष्टयं इति बोध्यं ॥
सप्तमंडलान्यतिक्रम्य तेषु तथैव स्थितस्तदाह । मुञ्चाग्निं मध्ये तत्री हि रयः पञ्चमंडलपरिमिति । अष्टमे मंडले स्थित्वा नवमे मंडले नि
तमयः पिंडसंज्ञका व्रीहीन्करात्भ्यां मर्दयित्वा [illegible] मंत्रेण कृष्णमाभ्युक्ष्य । [illegible] हस्तेन च दंडकरस्तुर्थी सिद्धं । यत्तु सं त्रासात्ससर
लेन हस्ताभ्यामन्यत्र दृश्यते । तथाप्यस्मद्देशे न प्रवर्तते ॥ यथाहकात्यायनः । प्र सवलन्न मिताश्वस्त स्त्रैस्तावनादन्यत्र दृश्यते ॥
अदग्धे तं विदुर्देवास्तस्य भूयो विधापयेत् ॥ अंतरा पतिते पिंडे संदेहे वा पुनर्भवेत् ॥ पदानि गत्वा नवमं मंडलादर्वाग्गे दपिंडः
पतति दग्धादग्धत्वे वा संशये स्तदा पुनर्दिव्यं स्यात् । प्राप्तमुक्तं । तत्रायमनुष्ठानक्रमः ॥ पूर्वेद्युः भूमिमुद्धृत्य पापार्पयेयुः मंड
लानि यथा शास्त्रं निर्माय मंडलाधिदेवता स्वतंत्रसंप्रज्याग्निमुपसमाधाय तां तिहोमं निर्वर्त्याग्नावयः पिंडं निधाय धर्मावा
हनादि सर्वदेवतापूजां निर्वर्त्य पोषितः स्नातस्यार्द्रवास स्तस्य प्रथमे मंडले तिष्ठतो व्रीहिमर्दनादिकं संस्कारं विधाय प्रतिज्ञापत्रं
समंत्रकं कर्तुः शिरसि बद्ध्वा अग्निदिवाकरस्तृतीयेतापेनिमंसि मंत्र्य न तयः पिंडं संदेशेन अहीत्वा कर्षीयमंत्रितं तस्यां जलोनिदध्यात् ॥

स्थाप्य १

त ८

दि ८

र २

हवनोत्तौ २

म १

प २

85

५२

।।४३।।

सोपि मण्डलानि सप्त गत्वा नवमे मण्डले प्रक्षिप्यात्। अधः स्तु द्रोण चति रत्सामर्थ्यविधिः॥ संप्रसन्न कविम्यिमाह॥ सत्येन माभिर
क्षस्व वरुणेत्यभिशाप्य कं॥ नाभिदघ्नोदकस्थस्य गृहीत्वोरू जलं विशेत् हे वरुण सत्येन माभिरक्षस्वेत्यनेन मन्त्रेणोदकमभि
शाप्याभिमन्त्र्य नाभिदघ्नोदकस्य नाभिप्रमाणोदके स्थितस्य पुरुषस्योरू गृहीत्वा शोध्यो जलं विशेत्। जले निमज्जेत्। ए
तच्च वरुणपूजायां सर्वांगंधमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः वरुणाय नमः इति पूजां कृत्वा मादौ समाहृत इति नारदस्मरणं॥
न च वरुणपूजायां सर्वांगंधमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः वरुणाय नमः
पालं तथा साधारणधर्मेषु धर्मार्था ह नादि सकल देवतापूजा होम समं चक्रप्रति सापत्र विशेषेति वेशानां तेषु तत्तु चातोय
स्वंप्राणिनां प्राणाः सत्येश्वर्ये तु निर्मितं। शुद्धेश्च कारणं प्रोक्तं तथा नारदेहि नातथा। अनत स्व दर्शयात्मानं शुभाशुभपरीक्ष
णंपिति प्राड्विवाकैर्भिमन्त्रणं कृते तोयम्। सत्येनाभिरक्षस्व वरुणेत्युदके प्रार्थयते। उदके स्थानाभिच्च नारदे नोक्तानि
नदीषु तनुवेगासु सागरेषु वहेषु च। ह्रदेषु देवखातेषु तडागेषु सरःसु चेति॥ तथापि तामहेनापि। स्थिरतोये निमज्जेत
न ग्राहिणि न च ल्पके। तृणशैवालरहिते जलौकामत्स्यवर्जिते। देवखातेषु यत्तोयं तस्मिन्कुर्याद्धि शोधनं आहार्यं
वर्जयेन्नित्यं शीघ्रगासु नदीषु च। आविष्टो तत्सलिलेनित्यं समर्मिपंकविवर्जितमिति॥ आहार्यं तडागादिस्थं आहृतं नाम्नक
पाहादिषु तं जलेनाभिप्रमाणोदकस्थस्य तिपञ्च हस्तादूर्ध्वं मध्यमस्वनीमवस्थ्यमा अङ्गुरि स्तिष्ठेत्। पर्ण
स चेतिस्म रणात्। ननु इति कतीयामस्त तआह। समकालमिषुं मुक्तं मानीयान्यो जवी नरः। गते तस्मिन्निमग्नां गं पश्येत् स शुद्धिमा
प्नुयात्। निमज्जनसमकालगते तस्मिन्नपि स्मेकस्मिन्पुरुषे अन्यो जवी शरपातस्थानं स्थितः पूर्वमुक्तमिषुमानीय जले निमग्नां
गं पदि पश्यति। तदा शुद्धो भवति। एतदुक्तं भवति। त्रिषु शरेषु मुक्तेषु वेगवानुमध्यशरपातस्थानं गत्वा तमादाय तत्रैव तिष्ठ
ति। अन्यस्तु पुरुषो वेगवान्शरमोक्षस्थाने तोरणमूले तिष्ठति। एवं स्थितयोस्तत्ती यस्यां करतालिकायां शोध्यो निमज्जति
तत्समकालमेव तोरणमूलस्थितोपि द्रुततरं मध्यमशरपातस्थानं गच्छति। शरग्राही च तस्मिन्नुपागते द्रुततरं तोरणमूलं

५४ ।।४।। २

उदके प्राङ्मुखस्तिष्ठेत्

स्थ३ चि४ ना७

माप्यां तर्जलगतं यदि पश्यति तदा शुद्धो भवति एतदेवस्पष्टीकृतं पितामहेन। गंतुश्चापि नरः कुर्याद्गमनं समं गमनमज्जने।
गच्छेत्तोरणमूलात्तु लक्ष्यस्थानं जवेन वीरः। तस्मिन्गते द्वितीयोपि वेगादादाय सायकं। गच्छेत्तोरणमूलं तु यतः स पुरुषो गतः
आगतस्तु शरग्राही न पश्यति यदा जले। अंतर्जलगतं सम्यक् तदा शुद्धिं विनिर्दिशेत् इति। जविनोश्च पुरुष यो त्रि
शरणं कृतवता रदेन। पंचाशतो धानुष्कानां योस्यातामधिको जवे तो च तत्र नियोक्तव्यौ शरानयनकारिणौ इति। तोरणं च
निमज्जनसमीपस्थाने समे श्रोत्रप्रकर्णप्रमाणोच्छ्रितं कार्यं। गत्वा तु तत्र लक्ष्यस्थाने तदे तोरणमुच्छ्रितं कुर्वीत कर्णमात्रं तु भू
मिभागे समे शुचौ विना रदस्मरणात्॥ शरत्रयं वेणवं च धनुर्मंगलद्यैः पुष्पादिभिः प्रथमं पूजयेत् शरान् संपूजये
त्पूर्वं वैणवं च धनुस्तथा। मंगलैर्धूपपुष्पैश्च ततः कर्म समाचरेत् इति पितामहवचनात्। धनुषः प्रमाणं लक्ष्यस्थानं च
नारदेनोक्तं। क्रूरं धनुः सप्तशतं मध्यमं षट्शतं स्मृतं मंदं पंचशतं ज्ञेयमेष ज्ञेयो धनुर्विधिः॥ मध्यमेन तु चापेन प्रक्षिपेत्तु शरा
रत्रयं। हस्तानां च शताने सार्धे लक्ष्यं तु विचक्षणाः। न्यूनाधिके तु दोषः स्यात् क्षिप्यतः सायकास्तथेति। अंगुलानां सप्ता
धिकं शतं क्रूरं धनुः एवं शीघ्रं तपन शतं। एवं चैवाद नांगुलाधिकं हस्तचतुष्टयं क्रूरस्य धनुषः प्रमाणं। मध्यमस्या
धिकं शतं क्रूरं धनुः एवं ... सकृत्सप्ततिशराख्यानाय साध्यावेपाः कार्याः शरास्त्वालाय सायास्तु प्रकुर्व
शांगुलाधिकं मंदस्य नवांगुलेऽधिकमिति ... क्षिपेदिति स्मरणात्। क्षेप्ता क्षत्रियस्तु छिन्न आलसिपः सोपवासो नियोक्त
तविमुच्ये॥ वेणुकांडेन यामश्च दक्षेप्मा तु सुदृढं क्षिपेदिति स्मरणात्। क्षेप्ता क्षत्रियः शांतः सोपवासस्ततः क्षिपेत् इति। त्रिशुमुक्ते
व्यः। यथाह। क्षिप्नाच क्षत्रियः प्रोक्तः सा हन्ति ब्राह्मणोपि वा। अक्रूरहृदयः शांतः ... दानात्। मध्यमशरो ग्राह्यः पुरुषेणाबली सेति वचनात्।
षु मध्यमः शरो ग्राह्यः तेषां च प्रेषितानां च शराणां वा ... वार स्पृपतनं ग्राह्यं सर्पणं तु विसर्जयेत्। सर्पन् सर्पन् शरोऽपा
तत्रापि पतनस्थानादानेतव्यो न सर्पणस्थानात् ... रक्षोनक नीयः। दृष्टुं न प्रक्षेपेत् विषमान् मारुते चा
याद्दृढतरत्वनवचनात्। वातेच प्रवाति विषमादिदेशे च शरक्षेपोन कर्तव्यः ... पिवामति॥ १०

87

॥ ४५ ॥

विषमे भप्रदेशेतु वृक्षस्थाणुसमाकुले। तृणगुल्मलतावल्लीपंकपाषाणसंयुते इति पितामहवचनात्। भिमनांगपक्षेत्रेष्ठु
द्रुमाभ्रुयदिति वदताउन्मज्जितांगस्यास्तु द्विदर्शिता॥ स्थानांतरागमनेचास्तु द्विः पितामहेनोक्ता। अन्यथानविशुद्धिस्यादेकां
गस्यापि दर्शनात्। स्थानाद्धान्यत्रगमनाघस्मिन् पूर्वं निवेशितं इति एकांगस्यापि दर्शनादिति चूर्णार्थेन प्रायेणद्विरेवा
त्रंतु दृश्येत न कर्णौ नापि नासिका॥ अस्तु प्रवेशनेयस्य मुद्धृतमपि निर्दिष्टं इति विशेषाभिधानात्। अयमत्र प्रयोगक्रमः। उक्त
लक्षणजलाशय सन्निधावुक्तलक्षणं तोरणं विधायोक्तप्रमाणे दशोल्ल स्थाने धायमनोरणासन्निधौ सशरं धनुः संहृत्य
जलाशयेव रुणमावास्य पूजयित्वातत्तीरे धर्मादीन्यदे वौहनांतमित्युक्तोध्यस्य स्थिरसि प्रतिज्ञापत्रमाबध्य प्राड्वि — न ६
कोजलमभिमंत्रयते। नोयत्वं प्राणिनां प्राणाइत्यादि मंत्रेण अघमोधः सत्यमित्यादिनामंत्रेणजलमभिमंत्र्याहतस्तृण — रे ८ पुरु
पास्यनाभिमात्रोदकावस्थितस्यबलीयसः पुरुषस्य समीपमुपसर्पति अथयत्रो पुत्रे मुक्तेषुमध्यमशरपातस्थानेमध्यमंत्रां
रं गृहीत्वाजविनैकस्मिन् पुरुषे स्थिते अन्यस्मिन् स्वतोरणमूले स्थिते प्राड्विवाकेन तालत्रये दत्ते युगपद्धते — नम
ज्जनमध्यशागानयनाभितः॥ इत्युदकविधिः॥ ७॥ इदानीं विषविधिमाह। त्वं विष ब्रह्मणः पुत्र सत्यधर्मेषु वस्थितः। त्रायं
स्वास्मादभीशापात्सत्येनाभव मेमृतं। एवमुक्त्वाविषंशाई भक्षयेद्धिमशैलजं। यस्य वेगो विनाजीर्येच्छुद्धिं तस्यविनादि
शेदिति॥ तद्विषं प्रागाद् मंत्रेणविषमभिमंत्र्य कर्तावि प्रहिमशैलजं भृंगमप्रमवं भक्षयेत् — अभक्षितं यस्यविष — व ५
वेगो विनाजीर्यति समशुद्धो भवति। तेषां च लक्षणानि पृथग्गौविषतंत्रे कथितानि। वेगोरोमांचमथोस्वयनि विषजः स्वेदवक्त्रोप
शोषौ तस्याङ्कस्तत्सु रौक्षो वपुषि जनयतो वर्णभेद प्रवेपौ। यो वेगः पंचमो सो नयन निवशतां कंठभंगं च हिक्कांषष्ठो निश्वास
मोहौ वितरति च मृतिं सप्तमो भक्षकस्येति। अत्र च महादेवस्य पूजा कर्तव्या। यथाह नारदः। दद्याद्धिषं सोपवासो देवब्राह्मणसन्निधौ धूपोपहारमंत्रैश्च अर्चयित्वा महेश्वरं इति प्राड्विवाकः कृतोपवासो महादेवं प्रजयित्वा तस्यपुरतो विषस्य वस्त्रा
पासन्निधौ धूपोपहारमंत्रैश्च अर्चयित्वा महेश्वरं इति प्राड्विवाकः कृतोपवासो महादेवं पूजयित्वा तस्य पुरतो विषस्य वस्त्रा —
जां १ प्यधर्मादिदृष्टं हवनांतं विधाय जनितापत्रं शोध्यस्य शिरसि संनिधाय भिमंत्रयते। त्वं विषब्रह्मणास्त्वं परीक्षार्थं दुरासनां।

× विषवेगो नाम धातोर्ध्वांतरप्राप्तिः॥ धातोर्ध्वांतरप्राप्तिर्विषवेग इति स्मृतिवचनात्॥ धातवश्च त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणीति सप्त॥ एवं च स× ॥ ४५ ॥
× प्तैव विषवेगा भवंति × ५

88

पापान्तां दूर्व्यायात्मानं कुप्तानाम न्यतं भव ॥ मत्स्यमूर्त्ते । विषत्वं हि ब्रह्मणा परिनिर्मितं । त्रायस्वैनं नरं पापात्सत्येनास्यामृ
तं भवेति । एवमभिमंत्र्य दक्षिणाभिमुखसंस्थिताय दद्यात् । नारदवचनात् । द्विजानां संनिधावेव दक्षिणाभिमुखसंस्थिते ॥
उदङ्मुखः प्राङ्मुखो वा विषं दद्यात्समाहितः ॥ विषं च वत्सनाभाद्यिमालयं । शृंगिणो वत्सनाभस्य हिमजस्य विषस्य वा ।
इति पितामहस्मरणात् । वर्ज्यानि च तेनैवोक्तानि । चारितानि च जीर्णानि कृत्रिमाणि तथैव च । भूमिजानि च सर्वाणि विषा
णि परिवर्जयेदिति ॥ तथा नारदेनापि । व्यक्तं च चारितं चैव धूपितं मिश्रितं तथा । कालकूटमलाबुं च विषं यत्नेन वर्जयेत्
कालमप्य नारदेनोक्तः ॥ तोलयित्वेप्सितं काले देयं नाद्रहिमागमे ॥ नापराह्णे न मध्याह्ने न संध्यायां तु धर्मवित् । कालांतरेल्ल
क प्रमाणाद्द्व्यं देयं । वर्षे चतुर्यवा मात्रा ग्रीष्मे पंचयवाः स्मृताः । हेमंते स्य सप्तयवा शरद्यल्पास्ततोपि हि इति स्मरणात्
अ ल्पा रतिषट्कयवा इस्यः हेमंतग्रहणेन शिशिरस्यापि ग्रहणं । हेमंतशिशिरयोः समासेनेति स्मृतेः । वसंतेपि सर्वं द्व
साधारणत्वेपि सप्तयवाः । विषं च घृतप्लुतं देयं । नारदवचनात् । विषस्य पलषड्भागो भागो विंशतिमस्तु यस्तेनमष्टभागही
नं तु ग्रीष्मे [illegible] घृतप्लुतमिति । पलं चात्र चतुःसुवर्णिकं तस्य षष्ठो भागो दशमाषाः द्रायवाश्च भवंति त्रियवं ते च कृष्णलं । पं
च कृष्णलिको माषः षट्सु एको माषः पंच द्रायवाः भवंति । एवं दशानां माषाणां म यवाः सार्द्धशतं भवंति । सर्वे च द्रायवा इति षष्ठ्य
धिकं शतं यवाः पलस्य षष्ठो भागस्तस्माद्विंशतिमो भागोऽष्टयवास्तस्याष्टभागहीन एकयवस्तं विंशतिमं भागं सप्तयवं घ
तप्लुतं दद्यात् । घृतं विषात्त्रिंशगुणितं ग्राह्यं । सर्वाङ्के शीतले देशे विषं देयं तु देहिनां । घृतेन योजितं श्लक्ष्णं विषात्त्रिंशगुण
न्वितं इति कात्यायनवचनात् ॥ त्रिंशगुणेन घृतेनान्वितं विषं । शोध्यमथ कुरु कादिभ्यो रक्षणीयः । त्रिरात्रं पंचरात्रं वा पु
रुषैः स्वैरधिष्ठितं । कुहकादिभयात् राजा धारयेद्दिव्यकारिणं । औषधीर्मंत्रयोगांश्च मणीनथ विषापहान् । कर्त्तुः शरीर
संस्थांस्तु गदाटोपनाशमरक्षयेद् इति पितामहस्मरणात् । तथा विषमपि रक्षणीयं वार्तार्ङ्ग हैमवनं शस्तं गंधवर्णरसा
न्वितं । अकृत्रिममसंयुक्तं मंत्रोपहतं च यदिति स्मरणारणात् । तथा विषपीते यावत् तत्र करतालिकाशतं पंचकं ना

२८

हार

हीन ६

॥ ४५ ॥

वत्सरं तीक्ष्णीयोनंतरं चिकित्सनीयः। यथाह नारदः॥ पंचतालत्रयानंकालं निर्विकारो यदा भवेत्। तदा भवति संशुद्धस्ततः कुर्यात्चिकित्सितमिति पितामहेनानुदितो तोयः वधिस्तु कोत्यमात्रविषयः। भक्षितेन च यदा स्वस्थस्यात्स्वर्धी च्छर्दीविवर्जितः निर्विकारो दिनस्यांते शुद्धं तमपि निर्दिशेत्। अत्र प्राड्विवाकः सोपवासो महादेवं समभ्यर्च्य तत्पुरतो विषं स्थापयित्वा धर्माधिष्ठातृदेवता रक्षिप्रतिज्ञापत्रं निधाय विषमभिमंत्र्य दक्षिणामुख स्थिताय विषं प्रयच्छति। स च त्रोध्यो विषमभिमंत्र्य भक्षयतीति क्रमः॥ छ॥ इति विषविधिः॥ छ॥ कोषविधिमाह॥ देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाव[...]। संश्राव्य पाययेत्तस्माज्जलात् तु प्रसृतित्रयं। उग्रान्देवान् दुर्गादित्यादीन् समभ्यर्च्य गंधपुष्पादिभिर्धूपयित्वा संस्नाप्य तत्स्नानोदकमाहरेत्। आह स च॥ तोयं च प्राणिनां प्राण इत्यादिना ततोयं प्राड्विवाकः संश्राव्य त्रोध्ये जलच ससेतुमा [...] भिरसत्वं वरुणेत्यनेनाभिमंत्रितं पाययेत्प्रसृतित्रयं। एतच्च साधारणधर्मेषु धर्मावाहनादिसकलदेवताभ्यर्चा होमसमंत्रकप्रतिज्ञापत्रशिरोपितवेद्यानां तेषु सत्सु। अत्र स्नाप्य देवतानियमः कार्यनियमोऽधिकारिनियमश्च पितामहादिभिरुक्तः॥ यः कोयोप स्यदेवस्य पाययेत्तस्य तज्जलं। तदभावे तु देवानामादित्यस्य तु दापयेत्। दुर्गायाः पाययेच्चौरान् ये च शस्त्रोपजीविनः। भास्करस्य तु पत्नोयं ब्राह्मणं तत्र पाययेत्॥ दुर्गायाः स्नापयेच्छूलं आदित्यस्य तु मंडलं। अन्येषामपि देवानां स्नापयेदायुधानि तु इति देवतानियमः॥ विस्रंभे सर्वशंकासु संधिकार्ये तथैव च। एषु कोपः प्रदातव्यो नित्यं चित्तविशुद्धये इति कार्यनियमः। पृथ्वीके सोपवासस्य स्नातस्याद्रपटस्य च। सम्यस्यायसनिनः कोशपानं विधीयत इति। समृकआ लिकः। मद्यपस्त्रीव्यसनिनां कितवानां तथैव च। कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः। महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते। नास्तिकव्रात्यदासेषु कोशपानं विवर्जयेदिति। महापराधो महापातकं निर्धर्मो वर्णाश्रमधर्मरहितः पाषंडीकुत्सितः प्रतिलोमजः दासाः केवलं तीर्थसंधिकारिनियमः यथा गोमयेन मंडलं कृत्वा तत्र शोध्यमादित्याभिमुखं स्थापयित्वा पाययेदिति च नारदवचनादवगंतव्यं यथाह॥

ति१

॥ ४५ ॥

९०

तमाह॥ याभिराप्तंतु मंडलंभ्यं नरैस्थितं। आदित्याभिमुखं दत्त्वा पापयेत्कस्तनित्रयामिति॥ ननु तुलादिषु विषांतेषु स
मपनंतरमेवमुख्यासुद्धिविभावनाकोरोतु कथमिसतआह॥ अर्वाकुचतुर्दशादन्हो यस्य नोराज दैविकं॥ व्य
सनंजायतेघोरं समुद्रस्यान्न संशयः॥ चतुर्दशादन्हः पूर्वं यस्य राजकं राजनिमित्तं दैविकं दैवप्रभवं व्यसनं दुरवं
महत् नोनैवजायते। अस्य स्यदेहिनो अपरिहार्यवां स शुद्धो वेदितव्यः। ऊर्ध्वं पुनरवधेर्नदोषः॥ यथाह नारदः
ऊर्ध्वंयस्यद्विसप्ताहाद्वैकृतंतुमहद्भवेत्। नाभियोज्यः स विदुषा कृतकालव्यतिक्रमात्॥ इस यदर्थे स्मितिमे वा कं॥
अर्वाकुचतुर्दशादह्न इत्येतन्महाभियोगविषयं। महाभियोगेष्वेतानिशीर्षकस्थे अभियोक्तरि
पितामहेनोक्ताः अल्पविषयाणि कोशमल्पेपदाप ये दैस्मरणात्॥ तानि च॥ त्रिरात्रात्सप्तरात्राद्वा द्वादशाहाद्विस
प्तकात्॥ वेदनं यस्य दृश्येत नपापकृत्स उदाहृत इति। महाभियुक्त इत्यादर्थाचीनं द्रव्यं त्रिधा विभज्य त्रिरात्रा घपिपृथक्पंच
वकल्पनीयः॥ इति कोशविधिः॥ तुलादीनि कोशांतानि पंच महादिव्यानि यथोदितेयोगीश्वरेण व्याख्यातानि। अन्यत्र तेल्पा
भियोगविषयाण्यन्या न्यपिदिव्यानि कथितानि॥ यथाह पितामहः॥ तंदुलानां प्रवक्ष्यामि विधिं भक्षणचोदितं॥ चौरे तु तंदु
लादेयान्यस्येति विनिश्चयः॥ तंदुलान्कारयेच्छुक्लान्शालेर्नान्यस्य कस्यचित्॥ मन्मयेभाजने कृत्वा आदित्यस्याग्रतः
शुचिः॥ स्नानोदकेन संमिश्रान्रात्रौ तत्रैव वासयेत्॥ प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकं॥ तंदुलान्भक्षयि
त्वा तु पात्रे निष्ठीवयेत्ततः॥ पिप्पलस्य तु नान्यत्र अभावे भूर्ज एव तु। लोहितं दृश्यते यस्य हनुस्तालु च शीर्यते॥ गात्रं च कं
पते यस्य तमशुद्धं विनिर्दिशेत्॥ इतिशिरोरोपितपत्रकं तंदुलान्नि थीरपेत् इति प्राड्विवाकः। भक्षयित्वेति व्यंताशिविरूपं॥
सर्वदिव्यसाधारणं च धर्मीयाहनादिपूर्ववदिहापि कर्त्तव्यं॥ ७॥ इति तंदुलविधिः॥ तप्तमाषकविधिः पितामहेनोक्तः॥
सौवर्णे राजते वापि ताम्रे वा षोडशांगुलं॥ चतुरंगुलखातं तु मृन्मयं वापि मंडलं॥ वर्तुलमित्यर्थः॥ पूरयेद्घृततैलाभ्यां विंशत्या

ना६

ति६

॥९६॥ ५० तुले सुतन्॥ सुवर्णमाषकं तस्मिन् सुतप्ते निक्षिपेत्ततः॥ अंगुष्टांगुलि योगेन उद्धरेत्तप्तमाषकं॥ करौ प्रमृज्य नद्युत्पादितस्फो
टो वा न जायते॥ शुद्धो भवति धर्मेण निर्विकारकरांगुलिः॥ उद्धरेदिति वचनात्पात्रादुत्क्षेपणमात्रं। नबहिः प्रक्षेपणमादर
णीयं॥ अपरः कल्पः। सौवर्णे राजते ताम्रे आयसे मन्मयेपि वा॥ गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः॥ सौवर्णीं राजतीं
ताम्रीमायसीं वा सुशोधितां। सलिलेन सकृद्धौतां प्रक्षिपेत्तत्र मुद्रिकां॥ भ्रमद्वीचितरंगाढ्ये सनखस्पर्शगोचरे॥ परीक्षेता
ईप[…]पात्तुरूकारं सघोषकं। ततश्चानेन मंत्रेण सकृत्तदपि मंत्रयेत्॥ परं पवित्रममृतं घृत त्वं यज्ञकर्मसु। दह पावक
पापं त्वं हिमशीतं शुचौ भव॥ उपोषितं ततः स्नातमार्द्रवाससमागतं॥ ग्राहयेन्मुद्रिकां तां तु घृतमध्यगतां तथा। प्रदेशिनीं च
तस्याथ परीक्षेयुः परीक्षकाः॥ यस्य विस्फोट न जायंते शुद्धोसावन्यथा शुचिरिति॥ अत्रापि धर्मराहस्यापनुसंधानवधं
तानुमंत्रणं प्राड्विवाकस्य। त्वमग्ने सर्वभूतानामिति शोध्यस्याग्नेरभिमंत्रणमंत्रः॥ प्रदेशिनीं परीक्षेयुरिति वचनात्
देशिन्येव मुद्रिकोद्धरणं॥ इति तप्तमाषविधिः॥ ९४॥ धर्माधर्मस्य दिव्यविधिं पितामहेनोक्तः। तथा च। अधुना संप्रवक्ष्यामि
धर्माधर्मपरीक्षणं। हंतॄणां याचमानानां प्रायश्चित्तार्थिनां नृणां॥ हंतॄणामपि साहसाभियोगेषु याचमानाभिशप्ता[…]मो
गेषु प्रायश्चित्तार्थिनामभिशप्तपातकाभियोगेषु॥ राजतं कारयेद्धर्ममधर्मं सीसकायसमिति॥ प्रतिमाविधानं सीसकं वा
आयसं चेति॥ पक्षांतरमाह॥ लिखेद्भूर्जे पटे वापि धर्माधर्मौ सितासितौ॥ अभ्युक्ष्य पंचगव्येन गंधमाल्यैः समर्चयेत्॥ सितपु
ष्पस्तु धर्मः स्यादधर्मोसितपुष्पधृक्॥ एवं विधायोपलिप्य पिंडयोस्तौ निधापयेत्॥ गोमयेन मृदा वापि पिंडौ कार्यौ समं ततः॥
मृद्भांडकेनुपहते स्थाप्यौ चानुपलक्षितौ॥ उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ॥ आवाहयेत्ततो देवान् लोकपालांश्च पूर्व
वत्॥ धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत्॥ ततो यदि पापविमुक्तो हं धर्मस्त्वायातु[…]मेकरे इति अभिशस्तमभिमंत्रयते॥
अभियुक्तः सा[…]योश्चैकं प्रगृह्णीताविलंबितः॥ धर्मे गृहीते शुद्धः स्यादधर्मे तु स हीयते॥ एवं समासतः प्रोक्तं धर्माधर्मपरीक्षणमिति॥

92

इतिधर्मोपन्नहिप्यविधिः॥ ७॥ अन्येच शपथा अल्पमहत्त्वविषया जातिविशेषविषयाश्च मन्वादिभिरुक्ताः॥ यथा॥ निष्कोल
सत्यवचने द्विनिष्कपादले मने॥ त्रिकादर्वाकु पुण्यं स्यात्कोशार्धेन मतः परः॥ सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः। गोबीजकांच
नैर्वैश्यं शूद्रं सर्वैस्तु पातकैरिसादयः॥ अत्र च समृद्धि विभावनानामतुनोक्ता॥ नेवानिमि छ्यातिक्षिप्रं सत्येक शापयेश्चुचीरिति अत्ति
रपियस्यनो राजदैवकंव्यसनं जायते घोरमित्स्कंके वैकालनियमश्चत्रि रात्रप्रकृतिकार्य लाघवगौरवपर्यालोचनया दृष्टव्यः
एवं दिव्येर्जयपरीयावधारणे दंडविशेषोपिदर्शितः कात्यायनेनाराताईं शपथे षु द्रुमसुक्षोदंडभाकूभवेत् इतिदंडमाह
विषे तोयेहुताशे च तुलाकोशे च तंडुले। तप्तमाषकदिव्ये न क्रमाद्दंडं प्रकल्पयेत् तूर्सहस्रं शताद्व् शातंचैवतथापंच
शतानितु। चतुस्त्रिद्विकमेवं च हीनं हीनेषु कल्पयेदिति॥ निन्द्वेषमाविनोदघादिसाफरूदंडे नायं दिव्यनिबंधनो दंडः समु
च्चीयते॥ इतिदिव्यप्रकरणं॥ ७॥ प्रमाणं मानुषं दैवमितिभेदेन वर्णितं॥ अधुनावर्ण्यते दायविभागो योगक्षेमचिंतना॥
तत्र दायशब्देन यद्धनं स्वामिसंबंधादेव निमित्तादन्यस्य स्वं भवति तदुच्यते। सद्विधः। अप्रतिबंधः सप्रतिबंधश्च पुत्रा
णां पौत्राणां च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं च स्वं भवतीत्यप्रतिबंधो दायः॥ पितृव्यभ्रात्रादीनां तु
पुत्राभावे स्वाम्यभावे च स्वं भवतीति पुत्रसद्भावः स्वामिसद्भावश्च प्रतिबंधः। तदभावे पितृव्यत्वेन भ्रातृत्वेन च स्वं भ
वतीति सप्रतिबंधो दायः। एवं तत्पुत्रादिष्वप्यूहनीयः॥ विभागो नाम द्रव्यसमुदायानामनेकस्वाम्यानां तदेकादेशेषु व्य
वस्थापनं॥ एतदेवाभिप्रेत्योक्तं नारदेन॥ विभागोर्थस्य पैत्रस्य तनयैर्यत्र कल्प्यते॥ दायभाग इति प्रोक्तं व्यवहारपदं
बुधैरिति॥ पैत्रस्येति स्वत्वनिमित्तसंबंधोपलक्षणं॥ तनयैरित्यपि प्रत्यासन्नोपलक्षणं॥ इह निरूपणीयं। कस्मि
न्काले कस्य कथं कैश्च विभागः कर्तव्य इति तत्र कस्मिन्काले कथं कैश्चेति तत्र तत्र श्लोकव्याख्यान एव वक्ष्यते॥ कस्य वि
भाग इत्येतदिह चिंत्यते॥ किं विभागात्स्वत्वमुत स्वस्य सतो विभाग इति तत्र स्वत्वमेव तावन्निरूप्यते। किं शास्त्रैकसमधिगम्यं
स्वमुत प्रमाणांतरसमधिगम्यमिति॥ तत्र शास्त्रैकसमधिगम्यमिति तावत्प्राप्तं॥ गौतमवचनात्। स्वामी रिक्थक्रयसंविभाग

२४
२५
२६
५२

९३

६

॥ ७ ॥

परिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरिति। प्रमाणान्तरगम्ये स्वत्वे नेदं वचनमर्थव
त्स्यात्॥ तथा। योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनं याजनाध्यापनेनापि यथास्तेनस्तथैव स इत्यादिना लिप्सोः सकारणा
न नादिष्टारोपापि दुष्प्रमार्जयनादेर्विधानमनुपपन्नं स्यात्स्वत्वस्य लौकिकत्वे॥ अपि च लौकिकं चेत्स्वत्वं ममस्वमनेनापहृत
मिति न ब्रूयादपहर्तुरेव स्वत्वादन्यथान्यस्वत्वे नापहृतमिति नापहर्तुः स्वं एवं तर्हि सुवर्णरजतादिस्वरूपवदस्यना
स्वमन्यस्य वा स्वमिति संशयो न स्यात्॥ तस्मात्तच्छास्त्रैकसमधिगम्यं स्वत्वमिति॥ अत्रोच्यते॥ लौकिकमेव स्वत्वं लौकिकार्थ
क्रियासाधनत्वात् व्रीह्यादिवत्॥ आहवनीयादीनां हि शास्त्रैकगम्यानां न लौकिकक्रियासाधनत्वमस्ति। न त्वाहवनीयो मध्यमपा
कादिसाधनत्वमस्त्येव॥ नैतन्न। न हि तेऽत्राहवनीयादिरूपेणापाकादिसाधनं किं तर्हि प्रत्यक्षादिपरिदृश्याग्न्यादिरूपे
ण। इह तु सुवर्णादिरूपेण क्रयसाधनत्वमपि तु स्वत्वेनैव। न हि यस्य यत्स्वं न भवति तत्तस्य क्रयादिक्रियां साधयति॥
अपि च। प्रसन्तवासिनामप्यदृष्टशास्त्राणां स्वत्वव्यवहारो दृश्यते। क्रयविक्रयादिदर्शनात् किं चान्नियतोपाय
स्वत्वं लोकसिद्धमेवेति न्यायविदो मन्यन्ते। तथा हि लिप्साक्षेत्रे तृतीये वैश्यकेऽद्व्यार्जननियमानां क्रत्वर्थत्वे स्वत्वमेव न स्यात्॥
स्वत्वस्य लौकिकत्वे इति पूर्वपक्षासंभवमाशंक्यार्जनस्य प्रतिग्रहादिना स्वत्वसाधनत्वं लौकिकसिद्धमिति पूर्वपक्षः
समर्थितो गुरुणा अपि घट्टार्थेपा। ननु च द्रव्यार्जनस्य क्रत्वर्थत्वे स्वमेव न स्यात् वतीतिपाग ऐनसं च तैत प्रलपितमिदं केना
पि अर्जनं स्वत्वं नापादयतीति प्रतिषिद्धमिति वचनात् स्वसिद्धान्तेऽपि स्वत्वस्य लौकिकत्वमंगीकृत्य सैव विचा
रप्रयोजनमुक्तं॥ अतो नियमातिक्रमः पुरुषस्य न क्रतोरिति अस्यार्थ एव विवक्षितः। यदा द्रव्यार्जननियमानां क्रत्वर्थ
त्वं तदा तदर्जितेनैव द्रव्येण क्रतुसिद्धिः। नियमातिक्रमार्जितेन द्रव्येण न क्रतुसिद्धिरिति। न पुरुषस्य नियमातिक्रमो दोषः
पूर्वपक्षे राद्धान्ते तु अर्जननियमस्य पुरुषार्थत्वात् तदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धिर्भवति। पुरुषस्यैव नियमा
तिक्रमाद्दोषः। इति नियमार्जितस्यापि स्वमंगीकृतमन्यथा क्रतुसिद्ध्यभावान्नचेनानवताचौर्यादिप्राप्तस्यापि स्वत्वं स्यादिति मन्तव्यं॥

सा

न ४

दीना ६

न ८

व ६

६ ॥ ७

94

लोके तत्र स्वत्वप्रसिद्धा सा चात्र व्यवहाराविसंवादात् । एवं प्रतिग्रहाद्युपायके स्वत्वे लोके सिद्धे ब्राह्मणस्य प्रति
ग्रहादय उपायाः । क्षत्रियस्य विजितादयो वैश्यस्य कृष्यादयो शूद्रस्य शुश्रूषादयो दृष्टा ये नियमाः रिक्थाद
यस्तु सर्वसाधारणाः स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेष्विति तत्र प्रतिबंधो स्योरिक्थं रूपः
प्रसिद्धः संविभागः सप्रतिबंधो दायः प्रतिग्रहेनान्यपूर्वस्य जलतृणकाष्ठादेः स्वीकारः । अधिगमो निध्यादेः प्राप्तिः ।
एतेषु निमित्तेषु सत्सु स्वामी भवति सा तेषु सत्सु ते स्वामी ब्राह्मणस्याधिकं लब्धमिति ॥ ब्राह्मणस्य प्रतिग्रहादिनाय लब्धं तद
धिकं साधारणं । क्षत्रियस्य विजितमिति अधिकमित्यनुवर्त्तते ॥ क्षत्रियस्य विजयदंडादिलब्धमसाधारणं निर्विष्टं वैश्य
शूद्रयोरिति । अत्राप्यधिकमनुवर्त्तते ॥ वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तदसाधारणं शूद्रस्य द्विजशुश्रूषादिना भृतिरूपे
ण यल्लब्धं तदसाधारणं एवं अनुलोमजानां प्रतिलोमजानां च लोकप्रसिद्धेषु स्वत्वहेतुषु यद्यदसाधारणमुक्तं सूतानामश्वसा
र...थ्यमित्यादि तत्सर्वं निर्विष्टशब्देनोच्यते । सर्वस्यापि भृतिरूपत्वात् निर्विष्टं प्राप्तिभोगयोरिति त्रिकांडस्मरणात् ॥ न त्वद वधा
रणे वेदितव्यो यद् पत्नी दुहितरश्चेत्यादि स्मरणं । तत्रापि स्वामिसंबंधतया बंधुषु दायविभागितया प्राप्तेषु लोकप्रसिद्धे पि स्व
त्वे व्यामोहनिवृत्त्यर्थं स्मरणमिति सर्वं मनवद्यं य इपि ममस्वमनेनापहृतमिति न ब्रूयात्स्वत्वं लौकिकत्वमिति तदप्यसत् ॥ स्वत्व
हेतुभूत क्रयादि संदेहोपपत्तेः विचारप्रयोजनं तु । यद्गर्हितेनार्जयंति कर्मणा ब्राह्मणा धनं तस्योत्सर्गेण शुध्यंति जपेन तपसै
व च ॥ इति शास्त्रैकसमधिगम्ये स्वत्वे गर्हितेनासत्प्रतिग्रहवाणिज्यादिना लब्धस्य स्वत्वमेव नास्तीति । तत्पुत्राणां तद्विभाज्यमेव वा
यदा तु स्वत्वं लौकिकं तदासत्प्रतिग्रहादिलब्धस्यापि स्वत्वात्तत्पुत्राणां तद्विभाज्यमेव वा तस्योत्सर्गेण शुध्यंतीति प्रायश्चित्तम
र्जयितुरेव । तत्पुत्रादीनां तु दायत्वेन स्वमिति न तेषां दोषसंबंधः ॥ सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः प्रयोगः कर्मयो
गश्च सत्प्रतिग्रह एव चेति मनुस्मरणात् । इदानीमिदं संदिह्यते ॥ विभागात्स्वत्वमुत स्वस्य सतो विभाग इति । तत्र विभागात्स्वमि
ति तावद्युक्तं । जातपुत्रस्याधानविधानात् । यदि जन्मनैव स्वत्वं स्यात्तदोत्पन्नस्य पुत्रस्यापि तत्स्वं साधारणमिति । इत्यसाधा

संदेहात्स्वत्व ६

दत्ता ५ म६ पि८

ना४ उ६ क८ सा९ स्य७ णि५

॥५८॥
६
॥५८॥

साधारणादिषु पितुरनधिकारः स्यात् । तथा विभागात् प्राक् पितृप्रसादलब्धस्य विभागप्रतिषेधो नोपपद्येत ॥
सर्वत्तु मत्प्रसादतत्वाद्विभागप्राप्त्यभावात् । शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत् । त्रीण्येतान्यविभाज्यानि प्रसा-
दो यश्च पैतृकः इति । तथा भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत् । सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते
इति । प्रीतिदानवचनं नोपपद्येत । जन्मनैव स्वत्वे नोच्च स्थावरादृते यद्दत्तमिति संबंधो युक्तो व्यवहितप्रयोजनात्स-
गात् ॥ यदपि । मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः । स्थावरस्य तु सर्वस्य न पिता न पितामहः ॥ तथा । पितृप्र-
सादाद्भुज्यन्ते वस्त्राण्याभरणानि च ॥ स्थावरं तु न भुज्येत प्रसादे सति पैतृके इति ॥ स्थावरस्य प्रसाद दानेऽप्र-
तिषेधवचनं न तत्पितामहोपात्तस्थावरविषयं यं मतीतपितामहेन दत्तं पितापुत्रयोः साधारणम्
पि मणिमुक्तादि पितुरेव । स्थावरं तु साधारणमित्यस्मादेव वचनाद् अवगम्यते । तस्मान्न जन्मना स्वत्वं किंतु स्वा-
मिनाशाद्विभागाद्वा स्वत्वं । अत एव पितुरूर्ध्वं विभागात् प्राक् द्रव्यस्य प्रहीणत्वादन्येन गृह्यमाणं न निवार्यत इति
चौघस्यानरकाराः । तथैकपुत्रस्यैव पितृप्रयाणादेव पुत्रस्य स्वत्वं मातृ न विभागमपेक्षत इति । अत्रोच्यते । लोकप्रसि-
द्धमेव स्वत्वमस्मकं ॥ लोके च पुत्रादीनां जन्मनैव स्वत्वं प्रसिद्धतरं । नापह्नवमर्हति । विभागशब्दश्च बहुस्वामिकध-
नविषयः प्रसिद्धो नान्यदीयविषयो न प्रहीणविषयः ॥ तथोत्पत्त्यैवार्थस्वामित्वं लभेतेत्याचार्याः ॥ इति गौतमवचनात् ॥
मणिमुक्ताप्रवालानामित्यादिवचनं च जन्मनास्वत्वपक्ष एव चोपपद्यते । न च पितामहोपात्तस्थावरविषयमिति ।
युक्तं । न पिता न पितामह इति वचनात् । पितामहस्य स्वार्जितमपि पुत्रपौत्रे च सत्यदेयमिति वचनं जन्मनास्वत्वं गमयति ।
मम९

॥५८६॥

९६

यथा परमते मणिमुक्तावस्त्राभरणादीनां पितुरेव स्वत्वं वचनादेवमस्मन्मतेपि पित्रार्जितानामप्येतेषां पितुर्दानाधिकारो
वचनादयं विशेषः॥ यत्तु भर्त्रा प्रीतेन यत्सादि विष्णुवचनं स्थावरस्य प्रीतिदानं तत्तावत्तनं तत्स्वोपार्जितस्यापि पुत्राद्य नु
ज्ञयैवेति व्याख्येयं। पूर्वोक्तमणिमुक्तादि वचनैः स्थावरव्यतिरिक्तस्यैव प्रीतिदानयोग्यत्वनिश्चयात्॥ यद पथे
साध्वेषु वैदिकेषु कर्मस्वनधिकार इति। तत्र तद्विधानबलादेवाधिकारो गम्यते। तस्मात्सैतत् पैतामहे च द्रव्ये जन्म
नैव स्वत्वं। तथापि तु रावश्यकेषु धर्मकृत्येषु वाचनिकेषु प्रसादद्दान कुटुंबभरणापद्विमोक्षादिषु च स्थावरव्यतिरि पा५
क्तेष्वपि नियोगे स्वातंत्र्यमिति स्थितं। स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतंत्र्यमेव। स्थावरं द्विपदं चैव यद्य
पि स्वयमर्जितं॥ असंभूय सुतान् सर्वान् न दानं नापि विक्रियः। ये जाता येप्यजाता ये च गर्भे व्यवस्थिताः। वृत्तिं च ते
भिकांक्षंति न दानं न च विक्रियं। इत्यादिवचनात्॥ अस्यापवादः॥ एकोपि स्थावरे कुर्याद्दानाधमनविक्रियं। आप
अ८ त्काले कुटुंबार्थे धर्मार्थे च विशेषतः॥ अस्यार्थः॥ प्राप्तव्यवहारेषु पुत्रपौत्रेषु चानुज्ञानादानसमर्थेषु भ्रातृषु वा तथावि
धेष्वविभक्तेषु अपि सकलकुटुंबव्यापिन्यामापदि तत्पोषणे चावश्यकर्त्तव्येषु च पितृश्राद्धादिषु स्थावरस्य दानाधमन
विक्रियमेकोपि समर्थः कुर्यादिति॥ यत्तु वचनं॥ विभक्ता वाविभक्ता वा सपिंडाः स्थावरे समाः। एको ह्यनीशः सर्व
त्र दानाधमनविक्रये इति॥ तदप्यविभक्तेषु द्रव्यस्य मध्यकत्वादेकस्यानीशत्वात्सर्वाभ्यनुज्ञां वक्ष्यकां पविभक्तेषु त
रकालं विभक्ताविभक्तसंशयव्युदासेन व्यवहारसौकर्याय सर्वाभ्यनुज्ञानं पुनरेकस्यानीश्वरत्वेनातोविभक्तानु
मतिव्यतिरेकेणाप्यव्यवहारः सिध्यत्येवेति व्याख्येयं॥ यदपि। स्वग्रामज्ञातिसामंतदायादानुमतेन चेव हिरण्योदकदाने
न षड्भिर्गच्छति मेदिनी इति। तत्रापि ग्रामानुमतिः। प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषत इति वचनात्॥ व्यवहारप्रका
शनार्थमेवापेक्ष्यते॥ पुनर्ग्रामानुमत्या विना व्यवहारासिद्धिः सामंतानुमतिस्तु सीमाविप्रतिपत्तिनिरासायैव ज्ञातिदाया

न९

९७

न९

दनुमते स्तु प्रयोजने मुक्तमेवं हिरण्योदकदानेनेति स्थावरविक्रयो नास्ति कुर्यादाधिमनुज्ञयेति स्थावरस्य विक्रयप्रतिषे-
धात्। भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति॥ उभौ तौ पुण्यकर्माणौ नियतौ स्वर्गगामिनाविति दानप्रशंसादर्श-
नाच्च। विक्रयेऽपि कर्त्तव्ये सहिरण्यमुदकं दत्वा दानरूपेण स्थावरविक्रयं कुर्यादित्यर्थः। पैतृके पैतामहे च धने
जन्मनैव स्वत्वे पितृविशेषं भूर्या पितामहोपार्जितेत्यत्र वक्ष्याम॥ ६॥ इदानीं पितृकृते विभागे च यथा विभागः क-
र्त्तव्यस्तं दर्शयन्नाह॥ विभागं चेत्सिता कुर्यादिच्छया विभजेत्सुतान्॥ ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः॥
यदि विभागं पिता चिकीर्षति तदेच्छया विभजेत्सुतानात्मनः सकाशात्पुत्रं पुत्रौ पुत्रान्वा इच्छया न रकुशलाद
नियमप्राप्तो नियमार्थमाह॥ ज्येष्ठं वा श्रेष्ठभागेनेति॥ ज्येष्ठं श्रेष्ठभागेन मध्यमं मध्यमभागेन कनिष्ठं कनिष्ठ-
भागेन विभजेदित्यनुवर्त्तते॥ श्रेष्ठादिभागाश्च मनुनोक्ताः॥ ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरं॥ ततोऽर्द्धं मध्य-
मस्य स्यात्तुरीयं तु यवीयस इति वा शब्दो वक्ष्यमाणपक्षापेक्षः॥ सर्वे वा स्युः समांशिनः॥ सर्वे वा ज्येष्ठादयः समांशभाजः
कर्त्तव्याः। अयं च विषमो भागः स्वार्जितद्रव्यविषयः पितृक्रमायाते तु समस्वाम्यस्य वक्ष्यमाणत्वान्नेच्छया विषमो
विभागो युक्तः। विभागं चेत्सिता कुर्यादिति यदा पितुर्विभागेच्छा स तावदेकः कालः। अपरोऽपि। जीवत्येव पितरि द्रव्यनिस्पृहे नि-
वृत्तरमणे मातरि च निवृत्तरजस्कायां पितुरनिच्छायामपि पुत्रेच्छयैव विभागो भवति। यथोक्तं नारदेन। अत ऊर्ध्वं पितुः पुत्रा
विभजेयुर्धनं सममिति पित्रोरूर्ध्वं विभागं प्रतिपाद्य मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च॥ निवृत्ते वापि रमणे पितर्युपर-
तस्पृहे इति दर्शितं। अत्र पुत्रैर्धनं समं विभजेयुरित्यनुषज्यते। गौतमेनापि ऊर्द्ध्वं पितुः पुत्रा भजेरन्निवृत्ते वा
पि रजसीति द्वितीयः कालो दर्शितः। जीवति चेच्छतीति तृतीयः। तथा रजस्कायामपि मातर्यनिच्छत्यपि पितर्यधर्मवर्त्तिनि दीर्घरोगि-

शा६

नु२

स९

ग्रस्ते च पुत्राणामिच्छया भवति विभागः॥ यथाह शंखः। अकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि रोगिणि च त१
नि। पितुरिच्छया विभागो द्व्यादिपितृसमो विषमश्च न तत्र समविभागे विशेषमाह। यदि कुर्यात्सम मानं स्वांश पत्न्यः नू२
कार्याः समांशिकाः॥ न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण च॥ यदा स्वेच्छया पिता सर्वानेव सुतान् समविभागिनः॥
करोति तदा पत्न्यश्च पुत्रसमांशभाजः कर्त्तव्याः। यासां पत्नीनां भर्त्रा श्वशुरेण च स्त्रीधनं न दत्तं। दत्ते तु स्त्रीधने अर्द्धांशं न४
वक्ष्यति। यद्यपि तेन लब्धं प्रकल्पयेदिति यदा तु ज्येष्ठभागादिना ज्येष्ठादीन् विभजति तदा पत्न्यः ज्येष्ठादिभागान्न लभन्ते किं
तु हि समुदायात्समानेवांशान् लभन्ते। स्त्रीधनं च यथाह आपस्तंबः। परीणाहं च गृहेऽलंकारो भार्याया इति॥
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिन इति पक्षद्वयेऽपवादमाह॥ शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक्क्रि
या॥ स्वयमेव बह्व्यार्जने समर्थस्यापि तैः च मनीहमानस्यानिच्छतो यत्किंचिदसारमपि दत्वा पृथक्क्रिया विभागः कृ
र्त्तव्यः पित्रा पुत्रस्य तत्सुतानां दायजिघृक्षा मा भूदिति॥ ज्येष्ठं वा श्रेष्ठभागेनेत्यनेनाधिकविभागो दर्शितः।
तत्र शास्त्रोक्तोद्धारादि विषमविभागव्यतिरेकेणान्यथा विषमविभागं निषेधयन्नाह॥ न्यूनाधिकविभागव्यतिरेके
णान्यथा विषमविभागं निषेधार्थमाह॥ न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः। न्यूनाधिकविभागेन वि
भक्तानां पुत्राणामसौ न्यूनाधिकविभागो यद्धर्म्यः शास्त्रोक्तो भवति। तदासौ पितृकृतः कृत एव न निवर्त्तत इति मन्वा
दिभिः स्मृतः। अन्यथा तु पितृकृतोऽपि निवर्त्तत इति अभिप्रायः॥ यथाह नारदः। व्याधितः कुपितश्चैव विषयासक्तमा न
नसः॥ अन्यथा शास्त्रकारी च न विभागे पिता प्रभुरिति। इदानीं विभागस्य कालान्तरं कर्त्तुं तदंशप्रकारनियमं चाह॥ वि
भजेरन् सुताः पित्रोरूर्ध्वं रिक्थमृणं समं। पित्रोर्मा तापित्रोरूर्ध्वं प्रयाणादिति कालो दर्शितः। सुता इति। कर्त्ता
रो दर्शिताः॥ सममिति प्रकारनियमः। सममेव ते रिक्थमृणं च विभजेरन्। न तु कदाचित्स्वमातुश्च स्वरूपज्ञस्य ज्येष्ठ

३८

१
॥५०॥

थै१

एवमुद्धारविभागेन ... श्रेषोद्धारमनुः पञ्जीवेषु पितरं न थेय... ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरं। ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः इति सर्वस्माद्द्रव्यसमुदायाद्धि ... इति विंशो भागः सर्वद्रव्येभ्यश्च यच्छ्रेष्ठं तत् ज्येष्ठायदातव्यं। तदर्धं चत्वारिंशत्तमो भागो मध्यमाय देयः अशीतितमो भागो कनिष्ठाय दातव्यमिति मातापित्रोरूर्ध्वं विभजतामुद्धारविभागो मनुना दर्शितः। तथा उद्धारेऽनुद्धृते तेषां सम्यक् ... ज्येष्ठस्य द्वौ भागौ नु ... कल्पना एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽनुजः। अंशमंशं यवीयांस इति धर्मो व्यवस्थितः। ज्येष्ठस्य द्वौ भागौ ... अनन्तरजातस्य सार्धं एको भागस्ततोऽनुजानामेकैको विभाग इत्युद्धारव्यतिरेकेण विषमो भागो दर्शितः पित्रोरूर्ध्वं ... विभजतां जीवद्विभागे च स्वयमेव विषमो विभागो दर्शितो ज्येष्ठं वा श्रेष्ठभागेनेति। अतः स ... विषमो वि ... शास्त्रदृष्टस्तथापि लोकविद्विष्टत्वान्नानुष्ठेयः। ... भागोऽस्तीति कथं सममेव विभजेरन्निति नियम्यते। ... अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु इति निषेधात्। यथा महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेदिति विधानेऽपि लोकविद्विष्टत्वादननुष्ठानं। यथा मैत्रावरुणीं गां वशामनुबन्ध्यामालभेतेति ... विधानेऽपि लोकविद्विष्टत्वादननुष्ठानं। उक्तं च। यथा नियोगधर्मो नो नानुबन्ध्यावधोऽपि वा। तथोद्धारविभागोऽपि नैव सम्प्रति वर्त्यते इति। आपस्तम्बोऽपि। जीवन्पुत्रेभ्यो दायं विभजेत्सममिति स्वमतमुक्त्वा ज्येष्ठो दायाद इत्येके देशविशेषे सुवर्णं कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य रथः पितुः परीभाण्डं च गृहे अलङ्कारो भार्याया ज्ञातिधनं चेत्येके इति ... स्वमतेनैवोद्धारविभागं दर्शयित्वा न शास्त्रैर्विप्रतिषिद्धमिति निराकृतवान्। तच्च शास्त्रविप्रतिषिद्धं स्वयमेव दर्शयति स्म पुत्रेभ्यो दायं विभजेदित्यविशेषेण श्रूयत इति। तस्माद्विषमो विभागः शास्त्रदृष्टोऽपि लोकविरोधाच्छ्रुतिविरोधाच्च नानुष्ठेय इति सममेव विभजेरन्निति नियम्यते॥

इ१
त२
इतिएक५
स्म४
स्प४

॥५०॥

100

मप्रतिष्ठितानांचेति ॥ अस्यार्थः ॥ प्रत्ताप्रत्तासमवायेऽप्रत्तानामेव स्त्रीधनं ॥ प्रत्तासु वा प्रतिष्ठिताप्रतिष्ठितासमवायेऽप्रतिष्ठितानामेवेति ॥ अ
प्रतिष्ठितानिर्धना ॥ दुहितृप्रावेमातृधनमृणा ५४

मातापित्रोर्दुहितृनं सुताविभजेरन्निस्कं नत्र मातृधनेपवादमाह ॥ मातुर्दुहितरः शेषमृणात्ताभ्यामातुर्धनं दुहितरौ भजेरन् ॥
ऋणाच्छेषं मातृकृतर्णापाकरणावशिष्टं अन्तमृणसमन्यूनं च मातृधनं सुता विभजेरन्निसस्यविषयः एतदुक्तं भवति ॥
मातृकृतर्णं पुत्रैरेवापाकरणीयं न दुहितृभिः ऋणावशिष्टं धनं दुहितरो गृह्णीयुरिति । पुत्रं चेतल ॥ सुमातृसुता
पि केसुके स्त्रीमनवयधिकेस्त्रियाइति स्त्र्यपवयवानां दुहितृषु बाहुल्यात् स्त्रीधनं दुहितृगामि पितृधनं पुत्रगा
मिपित्र वयवानां पुत्रेषु बाहुल्यादिति ॥ तत्र गौतमेन विशेषो दर्शितः । स्त्रीधनं दुहितृणामप्रत्तानां चाप्रति
ष्ठितानां च दुहितृणामिति ॥ ताभ्य ऋतेऽन्वयः ॥ ताभ्यो दुहितृभ्यो विना दुहितॄणामभावेऽन्वयः पुत्रादिर्गृह्णीयादित्यर्थः विभ
जेरन् सुताः पित्रोरूर्ध्वमित्यनेनैव सिद्धस्य पदार्थमुक्तं ॥ ११७ ॥ अविभाज्यमाह । पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जि
तं मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ॥ ११८ ॥ क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः । दायादेभ्यो न तद्दद्याद्विद्या
लब्धमेव च ॥ ११९ ॥ मातापित्रोर्द्रव्याविनाशेन यत्स्वयमर्जितं मैत्रं मित्रसकाशात्तु यल्लब्धमौद्वाहिकं विवाहलब्धं दायादा
नां च पितृणां न तद्भवेत् ॥ क्रमायातं क्रमायातं किंचिद्द्रव्यमन्यैर्हृतमसामर्थ्यादिना पित्रादिभिरनुद्धृतं यः पुत्राणां मध्ये तत्
साम्यनुज्ञया उद्धरति तद्दायादेभ्यो भ्रातृभ्यो न दद्यात् ॥ उद्धर्तैव गृह्णीयात् । तत्र क्षेत्रे तु रीयांशमुद्धर्त्रे लब्धं नेत्र शेषं
तु सर्वेषां सममेव च । यथाह शंखः ॥ पूर्वं नष्टां तु यो भूमिमेकश्चेदुद्धरेत्क्रमात् ॥ यथांशं तां लभेदन्ये दत्वांशं तु तु
रीयकमिति क्रमादभ्यागतामिति शेषः । तथा विद्यया वाचाध्ययनेन अध्यापनेन वेदार्थव्याख्यानेन यल्लब्धं तद
पि दायादेभ्यो न दद्यात् ॥ अर्जक एव गृह्णीयात् । अत्र पितृद्रव्याविरोधेन यत्किंचित्स्वयमर्जितमिति सर्वशेषः । अत
स्त्रपितृद्रव्याविरोधेन यन्मैत्रमर्जितं पितृद्रव्याविरोधेन यदौद्वाहिकं यच्च क्रमायातमुद्धृतं पितृद्रव्याविरोधेन विद्या
लब्धमिति प्रत्येकमभिसंबध्यते । तथा च । पितृद्रव्यविरोधेन प्रत्युपकरणेन यन्मैत्रं । आसुरादिषु विवाहेषु

पितृद्रव्याविरोधेन २

१११

प१

॥५९१॥३१

यल्लब्धं तद्यपि तैर्व्वा व्यायेन लब्धं पाव्यय्यालब्धं तत्सर्वं सर्वैर्भ्रातृभिः पित्रा च विभजनीयं। तथा पितृद्रव्या
विरोधेनेत्यस्य सर्वशेषत्वादेव पितृद्रव्याविरोधेन प्रतिग्रहलब्धमपि विभजनीयं॥ अस्य च सर्वशेषत्वा
भावे मैत्रमौद्वाहिकमित्यादिनारब्धव्यं। अथ पितृद्रव्याविरोधे नापि यन्मैत्रादिलब्धं तस्याविभज्यत्वा
तु यन्मैत्रादिवचनमर्थवादरूप्यते। तथा सति समानाचारविरोधः। विद्यालब्धेन नारदवचनेनाविरोधश्च॥
कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः। भागं विद्याधनात्तस्मात्स लभेताश्रुतोपि सन्। इति। तथा च
यो धनस्याविभाज्यस्य लक्षणमुक्तं कात्यायनेन। परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या। तया लब्धं
धनं यत्तु विद्याप्राप्तं तदुच्यते इति। तथा पितृद्रव्याविरोधेनेत्यस्याभिन्नवाक्यत्वे प्रतिग्रहलब्धस्याविभज्य
त्वमाचारविरुद्धमापद्येत॥ एतदेव स्पष्टीकृतं मनुना॥ अनुपघ्नन्पितृद्रव्यं

श्रमेण यदुपार्जयेत्। दायादेभ्यो न तद्द्यात् विद्यया लब्धमेव च। इति। श्रमेण सेवायुद्धादिना॥
अनुपघ्नन्पितृद्रव्याविरोधेनेत्यर्थः मैत्रादिद्रव्यं लब्धं तदविभाज्यमिति वक्तव्यं। विभागप्राप्त्यभावात्। यद्धनं लब्धं तत्स्वे
वनान्यस्येति प्राप्ते इतरप्रतिग्रहवर्त्तके प्रतिषेधः॥ अथ कश्चिद्विदश्रुतिमाह॥ यत्किंचित्पितरि प्रेते धनं ज्ये
ष्ठोधिगच्छति। भागो यवीयसां तत्र यदि विद्यानुपालिनः इति ज्येष्ठो वा कनिष्ठो वा मध्यमो वा पितरि प्रेते अप्रेते
वा यवीयसां वर्षीयसां चेति व्याख्यानेनापि तत्र पितरि सत्यसति च मैत्रादीनां विभज्यत्वं प्रतिषिध्यत इति तत्सत्य
मन्यत्रप्राप्तस्य प्रतिषेधः। किं तु सिद्धस्यैवानुवादो यदि लोकसिद्धस्यैवानुवादकान्येव प्रायेणास्मिन्प्रकरणे वचना
नि॥ अथ वा समवेतैस्तु यत्प्राप्तं सर्वे तत्र समांशिन इति प्राप्तस्यापवाद इति संप्रत्युभावानः। अतश्च यत्किंचित्पि
तरि प्रेते इत्यस्मिन्वचने ज्येष्ठादेर्यदर्जितं स्वल्पाप्राप्तमिथ्यामोहमात्रं अतो मैत्रादिवचने पितुः प्रागेव विभज्यत्वे नो

त८ त८ उ८ ति१ त८

॥५९१॥

112

श्रीगणेशाय नमः॥

वस्त्राणि ३

वि१

कस्यचित्किंचित्स्यात्तर्हि इत्यपवादः ... या स्वीयं॥ तथान्यदपि अविभाज्यमुक्तं मनुना। वस्त्रं पत्रमलंकारं कृता
न्नमुदकं स्त्रियः॥ योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते इति॥ एतानामेव वस्त्राणामविभाज्यत्वं येन भु
त३ क्तं तस्यैव। पित्र्यं तु पितृकृतं विभज्य तास्त्राद्धभोक्त्रे दातव्यानि॥ यथाह बृहस्पतिः। वस्त्रालंकारशय्यादि
पितुर्यद्वाहनादिकं॥ गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत् इति। अभिनवानि तु वस्त्राणि विभाज्यान्ये
त५ व। पत्रं वाहनमश्वशिबिकादि तदपि येनारूढं तस्यैव पित्र्यं तु वस्त्रादिवत्। अश्वादीनां बहुत्वे तु तादृक्रूपो व५
पजीविनां विभज्य समे चा वैषम्येणाविभज्य ज्येष्ठस्य। अजाविकं सैकशफं न जातु विषमं भजेत्। अजावि
कं चैकशफं ज्येष्ठस्यैव विधीयते इति मनुस्मरणात्॥ अलंकारोपि येन धृतः स तस्यैव। अधृतः साधा
रणो विभाज्य एव॥ पत्न्यो जीवति यस्त्रीभिः रलंकारो धृतो भवेत्। न तं भजेरन्दायादा भजमानाः पतंति
चेति। अलंकारो धृतो भवेदिति विशेषणोपादानादधृतानां विभज्यत्वं गम्यते। कृतान्नं तंडुलमोदकादि तद
प्यविभाज्यं यथासंभवं भोक्तव्यं। उदकं उदकाधारः कूपादि तत् विषमं मूल्यद्वारेण न विभाज्यं पर्यायेणोप
योक्तव्यं। स्त्रियश्च दास्यो विषमा न मूल्यद्वारेण विभाज्याः पर्यायेण कर्म कारयितव्याः॥
अवरुद्धास्तु पित्रा स्वैरिण्याद्याः समा अपि पुत्रैर्न विभाज्याः। स्त्रीषु च संयुक्तास्वविभागः इति गौतमस्मरणात्॥
क्षेमं च४ योगश्च योगक्षेमं योगशब्देनालब्धलाभकारणं श्रौतस्मार्ताग्निसाध्यमिष्टं कर्म लक्ष्यते। क्षेमशब्देन लब्धप
मं३ रिरक्षणहेतुभूतं बहिर्वेदि दानतडागारामनिर्माणादिकं पूर्तं कर्म लक्ष्यते। तदुभयं पैतृकमपि पितृद्रव्यविरोधा
र्जितमपि न विभाज्यं। यथाह लौगाक्षिः। क्षेमं पूर्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः। अविभाज्ये च ते प्रोक्ते शयनासना
नमेव चेति। योगक्षेमशब्देन योगक्षेमकारिणो राजमंत्रिपुरोहितादय उच्यते इति केचित्। ... चामरछत्रोपान ह

॥ श्री ॥

प्रवेशनिर्गममार्गः सोऽप्यविभाज्यः॥

प्रकृतमयद्रसन्त्वैर्मा चारो गृहारामादिषु प्रवेशनिर्गममार्गः सोऽप्यविभाज्यः॥ यत्तु शानसासेव सर्वविभाज्यत्वमुक्तं
अविभाज्यत्वं गोत्राणां मासहस्रकुलादपि। याज्यं क्षेत्रं च पत्रं च॥ तान्नमुदकं स्त्रिय इति तद्धूसणो सन्ततस्
त्रियादिषु त्रविषयं॥ न प्रतिग्रहस्य दैयादस्त्रियादिसुनायवैयधप्येषां पितादद्यान्स्ते विसासृतो हरेद्
इति स्मरणात्॥ याज्यं याजनलब्धं पितृप्रसादलब्धस्याविभाज्यत्वं वक्ष्यति। नियमा तिक्रमा
र्जितस्याविभाज्यत्वमनंतरमेवाभिहितं। पितृद्रव्याविरोधेन यदर्जितं तद्विसृजनीयमिति स्थितं॥ तत्रा
र्जकस्य भागद्वयं वैशिष्टवचनानुपयेन चेषां स्वयमुपार्जितं द्रव्यं स्यात्साऽशमेव लभेरन्निति॥ अस्यापवा
दमाह। सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः॥ अविभक्तानां भ्रातॄणां साधारणस्यार्थस्य कृ
षिवाणिज्यादिना समुत्थाने सम्यकुर्वद्भिनेकेन विहिते सम एव विभागो नार्जयितुरंशद्वयं। पितृद्र
व्ये पुत्राणां विभागो दर्शित इदानीं पैतामहे पौत्राणां विभागविशेषमाह॥ अनेकपितृकाणां तु पितृतो भाग
कल्पना। यद्यपि पितामहपौत्राणां विभागविशेषमाह। अनेकपितृकाणां पितामहद्रव्यविभा
गकल्पना न स्वरूपापेक्षया॥ एतदुक्तं भवति। यदा अविभक्ता भ्रातरः पुत्रानुत्पाद्य दिवंगताः। तत्रै
कस्य द्वौ पुत्रावन्यस्य त्रयोऽपरस्य चत्वारो रद्रति पौत्राणां वैषम्ये तत्र द्वौ वेकमंशं स्वपित्र्यं लभेते।
अन्ये त्रयोऽप्येकमंशं पित्र्यं चत्वारोऽप्येकमेवांशं लभन्त इति। तथा केषुचित्पुत्रेषु ध्रियमाणेषु केषुचि
त्सुतसुतादिविनष्टेष्वप्ययमेव न्यायो ध्रियमाणाः स्वांशान्लभन्ते। नष्टानामपि पुत्राः पित्र्या
नेवांशाल्लभन्त इति वचनिकाव्यवस्था॥ अथ नाविभक्ते पितरि द्रव्ये पितर्येव विद्यमाने आ
त्मीकेणापौत्रस्य पैतामहेद्रव्ये विभागो नास्ति। ध्रियमाणे तु पितरि पितृतो भागकल्पनं सकाशाद्

मं४ त्रा३ द्व्यंश का-तु केषु४

ने१

॥५२॥

114

न १ व स्वार्जितं वापि पितुरिच्छया एवं स्यादाशंकितव्यमाह॥ भूर्या पितामहोपात्ता निबंधो द्रव्यमेव वा। तत्र स्यात्सदृशं वा १
स्वाम्यं पितुः पुत्रस्य चैव हि॥२१॥ भूः शालिक्षेत्रादिका। निबंध एकस्य पर्णभारकस्येयंति पर्णानि तथैकस्य
क्रमुकफलभारस्येयंति क्रमुकफलानीत्याद्युक्तलक्षणः। द्रव्यं सुवर्णरजतादि। यत्पितामहेन प्रतिग्रह
विजयादिना लब्धं तत्र पितुः पुत्रस्य च स्वाम्यं लोकप्रसिद्धमिति कृत्वा विभागोऽस्ति। हि यस्मात्तस्मात्स
मानं। तस्मान्न पितुरिच्छया विभागो नापि पितुर्भागद्वयं। अत एव पितृतो भागकल्पनेत्येतत्स्वाम्ये समानेऽपि वा
चनिकं। विभागं चेत्पिता कुर्यादित्येतत्स्वार्जितविषयं। तथा द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पितेत्येतद
पि स्वार्जितविषयं। जीवतोरस्वतंत्रः स्याज्जरयापि समन्वित इति एतदपि पारतंत्र्यं मातापित्रर्जितद्रव्यवि
षयं। तथानीशा हि जीवतोरित्येतदपि। तथा च सरजस्कायां मातरि सस्पृहे चापि तरि विभागमनिच्छत्स
पि पुत्रेच्छया पैतामहद्रव्यविभागो भवति। तथा विभक्तेन पित्रा पैतामहद्रव्ये दीयमाने विक्रियमाणे वा तु ७
पौत्रस्य निषेधेप्यधिकारः। पित्रार्जिते तु न निषेधाधिकारः तत्परतंत्रत्वादनुमतिस्तु कर्तव्या। तथा हि पै
तृके पैतामहे च स्वाम्यं यद्यपि जन्मनैव तथापि पैतृके पितृपरतंत्रत्वात्पितुश्चार्जकत्वेन प्राधान्यास्य
त्रा विनियुज्यमाने स्वार्जिते द्रव्ये पुत्रेणानुमतिः कर्तव्या पैतामहे तु द्वयोः
स्वाम्यमविशिष्टमिति निषेधाधिकारोऽस्तीति विशेषः। मनुरपि। पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात् न तत्
पुत्रैर्भजेत्सार्द्धमकामः स्वयमर्जितमिति। यः पितामहार्जितं केनाप्यपहृतं पितामहेनानुद्धृतं यदा पिता उद्धरति
तत्स्वार्जितमिव पुत्रैः सार्द्धमकामः स्वयं न विभजेदिति। यदनुपितामहार्जितं क्रमेणापि पुत्रेच्छया पुत्रैः सह वि म २
भजेदिति दर्शयति॥ छ॥ विभागोत्तरकालं पुत्रस्य पुत्रस्य कथं भागकल्पनेत्यत आह॥ विभक्तेषु सुतो

115

।१५३।।

गंर

श्री४

भ्रा५

सुतो जातः सवर्णायां विभागभाक् ॥ विभज्य तदिति विभागः पित्रोर्विभागस्तं भजतीति विभाक्पित्रोरूर्ध्वं तयोरे
वोर्ल्लभनद्भुस्यैः ॥ मातृभार्याचा सवर्णां दुहितरि मातुर्दुहितरः शेषमित्युक्तवान्नान्यसवर्णायामुत्पन्नस्तु स्वांशमेव
पित्र्याल्लभते ॥ मातृकं तु सर्वमेव । एतदेव मनुनोक्तं । ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनमिति ॥ पित्रोरि
दं पित्र्यमिति व्याख्येयं । अनीशाः पूर्वजाः पित्रोर्भ्रातृभागे विभक्तजा इति स्मरणात् ॥ मातापित्रोर्भागे विभागात्
पूर्वमुत्पन्नो न स्वामी विभक्तजस्तु भागेन स्वामी सर्वस्य ॥ तथा विभागोत्तरकालं पित्रा यत्किंचिदर्जितं तत्स
र्वं विभक्तजस्यैव । पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितं । विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृता इति
स्मरणात् ॥ ये च विभक्ताः पित्रा सह संसृष्टास्तैः सार्धं विभक्तजो विभजेत । यथाह मनुः । संसृष्टास्तेन वा ये स्युः
विभजेत स तैः सहेति ॥ पितुरूर्ध्वं पुत्रेषु विभक्तेषु पश्चादुत्पन्नेषु कथं भागकल्पनेत्यत आह ॥ दृ
श्याद्वा तद्विभागः स्यादायविशोधितात् । तस्यापि तद्विदेते भ्रातृविभागसमये स्पष्टगर्भायां मातरि भ्रातृवियोगत
रक्षालब्धेन सविभागस्तद्विभागः कुत इत्यत आह ॥ दृश्याद्भ्रातृगृहीताद्धनात्कीदृशादायव्ययविशोधि
तात् । आयः प्रतिदिवसं प्रतिमासं प्रतिवर्षं वा यदुत्पद्यते । व्ययः पितृकृतर्णापाकरणं ताभ्यामायव्ययाभ्यां शो
धितं तस्मादुद्धृत्य तद्भागो दातव्यः स्यात् । एतदुक्तं भवति । भ्रातृसंसक्तेषु भागेषु तदुद्धृत्य मायं गर्भस्थस्यापि पितृ
तं च पूर्णमपनीय विशेषेभ्यः स्वेभ्यः स्वेभ्यो भागेभ्यः किंचित्किंचिदुद्धृत्य सविभक्तजस्य भागः स्वभागसमः
कर्तव्य इति । एतच्चाविभागसमये भ्रातृभार्याप्रजनस्पष्टगर्भायां विभागोर्ध्वमुत्पन्नस्यापि वेदितव्यं । स्पष्टगर्भा
यां तु प्रसवं प्रतीक्ष्य विभागः कर्तव्यः यथाह वसिष्ठः । अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्तासा
मापुत्रलाभादिति । ग[illegible]हीतगर्भा[illegible]मा प्रसवात्प्रतीक्षणीया इति योजनीयं । विभक्तजपि प्रमातृकं च
सर्वधनात्कृतो तोक्तः ॥ न च यदि विभक्तः पिता माता विभक्ता च पुत्राय स्नेहवशादाभरणादि दद्युः ततो न चाविभ

या४ स्या४

भाग१

गाज्जा३

स्या१

यथा१

यथ१

स७

य४

गा४

१५३।।

116

कृतेनैतदौपनिधे धोन कर्तव्यो नापि दत्तं प्रसाहर्तव्यमित्याह॥ पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत्॥ मातापि
तृभ्यां विभक्ताभ्यां पूर्वं विभक्तस्य पुत्रस्य यदलंकारादि दत्तं तत्तस्यैव पुत्रस्य न विभक्तजनस्य स्वं भवति। न्यायसाम्यादि
भागात्प्रागपि यस्य यद्दत्तं तत्तस्यैव। तथा असति विभक्ते विभक्तयोः पित्रो रूर्ध्वं तदूर्ध्वं विभजतां यस्य यद्दत्तं तत्त
स्यैवेति वेदितव्यं॥ जीवद्विभागे सुतसमो विश्वपत्नीनां पुत्रः यदि कुर्यात्समानंशान् स्यात् नापि तु रूर्ध्वं विभागेपि
पत्नीनां स्वपुत्रसमांशित्वं दर्शयितुमाह॥ पितुरूर्ध्वं विभजतां मातांप्यंशं समं हरेत्॥ १२३॥ पितुः प्रयाणादूर्ध्वं विभजतां
मातापि स्वपुत्रांशसममंशं हरेत् यावत्स्त्रीधनं दत्तं दत्ते स्वधनं चाह रिणीति वक्ष्यते॥ पितर्यूर्ध्वं तेय यस्य संस्कृता
भ्रातरः सन्ति। न संस्कारिका क्रिया तत्र इत्यत आह। असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः। पितुरूर्ध्वं विभज
द्भिर्भ्रातृभिरसंस्कृता भ्रातरः समुदायद्रव्येण संस्कर्तव्याः॥ असंस्कृतास्तु भगिनीषु विशेषमाह॥ भगिन्यश्च निजाद
शाद्दत्वांशं तु तुरीयकं॥ १२४॥ असंस्कृताः भगिन्यश्चापि संस्कर्तव्याः भ्रातृभिः। किं कृत्वा निजादंशाच्चतुर्थांशं दत्वा।
अनेन दुहितरोपि पितुरूर्ध्वमंशभागिन्य इति गम्यते। तत्र निजादंशादिति प्रत्येकं स्वकीयादंशादुद्धृत्य चतुर्थो
न भवति। किंतु यज्जातीया कन्या तज्जातीयपुत्रभागाच्चतुर्थांशभागिनी सा कन्या। एतदुक्तं भवति। यदि ब्राह्म
णी सा कन्या तदा ब्राह्मणीपुत्रस्य यावानंशो भवति तस्य चतुर्थांशस्तस्या भवति। तद्यथा यदि कस्यचिद्ब्राह्मण्ये
व पत्नी पुत्रश्चैकः कन्या चैका तत्रापि त्र्यं सर्वमेव द्रव्यं द्विधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तुरीयांशं कन्या
यै दत्वा शेषं पुत्रो गृह्णीयात्॥ अथ तु द्वौ पुत्रौ वैका कन्या तदा पितृधनं सर्वं त्रिधा विभज्य
तत्रैकं भागं चतुर्धा विभज्य तुरीयमंशं कन्यायै दत्वा शेषं पुत्रौ विभज्य गृह्णीतः। अथ त्वेकः पुत्रो द्वे कन्ये तदा
पितृधनं सर्वं त्रिधा विभज्य तत्र द्वौ भागौ द्वाभ्यां दत्वा शिष्टं सर्वं पुत्रो गृह्णीयात्। एवं समानजातीयेषु समविषमे
षु भ्रातृभगिनीषु च योजनीयं। यदा तु ब्राह्मणीपुत्र एकः क्षत्रिया कन्यैका पुत्रः तदा द्रव्यं सप्तधा विभज्य क्षत्रियापुत्रभागास्त्री
न्त्रातषु१

न१ तिर्थ न६ का५ एकंन्चतुर्थी विभज्य२ नं४ ति८

॥१५३॥

स्तुतो जातः सवर्णायां विभागभाक्॥ विभज्य तद्दति विभागात् पित्रोर्विभागस्तं भजतीति विभक्तोपि चोर्ध्वं तयोर्

जात भजत इत्यर्थः॥ मातृभर्त्रोश्चा सत्यां दुहितरि मातुर्दुहितरः शेषमित्युक्तत्वात्॥ अस सवर्णायामुत्पन्नस्तु स्यांशमेव

पित्र्याद्विभजते॥ मातृकं तु सर्वमेव॥ एतदेव मनुनोक्तं॥ ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनमिति॥ पित्रोरि

दं पित्र्यमिति व्याख्येयं॥ अनीशाः पूर्वजाः पित्रोर्भ्रातुर्भागे विभक्तजः इति स्मरणात्॥ मातापित्रोर्भागे विभागान्

पूर्वमुत्पन्नो न स्वामी विभक्तजस्तु भागेन स्वामीत्यर्थः॥ तथा विभागोत्तरकालं पित्रा यत्किंचिदर्जितं तत्स

र्वं विभक्तजस्यैव॥ पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितं। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृता इति

स्मरणात्॥ ये च विभक्ताः पित्रा सह संसृष्टास्तैः सार्धं विभक्तजो विभजेत। यथाह मनुः॥ संसृष्टास्तेन वा ये स्युः

विभजेत स तैः सहेति॥ पितुरूर्ध्वं पुत्रेषु विभक्तेषु पश्चादुत्पन्नेषु कथं भागकल्पनेत्यत आह॥ दृ

श्याद्वा तद्विभागः स्यादायव्ययविशोधितात्। तस्यापि तर्हि चेते भ्रातृविभागसमये स्पष्टगर्भायां मातरि भ्रातृवियोगोत्त

रकालमुत्पन्नस्य स्वविभागस्तद्विभागः कुत इत्यत आह॥ दृश्याद्भ्रातृगृहीताद्धनात् कीदृशादायव्ययविशोधि

तात्॥ आयः प्रतिदिवसं प्रतिमासं प्रतिवर्षं वा यदुत्पद्यते। व्ययः पितृकृतऋणापाकरणं ताभ्यामायव्ययाभ्यां शो

धितं तस्मादुत्पन्नस्य भागो दातव्यः स्यात्। एतदुक्तं भवति। प्रातिस्विकेषु भागेषु तदुत्पन्नमायं प्रवेश्य पितृकृ

तं चर्णमपनीय विशोध्य स्वेभ्यः स्वेभ्यः स्वेभ्यो भागेभ्यः किंचित्किंचिदुद्धृत्य सविभक्तजस्य भागः स्वभागसमः

कर्तव्य इति। एतच्च विभागसमये भ्रातृभार्यास्वप्रजस्स्पष्टगर्भास्वविभागोर्ध्वमुत्पन्नस्यापि वेदितव्यं। स्पष्टगर्भा

यां तु प्रसवं प्रतीक्ष्य विभागः कर्तव्यः। यथाह वसिष्ठः॥ अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्ता

सामापुत्रलाभादिति॥ [illegible] हीतगर्भा [illegible] मासप्रसवा प्रपत्नी [illegible] सर्णीयाभ्यर्थिते योजनीयं॥ विभक्तजोपि श्रमात् [illegible] च

सर्वं धनं हरेत् [illegible]॥ न च यदि विभक्तः पिता माता विभक्ता च पुत्राय स्नेहवशादाभरणादि दत्तं यत्तातेन विभ

या४ स्या४

॥१५३॥

Margin notes (left): गं२ भ्रा४ भा५ यव्य१ स७ व४
Margin notes (right): भाग१ गाज्ञा३ स्या१ यव्य२ गा४

118

॥५४॥

चतुर्धा विभज्य तुरीयांशं क्षत्रियकन्यायै दत्त्वा शेषं ब्राह्मणीपुत्रौ कातीयदा तु द्वौ ब्राह्मणीपुत्रौ क्षत्रियाकन्या चैका तत्र पित्र्यं

धनमेकधा विभज्य त्रीनंशान् क्षत्रियापुत्रभागान् चतुर्धा विभज्य चतुर्थमंशं क्षत्रियाकन्यायै दत्त्वा शेषं सर्वं ब्राह्मणी

णीपुत्रौ विभज्य गृह्णीतः॥ एवं जातिवैषम्ये भ्रातृणां भगिनीनां च संख्यायाः साम्ये वैषम्ये च सर्वत्रोहनीयं॥ ननु द

त्वा तुरीयकमिति तुरीयांशस्य विवक्षायां संस्कारमात्रोपयोगि द्रव्यं दद्यादिति व्याख्यानं युक्तं मनुवचनविरोधात्॥ स्वेभ्योंऽशे

भ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्। स्वात् स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सव इत्यस्यार्थः। ब्राह्मणादयो भ्रातरो

ब्राह्मणीप्रभृतीभ्यो भगिनीभ्यः स्वेभ्यः स्वजातिविहितेभ्योंऽशेभ्यश्चतुर्थांशानहरन्ति प्रदद्युरित्यादिवक्ष्यमाणेभ्यः स्वा

स्यादंशादात्मीयाद्भागाच्चतुर्थं भागं दद्युः। न चात्मीयभागादुद्धृत्य चतुर्थोंशो देय इत्युच्यते। किंतु स्वजातिविहि

तादेकस्मादंशात् पृथक् पृथक् एकस्यै एकस्यै कन्यायै चतुर्थोंशो देय इति जातिवैषम्ये च विषमा कुमारी रुक्तैव। पतिताः

स्युरदित्सव इत्यकरणे प्रत्यवायस्मरणात् अवश्यं दातव्यः प्रतीयते। अत्रापि चतुर्भागवचनं न विवक्षितं संस्का

रोपयोग्यद्रव्यदानमविवक्षितमिति चेन्न। नैतस्य निर्णये च चतुर्थांशादानाविवक्षायां प्रमाभावात् तेन एवायमा

वणादौ इति। यदपि केनचिदुच्यते। अंशदानविवक्षायां बहुभ्रातृकायां बहुधनं चाबहुभगिनीकस्य निर्धनता प्रा

प्नोति इति तदुक्तनीत्या परिहृतमेव। न ह्यत्रात्मीयभागादुद्धृत्य चतुर्थांशस्य दानमुच्यते येन तथा स्यात्। ततो

सहायमेधातिथिप्रभृतीनां व्याख्यानमेव चतुरस्रं न भारुचेः। कीदृशी स्मा पितुरूर्ध्वं कन्याप्यंशभागिनी॥ एवं तु पत्नि

त्वे पिता ददाति न देवलप्रभृतिविशेषवचनाभावादिति सर्वमनवद्यं॥ एवं विभागश्चेत्पिता कुर्यादित्यादिना प्रबं

धेन समानजातीयानां भ्रातृणां परस्परं पित्रा च सह विभागः निरूपितः। अधुना भिन्नजातीयानां विभागमा

नाह। चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः। क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः॥ २५॥ तिस्रो व

र्णानुपूर्व्येणेति ब्राह्मणस्य चतस्रः क्षत्रियस्य तिस्रो वैश्यस्य द्वे शूद्रस्यैकेति भार्या दर्शिताः॥ तत्र ब्राह्मणा

दद्या २ शंतु ४ ति ८ ग ८ इति १ णा ८ ड्जा २

॥५४॥

सन्ना ब्राह्मणोत्पन्ना वर्णास्तौ वर्णशब्देन ब्राह्मणादिवर्णास्तु यद्उच्यंते। संख्यैकवचनाच्च द्वीप्सायामित्यपि
कारणकारकादेकवचनासायां शसु। अतन्य वर्णायणे ब्राह्मणोत्पन्नायथाक्रमं चतुस्त्रिद्व्येकभागा४ सु
र्णवेषु॥ एतदुक्तं भवति। ब्राह्मणेन ब्राह्मण्यामुत्पन्नाः एकैकशश्चतुरो भागान् लभंते। तेनैव क्षत्रियायामुत्पन्ना
स्त्रीन् स्त्रीन् वैश्यायां द्वौ द्वौ शूद्रायामेकैक मिति। क्षत्रनाः क्षत्रियेणोत्पन्ना वर्णशब्दस्तु अनुवर्तते। यथाक्रमं त्रि
द्व्येकभागाः क्षत्रियेण क्षत्रियायामुत्पन्नाः प्रत्येकं त्रींस्त्रीन् भागान् लभंते। वैश्यायां द्वौ द्वौ शूद्रायामेकमेकं विट्शू
द्रेषु वैश्येनोत्पन्ना अत्रापि वर्णशब्दस्तु अनुवर्तते। यथाक्रमं द्वौ भागिनः वैश्येन वैश्यायामुत्पन्नाः प्रत्येकं द्वौ द्वौ भागौ लभंते शूद्रा
यामेकं। शूद्रस्यैकमार्यस्येति भिन्नजातीयपुत्राभावात् नसुत्राणां प्रत्येक एव विभागः। यद्यपि चतुस्त्रिद्व्येकभागा
द्रस्य विशेषणोक्तं। तथापि प्रतिग्रहप्राप्तभूव्यतिरिक्तविषयमिदं द्रष्टव्यं। यतः स्मरंति। न प्रतिग्रहभूर्देया क्षत्रि
यादिसुताय वैश्यपव्येषामपि तादृशान्न ते विप्रा सुतो हरेदिति प्रतिग्रहग्रहणात् क्रयादिलब्धाः
यादिसुताय वैश्यपव्येषामपि तादृशान्न ते विप्रा शूद्रापुत्रस्याविशेषप्रतिषेधात् द्यौ द्विजातिभिर्जातेन भगिनी
क्षत्रियादिसुतानामपि भवत्येव। शूद्रापुत्रस्याविशेषप्रतिषेधो नोपपद्यते। यत्तु न ब्राह्मणादी
नामिति॥ यदि प्रातानां क्षत्रियादिसुतानां न भवेत्तदा शूद्रापुत्रस्य विशेषप्रतिषेधो नोपपद्यते। यत्तु नब्राह्मणादि
नीति॥ यदि प्राताणां क्षत्रियादिसुतानां न भवेत्तदा शूद्रापुत्रस्य विशेषप्रतिषेधोनोपपद्यते ... तदपि जीवतापित्रा क्षत्रि
त्रियविन्नां शूद्रः पुत्रो न रिक्थभाक् यदेवास्य पिता दद्यात्तदेवास्य धनं भवेदिति तदपि जीवतापित्राक्षत्र
त्रियविन्नां शूद्रः पुत्रो न रिक्थभाक्। यदेवास्य पिता दद्यात्तदेवास्य धनं भवेदिति। सर्वविभागशेषं किंतु
पुत्राय किमपि प्रदत्तं स्यात्तद्विषयं। यदा तु प्रसादतानं नास्ति तदैकांशभागित्वं विरुद्धं। सर्वविभागशेषं किंतु
च्यते। अन्यो न्यापहृतं द्रव्यं विभक्तै यत्तु दृश्यते। तत्सम्मेतान्समैरंशैर्विभजेरन्निति स्थितिः॥
परस्परापहृतं समुदायद्रव्यं विभागकाले चाज्ञानं विभक्ते पि न धने यद्दृश्यते। तत्समैरंशैर्विभजेरन्निति एवंश्चि
तिः शास्त्रमर्यादा अत्र समैरंशैः ज्येष्ठस्यैव समुदायद्रव्यापहारदोषोदर्शितो तान कनीयसां यो ज्येष्ठो विनिकुर्व
तल्लोभाद्भ्रातॄन् यवीयसः। सोऽज्येष्ठः स्यादभागश्च नियंतव्यश्च राजभिरिति वदता नैतत्संभावित

※शेरितिवदताऽद्धारविभागो निषिद्धः॥ विभजेरन्निति वदतायेनद्दृश्यते तेनैव ग्राह्यमितिदर्शितं॥ एवं वचनस्यार्थवत्वात्त्र समुदायद्रव्यापहारदो※
षाभावपरत्वं॥ ननु मनुना ×२

120

×तदातस्यपुत्रंपौत्रंवानाशयती×४

॥५५॥

स्वातंत्र्यस्यपितृस्थानीयस्य ज्येष्ठस्यापि तेषं वदता ज्येष्ठपरतंत्राणां पुत्रस्थानीयानां ज्येष्ठाद्भुपि कनीय
स्यायोक्कनीयसां सुतरां देयोऽदर्शित एव। तथा च विशेषेणेव दोषः श्रूयते। ये वै भागिनं भागान्नुदन्ते च्यवते वैनं स य
दि वैनं न च्यवते ऽथ पुत्रमथ पौत्रं च्यवत इति॥ भागिनं भागार्हं भागान्नुदन्ते भागादपकर्षन्ति भागं तस्मै न प्र
यच्छन्ति॥ स भागान्नुन्न एनं भागान्नुदं च्यवते नाशयति दोषिणं करोति। यदि तं न नाशयति तर्हि तस्य पुत्रं विशेषमंतर
रेणैव साधारणद्रव्यापहारिणो दोषः श्रुतः। अय साधारणद्रव्यमात्मनोऽपि स्वं भवतीति स्वबुद्ध्या गृह्णा
तीन दोषमर्हतीति मतं। तदसत्। स्वबुद्ध्या गृहीतेष्वपि वर्तनीयत्वात् परस्वमपि गृहीतमेवेति निषेधात् परस्वग्रहणाद्दोषमा
वहत्येव। यथा मौद्गे चरौ विपन्ने सदृशात्तदभावे मुद्गरूपाणेषु प्रतिज्ञया माषा इति निषेधो न प्रवर्तते किंतु श्रावय
वबुध्या गृह्यमाणत्वादिति मदर्पक्षिणोक्ते मुद्गावयवेषु गृह्यमाणेषु वर्तनीयतया माषावयवानामपि गृहस्तनए
वेति निषेधः प्रविशत्येवेति राद्धांतितं। तस्मात् वचनतो व्यापृतस्य साधारणद्रव्यापहारे दोषोऽस्त्येवेति सिद्धं
तं॥ ७॥ एवं मुख्यानां स्वभागविशेषवद्धनीयं स तस्य स्वरूपमाह। अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभ
योरप्यसौ रिक्थी पिंडदाता च धर्मतः॥ अपुत्रेण गुर्वनुज्ञया फलकांक्षिणा पुत्रोऽदवरं दिना परक्षेत्रे परस्य भार्यायां
गुरुनियोगेनोत्पादितः पुत्र उभयोर्बीजक्षेत्रिणोः सोऽसौ रिक्थी रिक्थहारी पिंडदाता च धर्मतः। यदा तु निय
मो देवरादिः स्वयमप्यपुत्रः परस्य क्षेत्रे स्वपुत्रार्थं प्रवृत्तो जनयति। सद्धि न कोठ्यां व्यायणोद्वा रिक्थि
स्य हारी पिंडदाता च। यदा तु नियुक्तः पुत्रवानेव केवलं क्षेत्रिणः पुत्रार्थं प्रवर्तते तदा तदुत्पन्नः क्षेत्रिण एव पुत्रो भव
वेति। न बीजिनः। स च नियमेन न बीजिनो रिक्थहारी पिंडदो वेति॥ यथाह मनुना। क्रियाभ्युपगमात्क्षेत्रं बी
जार्थं यत्प्रदीयते। तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च॥ इति। क्रियाभ्युपगमादिति। अत्रोत्पन्नमपत्यमावयोरुभ
योरपि भवतीति संविदं गीकरणात् क्षेत्रं स्वामिना बीजवपनार्थं बीजिने दीयते। तत्र तस्मिन् क्षेत्रे उत्पन्नस्यापत्य
स्य बीजिक्षेत्रिणौ भागिनौ दृष्टौ महर्षिभिः। तथा फलं त्वनभिसंधाय क्षेत्रि णां बीजिनां तथा। प्रत्यक्षं क्षे

यो ३ व ६ य ९ पर ६ दा ५ क्षे ३ दा मु ६ या ३

॥५५॥

त्रिपामर्थो बीजाद्योनिर्बलीयसी निःफलं तु न भिसंधायेयन्त्रोसन्ध्यमपत्य भावयोः न्ययोरस्त्विसेवमनभिसंधि धा०
परक्षेत्रे यदपत्यमुत्पाद्यते। तदपत्यं संसृत्रिण एवं यतो बीजाद्योनिर्बलीयसी गवाश्वादिषु तथा दर्शनात्। अत्रापि
नियोगो वाग्दत्ताविषय एव। इतरस्त्रीनियोगस्य मनुना निषिद्धत्वात्। देवराद्वा सपिंडाद्वा स्त्रिया सम्यङ्नियुक्तया॥
प्रजेप्सिताधिगंतव्या संतानस्य परिक्षये॥ विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि। एकमुत्पादयेत्पुत्रं तो४
न द्वितीयं कथंचनेति। एवं नियोगस्तु पश्चस्य मनुः स्वयमेव निषेधति। नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजा
तिभिः। अन्यस्मिन्हि नियुंजाना धर्मं हन्युः सनातनं॥ नोद्वाहिकेषु मंत्रेषु नियोगः कीर्त्यते क्वचित्। न विवाह
विधावुक्तं विधवावेदनं पुनः॥ अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः। मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशास
ति॥ स महीमखिलां भुंजन् राजर्षिप्रवरः पुरा। वर्णानां संकरं चक्रे कामोपहतचेतनः॥ ततः प्रभृति यो मोहात्प्रमीत मी८
पतिकां स्त्रियं। नियोजयत्यपत्यार्थं तं विगर्हंति साधवः इति। न च विहितप्रतिषिद्धत्वाद्विकल्प इति मंतव्यं। नि
योक्तॄणां निंदाश्रवणात्। स्त्रीधर्मेषु व्यभिचारस्य च दोषश्रवणात्। संयममस्य प्रशस्तत्वाच्च। यथा मनुः। का
तै८ मं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः। न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु। इति नी वेनार्थी पुरुषांतराश्रय
णे प्रतिषिद्धे। आसीतामरणात्क्षांता नियता ब्रह्मचारिणी। यो धर्म एकपत्नीनां कांक्षंती तमनुत्तमं। अनेका
नि सहस्राणि कौमारब्रह्मचारिणां। दिवंगतानि विप्राणामकृत्वा कुलसंततिं। मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये
व्यवस्थिता। स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥ अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते॥ सेह निंदामवाप्नो
ति परलोकाच्च हीयते इति पुत्रार्थमपि पुरुषांतराश्रयणं निषेधति। नाङ्गहित अनिषिद्धत्वाद्विकल्प इति न युक्तं॥
एवं विवाहसंस्कृतानियोगप्रतिषिद्धकत्वात् मन्मयो नियोगाद् स्यतेआ हा यस्या म्रियेत कन्याया वाचा सत्ये कृते प
तिः। तामनेन विधानेन निजो विंदेत देवरः॥ यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रतां। मिथो भजेताप्रसवात्सकृत्सकृदृतौ ऋ०

तागर्भी९

122

×तदा तस्य पुत्रं पौत्रं वा नाशयती×४

॥५५॥

स्वातंत्र्यस्य पितृस्थानीयस्य ज्येष्ठस्यापि दोषं वदता ज्येष्ठपरतंत्राणां पुत्रस्थानीयानां दुष्टानामपि कनीय
स्यां यौ कनीयसां सुतरां दोषो दर्शित एव। तथा च विशेषेण वदोषः श्रूयते। यो वै भागिनं भागान्नुदते चयते वैनं स य
दि वैनं न चयते अथ पुत्रमथ पौत्रं चयत इति। भागिनं भागार्हं भागान्नुदते भागादपकर्षति भागं तस्मै न प्र
यच्छति। स भागान्नुन्न एनं भागापहारं चयते नाशयति दोषिणं करोति। यदि तं न नाशयति तिस्य ष्टविशेषमंतर
रेणैव साधारणद्रव्यापहारिणो दोषः श्रुतः। अथ साधारणं द्रव्यमात्मनोपि स्वं भवतीति स्वबुद्ध्या गृह्णमा
णेन दोषमर्हतीति मतं। तदसत्। स्वबुद्ध्या गृहीतेप्यवर्जनीयतया परस्वमपि गृहीतमेवेति निषेधानुप्रवेशाद्दोषमा
वहत्येव। यथा मौद्गे चरौ विपन्ने सद्भावात् यथा माषेषु गृह्यमाणेषु अयज्ञिया माषा इति निषेधो न प्रविशति मुद्गावय
वबुद्ध्या गृह्यमाणत्वादिति सर्वपक्षिणोक्ते मुद्गावयवेषु गृह्यमाणेषु वर्जनीयतया माषावयवा अपि गृह्यन्त एव
वीति निषेधः प्रविशत्येवेति राजा प्रतिनोक्तं। तस्माद्वचनतो याप्यत्वं साधारणापहारे दोषास्त्वेवेति सिद्धं
तं॥८७॥ द्व्यामुष्यायणस्य भागविशेषवदनीयं सत्स्य स्वरूपमाह। अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभ
योरप्यसौ रिक्थी पिंडदाता च धर्मतः॥ अपुत्रो गुर्वनुज्ञया देवरादिनापरक्षेत्रे परस्य भार्यायां
गुरुनियोगेनोत्पादितः पुत्र उभयोर्बीजक्षेत्रिणोः रिक्थी रिक्थहारी पिंडदाता च धर्मतः। यदा सोपि नियु
क्तो देवरादिः स्वयमप्यपुत्रः परस्य क्षेत्रे स्वस्य च पुत्रार्थं प्रवृत्तो जनयति। स द्व्यामुष्यायणो द्वयोरपि रि
क्थहरः पिंडदाता च। यदा तु नियुक्तः पुत्रकाम एव केवलं क्षेत्रिणः पुत्रार्थं प्रवर्तते तदा तदुत्पन्नः क्षेत्रिण एव पुत्रो भव
ति। न बीजिनः। स च नियमेन न बीजिनो रिक्थहारी पिंडदो वेति॥ यथाह मनुः। क्रियाभ्युपगमात्क्षेत्रं बी
जार्थं यत्प्रदीयते। तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च इति। क्रियाभ्युपगमादिति। अत्रोत्पन्नमपत्यमावयोरुभ
योरपि भवत्विति संविदंगीकरणात् क्षेत्रं स्वामिना बीजवपनार्थं बीजिने दीयते। तत्र तस्मिन्क्षेत्रे उत्पन्नस्यापत्य
स्य बीजिक्षेत्रिणौ भागिनौ दृष्टौ महर्षिभिः। तथा फलं त्वनभिसंधाय क्षेत्रिणां बीजिनां तथा॥ प्रत्यक्षं क्षे

यो३ व६ य८ पर६ दा५ क्षे३ दा मुद्द या३

॥५५॥८

123

सवर्णादुत्पन्नः॥ माता वा भर्त्रनुज्ञया प्रोषिते प्रेते वा भर्त्तरि पिता वा तत्त्यो वा सवर्णाय स्नेहेन दीयते स तस्य दत्तकः पुत्रः॥
यथाह मनुः। माता पिता वा दद्यातां यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुत इति। आपद्ग्रहणात्
अनापदि न देयः। तत्तु रपंप्रति निषेधस्त्याप एकः पुत्रो न देयः। न त्वेवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वेति वसिष्ठ
स्मरणात्॥ बहुपुत्रे नैकपुत्रसद्भावेऽपि ज्येष्ठः पुत्रो न देयः। ज्येष्ठेन जातमात्रेण पुत्री भवति मानव इति तस्यैव
पुत्रकार्यकरणे मुख्यत्वात्॥ पुत्रं प्रतिग्रहीष्यन्प्रकारः पुत्रं प्रतिगृह्णीयात् बंधूनाहूय राजनि निवेद्य निवे
शनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबांधवं बंधुसंनिकृष्ट एव प्रतिगृह्णीयादिति वसिष्ठेनोक्तं। अदूरबां
धवमित्यस्य तद्देशभाषाविप्रकृष्टस्य प्रतिषेधः। एवं क्रीतस्य पंचत्वे कृत्रिमेष्वपि ज्ञेयं। समानन्यायत्वात्॥ क्री
तस्तु पुत्रस्ताभ्यां मातापितृभ्यां मात्रा पित्रा वा विक्रीतः सर्ववत्तश्चैवं पुत्रं ज्येष्ठवर्जयित्वा आपदि सवर्णा इव।
यच्च मनुनोक्तं क्री[illegible]णीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमंतिकात्। स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि
चेति न गुणैः सदृशो सदृशो वेति व्याख्येयं। न जात्या सजातीयेष्वयं प्रोक्तस्तु अपसंहारात्। कृत्रिमः स्यात्स्वय
कृतः। कृत्रिमस्तु पुत्रः स्वयं पुत्रार्थिना यः नष्टो वापदर्शनाद्भिन्नः पुत्री कृतो मातापितृविहीनस्तत्सद्भावे त
स्वतंत्रत्वात्तदाज्ञामातुः पुत्रः यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं दत्त उपगतः। सहोढ
सह नेत्रत्वात्तदाज्ञामातुः पुत्रः। सहोढः पुत्रः। अपविद्धो मातापितृभ्यामुत्सृष्टो गृह्यते
यस्तु गर्भे स्थिता गर्भिण्यां परिणीता वा यः पर्श्णीतः। सहोढः पुत्रः। अपविद्धो मातापितृभ्यामुत्सृष्टः गृह्यते
यः स गृहीतुः पुत्रः सर्वे त्रैवर्णिकेष्वेव। एवमुक्तेषु पुत्रानुक्रम्य तेषां दायग्रहणमाह। पिंडदोंऽशहरश्चैषां
पूर्वाभावे परः परः॥ ११२॥ एतेषां द्वादशानां पुत्राणां पूर्वस्याभावे उत्तरउत्तरः पिंडदः श्राद्धदाता स्यात् धन
हरो वेदितव्यः॥ औरस क्षेत्रिकयोः समवाये औरसस्यैव धनग्रहणे प्राप्ते मनुरपवादमाह। पुत्रिकापादकृता
यां तु यदि पुत्रो नुजायते। समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रिया इति न यान्यैषामपि सर्वस्मिन्नसत्य

पृ६
स४
स२

सं२
पि६
प्रलो
जः५
गौण४

124

पुत्तरेषां पुत्राणां चतुर्थांशभागित्वमुक्तं वशिष्ठेन। तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्येत चतुर्थभागभा
जी स्याद्दत्तक इति। दत्तकग्रहणं क्रीतकृत्रिमादीनां प्रदर्शनार्थं पुत्रीकरणाविशेषात्। तथा च कात्यायनः
उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः। सवर्णा असवर्णास्तु ग्रासाच्छादनभाजना इति। सवर्णाः क्षेत्र
जदत्तकाद्यस्ते सत्यौरसे चतुर्थांशहराः सुताः। असवर्णाः कानीनगूढोत्पन्नसहोढज
पौनर्भवास्ते त्वौरसे सति न चतुर्थांशहराः किंतु ग्रासाच्छादनभाजनाः। यदपि विष्णुवचनं। अप्रश
स्तास्तु कानीनगूढोत्पन्नसहोढजाः। पौनर्भवश्चैव नैते पिंडरिक्थांशभागिनः स्यादौरसे सति चतुर्थांशनि
षेधपरमेवं रसाच्चमाचेत्तु कानीनादीनामपि सकलपित्र्यधनं ग्रहणमस्त्येवाह वीनाचेपरः परं वचना
त्। यदपि मनुवचनं। एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः। शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनमिति
तदपि दत्तकादीनामौरसप्रतिकूलत्वे निर्गुणत्वे च वेदितव्यं। तत्र क्षेत्रजस्य विशेषो दर्शितस्तेनैव। षष्ठं
तु क्षेत्रजस्यांशं प्रदद्यात् पैतृकाद्धनात्। औरसो विभजन्दायं पित्र्यं पंचममेव वेति प्रतिकूलत्वे निर्गुणत्वे सगुण
यथा षष्ठमंशं। एकतरसद्भावे पंचममिति विवेकः। यदपि मनुना पुराणाः षड्बंधुदायादाः षड्
दबांधवश्च पुत्रा एव षडदायादबांधवैतु कः। औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च
दायादा बांधवाश्च षट्। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च शौद्रश्च षडदायादबांध
धवा इति तदपि स्वपितृसपिंडसमानोदकानां संनिहितानां रिक्थहराभावे पूर्वषट्कस्य नाडिर्वषट्कस्य रिक्थहरत्वं। उत्तरष
ट्कस्य तु तन्नास्ति। बांधवत्वं पुनः समानगोत्रत्वेन सपिंडत्वेनोदकप्रदानादिकार्यकरत्वं उभयस्यापि सम
मेवेति व्याख्येयं। गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सुतः। गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधा। तत्र दत्त्रिम

स३ औ८ घा८ स्व५ इति७ पं८ रि३

॥॥ २६

अधुना शूद्रविभागे विशेषमाह॥ जातोपि दास्यां शूद्रेण कामतोंऽशहरो भवेत्॥ मृते पितरि कुर्युस्तं तर १५८॥ फा॰ १
स्त्वर्द्धभागिकं॥ अभ्रातृको हरेत्सर्वं दुहितॄणां सुताद्दृते॥ शूद्रेण दास्यामुत्पन्नः पु॰ त्रः कामतः पितुरिच्छ
या भागं लभते। पितुरूर्ध्वं यदि परिणीतापुत्राः संति ते भ्रातरस्तं दासीपुत्रमर्द्धभागिकं कुर्युः॥ स्वभा
गादर्द्धभागं दद्युरित्यर्थः। अथ परिणीतापुत्रा न संति तदा कृत्स्नं धनं दासीपुत्रो गृह्णाति यदि परिणी दि ४
ता दुहितरस्तत्सुताश्च न संति। तत्सद्भावे त्वर्द्धभागिक एव दासीपुत्रः॥ अत्र शूद्रग्रहणात् द्विजातीनां दा २
स्यामुत्पन्नः पितुरिच्छयाप्यंशं न लभते। नाप्यर्द्धं दूरत एव कृत्स्नं किं त्वनुकूलश्चेज्जीवनमात्रं लभते॥
मुख्यगौणाः सुता दायं गृह्णन्तीति निरूपितं। तेषामभावे सर्वेषां दायादक्रम उच्यते॥ पत्नी दुहितरश्चै
व पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजो बंधुः शिष्यः सब्रह्मचारिणः॥३५॥ एषामभावे पूर्वस्य धनभा
गुत्तरोत्तरः॥ स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः॥ पूर्वोक्ता द्वादश पुत्रा यस्य न संति असाव ५८
पुत्रस्तस्यापुत्रस्य स्वर्यातस्य परलोकं गतस्य धनभाक् धनग्राही। एषां पत्न्यादीनामनुक्रान्तानां
मध्यात् पूर्वस्य पूर्वस्याभावे उत्तरोत्तरो धनभागिति संबंधः। सर्ववर्णेषु मूर्द्धावसिक्तादिषु अनुलोमजेषु उत्तरध
सूतादिषु प्रतिलोमजेषु च वर्णेषु च ब्राह्मणादिषु अयं दाय ग्रहणविधिः दाय ग्रहणक्रमो वेदि
तव्यः। तत्र प्रथमं पत्नी धनभाक्। पत्नी विवाहसंस्कृता पत्युर्नो यज्ञसंयोग इति स्मरणात्। एकवचनं व ४
तु जात्यभिप्रायेण। अतश्च बह्व्यश्चेत्सजातीया विजातीयाश्च ता यथांशं विभज्य धनं गृह्णन्तीति। प्लेष
वृद्धमनुरपि पत्न्याः समग्रधनसंबंधं वक्ति। अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। पत्न्येव
दद्यात्तत्पिंडं कृत्स्नमेव हरेद्धनं। बृहस्पतिरपि। यद्धनं पत्न्यभिगामि तदभावे दुहितृगामि मातृगामीति।

तदभावे पितृगामि॥१५८॥

पि॰२ पारि॰तु॰१

य॰१ काम्यौनोपि। पतीमर्तुर्द्रुह्नरारी या स्याद्व्यभिचारिणी। तदभावे दुहिता पधनु दाभवेत्तदेति। तथा अ ता॰१
पुत्रस्याघ कुलजा पत्नी दुहितरो वा॥ तदभावे पिता पुत्रास्त्रैकीर्त्तिता इति। वृहस्पतिरपि। कुले माता २
षुविद्यमानेषु पितृमातृसनाभिषु॥ असुतस्य प्रमीतस्य पत्नीतद्भागहारिणीति॥ एतद्भिरुद्धा
नीव वाक्यानि दृश्यंते। यथा। भ्रातृणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा। विभजेरन्धनं तस्य शेषास्ते
स्त्रीधनं विना॥ भरणं चास्य कुर्वी रन्स्त्रीणामाजीवनक्षयात्। रक्षंति शय्यां भर्तुश्चेदाच्छिद्युरितरा
स्विति पत्नीसद्भावेपि भ्रातृणां धनग्रहणं पत्नीभरणमात्रं च नारदेनोक्तं॥ मनुना तु पिता हरेदपुत्रस्य रि
क्थं भ्रातर एव वेति पुत्रस्य धनं पितुर्वा भ्रातुर्वा इति दर्शितं॥ तथा अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्॥ वा॰८
मातर्यपि च वृत्तायां पितुर्माता हरेद्धनमिति मातुः पितामह्याश्च धनसंबंधो दर्शितः॥ शंखेनापि। स्वर्यातस्य
तस्य च पुत्रस्य भ्रातृगामि द्रव्यं [illegible] तदभावे पितरौ हरेयातां ज्येष्ठा वा पत्नीति भ्रातॄणां
पित्रोर्ज्येष्ठायाश्च पत्न्याः क्रमेण धनसंबंधो दर्शितः॥ कात्यायनेनापि विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता ह
रेत्। भ्राता वा जननी वाथ माता वा तत्पितुः क्रमादित्येवमादीनां विरुद्धार्थानां वाक्यानां व्यवस्थां वक्तव्या।
नान्यथा व स्था कारणम स्तीति गौतमवचनाद्। पिंडगोत्रर्षिसंबंधा रिक्थं भजेरन्स्त्री चानपत्यस्य बीजं वा
लिप्सेतेति॥ अस्यार्थः। पिंडगोत्रर्षिसंबंधा अनपत्यस्य रिक्थं भजेरन्यदि बीजं लिप्सेतेति॥ मनुरपि
धनं यो बिभृयात् भ्रातुर्मृतस्य स्त्रियमेव वा॥ सोपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनमित्यनेनैतद्दर्शयति॥
विभक्तधनेपि भ्रातर्युपरते पत्यवधारणे च पत्न्या धनसंबंधो नान्यस्येति। तथा विभक्तधनेपि कनीयान् ज्येष्ठ
भार्यायां पुत्रमुत्पादयेद्यदि॥ समस्तत्र विभागः स्यादिति धर्मो व्यवस्थित इति। तथा वशिष्ठोपि। रिक्थलोभा

स्त्री वारिक्थं भजेत ४

१८
॥५९॥

भा नास्तीति नियोगद्दुनिरिच्छत्वोभाभ्री योगप्रतिषेधनं नियोगद्वारकएव पत्याधनसंबंधो नान्यथेति दर्शी
यति। नियोगाभावे तु पत्याभरणमात्रमेव नारदवचनाच्चाभरणं वास्य कुर्वीरन् स्त्रीणामाजीवनस्त्वादिति। २२
योगीश्वरेणापि किं वक्ष्यते॥ अपुत्रायोषितश्चैषां भर्त्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रति
कूलास्तथैव चेति। अपि च। द्विजातिधनं यज्ञार्थत्वान्न स्त्रीणां चैयत्नेन धिकाराद्धनग्रहणमयुक्तं॥ स्य४
तथा केनापि च स्मृतं। यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये। अरिक्थभाजस्ते सर्वे ग्रासाच्छादन
भाजनाः। यज्ञार्थे विहितं वित्तं तस्मात्तद्विनियोजयेत्। स्थानेषु धर्मजुष्टेषु न स्त्रीमूर्खविधर्मिषु इति॥
तदनुपपन्नं पत्नी दुहितरश्चेत्यत्र नियोगस्याप्रतीतेरप्रस्तुतत्वाच्च। अपि वेदमन्त्रवक्ष्ये। पत्याधनग्र
हणे नियोगो वा निमित्तं। तदुत्पन्नमपत्यं वा। तत्र नियोगस्यैव निमित्तत्वे तदुत्पादितपुत्रायाऽपि धनसंबं
धः प्राप्नोत्युत्पन्नस्य पुत्रस्य च धनसंबंधो प्राप्नोति। अथोत्पन्नस्यैव निमित्तत्वे तथा सति न९
पुत्रस्यैव धनसंबंधात् सत्तेति नारब्धं। अथ स्त्रीणां पतिद्वारको धनसंबंधः पुत्र
द्वारको वा नान्यथेति मतं। तदप्यसत्। अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं पित६
स्त्रीधनं स्मृतमित्यादि विरोधात्। किं च। पुत्राभावे पत्नीदुहितर इत्यारब्धं॥ तत्र नियोगाद्धनसंबंधं युद्ध
वदतां क्षेत्रजस्यैव धनसंबंधः कथं भवति। स च प्रागेवाभिहित इति पुत्रप्रकरणे पत्नीति नारब्ध
व्यं। अथ पिण्डगोत्रर्षिसंबंधा रिक्थं भजेरन् स्त्री चानपत्यस्य बीजं वा लिप्सेतेति गौतमवचनात् नियु
क्ताया धनसंबंध इति तदप्यसत्। नहि यदि बीजं लिप्सेत तदा अनपत्यस्य स्त्री धनं गृह्णीयादिति यम
र्थो स्मात् प्रतीयते। किं त्वनपत्यस्य धनं पिण्डगोत्रर्षिसंबंधा भजेरन्। स्त्री च साध्वी बीजं वा लिप्सेत् तस्म
यतो वा भवेदिति। न स्याधर्मातिरोपदेशः। वा शब्दस्य पक्षान्तरैर्व्विनये न्यपाप्रतीतेः। अपि च। संयतायां

वचनं९

१८
॥५९॥

128

एवं धनग्रहणं युक्तं न नियुक्तायाः स्मृति लोकविनिन्दितायाः अपुत्रायाय नेभर्तुरिति संयताया धन
ग्रहणमुक्तं। तथा नियो गाम्यविनिंदितो मनुना॥ नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजाति
भिः॥ अन्यस्मिन्हि नियुंजाना धर्मं हन्युः सनातनं इति। यत्तु वसिष्ठवचनं। रिक्थलोभान्नास्ति नि
योग इति न दविभक्ते संसृष्टिनि वा भर्तरि प्रेते धनसंबंधो नास्तीति स्वापत्यस्य धन संबंधार्थं नियोगो
न कर्तव्य इति व्याख्येयं। यदपि नारदवचनं भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयादिति
तदपि संसृष्टानां तु यो भाग स्तेषामेव स इष्यत इति संसृष्टिनां प्रस्तुत त्वात् तत्स्त्रीणामनपत्या
नां भरणमात्रप्रतिपादनेन च भ्रातॄणामप्रजाः प्रेयादित्य स्य संसृष्टिविषयत्वे संसृष्टानां तु या
भाग इत्यनेन पौनरुक्त्यमाशंकनीयं यतः प्रत्येकविवरणेन स्त्रीधनस्याविभाज्यत्वं न स्त्रीणां
च भरणमात्रं विधीयते। यदप्यपुत्रायोषितेन्ध्येषां रसादि वचनं तत् रुक्मीवादि स्त्रीविषयमिति
वक्ष्यते। यत्तु द्विजातिधन स्य यज्ञार्थत्वात् स्त्रीणां चेयज्ञेनधिकारात् न ग्रहणमयुक्तमि
ति। तदसत्। सर्वस्य द्रव्यजातस्य यज्ञार्थत्वे दानहोमाद्यसिद्धेः। अथ यज्ञशब्दस्य धर्मोपलक्ष
णत्वात् दानहोमादीनामपि धर्मत्वात्तदर्थं भवि रुद्धमिति मतं। एवं तर्हि अर्थकामयोर्द्धन साध्य
योरसिद्धिर्वस्यात्। तथा स्मृतिः धर्ममर्थं कामं च यथाशक्ति नहापयेत्। तथा न पूर्वाह्णमध्यंदिनापरा
न कुर्याद्यथाशक्ति धर्मार्थकामेभ्यस्तथा तेषु तांस्त्रिवर्गानुसन्धिप्रयं कुर्यात् एव प्रसादिया सर्वलक्षणो तन्मम
नुवचन विरोधः। अपि च धनस्य यज्ञार्थत्वे हिरण्यं भार्यमिति हिरण्यस्य क्रत्वर्थता निराकरणेन पुरुषार्थत्व
मुक्तं। प्रसक्तं तस्मात्। किंच यज्ञशब्दस्य धर्मोपलक्षणत्वे स्त्रीणामपि पूर्तधर्माधिकारात् न ग्रहणं

परां ७ ते चू ५ रे ४ त ३ तिर

च ४

॥६०॥

पुत्रान इ। यत्तु पारतंत्र्यवचनं न स्त्री स्वातंत्र्यमर्हतीत्यादि तदल्पापराधे न स्वधनस्वीकारे कोपि विरोधः। यत्तु
र्हिपरार्थं धन मुख्यमिति सादि वचनं मुच्यते। यत्स्वार्थमेवार्जितं यदुक्तं तच्च स्वएव नियोक्तव्यं पुत्रादि
दिष्ववि शेषात्
निरन्वीते एवं परंतु तायसार्थं लब्धं मदद्द्यात्सः काको विवाभवेन्न रक्तित्तेषम्न वणास्य पुत्रादि
यदपि कात्यायने नोक्तं। अदायिकं राजगामि योषिद्भृत्यौर्ध्वदेहिकं। अपास्य श्रोत्रियद्रव्यं श्रोत्रियेभ्यस्त
दर्पये दिति॥ अदायिकं दायरहितं यदुक्तं तद्राजगामि राज्ञो भवति। योषिद्भृत्यौर्ध्वदेहिकं अपास्य स्त्रीणा
मन्नानाच्छादनोपयुक्तमौर्ध्वदेहिकं धनं तु धान्याद्युपयुक्तं चापास्य परिहृत्य राजगामि भवतीति संबंधः। अ
स्यापवादः। श्रोत्रियद्रव्यं तु योषिद्भृत्यौर्ध्वदेहिकं अपास्य श्रोत्रियायोपपादयेदित्येतदप्यनरुद्धं स्त्रीविषयं। यो
षिद्ग्रहणात्तत्रारद वचनाच्च। अन्यत्र ब्राह्मणात्किंतु राजा धर्मपरायणः। तत्स्त्रीणां जीवनं दद्यादे
षदायविधिः स्मृत इत्येवरुद्धं स्त्रीविषयमेव। स्त्रीभ्रत्रणा तासं हनु पत्नी शब्दात् द्रौपदाः सं तामाधन
ग्रहणमविरुद्धं। तस्माद्विभक्तासंसृष्टि न्यपुत्रेस्वर्याते पत्नीधनग्रहणमंगत्यता सप्रमथ्यः सिद्धेयं वृत्ति
विभक्तस्यो नैवाल। संसृष्टानां वक्ष्यमाणालाताएते नाल्पधनविषयत्वं श्रीकरादिभिर्निरस्तं वे
दितव्यं तथाहि श्रीकरेषु पुत्रेषु सत्स्वपि जीवाद्विभागे जीवद्विभागे चापत्यास्तत्र समांशग्रहणमुक्तं॥
यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः॥ तथापि तुरूर्ध्वं विभजतां मातापि समंहरे
दिति च॥ तथा सत्सु पुत्रेष्वपि सर्वां तस्य धनं पत्नीभरणमात्रं लभत इति व्यामोहमात्रं। अ
यपत्न्यः कार्याः समांशिका इत्यत्र मातापि समं हरेदित्यत्र च जीवनोपयुक्तमेव धनं स्त्री हरतीति म
तं। नदसत्तैअंशशब्दस्य समशब्दस्य चानर्थक्यप्रसंगात्। स्यान्मतं बहुधने जीवनोपयुक्तं धनं

२६

द॰ ८
द॰ ६
पु॰ ५
स॰ २

130

ति ५

गच्छत्स्वल्पेतु पुत्रांशसममंशं गच्छतीति तत्र नाविधिवैषम्यप्रसंगात्। तथाहि। पत्न्यः कार्याः सम
शिकाः। मातापि पुत्रांशसमं हरेदिति वक्तुं धने जीवनमात्रोपपुत्त्वात् परमपेक्ष्य प्रतिपादयत्स्वल्पधने
तु पुत्रांशसममंशं प्रतिपादयति। यथा चातुर्मास्येषु द्वयोः प्रणयन्तीत्यत्र पूर्वपक्षिणा सौमिकप्र
णयनातिदेशोहेतुत्वेन वैश्वदेववदुत्तरवेदिमुपकिरति नाक्तुना सिद्धीय इत्युत्तरवेदिप्रतिषेधे
दर्शिते तत्प्रत्तैकदेशिना न सौमिकप्रणयनातिदेशात् प्राप्ता या उत्तरवेदिः तस्याः प्रथमोत्तमयोः पर्वणो
रयं प्रतिषेधः किंतु पात्रवत्पत्नीति प्राकरणिकेन वचनेन प्राप्ताया उत्तरवेद्याः प्रतिषेधोऽयमिति
हिते पुनः पूर्वपक्षिणा पात्रवत्पत्नीति प्रथमोत्तमयोः पर्वणोः प्रतिषेधमपेक्ष्य पाक्षिकीमुत्तरवे
दिं प्र यन्ति मध्यमयोस्तु निरपेक्षमेव नित्यवदुत्तरवेदिं प्रतिपादयतीति विधिवैषम्यदर्शि
तं। सिद्धान्ते त्वविविधिवैषम्यं प्रथमोत्तमयोः पर्वणोरुत्तरवेदिप्रतिषेधे नित्यानुवादो द्वयोः प्रणयं
तीत्यादिचोदितत्वे अपर्यालोचनया पात्रवत्पत्नीति मध्यमयोरेव वरुणप्रघाससाकमेधपर्वणोरुत्तर
वेदि विध्यर्थ इति दर्शितं। यदपि मतं। पितामहरेत्पुत्रस्य रिक्थं भ्रातर एव वेति
मनुस्मरणात्। न चास्य पत्नीत्यस्य पुत्रस्य भ्रातृगामित्वं तदभावे पितरौ हरेयातां ज्येष्ठा वा पत्नीति
स्वस्मरणाच्च। अपुत्रधनं भ्रातृगामीति प्राप्तं प्राप्ते स्मरणं चास्य कुबेरस्य स्त्रीणामाजीवनसयादि निवर्तना
र्थमरणापयुक्तं पत्नीलभनस्य पि हि दृष्टम्। एवं स्थिते बृहस्पतिनेऽत्र सवर्णेतरणोपयुक्तं पत्नीग्रह
तिशेषश्च भ्रातरो यदतु पत्नी मरणमात्रोपयुक्तमेव तिन तोऽस्य नवा तत्राकिं पत्येव गति
ने भ्रातरोपीति विरोधे स्तापनार्थ पत्नी दुहितरश्चैव मिति। तदप्यत्र नाचार्यो

यो १
स्या २
त ६
स्य ६
२८
पु ३
ग १

131

॥६१॥ २१ २२

स्यर

तिप५

निषेधा७

ल१० म१

तुध

नमस्यति। यत्तु पितामहेरेवपुत्रस्य पितृव्यभ्रातॄनेव वेत्ति विकल्पस्मरणात्। नेदं क्रमपरं वचनं अपितु धनग्रहणे धिकारिप्रदर्शनमात्रपरं तच्छ्वासस्य यथेपत्न्यादिगणेषु दृष्टं इति व्याचक्षते। ।शंखवचनमपि संसृष्टभ्रातृविषयमिति। अपिच अस्य विषयत्वमसंभवेनासकारणादानावगम्यते। धन भाग्रुत्तरोत्तरं सस्य च पत्नी दुहितरश्चेति विषय इति वा कमांतरमपेक्ष्यत्वं धनविषयत्वं पित्रादिषु तु धनमात्रविषयत्वमिति ह्योः विवियेषम्यतद्वचस्य मेवेति पासिद्धि न्। यत्तु हारीतवचनं। विधवायौवनस्था चेत् नारी भवति कर्कशा। आयुषः क्षयणार्थं तु दातव्यं जीवनं तदा ॥ इति। तदपि शंकित व्यभिचारायाः सकलधनग्रहणं। अस्मादेववचनादनाशंकित व्यभिचारायाः सकलधनग्रहणं गम्यते। एतदेवाभिप्रेत्योक्तं शंखेन ज्येष्ठा वा पत्नीति ज्येष्ठा गुणज्येष्ठा नाशंकितव्यभिचारा मक्ष्वेव धनं गृहीता यो क्रमेण रामि विमानवसात्प्रत्ती तिस्थितं। सवर्ग्रमिनवयं। तस्माद्पुत्रस्य स्वर्यातस्याविभक्तस्यासंसृष्टिनो धनं परिणीता स्त्री संयतासकलमेव गृह्णाती तिस्थितं। तदभावे दुहितरः दुहितरश्चेति बहुवचनं समानजातीयानां च समविषमानां प्राप्यर्थं तथा च कात्यायनः पत्नी भर्तुर्धनहारी या स्याद्व्यभिचारिणी तदभावे दुहितायद्यनूढा भवेत्तदेति। बृहस्पतिरपि भर्तुर्धनहारी पत्नी तांविना दुहिता स्मृता। अंगादंगात्संभवति पुत्रवद्दुहिता नृणां। तस्मात्पितृधनं त्वन्यः कथं गृह्णाति मानव इति। तत्रोढानूढा समवाये न्नूढैव गृह्णाति तदभावे दुहिता यद्यनूढा भवेत्तदेति विशेषस्मरणात्। तथा प्रतिष्ठिताप्रतिष्ठितासमवाये प्रतिष्ठितैव। तदभावे प्रतिष्ठिता। स्त्रीधनं दुहितॄणामप्रत्तानां अप्रतिष्ठितानां चेति गौतमवचनं पितृधनेपि समानत्वात्। नचैतत्पुत्रिकाविषयमिति मंतव्यं। तत्समः पुत्रिकासुत इति पुत्रिकायाः सुतस्यचौरससमानत्वेन पुत्रप्रकरणे भिधानात्। तदभावे दुहितृभावे दौहित्रो धनभाक्। यथाह विष्णुः॥ अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः। पूर्वेषां तु स्वधाकारे पौत्रदौहित्रकामत इति। मनुरपि। अकृता वा कृता वापि यं विंदेत्सदृशात्सुतं। पौत्री मातामहस्तेन दद्यात्पिंडं हरेद्धनमिति। तदभावे पितरौ च। भ्रातरो॥ अपि पुत्रपदाधिकरणवचनतायां दृश्यस्मरणात्। तदपवादः स्यादेकरोषस्य धनग्रहणे पित्रोः क्रमेण मतापि ते तथापि विग्रहः॥

ससमानजातीयानां १०

ताऽप्रतिष्ठिता

ध्य२

मर्तुर स्य५ ॥६१॥

132

वांतरेष्वपि सा धारणो माता तु सा धारणीति प्रत्यासत्तिन्यायादनंतरः सपिंडाद्यस्तस्य तस्य धनं भवेदिति वचनान्मातुरेव प्रथमं ध
नग्रहणं युक्तं। न च सपिंडेष्वेव प्रत्यासत्तिर्नियामिका। अपितु समानोदकादिष्वपि अविशेषेण धनग्रहणे प्राप्ते प्रत्यासत्तिरेव नि
यामिके यस्मादेव यच्चशादव गम्यत इति मातापित्रोर्मातुरेव प्रत्यासत्तिन्यायाद्धनग्रहणं युक्ततरं। तदभावे पितोन
ता कु पित्रभावे भ्रातरो धनभाजः॥ तथा च मनुः॥ पिता हरेदपुत्रस्य रिक्थं भ्रातर एव चेति। वसु न [illegible] अनपत्य
स्य पुत्रस्य माता दायमवाप्नुयात्॥ मातर्यपि च वृत्तायां पितुर्माता हरेद्धनमिति मनुवचनात्। जीवत्यपि पितरि माता तरि वृ
त्तायां पितुर्माता धनं हरेत् न पिता। यतः पितृहीनं तं न विजातीयेष्वपि पुत्रेषु गच्छति। पितामही तं तु सजातीयेष्वेव गच्छतीति
पितामह्येव गृह्णातीति। तद्व्याख्या योगानुमन्यते विजातीयपुत्राणामपि धनग्रहणास्योक्तत्वात्। चतुस्त्रिद्व्येकभागाः स्यु
रिति नेति। यस्तु न र्हाय ब्राह्मणो वंशजानि स्यामितिरिति मनुस्मरणात् तदनन्तरं प्रायेण पुत्राभिप्रायं भ्रातृष्वपि सोदराः
प्रथमं गृह्णीयुर्भिन्नोदराणां मातृविप्रकर्षात्। अनंतरः सपिंडाद्यस्तस्य धनं भवेदिति स्मरणात्। सोदराणामभावे भिन्नो
दरा धनभाजः। भ्रातॄणामप्यभावे तत्सुताः पितृक्रमेण धनभाजः। भ्रातृपुत्रसमवाये भ्रातृपुत्राणामनधिकारः। भ्रा
त्रभावे भ्रातृपुत्राणामधिकारो वचनात्। पदात् पुत्रे भ्रातरि स्वर्याते तेन भ्रातॄणामविभक्तेषु धनसंबंधे जाते भ्रातृधने
विभागात् प्रागेव यदि कश्चिद्भ्राता म्रियते तदा तत्सुतानामपि तत्रैवाधिकारप्राप्तस्तेषां भ्रातॄणां चाविभक्तद्रव्यग्रहणेऽपि ततो भा
गकल्पनेति युक्तं॥ भ्रातृपुत्राणामप्यभावे गोत्रजा धनभाजः। गोत्रजाः पितामही सपिंडाः समानोदकाश्च तत्र
प्रथमं पितामही धनभाक्। मातर्यपि च वृत्तायां पितुर्माता हरेद्धनमिति मातुरनंतरं पितामह्या धनग्रहणे प्राप्ते पित्रा

न१

133

।।६२।।

दौहित्रा तत्सुतपर्यंतानां बहूनां क्रमस्तेन मध्येनु प्रवेशः । भावात् पितुर्माता धनं हरेदिति स्मृत्यवचनस्य धनग्रहणाधिकारप्राप्तिमात्रपरत्वादुक्तोपेत
सुतानंतरं पितामही गृह्णातीत्यविरोधः ॥ पितामह्या अभावे समानगोत्रजाः सपिंडाः पितामहादयो धनभाजः । भिन्नगोत्राणां सपिंडानां बंधुशब्दे-
न ग्रहणात् । तत्र पितृसंतानाभावे पितामही पितामहः पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः । पितामहसंतानाभावे प्रपितामही प्रपितामहः
तत्पुत्रास्तत्सुताश्चेत्येवमासप्तमात्समानगोत्राणां सपिंडानां धनग्रहणं वेदितव्यं । तेषामभावे समानोदकानां धनसंबंधः ।
ते च सपिंडानामुपरि सप्त वेदितव्याः जन्मनामज्ञानावधिका वा । यथाह बृहन्मनुः सपिंडता तु पुरुषे सप्तमे विनिवर्तते । समानोदकभा-
वस्तु निवर्तेताचतुर्दशात् । जन्मनाम्नोः स्मृते रेके तत्परं गोत्रमुच्यते इति । गोत्रजाभावे बंधवो धनभाजः । बंधवश्च त्रिविधा आत्मबंधवः
पितृबंधवो मातृबंधवश्चेति । यथोक्तं । आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः । आत्ममातुलपुत्राश्च विज्ञेया आत्मबांधवाः । पितुः पितृष्व-
सुः पुत्राः पितुर्मातृष्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः । मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः । मातुर्मातुलपुत्राश्च विज्ञेया मा-
तृबांधवा इति । तत्र चांतरंगत्वात्प्रथममात्मबंधवो धनभाजः । तदभावे पितृबंधवस्तदभावे मातृबंधव इति क्रमो वेदितव्यः । बंधूनामभावे आचार्य-
स्तदभावे शिष्यः ॥ पुत्राभावे यः प्रत्यासन्नः सपिंडस्तदभावे आचार्य आचार्याभावे तेवासी आपस्तंबस्मरणात् । शिष्याभावे सब्रह्मचारी धनभाक् । येन सहैक-
स्मादाचार्यादुपनयनाध्ययनतदर्थज्ञानप्राप्तिः स ब्रह्मचारी ॥ तदभावे ब्राह्मणद्रव्यं यः कश्चिच्छ्रोत्रियो गृह्णीयात् । श्रोत्रिया ब्राह्मणस्यानपत्यस्य
रिक्थं भजेरन्निति गौतमवचनात् । तदभावे ब्राह्मणमात्रं । यथाह मनुः । सर्वेषामप्यभावे तु ब्राह्मणा रिक्थहारिणः । त्रैविद्याः शुचयो दांतास्त-
था धर्मो न हीयते इति । न कदाचिदपि ब्राह्मणद्रव्यं राजा गृह्णीयात् । अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिरिति मनुवचनात् ।
नारदेनाप्युक्तं । ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन । ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोन्यथेति । क्षत्रियाधनं सब्रह्मचारिपर्यंता-
नामभावे राजा हरेत् न ब्राह्मणाः । यथाह मनुः । इतरेषां तु वर्णानां सर्वाभावे हरेन्नृप इति । पुत्राः पौत्राश्च तत्पुत्र इत्युक्तं तदभावे पत्न्यादि-
य इत्युक्तं तानीतदुभयापवादमाह ॥ वानप्रस्थयतिब्रह्मचारिणां ऋक्थभागिनः । क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः । वानप्र-

दि३

।।६२।।

134

स्थस्य यतेर्ब्रह्मचारिणश्चानुक्रमेण प्रतिलोमक्रमेण वाचार्यः सच्छिष्यो धर्मभ्रातारकतीर्थी वरिक्थस्य धनभागिनः ॥ ब्रह्मचारी नैष्ठिकः
उपकुर्वाणस्य धनं मात्रादय एव गृह्णंति । नैष्ठिकस्य धनं तदपवादत्वेनाचार्यो ग्रहीतोच्यते । यतेस्तु धनं सच्छिष्यो गृह्णाति । सच्छि
ष्यः पुनरध्यात्मशास्त्रश्रवणधारणतदर्थानुष्ठानक्षमः । दुर्वृत्तस्याचार्यादिरपि विभागं नार्हति तस्मात् वानप्रस्थस्य धनं धर्मभ्राता क
तीर्थी गृह्णाति धर्मभ्राता प्रतिपन्नो भ्राता एकतीर्थी एकाश्रमी धर्मभ्रातात्वात्सावेकतीर्थी च धर्मभ्रातैकतीर्थी । एतेषामाचा
र्यादीनामभावे पुत्रादिषु सत्स्वप्येकतीर्थ्यादयो गृह्णातिनै ... त्वाश्रमांतरगता इति वसिष्ठस्मरणात् । आश्रमांतरगतानां रि
क्थसंबंध एव नास्ति कुतस्तद्विभागः । न च नैष्ठिकस्य स्वार्जितधनसंबंधः प्रतिग्रहादिनिषेधात् । अनिचयो भिक्षुः इति गौतम
स्मरणात् । भिक्षोरपि न स्वार्जितधनसंबंधः उच्यते । वानप्रस्थस्यापि तावत् अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा । अर्थस्य संच
यं कुर्यात् कृतमाश्वयुजे त्यजेदिति वचनाद्धनसंबंधोऽस्त्येव । यतिरपि कौपीनाच्छादनार्थं तु वासो बिभृयात्तथा योगसंभाररूपो ... पात्र
पादुकेत्येवमादिवचनाद्वस्त्रपुस्तकादिसंबंधोऽस्त्येव । नैष्ठिकस्यापि शरीरयात्रार्थं वस्त्रादिसंबंधोऽस्त्येवेति तद्विभागकथनं युक्तमेव ॥
... संसृष्टिनस्तु संसृष्टी । विभक्तं धनं पुनर्मिश्रीकृतं संसृष्टं तद
स्यास्तीति संसृष्टी ॥ संसृष्टी च नयेन केनापि किंतु पित्रापि पित्र्येण वा पथ्या ... हस्यापि । विभक्तेयः सुतः पित्रा भ्रात्रा वैकत्र संस्थितः ॥
पित्रा ... व्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते इति ॥ तस्य संसृष्टिनो मृतस्यांशं भागं विभागकाले विज्ञातगर्भायां भार्यायामप्रख्या
तस्य जातस्य पुत्रस्य संसृष्टी दद्यात् ॥ पुत्राभावे संसृष्टी यापहरेत् प्रक्षीयात् न पत्न्यादि ॥ संसृष्टिनस्तु संसृष्टी यस्य
पदेवामाह ॥ सोदरस्य तु सोदरः ॥ दद्याच्चापहरेच्चांशं जातस्य च मृतस्य च ॥ १३८ ॥ संसृष्टिनः संसृष्टीत्यनुवर्तते ॥ अत
सोदरस्य संसृष्टिनो मृतस्यांशं सोदर एव संसृष्टी ... स्यापवादमाह ॥ सोदरस्य तु सोदरः ॥ दद्याच्चापहरेच्चांशं जातस्य च मृतस्य चेति ॥
तस्य दद्यात् तदभावे परे इति पूर्ववत्संबंधः ॥ एवं च सोदरसंसर्गे सोदरस्य संसृष्टिनो धनं सोदर एव संसृष्टी गृह्णाति । न भिन्नोद

नवनं ५
ब८
द८
भ्रात्रा६
द९
स
ह
तप

॥६३ ४९

र: संसृष्टस्यपीति पूर्वोक्तस्यापवादः॥ ॥ इदानीं संसृष्टिस्य पुत्रे स्यर्थाभावे संसृष्टिनोऽभिन्नोदरस्यसो
दरस्य वा सद्भावे कस्य धनग्रहणं भूतिविप्रमायां द्वयोर्विभज्य ग्रहणोपकारणमाह। अन्योदर्यस्तु संसृष्टी ना
स्सं३ न्योदर्यो धनं हरेत्। असंसृष्ट्यपि वादद्यात् संसृष्टो नान्यमातृजः॥१३९॥ अन्योदर्यः सपत्नीभ्राता संसृष्टी धनं हरेन्नपु
नरन्योदर्यो धनं हरेत्। असंसृष्टी। अनेनान्वयव्यतिरेकाभ्यामन्योदर्यस्य संसृष्टित्वं धनग्रहणकारणमुक्तं।
त.५ असंसृष्ट्यपि तु इतरेणापि संबध्यते। अतश्चासंसृष्ट्यपि संसृष्टिधनमाददीत। कोसावित्यत आह॥ संसृष्ट इति
अ संसृष्टः सोदरः। संसृष्टः सोदर इति यावत्। अनेना
संसृष्टस्यापि सोदरस्य
न४ धनग्रहणे सोदरत्वं कारणमुक्तं संसृष्टत्वमितरेणापि संबध्यते। तत्रश्च संसृष्टः संसृष्टी स्यर्थः॥ नान्यमातृजः। अत्रै
एवसं६ व्याख्या हारेणाध्या स्याऽनंकार्यं संसृष्टस्य अन्यमातृजः संसृष्टिनो धनं नाददीतेति। एवं चासंसृष्टस्यापि वाधाद्दिस
द६ पितृव्यश्रवणात् संसृष्टोनान्यमातृज एवेत्यवधारणा विरोधाद् संसृष्टः सोदरस्य संसृष्टभिन्नोऽसोदरस्य च विभ
ज्य ग्रहणकर्तव्यमिसुक्तं भवति। द्वयोरपि धनग्रहणकारणसेपके कस्य सद्भावादेरतदेव स्पष्टीकृतं मनुना।
ह विभक्ताः संसृष्टिनो विभजेरन्पुनर्यदीति संसृष्टिविभागं प्रक्रम्य येषां ज्येष्ठः कनिष्ठो वा हीयेतं शप्रदानतः म्रियेता
न्यतरो वापि तस्य भागो न लुप्यते। सोदर्या विभजेयुस्तं समेत्य सहिताः सम। भ्रातरो ये च संसृष्टा भगिन्यश्च स
नाभयः इति वदता येषां भ्रातॄणां संसृष्टिनां मध्ये ज्येष्ठः कनिष्ठो वा मध्यमो वां शप्रदानतो प्रव्रज्यादिना सार्वविभ
भागिकस्य सत्त्वे विभागकाल इति यावत्। हीयेत स्वांशात् स्यात्आश्रमान्तरपरिग्रहेण ब्रह्महत्यादिना वा म्रियेत

॥६३॥

136

न्नेवा तस्य भागो न लुप्यते। अतः पृथगुद्धरणीयो न संसृष्टिन एव गृह्णीयुरित्यर्थः। तस्याप्यपवादमाह। सोद-
र्यविभक्तेयुस्तु मिति। तमुद्धृतं भागं सोदर्याः सहोदरा असंसृष्टा अपि समं सुदेशांतरगता अपि समभागं यु-
संहताः संभूय सममन्यूनाधिकभावेन नयेयुर्यस्मात्तेऽपि तत्सोदराः संसृष्टास्ते च सनाभयो भगिन्यश्च विभजेयुः
समं विभज्य गृह्णीयुरित्यर्थः॥१३९॥ पुत्रपत्न्यादिसंसर्गस्थानां पत्नीगृहपात्रमुक्तं तस्यापवादमाह। क्लीबोऽथ पतितस्तज्जः पं-
गुरुन्मत्तको जडः। अंधोऽचिकित्स्यरोगाद्या भर्तव्याः स्युर्निरंशकाः॥१४०॥ क्लीबो नपुंसकः। पतितो ब्रह्महादिः तज्जः पतितोत्पन्नः। पंगुः पा-
दविकलः। उन्मत्तको वातिकपैत्तिकश्लैष्मिकसान्निपातिकग्रहावेशाख्यलक्षणैरुन्मादैरभिभूतः। जडो विकलान्तःकरणो हिता-
वधारणाक्षम इति यावत्। अंधो नेत्रविकलः। अचिकित्स्यरोगोऽप्रतिसमाधेयक्षयादिरोगः। आद्यशब्देनाश्रमांतर-
गतपितृद्वेष्युपपातकिबधिरमूककाणनिरिन्द्रियाणां। यथाह वसिष्ठः। अनंशास्त्वाश्रमांतरगता इति। नारदोऽपि। पितृद्वि-
ट् पतितः षंढो यश्च स्यादौपपातिकः। औरसा अपि नैते अंशं लभेरन् क्षेत्रजाः कुतः। इति। मनुरपि। अनंशौ क्लीबपतितौ जात्यं-
धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः इति। निरिन्द्रियाः निर्गतमिंद्रियं येषां स्याद्याधा[illegible] दिना
सन्निरिन्द्रियः। एते क्लीबादयो निरंशा रिक्थभाजो न भवन्ति। केवलमन्नाच्छादनदानेन पोषणीया भर्तव्याः। अभरणे
तु पतितत्वदोषः। सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा। ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत् इति मनुस्मर-
णात्। भर्तव्या एवं। ...इत्यर्थः। एतेषां विभागात्प्रागेव दोषप्राप्तावनंशित्वं न पुनर्विभक्तस्य। विभागोत्तरकालं अ-
प्यौषधादिना दोषनिर्हरणे भागप्राप्तिरस्त्येव। विभक्ते तु सुतो जातः सवर्णायां विभागभागित्यस्य समानन्याय

षि ६
ग्रहणं ६
औ ६

ग्र ७
स्य ५

137

॥६४॥

दि ३

औ ४

स्यात्॥ पतितादिषु पुल्लिङ्गमविवक्षितं। अतश्च पत्नीदुहितृमात्रादीनामप्युक्तदोषदुष्टानामनंशत्वं वेदितव्यं॥ क्लीबादीनाम
नंशत्वात् तत्पुत्राणामनंशत्वे प्राप्त इदमाह॥ औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः॥ एतेषां क्लीबादीनामौरसाः
क्षेत्रजा वा पुत्रा निर्दोषा अंशग्रहणविरोधिक्लैब्यादिदोषरहिता भागहारिणो अंशग्राहिणो भवन्ति। तत्र क्लीबस्य क्षेत्रजः पु
त्रः संभवत्यन्येषामौरसा अपि। इतरे सक्षेत्रजयोर्ग्रहणं इतरपुत्रव्युदासार्थं॥ किं च। क्लीबादिषु हितेषु तेषां विशेषमाह।
सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः॥ एषां क्लीबादीनां सुता दुहितरो यावद्विवाहसंस्कृता भवन्ति॥ तावद्भ
रणीयाः॥ वरादप्तसंस्कार्याश्च क्लीबादिपत्नीनां विशेषमाह॥ अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः॥ नि
र्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च॥ एषां क्लीबादीनामपुत्राः पत्न्यः साधुवृत्तयः स
दाचाराश्चेद् भर्तव्या भरणीयाः॥ व्यभिचारिण्यस्तु निर्वास्याः॥ प्रतिकूलास्तथैव च। निर्वास्या भरणी
याश्चाव्यभिचारिण्यश्चेत्तु न पुनः प्रातिकूल्यमात्रेण भरणमपि न कर्तव्यं॥ विभजेरन् सुताः
पित्रोरित्यत्र स्त्रीपुंसधनविभागं संक्षेपेणाभिधाय पुरुषधनविभागो विस्तरेणाभिहितः इदानीं स्त्रीधनविभागं विस्त
रेणाभिधास्यंस्तत्स्वरूपं तावदाह॥ पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतं। आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्ति
तं॥ पित्रा मात्रा पत्या भ्रात्रा च यद्दत्तं यच्च विवाहकाले अग्नावधि मातुलादिभिर्दत्तं आधिवेदनिकमधिवेदननिमि
त्तं अधिविन्नस्त्रियै देयं। आदिशब्देन रिक्थक्रयसंविभागपरिग्रहाधिगमप्राप्तं। तत् स्त्रीधनं
मन्वादिभिरुक्तं। स्त्रीधनशब्दश्च यौगिको न पारिभाषिकः। योगसंभवे परिभाषाया अयुक्तत्वात्। यत्तु मनुने

८९

पासनम ३

म२

॥६४॥

138

139

व्य०१

कं। भैग्न्यध्यावहनिकं दत्तं च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिति स्त्रीधनस्य षड्विधत्वं
तन्न्यूनसंख्याव्यवच्छेदार्थं नाधिकसंख्याव्यवच्छेदाय। अध्यग्न्यादिस्वरूपं च कात्यायनेनोक्तं। विवाहकाले य
त्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ। तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितं॥ यत्पुनर्लभते नारी नीयमाना पितु
र्गृहात्॥ अध्यावहनिकं नाम स्त्रीधनं तदुदाहृतं। प्रीत्या दत्तं तु यत्किंचित् श्वश्र्वा वा श्वशुरेण वा। पादवंदनिकं
चैव प्रीतिदत्तं तदुच्यते। ऊढया कन्यया वापि पत्युः पितृगृहे पि वा। भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृ
तमिति किंच। बंधुदत्तं तथा शुल्कमन्वाधेयकमेव च। बंधुभिः कन्याया मातृबंधुभिश्च यद्दत्तं शुल्कं यद्गृहीत्वा कन्या
न्यादीयते। अन्वाधेयकं परिणयनादनु पश्चादाहितं दत्तं। उक्तं च कात्यायनेन। विवाहात्परतो यच्च लब्धं भर्तृकु
लस्त्रिया। अन्वाधेयं च तद्द्रव्यं लब्धं पितृकुलात्तथेति स्त्रीधनं परिकीर्तितमिति गतेन संबंधः। एवं स्त्रीधनमुक्त्वा
तद्विभागमाह। अतीतायामप्रजसि बांधवास्तदवाप्नुयुः॥१४५॥ तत्पूर्वोक्तं स्त्रीधनमप्रजस्य नपत्यायां दुहितृ दौहित्र दौहित्री
च पुत्ररहितायां स्त्रियामतीतायां बांधवा भर्त्रादयो वक्ष्यमाणा गृह्णंति। सामान्येन बंधुशब्देन ग्रहणेपि अधिकारिणो
गृहीता इदानीं विवाहभेदेनाधिकारिभेदमाह। अप्रजः स्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि। दुहितॄणां प्रसूता चे

भा०२

च्छेषेषु पितृगामि तत्॥ अप्रजसः स्त्रियाः पूर्वोक्तायाः ब्राह्मदैवार्षप्राजापत्येषु चतुर्षु विवाहेषु भार्यात्वप्राप्तायामती
तायाः पूर्वोक्तं धनं प्रथमं भर्तुर्भवति। तदभावे तत्प्रत्यासन्नानां सपिंडानां भवति। शेषेष्वासुरगांधर्वराक्षसपै
शाचेषु विवाहेषु तदप्रजः स्त्रीधनं पितृगामि माता च पिता च पितरौ गच्छतीति पितृगामि। एकशेषनिर्देशाया

॥६५॥ मा१

अपि मातुः प्रथमं धनग्रहणं पूर्वमेवोक्तं। तदेवं तत्प्रत्यासन्नानां धनग्रहणं सर्वेष्वेव विवाहेषु प्रसूतापत्यवती चेद्दुहि
तॄणां तदा न भवति। अत्र दुहितृशब्देन दुहितृदुहितार उच्यन्ते। मातृष्वादुहितॄणां मातुर्दुहितरः शेषमित्यत्रोक्तत्वात्। अ
तश्च मातृधनं मातरि वृत्तायां प्रथमं दुहितरो गच्छन्ति। तत्रैवोढानूढासमवाये नूढा गच्छन्ति। तदभावे परिणीता
तत्रापि प्रतिष्ठिताप्रतिष्ठितासमवाये प्रतिष्ठिता गच्छन्ति। तदभावे प्रतिष्ठिता। यथाह गौतमः। स्त्रीधनं दुहि
तॄणां प्रत्तानामप्रतिष्ठितानां चेति। तत्र च गौतमस्य प्रत्तानां प्रतिष्ठितानां च अप्रतिष्ठितानां पत्यनिर्दूनावाए तच्छुस्र
क्व्यतिरेकेण। स्तुतं तु सोदर्यामे भागभिनीमुत्वः सोदर्याणामहं मातुरिति गौतमवचनात्। सर्वाभावे दुहितृ
णामभावे दुहितृदुहितरो गच्छन्ति। दुहितॄणां प्रसूतानां वेति त्यस्माद्वचनात्। सौतोपि न्नमातृकाणां समवाये मा
तृद्वारेण भागकल्पना। प्रतिमातृत्वं स्ववर्गे भागविशेष इति गौतमस्मरणात्। दुहितृदौहि णां समवाये दौ
हित्रीणां किंचिद्देयं दातव्यं। यथाह मनुः। यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या धनात्किंचित्प्रदे
यं प्रीतिपूर्वकमिति। दौहित्रीणामप्यभावे दौहित्रा धनहारिणः। यथाह नारदः। मातुर्दुहितरोऽभावे दुहितॄणां तदन्वय
इति तदन्वयशब्देन संहितदौहित्रपरामर्शात्। दौहित्राणामभावे तु पुत्रा गच्छन्ति। ताभ्य ऋते तदन्वय इत्युक्तत्वात्। मनुर
पि दुहितॄणां पुत्राणां च मातृधनसंबंधं दर्शयति। जननी संस्थितायां तु समं सर्वे सहोदराः। भजेरन्मातृकं
रिक्थं भगिन्यश्च सनाभयः। इति मातृकं रिक्थं सर्वे सहोदराः समं भजेरन्। सनाभयो भगिन्यश्च समं भजेरन्निति सं
बंधः। न पुनः सहोदराः भगिन्यश्च संभूय भजेरन्निति। इतरेतरयोगस्य द्वंद्वैकशेषाभावादप्रतीतेः। अपि

ता४ म५ णा६ नि ची७ र२

॥६५॥

140

स्तु३

गकर्तृत्वान्वयवाचिचशब्दोपपत्तेर्यथा देवदत्तः कृषिं कुर्याद्यज्ञदत्तश्चेति॥ समग्रहणमुद्धारविभागनिवृत्त्यर्थं
सोदरग्रहणं भिन्नोदरनिवृत्त्यर्थं। अनपत्यहीनजातिस्त्रीधनं तु भिन्नोदरा अप्युत्तमजातिसपत्नीदुहिता गृह्णाति। तद
दभावे तदपत्यं जथा च मनुः॥ स्त्रियां यद्द्रव्यं दत्तं पित्रा दत्तं कथंचन। ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवे
दिति॥ ब्राह्मणीग्रहणमुत्तमजात्युपलक्षणं॥ अतश्चानपत्यवैश्यस्य स्त्रीधनं क्षत्रियाकन्या गृह्णाति। तदभावे पु
त्राः पुत्राणामभावे पौत्राः पितामहीधनहारिणः॥ ऋणं प्राजऋणं प्रति कुर्युरिति गौतमवचनात्॥ पुत्रपौत्रैर्ऋणं देय
मिति पौत्राणामपि पितामहर्णीकरणेऽधिकारात्॥ सौत्रौ मप्यभावे पूर्वोक्ता भर्त्रादयो बांधवा धनहारिणः॥ स्त्रीधनप्रसंगेन
वाग्दत्ताविषये किंचिदाह॥ दत्तां कन्यां हरन्दंड्यो व्ययं दद्याच्च सोदयं। कन्यां वाचा दत्त्वा अपहरन् द्रव्यानुबंधाद्यनुसारे
ण राज्ञा दंडनीयः। एतच्चापहारे कारणाभावे। सति तु कारणे दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेदित्यपहाराभ्यनुज्ञाना
न्न दंड्यः। यच्च वाग्दाननिमित्तं वरेण संबंधिनां वोपचारार्थं धनं व्ययीकृतं तत्सर्वं सोदयं सवृद्धिकं कन्यादाता वराय
दद्यात्॥ ७॥ अथ कथंचिद्वाग्दत्ता संस्कारात्प्राक् म्रियेत तदा किं कर्तव्यमित्यत आह॥ मृतायां दत्तमादद्यात्परिशोध्यो
भयव्ययं॥ ४६॥ यदि वाग्दत्ता असंस्कृता म्रियेत तदा यत्पूर्वमंगुलीयकादि शुल्कं वा वरेण दत्तं तद्वर आददीत। परिशोध्यो
भयव्ययं। उभयोरात्मनः कन्यादातुश्च यो व्ययस्तं परिशोध्य शिष्टमाददीत। यत्तु कन्यायै मातामहादिभि
र्दत्तं हारोराभूषणादिकं वा क्रमायातं तत्सोदरा भ्रातरो गृह्णीयुः॥ सं मृतायां गृह्णीयुः सोदरास्तदभावे माता तद
भावे पितेति बौधायनस्मरणात्॥ ७॥ मृताप्रजस्त्रीधनं भर्तृगामीत्युक्तं तदानीं जीवंत्याः सप्रजाया अपि स्त्रिया

नि३ पा६ दा७ कार७ ऋ६ कृ५ पा६ कं६ व२

141

धनग्रहणे क्वचिद्भर्तुरस्वातन्त्र्यमाह ॥ दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके । गृहीतं स्त्रीधनं भर्ता न स्त्रियै
दातुमर्हति ॥४७॥ दुर्भिक्षे कुटुंबरक्षणार्थं धर्मकार्ये वश्यकर्तव्ये व्याधौ च सं
प्रतिरोधके बंदिग्रहनिग्रहादौ द्रव्यांतररहितः स्त्रीधनं गृहीत्वा न पुनर्दातुमर्हतीति ॥ प्रकारांत
रेणापहरन्दद्यात् ॥ भर्तृव्यतिरेकेणाजीवत्याः स्त्रियाधनं केनापि दायादेन न ग्रहीतव्यं जीवंतीनां तु तासां
ये तद्धरेयुः स्वबांधवाः । तांछास्याच्चौरदंडेन धार्मिकः पृथिवीपतिरिति दंडविधानात् ॥ पत्यौ जीवति यः स्त्री
भिरलंकारो धृतो भवेत् । न तं भजेरन्दायादा भजमानाः पतंति ते इति दोषश्रवणाच्च ॥ अधिवेदनिकं स्त्रीधन
मुक्तं तदाह ॥ अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं । न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्तितं ॥ यस्या उपरि
विवाहः साधिविन्ना । सा चासौ स्त्री च तस्यै अधिविन्नस्त्रियै आधिवेदनिकं अधिवेदननिमित्तं धनं समं यावद
धिवेदनार्थं व्ययीकृतं तावद्दद्यात् । यस्यै भर्त्रा श्वशुरेण वा स्त्रीधनं न दत्तं ॥ दत्ते पुनः स्त्रीधने अधिवेद
भवति तावद्देयमित्यर्थः ॥४८॥ एवं भागमुक्त्वा तत्संदेहे निर्णयहेतुमाह । विभागनिह्नवे ज्ञातिबंधुसा
क्ष्यभिलेखितैः । विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥ विभागस्य निह्नवे अपलापे ज्ञातिभिः पितृबंधुभिः

बंधुभिः २

मातुलादिभिः साक्षिभिः पूर्वोक्तलक्षणैः लेख्येन च विभागपत्रेण विभागभावना विभागनिर्णयो ज्ञातव्यः
तथा यौतकैः पृथक्कृतैर्गृहक्षेत्रैश्च पृथक्कृष्यादिकार्यप्रवर्तनेन पंचमहायज्ञादिधर्मानुष्ठा

५ निकं तद्द्रव्यस्यार्द्धं दद्यात् ॥ अर्धशब्दः समभागवाची ॥ असमप्रविभागवचनो न भवति ॥ अतश्च यावता सर्वं दत्तमाधिवेदनिकं समं ५

धनग्रहणे क्वचिद्भर्तुरभ्यनुज्ञानमाह ॥ दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके । गृहीतं स्त्रीधनं भर्ता नाभस्त्रि
येदातुमर्हति ॥ ४७ ॥ दुर्भिक्षे कुटुंबरक्षणार्थं धर्मकार्ये वश्यकर्तव्ये व्याधौ च सं
संप्रतिरोधके । वंदिग्रह निग्रहादौ द्रव्यांतररहित स्त्रीधनं गृह्णन् स तन्न पुनर्दातुमर्हतीति ॥ प्रकारांत
रेणापहरन्दद्यात् ॥ भर्तृव्यतिरेकेण जीवंत्याः स्त्रियाः धनं केनापि दायादेन न ग्रहीतव्यं जीवंतीनां तु तासां
ये तद्गृह्णीयुः स्वबांधवाः । तांश्चास्यानुशासेद्दंडेन धार्मिकः पृथिवीपतिरिति दंडविधानात् । पत्यौ जीवति यः स्त्री
भिरलंकारो धृतो भवेत् । न तं भजेरन्दायादा भजमानाः पतंति ते इति दोषश्रवणाच्च ॥ अधिवेदनिकं स्त्रीधन
मुक्तं तदाह ॥ अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं । न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकीर्तितं ॥ यस्यामुपरि
विवाहः साधिविन्ना । सा चासौ स्त्री च तस्यै अधिविन्नस्त्रियै आधिवेदनिकं अधिवेदननिमित्तं धनं समं यावद
धिवेदनार्थं व्ययीकृतं तावद्दद्यात् । यस्यै भर्त्रा श्वशुरेण वा स्त्रीधनं न दत्तं ॥ दत्ते पुनः स्त्रीधने अधिवेद
भवति तावद्देयमित्यर्थः ॥ ४८ ॥ एवं भागमुक्त्वा तत्संदेहे निर्णयहेतुमाह ॥ विभागनिह्नवे ज्ञातिबंधुसा
क्ष्यभिलेखितैः ॥ विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥ विभागस्य निह्नवे अपलापे ज्ञातिभिः पितृबंधुभिः
मातुलादिभिः साक्षिभिः पूर्वोक्तलक्षणैः लेखेन च विभागपत्रेण विभागभावना विभागनिर्णयो ज्ञातव्यः
तथा यौतकैः पृथक्कृतैर्गृहक्षेत्रैश्च पृथक्कृष्यादिकार्यप्रवर्तनेन पंचमहायज्ञादिधर्मानुष्ठा

बंधुभिः २

५ निकं तद्द्रव्यस्यार्धं दद्यात् ॥ अर्धशब्दः समप्रविभागवचनो न भवति ॥ अतश्च यावता तत्सर्वं दत्तमाधिवेदनिकसमं ५

२

४४

॥ ६७ ॥

वृद्धादिलक्षणं च तेनैवोक्तं ॥ निर्णीतानैर्वृद्धं तत्कार्यं तद्रूपान्विते॥ एवं वा यदि वा दृष्टास्ते तु वृद्धाः प्रकीर्तिताः। ये तत्र पूर्वं सामंताः पश्चाद्दे-
शांतरं गताः। तन्मूलत्वात्तु ते मौलाः ऋषिभिः परिकीर्तिताः॥ उपश्रवणसंभोगकार्याख्यानोपचिह्निताः॥ उद्धरंति पुनर्यस्मादुद्धृतास्ते
ततः स्मृताः इति गोपा गोरक्षकाः सीमाकर्षणाः सीमासन्निहितक्षेत्रकर्षुकाः। सर्वे च नगोचराः। वनचारिणो व्याधादयस्ते मनुनो-
क्ताः॥ व्याधाः शाकुनिकान् गोपान् कैवर्तान्मूलखानकान्। व्यालग्राहानुंछवृत्तीनन्यांश्च वनगोचरानिति॥ स्थलमुन्नतो भूप्रदेशः॥ अंगा-
रः अग्नेरवशिष्टांशः। धान्यतुषाधान्यत्वच। द्रुमान्यग्रोधादयः। सेतुर्जलप्रवाहबंधः। वल्मीकपाषाणादिबंधः। आयतशब्देन वेणुवालुकादिनां
ग्रहणं एतावन्ति प्रकाशप्रकाशभेदेन द्विप्रकाराणि। तथा च मनुः। सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंशुकान्। शाल्मलीन्सा-
लतालांश्च क्षीरिणश्चैव पादपान्॥ गुल्मान्वेणूंश्च विविधान्शमीवल्लीस्थलानि च। शरान्कुब्जकगुल्मांश्च तथा सीमा न नश्यति॥
तडागान्युदपानानि वाप्यः प्रस्रवणानि च। सीमासंधिषु कार्याणि देवतायतनानि च इति प्रकाशरूपाणि। उपच्छन्नानि चान्या-
नि सीमालिंगानि कारयेत्। सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययं। अश्मनोस्थीनि गोवालांस्तुषान्भस्म कपालिकाः। करीष-
मिष्टकांगारश्चर्करा वालुकास्तथा। यानि चैवंप्रकाराणि कालाद्भूमिर्न भक्षयेत्। तानि संधिषु सीमायामप्रकाशानि कारयेत्॥ ए-
तैर्लिंगैर्नयेत्सीमां राजा विवदमानयोरिति प्रच्छन्नलिंगानि। एतैः प्रकाशाप्रकाशरूपैर्लिंगैः सामंतादिप्रदर्शितैः सीमां प्रति वि-
वदमानयोः सीमानिर्णयं कुर्यादिति॥ अथ पुनश्चिह्नानि न संति विद्यमानानि वा तानि लिंगानि लिंगतया संदिग्धानि तदा निर्ण-
योपायमाह॥ सामंता वा समग्रामाश्चत्वारोष्टौ दशापि वा। रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः॥ सामंताः पूर्वोक्त-
लक्षणाः समग्राः एकमन्ये न सीम्नि निर्णयं ब्रूयुः तैर्निर्णीतां सीमां तत्सामंतदर्शितसकललिंगयुक्तां साक्ष्यादिनामान्वितां चा-
न्नभरणार्थं पत्रे समारोपयेत्। उक्तं च मनुना। ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निर्णयं निबध्नीयात्तथा सीमां सर्वां-
स्तांश्चैव नामत इति। एतेषां साक्षिसामंतप्रभृतीनां सीमानयं कर्मणा

२४

त६

नि५

॥ ६७ ॥

144

दिनादारभ्य यावत्त्रिपक्षं राजदैविकं व्यसनं चेन्नोत्पद्यते। तदा तत्प्रदर्शितासीमानिर्णयः अयं च राजदैविकव्यसनावधिः कात्यायने
नोक्तः॥ सीमाचंक्रमणे कोशे पादस्पर्शे तथैव च। त्रिपक्षपक्षसप्ताहं दैवराजिकमिष्यत इति॥ एतच्च सीमायामुक्तसाक्षिवचसा
त्रिपक्षाभ्यंतरे रोगादि दृश्यते। अथ वा प्रतिवादिनिर्दिष्टसाक्ष्यधिकसंख्यगुणिसाक्ष्यंतरविरुद्धवचनात्॥ तदा ते मत्याधितया दं
डनीयाः स्युः। इत्यनंते पृथक्पृथग्दंड्या राज्ञा मध्यमसाहसं॥ अनंते भिथ्यावदने निमित्तभूते समस्तसर्वैः सामंताः प्रत्येकं मध्यम
साहसेन चत्वारिंशदधिकेन पणपंचशतेन दंडनीयाः॥ सामंतविषयतावास्य साक्ष्यमौलादीनां समसंख्यत्वे दंडांतरविधाना
त् अवगम्यते। तथा च मनुः॥ यथोक्तेन नयंतस्ते पूयंते सत्यसाक्षिणः विपरीतं नयंतस्तु दाप्याः स्युर्द्विशतं दममिति॥ नारदेनापि
अथ चेदनृतं ब्रूयुः सामंताः सीमनिर्णये॥ सर्वे पृथक्पृथग्दंड्या राज्ञा मध्यमसाहसमिति सामंतानां मध्यमसाहसं दंडमभि
धाय तद्वाक्ये दनृतं ब्रूयुर्निर्मुक्ता भूमिकर्मणि प्रत्येकं तु जघन्यास्ते विनेयाः पूर्वसाहसमिति तत्सामंतादिषु प्रथमसाहस
मुक्तवान्मौलादीनामपि तमेव दंडमाह। मौलवृद्धाश्च न्ये दंडगण्याः पृथक्पृथक् विनेयाः प्रथमेनैव साहसेनानृते ते

द७

स्थिता इति। आदिग्रहणेन गोपशाकुनिकव्याधवनेचराणां ग्रहणं यद्यपि शाकुनिकादीनां वापरत्वाल्लिंगप्रदर्शन
द्वारेणोपयोगो न साक्षात्सीमानिर्णये तथापि लिंगप्रदर्शने एव तद्वाभाविलसंभवाद्दंडविधानमुपपद्यत एव। अनंतेनु
पृथक्पृथग्दंड्या इत्येतत्तु दंडविधानमज्ञानविषये। बृहस्पतिना लुप्तहीतानां न सर्वे निर्णयं यदि कुर्युर्भयाद्वा लोभाद्वा दंड्यास्तु

न३

तमसाहसमिति ज्ञानविषये साक्ष्यादीनां कात्यायनेन दंडांतरविधानात्। तथा साक्षियचने भेदे प्रथममेव दंडं स्तेनैवोक्तः की
र्तितं यदि भेदः स्याद्दंड्यास्तु तमसाहसमिति॥ एवमज्ञानादिना अनृतवचने साक्ष्यादीन्दंडयित्वा पुनः सीमाविचारः प्रव
र्तयितव्यः अज्ञानात्को दंडयित्वा पुनः सीमां विचारयेदिति कात्यायनोक्तं दुष्टास्तु सामंतानन्यान्मौलादिषि सहस्रं भि

145

॥६८॥

प्रकारोयं सीमामेवं धर्मविदो विदुरिति निर्णयप्रकारस्तेनैवोक्तः ॥ ७ ॥ यदा पुनः सामंतप्रभृतयो ज्ञातारः चिह्नानि च न सं-
संति तदा कथं निर्णयः स्यात् तत्राह । अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता ॥ ज्ञातॄणां सामंतादीनां लिंगानां वृक्षादी-
नां अभावे राजैव सीम्नः प्रवर्तिता ॥ प्रवर्तयिता । अंतर्भावितो ण्यर्थः । ग्रामद्वयमध्यवर्तिनीं विवादास्पदीभूतां भुवं स-
मं प्रविभज्यास्य यं भुवं स्थापयित्वा उभयोः समसमर्थतन्मध्ये सीमालिंगानि कुर्यात् यदा तस्यां भूमौ यन्मतरस्योपकारातिशयो
दृश्यते तदा तस्यैव ग्रामस्य सकला भूः समर्पणीया । यथाह मनुः ॥ सीमायामविषह्यायां स्वयं राजैव धर्मवित् ॥ प्रदि-
शेद्भूमिमेकेषामुपकारादिति स्थितिः ॥ ८ ॥ [illegible] तथा तु मसिदेशं माह ॥
आरामायतनग्रामनिपानोद्यानवेश्मसु ॥ एष एव विधिर्ज्ञेयो वर्षांबुप्रवहादिषु ॥ आरामः पुष्पफलोपचयहेतुर्भूभागः
आयतनं निवेशनं पञ्चालकुटाद्यर्थो भूभागो भूप्रदेशः ॥ ग्रामः प्रसिद्धः ॥ ग्रामग्रहणं च नगराद्युपलक्षणार्थं । निपानं पा-
नीयस्थानं कूपवाप्यादि प्रसिद्धं । उद्यानं क्रीडार्थो भूभागः । वेश्म गृहं । एतेषु आरामादिषु यमेव सामंतसाक्ष्यादिलक्षणो वि-
धिर्ज्ञातव्यः ॥ तथा प्रवर्षणोद्भूतजलप्रवाहेषु अनयोः प्रहसमध्येन जलौघः प्रवहतु नयोर्वैत्यं वं प्रकारे विवादे ॥ आदिग्र-
हणात् स्मादि सर्वप्राचीनत्व विधिर्वेदितव्यः । तथा च कात्यायनः ॥ क्षेत्रकूपतडागानां केदारारामयोरपि । गृह-
प्रासादावसथनृपदेवगृहेषु चेति ॥ सीमानिर्णयमुक्त्वा तत्प्रसंगेन मर्यादाप्रभेदनादौ दंडमाह ॥ मर्यादायाः प्रभेदे च सीमातिक्र-
मणे तथा । क्षेत्रस्य हरणे दंडा अधमोत्तममध्यमाः ॥ अनेकक्षेत्रव्यवच्छेदिका साधारणभूर्मर्यादा तस्याः प्रकर्षेण भेदने सी-
मातिक्रमणे सीमानमतिलंघ्य कर्षणे । क्षेत्रस्य च भयादिदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमसाहसा दंडा वेदितव्याः । त

मा ६

तां ६

॥६८॥

146

क्षेत्रग्रहणं चात्र गृहारामाद्युपलक्षणार्थं यदा पुनः स्वीयत्वं स्याक्षेत्रादिकमपहरति ॥ तदाहुर्दृष्टं तोदमो वेदितव्यः यथाह मनुः ॥

च२ गृहं तडागमारामं क्षेत्रं वा भीषया हरन् ॥ शतानि पंच दंड्यः स्यादज्ञानाद्द्विशतो दम इति ॥ परिह्रय मापो क्षेत्रादि

यस्यापर्यालोचनया कदाचिदुत्तमोपि दंड प्रयोक्तव्यः ॥ अत एवाह ॥ बृहः सर्वस्वहरणं पुरान्निर्वासनांकने ॥ तदंगच्छेद

इत्युक्तो दंड उत्तमसाहस इति ॥ यः पुनः परक्षेत्रे सेतुकूपादिकं प्रार्थनया विना [illegible] निर्मातुमिच्छति तन्निषेधं तः

क्षेत्रस्वामिन एव दंड इत्याह ॥ न निषेध्योल्पबाधस्तु सेतुः कल्याणकारकः ॥ परभूमिं हरन्कूपः स्वल्पक्षेत्रो बहूदकः ॥

न६ परकीयां भूमिमपहृत्य [illegible] पि सेतुर्जलप्रवाहबंधकः क्षेत्रस्वामिना न प्रतिषेध्यः सर्वदीर्घपीडा बहूपकारश्च भवति ॥ कूपस्त्वल्पक्षेत्र

र७ व्यापित्वेनाल्पबाधो बहूदकत्वेन बहूपकारकोऽनिवारणीयः ॥ कूपग्रहणं च वापीपुष्करिण्याद्युपलक्षणार्थं यदा पुनः सेतुः समग्र

क्षेत्रं तथा बहु बाधो [illegible] समीपक्षेत्रवर्तिन्या अल्पोपकारस्तदा सो निषेध्य इत्यर्थादुक्तं भवति सेतोश्च द्वैविध्यमुक्तं नार

दने ॥ सेतुश्च द्विविधो ज्ञेयः खेयो बंध्यस्तथैव च ॥ तोयप्रवर्तनात्खेयो बंध्यः स्यात्तन्निवर्तनात् ॥ यदा स्वामिनिर्मितसेतुभेद नादिना न

सं७ ष्टं स्वयं संस्कारोति तदा पूर्वस्वामिनं तदंशं न प्रवास्य [illegible] संस्कुर्यात् ॥ यथाह नारदः ॥ पूर्वप्रवृत्तमुत्सन्नमपृष्ट्वा स्वामिनं तु यः ॥ सेतुं प्रव

र्तयेत्कश्चिन्न स तत्फलभाग्भवेत् ॥ मृते तु स्वामिनि पुनस्तद्वंश्ये चापि मानवे ॥ राजानमामंत्र्य ततः कुर्यात्सेतुप्रवर्तनमिति ॥

क्षेत्रस्वामिनं [illegible] सेतोः प्रवर्तयिता रं प्रत्याह ॥ स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रकल्पयेत् ॥ उत्पन्ने स्वामिनो भो

गस्तदभावे महीपतेः ॥ क्षेत्रस्वामिनमनभ्युपगम्य [illegible] दभावे [illegible] परक्षेत्रे सेतुं प्रवर्तयति स सेतुफलभाग्न भवत्यपि तु

तदुत्पन्नफलं क्षेत्रस्वामिनो भोगस्तदभावे राज्ञः [illegible] प्रार्थनया प्रदानेन वा क्षेत्रस्वामिनं तदभावे राजानं वानुज्ञाप्यैव

परक्षेत्रे सेतुः प्रवर्तनीय इति तात्पर्यार्थः ॥ क्षेत्रस्वामिनां सेतुर्न प्रतिषेध्य इत्युक्तम् [illegible] तस्यैव [illegible]

धं तरमाह ॥ फालाहतमपि क्षेत्रं यो न कुर्यान्न कारयेत् ॥ स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत् ॥ यः पुनः क्षेत्रस्वामिपार्श्वे ह

स्वा७

६४ शातितमो भागः॥ माषो विंशतिमो भागः पणस्य परिकीर्त्तितः इति नारदस्मरणात्॥ एतच्चाज्ञानविषयं॥ ज्ञानपूर्वे तु पणस्य पादो द्वौ गां तद्द्विगुणं महिषीतथा॥ तथा ४६

॥६९॥

मिदं क्षेत्रं क्षामी स्वं गोक्षस्य पश्चादुक्तजातिः न चान्यनकर्षयाम्॥ तत्क्षेत्रं यद्यधिका लाहतमीक्षद्ले [illegible] सस्यबीजवापार्हं तत् तं न १
यादि कृषस्य फलं यावत्तत्रोत्पस्यधसामं तादिकल्पितं तावद्देशो कर्षको दापनीयः॥ तत्क्षेत्रं पूर्वं कर्षका दू [illegible] सधान्येन को
रयेत्॥ ७ पशुनिक्षीमाविवादः॥ व्यवहारपदानां परस्परं हेतुहेतुमद्भावात्तेषामाद्यमणादानमित्यादिया क्रमो न विवक्षितः तत् मावा ३
षी४ ति [illegible]मेपाः स्वामिपालविवादोऽभिधीयते॥ माषानष्टौ तु महिषी सस्यघातस्य कारिणी। दंडनीया तदर्द्धं तु गौस्तदर्द्धमजाविकं
परसस्यविनाशकारिणी महिषी अष्टौ माषान् दंडनीया॥ गौस्तदर्द्धं चतुरो माषान् अ [illegible] जामेषाश्च माषद्वयं दंडनीयाः॥ म
हिष्यादीनां धनसंबंधाभावात् तत्स्वामी पुरुषो लक्ष्यते॥ माष श्चात्र तांम्रिकपणस्य विंशतिको बसानां
पादो द्वंदः प्रकीर्तितः इति स्मृत्यंतरोक्तं द्रष्टव्यं॥ अस्यु न नारदेनोक्तं॥ माषं [illegible] गां दापयेद्द्वौ माषौ महिषीं तथा। तथा
जाविकवसानां दंडः स्यादर्द्धमाषक इति। तस्तु न प्रहरौ योग्यमला वत्रौषधक्षणाधिगयं अपराधातिशायेन कश्चिद्द [illegible]
ष्यमाह॥ भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः॥ यदपगायः परक्षेत्रे सस्यं भक्षयित्वा तत्रैव विरितां शेरते। तदा यथो निर
क्ताद्द्विगुणो दंडो वेदितव्यः॥ सवसानां पुनर्भक्षयित्वोपविष्टानां यथोक्ता चतुर्गुणो दंडो वेदितव्यः। वसतां द्विगुणः प्रोक्तः स
वसानां चतुर्गुण इति वचनात्॥ क्षेत्रान्तरेष्वंतरस्यातिदेशमाह॥ सममेषां विवीतेपि खरोष्ट्रं महिषीसमं॥ विवीतः प्रचुरतृण
काष्ठा रक्ष्यमाणः परिगृहीतो भूप्रदेशः॥ तदुपघातेपि उक्तरक्षेत्रदंडसमं दंडमेषां महिष्यादीनां विद्यात्। रवरोष्ट्रं खरोष्ट्रं तन्महि न५
षीसमं महिषीयत्र यद्दंड्या न दंडेनदंड्यते॥ तत्र तावद्दंडेन वदंडेन खरोष्ट्रमपि प्रत्येकं दंडनीयो। सस्यापराधकले खरोष्ट्रयोः प्र
त्येकं महिषीतुल्यत्वात्॥ दंडस्य चापराधानुसारित्वात्। [illegible] खरोष्ट्रमिति समाहारोपि वषित॥ परसस्यविनाशे गोमि स्वा ३
नोदंड उक्तः इदानीं क्षेत्रस्वामिनो फलमसौ दापनीय इत्याह। यावत्सस्यं विनश्येत्तु तावत्स्यात्क्षेत्रिणः फलं गोपस्ताड्यस्तु
गोमी तु पूर्वोक्तं दंडमर्हति॥ सस्यग्रहणं क्षेत्रोपचयोपलक्षणार्थं॥ यस्मिन् क्षेत्रे यावत्सस्यलालध्यान्यादिकं गवादिभिर्विनाशितं

॥६९॥

तावत्क्षेत्रफलमेव पालो तावति क्षेत्रे यावद्भक्षयतीति सामन्तैः परिकीर्तितं । तत्क्षेत्रस्वामिनो गोस्वामी दापनीयः गोपस्तु ताडनी
यः स्वामिना फलं दापनीयः । गोपस्य च ताडनं पर्यन्तं धनदंडसहितमेव पालदोषे पशोस्य मारो दृष्टव्यो । स्वामिना पालदोषेण स
गोस्तु सस्यानि नाशयेत् ॥ न तत्र गोमिनां दंडः पालस्तं दंडमर्हतीति च नारदः । गोमी पुनः स्वापराधेन सस्यनाशे ... दृष्टव्यो के
दंडमेवार्हति ॥ न ताडनं फलदानं पुनः सर्वं गोमिन एव । तत्फलपुष्पाद्यक्षीरोपभोगद्वारेण तत्क्षेत्रफलभोगित्वात् ।
गवादिभक्षितायां शस्यं फलादिकं गोमिने वा गृहीतव्यं मध्यस्थकल्पितमोल्यदानं नक्षीतप्रायत्वात् ॥ अत एव नारदः
गोभिस्तु भक्षितं सस्यं यो नरः प्रतियाचते । सामन्तानुमतं देयं धान्यं यत्तत्र वापितं । पलालं गोमिनां देयं धान्यं वै कर्षकस्य
स्तिति ॥ छ ॥ क्षेत्रविशेषे पशुदंडमाह ॥ पथिग्रामविवीतान्तक्षेत्रे दोषो न विद्यते । अकामतः कामचारे चोरवद्दंडमर्हति
इति । पथिमार्गसमीपवर्ति क्षेत्रे ग्रामविवीतसमीपवर्ति च क्षेत्रे अकामतो गोभिर्भक्षिते गोपगोमिनोर्द्वयोरप्यदोषः । दोषाभा
वप्रतिपादनं च दंडाभावार्थं विनष्टसस्यमोल्यनैदीप्रतिषेधार्थं च । कामचारे कामतश्चारणे चौरवच्चौरस्येव दंडं
स्वाद्दंडमर्हति । एतच्चैतत्क्षेत्रविषयं । तत्रापि वृतं धान्यं यदि हिंस्युः पशवो यदि । न तत्र प्रणयेद्दंडं नृपतिः पशुरक्षिणा
मिति दंडाभावस्यानावृतक्षेत्रविषयत्वेन मनुनोक्तत्वात् । आवृते पुनर्मार्गादिक्षेत्रेऽपि दोषो स्यैव । वृतिकरणं च तेनैवोक्तं
वृतिं च तत्र कुर्वीत यामुष्ट्रो नावलोकयेत् ॥ छ ॥ पशुविशेषे दंडाभावमाह ॥ महो
क्षोत्सृष्टपशवः सूतिकागन्तुकादयः । पालो येषां न ते मोच्या दैवराजपरिप्लुताः ॥ महोक्षास्ता वृषास्ते महोक्षाः । वृषसेके
उत्सृष्टपशवो वृषोत्सर्गादिविधानेन दैवतोद्देशेन त्यक्ताः । सूतिका प्रसूता अभिनवप्रसूता । आगन्तुकः स्वयूथात्परिभ्र
ष्टो देशान्तरादागतः । एते मोच्याः परसस्यभक्षिणोऽपि न दंड्याः । येषां च पालो विद्यते तेऽपि दैवराजपरिप्लुताः । दैवराजोपह
ताः । सस्यनाशकारिणो न दंड्याः । आदिग्रहणात् हस्त्यश्वादयो गृह्यन्ते । तेऽपि न सामान्ताः । अदंड्या हस्तिनो ... प्रजापाल

स२

नि८

वो६

त्रा१

199

॥७०॥

हितेरताः। अदंडौ कारकं दैवचयेन्नृपः स्वल्कृतलक्षणाः। अदंडत्यागे तु कोशोस्मृतिकात्यायिनस्मारिणी। अदंडयाश्वाहस्वेगाच प्राढू
कालेतथैवचेति अत्रोसस्य पशूनामस्वामिकत्वेनदंडयत्वा संभवात् दृष्टांतार्थमुपादानं। यथोत्सृष्टपशवो यो न दंड्या
एवं महोक्षादयः इति। गोस्वामिनः उक्तमिदानीं गोपस्य पशुपदिश्यते। यथार्पितानू पशून् गोपः सायं प्रत्यर्पयेत्तथा। प्र
मादमृतनष्टांश्च प्रदाप्यः कृतवेतनः। गोस्वामिनाप्रातः कालेयथागणयित्वासमर्पिताः पशवस्तथैवसायंकालेगो
पोगोस्मिने पशून्विगणय्य प्रत्यर्पयेत्। प्रमादेनस्वापराधेनमृतान्नष्टांश्च पशून्कृतलवेतनः प्रकल्पितवेतनो गो
पः स्वामिने दाप्यः चेतनकल्पनाच्च नारदेनोक्ता। गवांशतात्तुवत्सतरीधेनुः स्याद्विशतांभृतिः। प्रतिसंवत्सरं गोपस्य
दोहश्चाष्टमेहनीति। प्रमादनाशश्च मनुनास्पष्टीकृतः। नष्टंजग्धंचकृमिभिः श्वहतंविषमेमृतं। हीनंपुरुषकारेण
प्रदद्यात्पाल एव त्विति। प्रसह्यचोरैरपहृतं न दाप्यः। यथाह मनुः। विघुष्य तु हृतं चोरैर्नपालो दातुमर्हति। यदि
देशेचकालेच स्वामिनः स्वस्यशंसति। दैवमृतानां पुनः कर्णादिप्रदर्शनीयं। कर्णौचर्मचवालांश्च वस्तिस्नायुंचरोचनां।
पशुस्वामिषु दद्यात्तु मृतेष्वंकानि दर्शयन्निति स्मरणात्। किंच। पालदोषविनाशे तु पालेदंडो विधीयते। अर्द्ध
त्रयोदशपणाः स्वामिनोद्रव्यमेव तु। पालदोषेणपशुविनाशेतु अधिकत्रयोदशपणांदंडंपालोदाप्यः। स्वामिनस्तुद्रव्यं
चिनष्टपशूमूल्यं मध्यस्थकल्पितं दंड परिमाणार्थः श्लोकान्यत्र चोक्तमेन गोप्रसंगाद्गोचरमाह। ग्रामेच्छयागोप्रचरो
भूमिराजवशेन वा। द्विजस्तृणैधः पुष्पाणि सर्वतः स्वमुदाहरेत्। ग्रामेच्छया ग्राम्यजनेच्छया भूम्यंश्च महत्त्वापेक्षया राजे
च्छया वा गोप्रचरः कर्तव्यः। गवादीनांचरणार्थे क्रियानाथिक्रभागो यः स्थः परिकल्पनीयइत्यर्थः। द्विजस्तृणं धंतःसमि
गवाग्निदेवतार्थं तृणकाष्ठकुसुमानि सर्वतः स्ववदनिवारितः आहरेत्फलानि त्वपरिवृत्तादेवागोग्न्यर्थं तृणमेधान्वीर
धयनस्पतीनांचपुष्पाणि स्ववत्सलः फलानित्वपरिवृत्तानामिति गोतमवचनात्। इतश्चपरिगृहीतविषयं। अपरिगृ

दनिवा१

॥७०॥

स८ तु६ रो८ तु७ प्र५ ल४

150

ज१ वा२ स्य४ मि८ षः८ लो४ ता१

हीतेषु व्यतिरिक्तस्यापि परिग्रहादेयस्य त्वसिद्धेः। यथा तेनैवोक्तं। ग्रा नीभिहृ क्रयसंधिमार्गपरस्य हा ह्रिग्रामे विविते। यस्तु नेरुक्तं। तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलं। अनापृच्छन् हि गृह्णानो हस्तच्छेदनमर्हतीति। तद्व्यतिरिक्तविषयं ज्ञानापहृतविषयं। गवादिव्यतिरिक्तविषयं वा। इदमपरं गवादीनां ज्ञानासनन्नैमोक्षार्थमुच्यते। धनुःशतपरीणाहो ग्रामक्षेत्रान्तरं भवेत्। द्वे शते खर्वटस्य स्यान्नगरस्य चतुःशतं। ग्रामक्षेत्रयोरन्तरं धनुःशतपरिमितं परीणाहः सर्वतोदिक्कं तु सस्यैकार्थं कर्कटस्य प्रचुरकंटकसंतानस्य ग्रामस्य द्वे शते परीणाहः। नगरस्य बहुजनसंकीर्णस्य धनुषां चतुःशतपरिमितमन्तरं कार्यं। ७। इति स्वामिपालविवादप्रकरणं। ७। संप्रत्यस्वामिविक्रयाख्यं व्यवहारपदमुपक्रमते। तस्य च लक्षणं नारदेनोक्तं। निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा। विक्रीयते समक्षं यत्स ज्ञेयोऽस्वामिविक्रयः इति। तत्र किं स्यादित्याह। स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते। हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः।

स्वमात्मसंबंधि द्रव्यमन्यविक्रीतमस्वामिविक्रीतं यदि पश्यति तदा लभेत गृह्णीयात्। अस्वामिविक्रयस्य स्वत्वहेतुत्वाभावात्। विक्रीतग्रहणं दत्ताहितयोरुपलक्षणार्थं। अस्वामिकृतत्वेन तुल्यत्वादत एवोक्तं। अस्वामिविक्रयं दानमाधिं च विनिवर्तयेदिति। क्रेतुः पुनरप्रकाशिते क्रये दोषो भवति। तथा हीनात् द्रव्यागमोपायहीनात्। रहस्येकान्ते संभाव्यद्रव्यादपि हीनमूल्ये अल्पतरेणाल्पमूल्येन क्रये वेलाहीने च यो हीनो वै हीनः क्रेता सोऽन्यैः तस्करो भवति। तस्करवद्दण्डभाग्भवतीत्यर्थः। यथोक्तं। द्रव्यमस्वामिविक्रीतं प्राप्य स्वामी तदाप्नुयात्। प्रकाशं क्रयतः शुद्धिः क्रेतुः स्तेयं रहः क्रयादिति। स्वाम्यपि युक्ते नकेनचित्किं कर्तव्यमित्यत आह। नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरं। देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत्। नष्टमपहृतं वा अन्यदीयं क्रयादिना प्राप्य हर्तारं विक्रेतारं ग्राहयेच्चौरोद्धरणिकादिभिः। आत्मनिर्विशुद्ध्यर्थं राजदेशप्राप्त्यर्थं च। अथवा अविदितदेशान्तरगतः कालान्तरे

151

।७१।।

प३

क्रोध

यातिपन्नमन्त्र मूलसमाहरणाशक्तौ विक्रेतारमदर्शयित्वैव स्वयमेव तद्धनं नाष्टिकस्य समर्पयेत् तावतैवासौ शुद्धो भवतीति
श्रीकराचार्येण व्याख्यातं। तदिदमनुपपन्नं। विक्रेतुर्दर्शनाच्छुद्धिः इत्येतेन यो नरः स्वयं प्रसंगादेतदन्यथा व्याख्यायते।
नष्टापहृतमिति नाष्टिकं प्रत्ययमुपदेशः॥ नष्टमपहृतं वा स्वीयं द्रव्यमासाद्य केनचिद्धस्ते स्थितं ज्ञात्वा तेन हर्तारं क्रेतारं स्थान
पालादिभिर्ग्राहयेत्। देशकालातिपत्तौ देशकालातिक्रमे स्थानपालाद्यसंनिधाने तद्ग्रहणकालात् प्रागेव पलायनादौ
कायं स्वयमेव गृहीत्वा तेभ्यः समर्पयेत्॥ गृहीते हर्तरि किं कर्तव्यमित्यत आह। विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो
दमं क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्याधिक्रयी। यद्यसौ गृहीतः क्रेता न मयेदमपहृतमन्यस्मात्क्रीतमिति
यदि तदा तस्य क्रेतुर्विक्रेतृदर्शनमात्रेण शुद्धिर्भवति। न पुनरसौ विनयोग्यः। किंतु। तत्प्रदर्शनेन विक्रेत्रा सह नाष्टि
कस्य विवादः। यथाह बृहस्पतिः। मूले समाहृते क्रेता नाभियोज्यः कथंचन। मूलेन सह वादस्तु नाष्टिकस्य विधीयत
इति। तस्मिंश्च विवादे यदि स्वामित्वं विक्रेतुर्निश्चयो भवति। तदा तस्य नष्टापहृतस्य गवादिद्रव्यस्य योऽधिक्रयी विक्रे
ता तस्य सकाशात्स्वामी नाष्टिकः स्वीयद्रव्यमवाप्नोति। नृपश्चापराधानुरूपं दण्डं क्रेता स्वमूल्यमवाप्नोति। अथासौ दे
शान्तरं गतस्तदा योजनसंख्यया आनयनार्थं कालो देयः। प्रकाशं वा क्रयं कुर्यान्मूलं वापि समर्पयेत्। मूलानयनकालश्च ये५
देयस्तत्राध्वसंख्ययेति स्मरणात्। अथासौ न देशान्तरं याति मूलमाहर्तुं न शक्नोति। तदाक्रयं शोधयित्वैव शुद्धो भवति।
असमाहार्यमूलस्तु क्रयमेव विशोधयेदिति वचनात्। यदा पुनः साक्ष्यादिभिर्हृदये न वा क्रयं शोधयति। मूले
च न प्रदर्शयति। तदासौ चोरवद्दण्डभाक् भवति। अनुपस्थाप्य मूलं क्रयं वाप्यविशोधयन्। यथाभियोगं धनिने नु२
धनं दाप्यो दमं च सः इति स्मरणात्। स्वल्पेनापि तामूल्ये विक्रीतमिति के। तत्र प्रभुणा किं कर्तव्यमित्यत आह। आगमेनाप

त१ तु२

।७१।।

प१

भोगेन न स्वत्वं प्राप्यमतोऽन्यथा। पश्य वंशोद्गमस्तस्य राज्ञे तेनैव भाविते। आगमेन विशुद्धं क्रियायां हिनाऊ भोगेन च मदीयं द्र
व्यं तच्चैवं न पश्यम पहृतं चेत्स्वधिभाव्यं साधनीयं तत्स्वामि न भावितोऽन्यथा तेन स्वामिना। अपात्ते वि पंचबंधेन द्र
व्यस्य पंचमांशो दण्डो नाधिके नराः सदंपः॥ अत्र चायं क्रमः। पूर्वस्वामी न प्रथम मात्मीयं साधयेत्ततः क्रेता चौ
र्यपरिहारार्थं मूल्यलाभाय च विक्रेतारमानयेत्॥ अथानेतुं न शक्नोति तदा स्वदोषपरिहाराय क्रयं साधये
त्। द्रव्यं नाधिकस्य समर्पयेदिति॥ तस्करः प्रणष्टादिकमाह। हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात्
अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिं पणान्॥ हृतं प्रनष्टं वो यादि हस्तस्थं द्रव्यमनेन मदीयं द्रव्यमपहृतमिति
नृपस्यानिवेद्य चर्यादिना योगक्षात्स्वसो षड्भुत्तर नवतिं पणान् दण्डनीयः तस्कर प्रणष्टादिकं तेन दुष्टत्वात्॥७
राजपुरुषानीतं प्रत्याह। शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम्। अर्वाक्संवत्सरात्स्वामी हरेत परतो नृपः॥ य
दा तु सत्याधिकारिभिः स्थानरक्षिभिर्वा नष्टापहृतं द्रव्यं राजपार्श्वं प्रत्यानीतं तदा संवत्सरादर्वाक् प्रापश्चेन्ना
धिकस्तद्रव्यमाप्नुयात्। ऊर्द्ध्वं पुनः संवत्सराद्राजा गृह्णीयात्॥ स्वपुरुषानीतं च द्रव्यं न संग्रहे हस्ति घो॥ यावत्संव
त्सरं राज्ञा रक्षणीयं। यथाह गौतमः। प्रनष्टमस्वामिकमधिगम्य राज्ञे प्रब्रूयुर्विख्याप्य संवत्सरं राज्ञा रक्ष्यमिति।
यत्पुनर्मनुनोक्तं तरप्रनष्टं प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत्। अर्वाक् त्र्यब्दाद्धरेत् स्वामी परतो नृपतिः
हरेदिति॥ तत् तु श्रुतत्संपन्न ब्राह्मणपालविषयं। रक्षणनिमित्तं च षड्भागादिग्रहणं च तेनैवोक्तं। आददीताथ षड्भागं
प्रनष्टाधिगतान्नृपः। दशमं द्वादशं वापि सतां धर्ममनुस्मरन्॥ इति तत्रापि दीयप्रथमसंवत्सरेषु यथाक्रमं ष
ष्ठादयो भागा वेदितव्याः प्रपंचितं चैतत्पुरस्तात्॥ मनुष्यरूपाग्रादिग्रहणस्य द्रव्यविशेषेण वादमाह। पणानेक
शफे दद्याच्चतुरः पंचमानुषे। महिषोष्ट्रगवां द्वौ द्वौ पादं पादमजाविके॥ एकशफेष्वादौ प्रनष्टाधिगते तत्स्वामी रा
ज्ञे रक्षणनिमित्तं चतुरः पणान्दद्यात्। मनुष्यजातीयस्य पंच पणान्। महिषोष्ट्रगवां रक्षणनिमित्तं प्रत्येकं द्वौ द्वौ पणौ

णप्र

1५3

६ पाद१ दि१

॥७२॥ अजाविके पुनः प्रत्येकं पादं दद्यादिति सर्वं प्रात्युच्यते। अजाविकमिति समासनिर्देशेऽपि पादं दद्यादिति वीप्सा
बलात् प्रत्येकं संबंधोऽवगम्यते ॥ ७ ॥ इत्यस्वामिविक्रयप्रकरणं ॥ ७ ॥ अधुनाविहितो विहितमार्गं दृष्ट्याश्रयत
याद्दत्तानपकर्म दत्ताप्रदानिकमिति चतुर्थाभिधानद्वयं दानाख्यव्यवहारपदमभिधीयते॥ तत्स्वरूपं च
नारदेनोक्तं। दत्त्वा द्रव्यमसम्यग्यः पुनर्दातुमितिच्छे॥ दत्ताप्रदानिकं नाम व्यवहारपदं हि तदिति। असम्यगवि
हितमार्गाश्रयेण द्रव्यं दत्त्वा पुनरादातुमिच्छति। यस्मिन्विवादपदे तद्दत्ताप्रदानिकं दत्तस्याप्रदाने पुनर्हरणे यस्मिन्
दानाख्ये तद्दत्ताप्रदानिकं नाम व्यवहारपदं विहितमार्गाश्रयणेन तस्यापि पक्षः परं तत् दत्तव्यवहारपदं दत्तानपकर्मे
त्यर्पादुक्तं स्मृतौ। दत्तस्य अनपकर्म अपुनरादानं यत्र दानाख्ये विवादपदे तद्दत्तानपकर्म तच्च देयादिभेदेन चतुर्वि
धं। यथाह नारदः। अथ देयमदेयं च दत्तं चादत्तमेव च। व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विध इति। तत्र देयमित्यनि
षिद्धदानक्रियायोग्यमुच्यते। अदेयमस्वत्वापन्नं निषिद्धं तया यादानानर्हं यत्पुनः प्रकृतिस्थेन दत्तं सम्यगावर्तनीयं तद्द
त्तमुच्यते। अदत्तं तु यत्पुनः प्रत्याहरणीयं तदुच्यते। तदेतत्संक्षेपतो विस्तरेणाह। स्वं कुटुंबाविरोधेन देयं दारसुता
दृते। नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतं। स्वमात्मीयं कुटुंबाविरोधेन कुटुंबानुपरोधेन कुटुंबभरणावशिष्ट
किंचिद्यावत्तद्देयात्। तद्भरणस्यावश्यकत्वात्। तथा च मनुः। वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं
कृत्वा भर्तव्या मनुरब्रवीत्। इति। स्वकुटुंबाविरोधेनेत्यनेन देयमेकविधं दर्शयति। स्वं दद्यादित्यनेनास्वं परस्वतां ना
मन्वाहितयाचितकाधिसाधारणनिक्षेपाणां। पंचानामप्यदेयत्वं व्यतिरेकतो दर्शितं। स्वसुतौ दारेनाद्य वि
पत्तमदेयानामन्वाहितं याचितकमाधिः साधारणं च यन्निक्षेपः पुत्रदारं च सर्वस्वं चान्वये सति आपत्स्वपि
हि कष्टासु वर्तमानेन देहिना। अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतं इति। एतदपवादमात्रं प्रायेण पुनः स्वत्वाभा
वाभिप्रायेण पुत्रदारसर्वस्वप्रतिश्रुतेषु स्वत्वस्य सद्भावात्। अन्वाहितादीनां स्वरूपं च प्राक् प्रपंचितं। तत्र ददा

ना४ प६ २य६ नी४ तमि२ दे२ न२ ॥७२॥

154

त्वेनेन दारसुतादेरपि स्वत्वाविशेषेण देयत्वप्रसंगे प्रतिषेधमाह। दारसुतादृते दारसुतव्यतिरिक्तं स्वं दद्यान्न दारसु
तं न दद्यात्। पुत्रानुत्पाद्य संस्कृत्य वृत्तिं चैषां प्रकल्पयेदिति स्मरणात्। तु
तस्मिन्सर्वस्वं। तथा कुटुंबपोषणाद्यवशिष्टं च विद्यमाने सर्वस्वं न दद्यात्। पुत्रानुत्पाद्य ... एवं दारसुतादिव्यतिरिक्तं देयमुक्त्वा प्रसंगाद्देयं च न ग्राह्यं
तथा हि रथ्यादिकमन्यस्मै प्रतिश्रुतमन्यस्मै न देयं।। ४।। एवं दारसुतादिव्यतिरिक्तं देयमुक्त्वा प्रसंगाद्देयं च न ग्राह्यं
तथाह स्थ्यादिकमन्यस्मै प्रतिश्रुतमन्यस्मै न देयमित्याह।। प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः। देयं प्रतिश्रुतं चैव द
त्त्वा प्रतिग्रहीत्वा प्रकाशमेव कर्तव्य इत्याह।। प्रतिग्रहः प्रकाशः स्यात्। विवादनिराकरणार्थं स्थावरस्य विशेषतः प्रकाशमेव ग्रहणं का
त्वा नापहरेत्पुनः। इति ग्रहणं प्रतिग्रहः स प्रकाशः कर्तव्यः। विवादनिराकरणार्थं स्थावरस्य विशेषतः। प्रकाशमेव ग्रहणं का
र्यं तस्य सुवर्णादिवदासनिग्रह्य तस्याद्वैगुण्यादि तुमशक्यत्वात्।। एवं प्रासंगिकमुक्त्वा प्रकृतमनुसरन्नाह।। देयं प्रतिश्रुतं चैव द
त्त्वा नापहरेत्पुनः। प्रत्युतेपुनर्नदातव्यं प्रतिश्रुत्य यथोक्तसंयुक्तायुन
यद्यस्मै धर्मार्थं प्रतिश्रुतं तत्तस्मै देयमेव यदि स धर्मात्प्रच्युतो न भवति। प्रच्युते पुनर्न दातव्यं प्रतिश्रुत्यापि धर्मसंयुक्ताय पुन
यद्यस्मै धर्मार्थं प्रतिश्रुतं तत्तस्मै देयमेव यदि सो धर्मात्प्रच्युतो न भवति। ... दत्तं सम्यग्धर्मापि पुनर्नापहर्तव्यं किंतु तथैवानुगत
द... इति गौतमस्मरणात्। दत्त्वा नापहरेत्पुनः न्यायमार्गेण यद्दत्तं सम्यग्धर्मापि पुनर्नापहर्तव्यं किंतु तथैवानुगत
व्यं। यत्पुनरन्यायेन दत्तं तदद्दत्तं षोडशप्रकारमपि प्रत्याहर्तव्यमेवेत्यर्थः।। तदुक्तं भवति नारदवचनेन। दत्तं सप्तविधं प्रो
क्तमदत्तं षोडशात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतं। पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः। स्त्रीशुल्का नु
ग्रहार्थं च दत्तं दानविदो विदुः। अदत्तं तु भयक्रोधशोकावेशरुजान्वितैः। तथोत्कोचपरीहासव्यत्यासच्छलयोगतः।। बालमूढ
दास्वतंत्रार्त्तमत्तोन्मत्तापवर्जितं। कर्त्ता ममायं कर्मेति प्रतिलाभेच्छया च यत्। अपात्रे पात्रमित्युक्ते कार्ये चाधर्मसंहिते
यद्दत्तं स्यादविज्ञानादतदत्तमिति तत्स्मृतमिति। अयमर्थः। पण्यस्य क्रीतद्रव्यस्य यन्मूल्यं दत्तं भृतिर्वेतनं फलकर्म
पादत्तं तुष्ट्या बंदिचारणादिभ्यो दत्तं। स्नेहाद्दुहितृपुत्रादिभ्यो दत्तं प्रत्युपकारतः उपकृतवते प्रत्युपकाररूपेण दत्तं स्त्री
शुल्कं परिणयनार्थं कन्याज्ञातिभ्यो यद्दत्तं। अनुग्रहार्थं दत्तं तदेतत्सप्तविधमपि दत्तमेव न प्रत्याहरणीयं। भयेन। दत्तमप
रिहासेनोपहासेन दत्तं। एकोपि स्वद्रव्यमन्यस्मै ददात्यन्योपि तस्मै ददातीति दानव्यत्यासः। छलयोगतः। शतं दान
बंदिग्रहादिभ्यो दत्तं।। क्रोधेन पुत्रादिवैरनिर्यातनाय अन्यस्मै दत्तं। पुत्रवियोगादिनिमित्तशोकावेशेन दत्तं। उत्कोचेन कार्यप्रतिबंधनिरासार्थं

घा० ८

द० ४

२४

मि० ७

पत्र २२

155

मभिसंधाय सहस्रमिति परस्माद्गृह्णाति। बालेन प्राप्तषोडशवर्षेण वा भूतेनालोकवेदानभिज्ञेन। अस्वतंत्रेण पुत्रदासादिना।
आर्त्तेन रोगाभिभूतेन। मत्तेन मदनीयमत्तेन। उन्मत्तेन वातिकाद्युन्मादग्रस्तेन। अपवर्जितं दत्तं। तथायं मदीयमिदं कर्म करिष्यती
ति लाभेच्छया दत्तं। अचतुर्वेदाय चतुर्वेदोहमिति वंचयते दत्तं। यज्ञं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुंजानाय दत्तं। इत्येवं
षोडशप्रकारमपि दत्तमदत्तमुच्यते॥ प्रत्याहरणीयमित्यर्थः। आर्त्तदत्तस्यादत्तत्वं कर्मकार्यव्यतिरिक्तविषयं। स्वस्थेना
र्त्तेन वा दत्तं श्रावितं धर्मकारणात्। अदत्वा तु मृते दाप्यस्तत्सुतो नात्र संशय इति कात्यायनस्मरणात्। तथेदमपरं संक्षि
प्तार्थवचनं सर्वविवादसाधारणं। योगाधमनविक्रीतं योगदानप्रतिग्रहं। यस्य वाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत्। योगः
उपाधिः तेनागमनोपाधिविक्रयदानप्रतिग्रहाः कृतास्तदुपाधिविगमे क्रयादीन् विनिवर्तयेदित्यस्यार्थः।
यः पुनः षोडशप्रकारमप्यदत्तं गृह्णाति यश्चादेयं प्रयच्छति तयोर्दंडो नारदेनोक्तः। गृह्णात्यदत्तं यो लोभाद्यश्चादेयं प्रयच्छ
ति। अदेयदायको दंड्यस्तथादत्तप्रतीच्छक इति॥ छ॥ ॥ इति दत्ताप्रदानिकं नाम प्रकरणं॥ छ॥ क्रीतानुशयः कथ्यते।
तत्स्वरूपं च नारदेनोक्तं। क्रीत्वा मूल्येन यः पण्यं केता न बहु मन्यते क्रीतानुशय इत्येतद्विवादपदमुच्यत इति। तत्र च यः
स्थिरार्घं पण्यं क्रीतं तस्मिन्नेवाह्नि तदविकृतं प्रत्यर्पणीयमिति तेनोक्तं। क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं म
न्यते क्रयी। विक्रेतुः प्रतिदेयं तु तस्मिन्नेवाविक्षतमिति। द्वितीयादिदिने तु प्रत्यर्पणे विशेषस्तेनैवोक्तः। द्वितीयेह्नि
ददत्क्रेता मूल्यात्त्र्यंशांशमावहेत्। द्विगुणं तु तृतीयेह्नि परतः क्रेतुरेव तदिति। परतोनुशयो न कर्तव्य इत्यर्थः। एतच्च बीजव्यतिरि
क्तोपभोगविनश्वरवस्तुविषयं। बीजादिके ये पुनरन्य एव प्रत्यर्पणावधिर्विहितः। दशैकपंचसप्ताहमासत्र्यहार्द्धमासिकं। बीजा
योवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणं। बीजं व्रीह्यादिबीजं। अयो लोहः। वाह्यो बलीवर्दादिः। रत्नं मुक्ताप्रवालादि। स्त्री दासी। दोह्यं
महिष्यादि। पुमान् दासः। एषां बीजादीनां यथाक्रमेण दशाहादिकः परीक्षाकालो विज्ञेयः। परीक्षमाणेषु बीजादोषप

सम्य॑ बुध्यानुशयो भवति तदा दशाहादर्वाक् क्रयनिवृत्तिर्न पुनरूर्ध्वमित्युपदेशप्रयोजनं। यत्तु मनुवचनं। क्रीत्वा वि
क्रीय वा किंचिद्यस्येहानुशयो भवेत्। सोन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत चेति। तद् कृतलोहादिव्यतिरिक्तोपभोगवि
नश्वरगृहक्षेत्रयानशयनासनादिविषयं। सर्वं चैतदपरीक्षितक्रीतविषयं। यत्पुनः परीक्ष्य न पुनः प्रत्यर्पणीयमिति स
मयं कृत्वा क्रीतं तद्दुष्टमपि न प्रत्यर्पणीयं। तदुक्तं। क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः। परीक्ष्याभिमतं क्रीतं
विक्रेतुर्न भवेत् पुनरिति। दोषादिपरीक्षाप्रसंगेन स्वर्णादेरपि परीक्षणमाह। अग्नौ सुवर्णमक्षीणं रजते द्विपलं श
ते। अष्टौ त्रपुणि सीसे च ताम्रे पंच दशायसि। अग्नौ प्रताप्यमानं सुवर्णं न क्षीयते। अतः कटकादिनिर्माणार्थं यावत्स्वर्णका
रहस्ते क्षिप्तं प्रक्षिप्तं तावत्तुलितं तेन प्रत्यर्पणीयं। इतरथा [illegible] दाप्या दंड्याश्च। रजते तु शतपले प्रताप्यमाने पलद्वयं क्षीय
ते। अष्टौ त्रपुणि सीसे च शते तु सम्वर्तते। त्रपुणि सीसे च शतपले प्रताप्यमाने अष्टौ पलानि क्षीयंते। ताम्रे पंच दशायसि ता
म्रे शते पंच पलानि। अयसि दश पलानि क्षीयंते। अत्रापि शतं तुल्येत। कांस्यस्य त्रपुताम्रयोनित्वात्तदनुसारेण क्षयः कल्प
नीयः। इतोऽधिकक्षयकारिणः शिल्पिनो दंड्याः। कश्चिदौर्णादौ वृद्धिमाह। शते दशपला वृद्धिरौर्णे
कार्पाससौत्रिके मध्ये पंचपला वृद्धिः सूक्ष्मे तु त्रिपला मता। स्थूलेनौर्णसूत्रेण यत्कंबलादिकं क्रियते
तस्मिन् शतपले दशपला वृद्धिर्वेदितव्या। एवं कार्पाससूत्रनिर्मितेऽपि पटादौ वेदितव्यं। मध्यमे नातिसूक्ष्मसूत्रनिर्मि
ते पटादौ पंचपला वृद्धिः। सूक्ष्मसूत्ररचिते शते त्रिपला वृद्धिर्वेदितव्या। एतच्च प्रक्षालितवासोविषयं। द्रव्यांतरे विशे
षमाह। कार्मिके रोमबद्धे च त्रिंशद्भागः क्षयो मतः। न क्षयो न च वृद्धिश्च कौशेये वल्कलेषु च। कार्मिकं कर्मणा चि
त्रेण निर्मितं। यत्र निष्पन्ने पटे स्वस्तिकादिकं चित्रसूत्रैः क्रियते तत्कार्मिकमित्युच्यते। यत्र प्रवेशादौ रो
माणि बध्यंते स रोमबद्धः। तत्र त्रिंशत्तमो भागः क्षयो वेदितव्यः। कौशेये कोशप्रभवे वल्कलेषु च सत्यकृ निर्मितेषु वस
नेषु वृद्धिक्षयौ न स्तः। कियता वर्द्धनार्थं कुविंदादिभ्यो दत्तं तावदेव प्रत्यादेयं। द्रव्यानंतरसंबंधात् द्रव्यस्वरूपप्रतिपादनाय
केः सामान्येन हृतस्य वृद्धिक्षयोपायमाह। देशं कालं च भोगं च ज्ञात्वा नष्टे बलाबलं। द्रव्याणां कुशला ब्रूयुर्यत्तद्दाप्यमसंशयं

ग्राणः। क्षौमादेर्द्रव्येन षड्भागः समुपगतेद्रव्याणां कुशलाः द्रव्यशुद्धिस्तथापि हि ॥ देशं कालमुपभोगं तथा नष्टद्रव्यस्य बलाबलं सारासारं तदपेक्ष्य परीक्ष्य फलं कल्पयेदिति । तद्दर्शितं पंडितम्मन्यो दृष्यः ॥ ५ ॥ इति क्रीतानुशयप्रकरणं ॥ ६ ॥ सो ऽ प्र ॥ तमभ्युपेत्याशुश्रूषाख्यमपरं विवादपदमभिधातुमुपक्रमते । तत्स्वरूपं च नारदेनोक्तं । अभ्युपेत्याशुश्रूषां यस्तां प्रतिपद्यते । अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यत इति । आज्ञाकरत्वं शुश्रूषा तामंगीकृत्य पश्चाद्यो न संपादयति तद्विवादपदमभ्युपेत्याशुश्रूषाख्यं शुश्रूषकश्च पंचप्रकारः शिष्यांतेवासी भृतकोधिकर्मकृद्दास इति । तेषामाद्याश्चत्वारः कर्मकरा उच्यंते । ते च शुभकर्मकारिणः । दासाः पुनर्गृहजातादयः । पंचदशप्रकाराः ॥ गृहद्वाराशुचिस्थानरथ्यावस्करशोधनाद्यशुभकर्मकारिणः ॥ तदिदमाह नारदः ॥ शुश्रूषकः पंचविधः शास्त्रे दृष्टो मनीषिभिः ॥ चतुर्विधः कर्मकरस्तेषां दासास्त्रिपंचकाः ॥ शिष्यांतेवासिभृतकाश्चतुर्थस्त्वधिकर्मकृत् ॥ एते कर्मकरा ज्ञेया दासास्तु गृहजादयः सामान्यमस्वतंत्रत्वमेषामाहुर्मनीषिणः ॥ जातिकर्मकृतस्तूक्तो विशेषो वृत्तिरेव च ॥ कर्मापि द्विविधं ज्ञेयमशुभं शुभमेव च ॥ अशुभं दासकर्मोक्तं शुभं कर्मकृतं स्मृतं ॥ गृहद्वाराशुचिस्थानरथ्यावस्करशोधनं गुह्यांगस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनं ॥ इच्छतः स्वामिनश्चांगैरुपस्थानमथांततः ॥ अशुभं कर्म विज्ञेयं शुभमन्यदतः परमिति ॥ तत्र शिष्यो वेदविद्यार्थी ॥ अंतेवासी शिल्पशिक्षार्थी ॥ मूल्येन यः कर्म करोति स भृतकः ॥ कर्म कुर्वतामधिष्ठाता अधिकर्मकृत् ॥ अशुचिस्थानं उच्छिष्टप्रक्षेपार्थगर्तादिकं अवस्करः ॥ गृहमार्जितपांस्वादिनिक्षेपस्थानं ॥ उज्झनं त्यागः ॥ भृतकश्चात्र त्रिविधः ॥ तदुक्तं ॥ उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीवलः ॥ अधमो भारवाही स्यादित्येवं त्रिविधो भृतक इति ॥ दासाः पुनः ॥ गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ॥ अनाकालभृतस्तद्वदाहितः स्वामिना च यः ॥ मोक्षितो महतश्चर्णात् युद्धप्राप्तः पणे जितः ॥ तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥ भक्तदासश्च

धिज्ञेयः स्तथैव वडवाहृतः विक्रेता चात्मनः शास्त्रे दासाः पंचदश स्मृताः॥ गृहदास्यां जातो गृहजातः॥ क्रीतो

ध्यः २ मूल्येन॥ लब्धः प्रतिग्रहादिना॥ दायादुपागतः पित्रादिदासः॥ अनाकालभृतो दुर्भिक्षे यो दासत्वाय मरणाद्रक्षितः॥

आहितः स्वामिना धनग्रहणेनाधितां नीतः॥ ऋणमोचनेन दासत्वमभ्युपगतः ऋणदासः॥ युद्धप्राप्तः समरे विजित्य

गृहीतः॥ पणे जितः॥ यद्यस्मिन्नु विवादे पराजितोऽहं त्वद्दासो भवामीति परिभाष्य जितः॥ तवाहमित्युपगतः

तवाहं दास इति स्वयं संप्रतिपन्नः॥ प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः॥ कृतः तावत्कालं दास इत्यभ्युपगमितः॥ भ ग

क्तदासः सर्वकालं भक्तार्थमेव दासत्वमभ्युपगम्य यः प्रविष्टः॥ वडवाहृतो वडवा गृहदासी तया हृतः तल्लोभे

न तामुद्वाह्य दासत्वेन प्रविष्टः॥ य आत्मानं विक्रीणीते स आत्मविक्रेता॥ एवं पंचदश प्रकाराः॥ यत्तु मनुनोक्तं ध्व

जाः८ जाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ। पैतृको दंडदासश्च सप्तैते दासयोनय इति॥ सप्तविधत्वमुक्तं तत्तेषां दास

त्वप्रतिपादनार्थं न तु परिसंख्यार्थं। तत्र ब्राह्मणस्यापि ते वा क्षत्रियस्य कार्यकर्म कृतं। दासानामयं विशेषः स्वीकृतः प्रति

पादितो नारदेन। अशुभकर्मकरा दासाः शुभकर्मकरा भृतकाः। तत्तु वेतनादानप्रकरणे वक्ष्यते। यो स्यादि६

च५ यावत्कुरुते कर्म तावत्तस्य स्याद्वेतनमित्यादिना॥ दासानां तेषां विमोक्षधर्मविशेषं वक्तुमाह॥ बलाद्दासीकृतश्चौरैर्

विक्रीतश्चापि मुच्यते॥ स्वामिप्राणप्रदो भक्तत्यागात्तन्निष्क्रयादपि॥ बलाद्बलात् चौरैर्वा यो

दासीकृतः यश्चौरैर्वा परैर्हृत्य विक्रीतः॥ अपि राज्ञा दृष्टिगोचरत्वे स मुच्यते। यदि स्वामी न मुंचति तर्हि राज्ञा मो मी३

चयितव्यः। उक्तं च नारदेन। चौरापहृतविक्रीता ये च दासीकृता बलात्। राज्ञा मोचयितव्यास्ते दास्यं तेषु हि

नेष्यत इति। चोरव्याघ्रादिभ्यः स्वामिनो प्राणात्ययः प्रददाति रक्षति यः सोऽपि मोचनीयः॥ तदिदं सर्वं दासानां

159

साधारणं दास्यनिवृत्तिकारणं यो वै तेषां स्वामिनं कश्चिन्मोक्षयेत् प्राणसंशयात् । दासत्वात्स विमुच्येत पुत्रभागं लभेत च इति नार- मु १
दस्मरणात् । एवं च दासानां प्रातिस्विकमपि मोक्षकारणमुच्यते । अनाकालभृतो दासो भक्तस्य त्यागात् दासभावात् दारस्य स्वामिद्-
त्ये यावदुपभुक्तं तावद्दत्वा मुच्यते । आहितः स्वर्णदासो तु निष्क्रयात् । यत्तु गृहीत्वा स्वामिना आहितो पश्चाद्दत्वा धनिने उत्तमर्णा-
न्मोचितः तस्यापि निष्क्रयात् सवृद्धिकस्य प्रसर्पणान्मुच्यते । नारदेन विशेषो प्रोक्तः । अनाकालभृतो दास्यान्मुच्यते गोयु- से ५
गं ददत् । संभक्षितं यद्दुर्भिक्षे न तच्छुध्येत कर्मणा । एवं भक्तस्योपणात्सद्यो भक्तदासः प्रमुच्यते । आहितोपि धनं द-
त्वा स्वामी यद्येनमुद्धरेत् । ऋणं तु सोदयं दत्वा ऋणी दासात्प्रमुच्यते इति । तवाहमित्युपगत युद्धप्राप्त पणजि-
त७ तकौ वडवाहृतानां च प्रातिस्विकं मोचनकारणं तेनैवोक्तं । तवाहमित्युपगतो युद्धप्राप्तः पणे जितः । प्रतिशीर्षप्रदानेन
मुच्येरंस्तुल्यकर्मणा । कृतकालमुपगमात् कृतकोपि विमुच्यते । निग्रहाद्वडवायास्तु मुच्यते वडवाहृत इति ।
दासेन सह संभोगनिरोधादि स्यर्थः । तदेवं गृहजात क्रीतलब्धदायप्राप्ताधिक्रीयिणां स्वामिप्राणप्रदान
तत्प्रसाद रूपसाधारणकारणव्यतिरेकेण मोक्षो नास्ति विक्रयप्रकारणानभिधानात् । दासमोक्षस्थाने न प्रकारो नै-
कर्तव्यः । स्वं दासमिच्छेद्यः कर्तुमदासं प्रीतिमानसः । स्कंधादादाय तस्यासौ भिंद्यात्कुंभं सहांभसा । साक्षिताभिः सपुष्पाभि- दा ६
र्मूर्ध्न्यद्भिरवाकिरेत् । अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेदिति । तेनैवोक्तं । प्रव्रज्यावसितस्य तु मोक्षो ना-
स्तीत्याह । प्रव्रज्यावसितो राज्ञो दास आमरणांतिकं । प्रव्रज्यासंन्यासस्तस्माद्वसितः प्र तः अनपक्रमप्रायश्चित्त- च्यु ४
श्चेद्राज्ञ एव दासो भवति । मरणमेव तद्दासत्वस्यांतं नान्यतरा प्रतिमोक्षोऽस्ति । वर्णापेक्षया दासस्य च स्थानमाह । वर्णा-
नामानुलोम्येन दास्यं न प्रतिलोमतः । ब्राह्मणादीनां वर्णानामानुलोम्येन दास्यं ब्राह्मणस्य क्षत्रियादयः । क्षत्रिय-
स्य वैश्यशूद्रौ वैश्यस्य शूद्र इत्येवमानुलोम्येन दासभावो भवति । न प्रातिलो(म्येन) नैःस्वधर्मत्यागिनः पुनः परिव्राज-

५४ गुरुग्रामभोजनस्तत्फलप्रदः ॥ अंतेवासी गुरुगृहे कृतकालं वर्षचतुष्टयमपूर्वेद्यां दिशिल्पशिक्षार्थं गृहे वसामीति या

तस्य प्रातिलोम्येनापि दासत्वमिष्यत एव ॥ यथाह नारदः ॥ वर्णानां प्रातिलोम्येन दासत्वं न विधीयते ॥ स्वधर्मत्यागि
नोऽन्यत्र दारवद्दासता मतेति ॥ अंतेवासिधर्मानाह ॥ कृतशिल्पोऽपि निवसेत्कृतं कालं गुरोर्गृहे ॥ अंतेवासी
वर्षचतुष्टयादर्वागेव लब्धापेक्षितशिल्पविद्यः कथं निवसेत् ॥ गुरुग्रामभोजनः ॥ गुरोः सकाशात्प्राप्तभो
जनः येन स तथोक्तः ॥ तत्फलप्रदः ॥ तस्य शिल्पस्य फलमाचार्याय प्रददातीति तत्फलप्रदः ॥ एवंभूतो वसे
त् ॥ नारदेन विशेषोऽप्यत्र दर्शितः ॥ स्वशिल्पमिच्छन्नाहर्तुं बांधवानामनुज्ञया ॥ आ
चार्यस्य वसेदंते कृत्वा कालं सुनिश्चितं ॥ आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनं ॥ न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरे
त् ॥ शिक्षयंतमसंदुष्टं य आचार्यं परित्यजेत् ॥ बलाद्वासयितव्यः स्याद्वधबंधौ च सोऽर्हति ॥ शिक्षितोऽपि कृतं कालमं
तेवासी समाप्नुयात् ॥ तत्र कर्म च यत्कुर्यादाचार्यस्यैव तत्फलं ॥ गृहीतशिल्पः समये कृत्वाचार्यं प्रदक्षिणं ॥ शक्तितश्चा
नुमान्यैनमंतेवासी निवर्तत इति ॥ वधश्चात्र ताडनार्थः ॥ दासप्रकरणं समाप्तं ॥ इत्यभ्युपेत्याशुश्रूषाख्यं विवादपदं ॥ ४ ॥
संप्रति संविद्व्यतिक्रमः ॥ तस्य च लक्षणं नारदेन व्यतिरेकमुखेन दर्शितं ॥ पाषंडिनैगमादीनां स्थितिः समय उच्यते
समयस्यानपाकर्म तद्विवादपदं स्मृतमिति ॥ पारिभाषिकधर्मेण व्यवस्थानं समयः ॥ तस्यानपाकर्मा व्यतिक्रमः परिपा
लनं तद्व्यतिक्रम्यमाणं विवादपदं भवतीत्यर्थः ॥ तदुपक्रमार्थं किंचिदाह ॥ राजा कृत्वा पुरे स्थानं ब्राह्मणान्न्यस्य तत्र
तु तान् ॥ त्रैविद्यं वृत्तिमद्ब्रूयात्स्वधर्मः पाल्यतामिति ॥ राजा स्वपुरे दुर्गादौ स्थानं धवलगृहादिकं कृत्वा तत्र ब्राह्मणान्
स्थापयित्वा तान्ब्राह्मणान्प्रत्यते ॥ त्रैविद्यं वेदत्रयसंपन्नं वृत्तिमद्धिरण्यादिसंपन्नं च कृत्वा स्वधर्मो वर्णाश्रमनिमित्तः
श्रुतिस्मृतिविहितो युष्माभिरनुष्ठीयतामिति तान्ब्राह्मणान्ब्रूयात् ॥ एवं नियुक्तैस्तैर्यत्कर्तव्यं तदाह ॥ निजधर्मा
विरोधेन यस्तु सामयिको भवेत् ॥ सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ॥ श्रौतस्मार्तधर्मानुपमर्देन समयाल्लिः प

शिक्षये ६

घ ८

द्व ४

पर

161

१०

॥७६॥

न्नोयाधर्मोगोः प्रपारोदकरणोद्‌वगृहपालनादिरूपो। सोऽपियत्नेनपालनीयः । तथाराज्ञाचनिजधर्माविरोधे
५२ नैवयः सामयिकोधर्मोयावस्थिकंभोजनं दैमस्मदर्शनोतिमंडलेतुरगादयोनप्रस्थापनीयाइत्येवं यः सोऽपिरक्ष
णीयः ॥ एवंसमयधर्मपरिपालनीयमुक्त्वा तद्व्यतिक्रमेदंडमाह ॥ गणद्रव्यंहरेद्यस्तुसंविदंलंघयेच्चयः ॥ स
र्वस्वहरणंकृत्वातंराष्ट्राद्विप्रवासयेत् ॥ यःपुनर्गृह ग्रामादिजनसमूहस्यसंबंधिसाधारणंद्रव्यमपहरति । ५५
संविल्लमयस्तांसमूहकृतांराजकृतांवायोलंघयेदतिक्रामेत्तदीयंसर्वधनंगृहीत्वास्वराष्ट्राद्विप्रवासयेत् । नि
ष्कासयेत् ॥ अयंदंडोऽनुबंधातिशयेद्रष्टव्यः । अनुबंधाल्पत्वेतुयोग्रामदेशसंघानांकृत्वासत्येनसंविदं विसंवा
देल्लोभात्तंराष्ट्राद्विप्रवासयेत् । निगृह्यदापयेच्चैनंसमयव्यभिचारिणं चतुःसुवर्णान्षण्निष्कान् शतमानंचरा
५८ जैमिति मनुप्रतिपादितदंडानांनिर्वासनचतुःसुवर्णषण्निष्क शतमानानांचतुर्णामन्यतमोजातिशक्त्याद्यपेक्षया
कल्पनीयः ॥ ७ ॥ इदंचान्यत्कर्तव्यमित्याह । कर्तव्यंवचनंसर्वैः समूहहितवादिनां । गणिनांमध्येयस्समूहहितवचन
शीलस्तद्वचनमितरैर्गणांतर्गतैरनुसरणीयं ॥ ७ ॥ अन्यथादंडमाह । यस्तत्रविपरीतःस्यात्सदाप्यःप्रथमंदमं ॥
यस्तुगणिनांमध्येसमूहहितवचनेप्रतिबंधकारीसराज्ञाप्रथमंसाहसंदंडनीयः ॥ राज्ञाचतुर्थभागेषु वर्तनीय
मित्याह ॥ समूहकार्यआयातान्कृतकार्यान्विसर्जयेत् ॥ सदानमानसत्कारैः सराजापरितोष्य विसर्जयेत्
त् ॥ ७ ॥ समूहदत्तापहारिणंप्रत्याह । समूहकार्यप्रहितो यल्लभेत तदर्पयेत् ॥ एकादशगुणंदाप्यो यद्यसौ
नार्पयेत्स्वयं ॥ समूहकार्यार्थमहाजनैः प्रेषितोराजपार्श्वेयद्धस्त्यश्वहिरण्यादिकंलभते ॥ तदर्पयितव्यंम
हाजनेभ्यो निवेदयेत् । अन्यथालब्धादेकादशगुणं दंडेदापनीयः ॥ एवंप्रकाराश्चकार्यचिंतकाः कार्याइत्याह ॥
धर्मज्ञाःशुचयो लुब्धाभवेयुः कार्यचिंतकाः । कर्तव्यंवचनंतेषांसमूहहितवादिनां ॥ श्रौतस्मार्त ॥७६॥

162

धर्मज्ञाः॥ याया ख्यं तत्र श्रेण्यादयुक्तमर्थे प्यलु खांकार्यविचारका मर्त्याः॥ तेषां वचनमितरैः कार्यमित्यर्थः दशार्थं पुनर्वचनं॥ ८७॥ इह नीत्वे विधाना प्रतिपादितेधर्मश्रे ण्यादिप्रकृतिरिह न्याह॥ श्रेणिनैगमपाषण्डिगणानामप्ययं विधिः॥ भेदं तेषां नृपो रक्षेत्पूर्ववृत्तिं च पालयेत्॥ एकपण्य शिल्पोपजीविनः श्रेणयः॥ नैगमाः ये वेदस्यापौरुषेयत्वेन प्रामाण्यमिच्छन्तिपाशुपतादयः॥ पाखण्डिनः॥ ये वेदस्य प्रामाण्यं नेच्छन्ति नग्नाटकसौगतादयः॥ गणाः आयुधीयादीनां मेकर्मोपजीविनां एषां च तुर्विधानामप्ययमेव विधिः॥ यो निधर्माविरोधेन त्याद्विना प्रतिपादितः॥ एतेषां च श्रेण्यादीनां भेदं धर्मव्यवस्थां नृपो रक्षेत्॥ पूर्वपारम्पर्यवृत्तिं पालयेत्॥ ८८॥ इति संविद्व्यतिक्रमप्रकरणं॥

सम्प्रति वेतनस्यानपाकर्माख्यं व्यवहारपदं प्रस्तूयते। तत्स्वरूपं च नारदेनोक्तं॥ भृतानां वेतनस्योक्तो दानादानविधिक्रमः॥ वेतनस्यानपाकर्म तद्विवादपदं स्मृतमिति॥ अस्यार्थः॥ भृतानां वेतनस्य वक्ष्यमाणश्लोकेन दानादानविधिक्रमो यत्र विवादपदे तद्वेतनस्यानपाकर्मेत्युच्यते॥ तत्र निर्णयमाह॥ गृहीतवेतनः कर्म त्यजन्द्विगुणमावहेत्॥ अगृहीते समं दाप्यो भृत्यैरक्ष्य उपस्करः॥ गृहीतं वेतनं येनासौ स्वामिनः कृतकर्म त्यजन्ननकुर्वन् द्विगुणं भृतिं स्वामिने दद्यात्॥ यदा पुनरभ्युपगते कर्मागृहीतवेतनेत्यजति तदा सममेवा वेतनमभ्युपगतं तावद्दाप्यो न द्विगुणं। यद्वा गीकृतं यत्तदेतावला कारयितव्यः॥ कर्माकुर्वन्प्रतिश्रुत्य कार्यो दत्वा भृतिं बलादिति नारदवचनात्॥ भृतिरपि तेनैवोक्तो मत्ता यवेतनं दद्यात्कर्मस्वामी यथाक्रमं॥ आदौ मध्ये वसाने वा कर्मणो यद्विनिश्चितमिति॥ भृत्यैश्च स्वेरुपस्करः उपकरणं लाङ्गलादीनां रक्षणीयो कुद्दालादिकं यथायोग्यं त्वया रक्षणीयमितरथा कृष्यादिनिष्पत्त्यनुपपत्तेः॥ भृतिमपरिच्छिद्य यः कर्म कारयति तं प्रत्याह॥ दाप्यस्तु दशमं भागं वाणिज्यपशुसस्यतः॥ अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता॥ यस्तु स्वामी यया किं

व. १

स्योक्तला १
रुष ३
मे ४
ज ५
क्रम ६
सा ३
नि २
गो १

163

॥७७॥

भीक्षेत्रिको अपरिच्छिन्नवेतनमेव भक्तं कर्म कारयति ... स्वामी ... ज्यपशुसस्य लक्षणा कर्मणो यद्वच्छेत स्य दशमं भा
गं भर्ता यमहाप्सितारज्ञा दापनीयः ॥ अनातस्मकारिणं प्रत्याह। देशं कालं च यो ... तीयात्लाभं कुर्या यो न्यथा ॥ तत्रस्या
स्वामिनस्तुष्टो धिकं देयं कृते धिके ॥ यस्तु ... चस्य पण्य धिकृया ... देशं कालं च पण्यपगिकृया घ कुर्वन्
दर्पादिना लुब्धये नास्मिन्नेव वादेशकाले च लाभमन्यथा ... घातिद्रव्यसाध्यत याहीं लंकरोति तस्मिन् दर्शतिदानं प्र
तिस्वामिनस्तु दर्शनाय घावद्विगुणं तावद् धान्तपुनः सर्वमिव भर्तितिमिस्यर्थः ॥ यदा पुनर्देशकालाभिज्ञतया
धिकाकाभः ... तस्त्वदापर्यपरिच्छिन्नायास्ते रघैमपि च नस्वामिनाभ्यस्यायदातव्यं ॥ अनेकपस्य साध्यकर्मणि
निदानप्रकारमाह ॥ यो यावत्कुरुते कर्म तावत्तस्य तु वेतनं ॥ उभयोरप्यसाध्यं चेत्साध्ये कुर्याद्यथाश्रुतं ॥ यदा पुनरे
कमेव कर्मनियतवेतनं तु भाभ्यांक्रियमाणमुभयोरप्यसाध्यं चेद्वाध्यांभि ... वा तुभाभ्यां अपि ... पिरपि यदि
न परिसमापितं तदा यो ... स्यो यावत्कर्म करोति तस्मै तत्कृतकर्मानुसारेणामध्यस्थकल्पितवेतनं देयं ॥ न पु
नः समेन ... कर्मणि ... तनस्यापरिभाषितत्वाद्दानमितिमंतव्यं ॥ साध्ये तु उभाभ्यां कर्मण्यानिवर्तितेय
थाश्रुतं यावत्सपरिभाषितं तावदुभाभ्यां देयं न पुनः प्रत्येकं ... चेतनं नापि कर्मानुरूपेण परिकल्प्य देयं ॥ ... आयु
धा ... यभारपाहकोप्रत्याह ॥ अराजदैविकं नष्टं भांडं दाप्यस्तु वाहकः ॥ प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृ
तिं ॥ नविघातेराजदैविकं यस्य भांडस्य ततथोक्तं ॥ तद्यदि प्रज्ञाहीनतया वाहकेन नाशितं ॥ तदानाशं तु सारेणासौ
तद्भांडं दापनीयः ॥ तदाह नारदः ॥ भांडं व्यसनमागच्छेद् यदि वाहकदोषतः ॥ दाप्यो यत्तत्र नश्येत्तु दैवराजकृतादृते
ति ॥ यः पुनर्विवाहादौ मंगलवतिवासरे प्रतिष्ठमानस्य तत्स्थानोपयिकं कर्मप्रारंभी ... स्य तदानीं न करि

क.५

न.८

नुर

धु३

दा८

घ८

घर

॥७७॥

164

ष्यामीति प्रस्थानाय विघ्नमाचरति ॥ तदासौ द्विगुणां भृतिं दाप्य असंतोऽकर्षहेतु निरोधात् ॥ किंच ॥ प्रक्रान्ते सप्तमं
भागं चतुर्थं पथि संत्यजन् ॥ भृतिमर्द्धपथे सर्वं प्रदाप्यस्त्याजकोऽपि च ॥ प्रक्रान्ते अध्यवसिते प्रस्थाने स्वामी कृ
तं कर्म यस्त्यजत्यसौ भृतेः सप्तमं भागं दाप्यः ॥ नन्वत्रैव विषये प्रस्थानवि घ्नकृदित्यादिना द्विगुणां भृतिदा
नमुक्तं ॥ इदानीं सप्तमो भाग इति विरोधः ॥ उच्यते ॥ अस्यां तदापादानावसरे संभवे स्वामी कृतं कर्म यस्त्यजति ॥
तस्य सप्तमो भागः ॥ यस्तु प्रस्थान समयलग्न एव त्यजति । तस्य द्विगुणापत्तिदानमित्यविरोधः ॥ यः पु
नः पथि प्रक्रान्ते गमने वर्त्तमाने सति कर्म त्यजति ॥ स कृतस्य चतुर्थभागं दाप्यः ॥ अर्धपथे पुनः सर्वं दापनीयः ॥ य
स्तु त्याजकः कर्मोत्सृजन्तं त्याजयति स्वामी पूर्वोक्तदेशेष्वस्थानेष्वपि पूर्वोक्तसप्तमभागादिकं त्याजयदाप
नीयः ॥ एतच्च व्याधित्वादि विषयेऽपि तत्राह ॥ न कुर्याद्यो दर्पात् कर्म यथोदितं स दण्ड्यः कृष्णलान्यष्टौ
न देयं तस्य वेतनमिति ॥ यदा पुनर्व्याध्याद्युपगतेन तरिं तद्दिवसान्यपरिगणाप्यपूरयति तदा लभत एव वेत
नं आर्तस्तु कुर्यात् स्वस्थः सन् यथाभाषितमादितः स दीर्घस्यापि कालस्य तल्लभेतैव वेतनमिति मनुस्मरणं ॥
यस्त्वपगतव्याधितः स्वस्थ एवालस्यादिनारब्धं कर्मान्त्ये न करोति । परेण वा यस्तत्कर्म न कारयेत् ॥
न तस्य वेतनं देयमल्पोनस्यापि कर्त्तव्यमिति ॥ छ ॥ वेतनादानप्रकरणं ॥ छ ॥ अथ पुनाद्यूतसमाह्वयाख्यं
विवादपदमभिधीयते ॥ तस्य रूपं च नारदेनाहितं ॥ अक्षवध्रशलाकाद्यैर्देवनं जिह्मकारितं ॥ पणक्रीडा
वयोभिश्च पदं द्यूतसमाह्वयं ॥ अक्षाः पाशकाः वध्रश्चर्मपट्टिका ॥ शलाका दन्तादिमयो दीर्घा चतुरस्राः ॥
आद्यग्रहणाच्चतुरंगादि क्रीडासाधनं कपि तुरंगस्था कंगस्यते । तैरप्राणिभिर्यद्देवनं क्रीडा पण

थि

मिर

दि९

५२

॥७८॥

पूर्वं कांक्ष्यते ॥ तथा वयोभिः पक्षिभिः कुक्कुटादिभिः मल्लमेषमहिषादिभिः अप्राणिभिश्च यत्पण
पूर्वं काक्षीडा क्रियते ॥ तदुभयं यथाक्रमेण द्यूतसमाह्वयाख्यं विवादपदं द्यूतं च समाह्वयश्च द्यू
तसमाह्वयं ॥ तदुक्तं मनुना ॥ अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते ॥ प्राणिभिः क्रियते यस्तु स विज्ञेयः स
माह्वयः ॥ इति ॥ तत्र द्यूतसमा[illegible]माह ॥ ग्लहे शतिकवृद्धेस्तु सभिकः पंचकं शतं ॥ गृह्णीया
या धूर्तकितवादितरोद्दशकं शतं ॥ परस्परसंप्रतिपन्नाक्षिकितवपरिकल्पितः पणो ग्लह इत्युच्यते ॥ तत्र
ग्लहे तदाश्रया शतिकाः शतं परिमिता तदधिकपरिमाणो वृद्धिर्यस्यासौ शतिकवृद्धिः तस्माद्धूर्तकित
वात्पंचकं शतं तस्मात्स्वार्थं सभिको गृह्णीयात् ॥ पंचपणा आयो यस्मिन् शते तच्छतं पंचकं ॥ तदस्मिन्वृद्ध्याय
लाभेत्यादिना कप्रत्ययः ग्लहस्य विंशतितमं भागं गृह्णीयादित्यर्थः ॥ सभाकितवनिवासार्थं यस्यास्त्यसौ सभि
कः कल्पिताक्षादिनिखिलक्रीडोपकरणास्तद्[illegible] तद्व्योपजीवी सभापतिरुच्यते ॥ इतरस्मात्पुनरपरिपूर्णश
तिकवृद्धेः कितवाद्दशकं शतं जितद्रव्यस्य दशमं भागं गृह्णीयादिति यावत् ॥ एवं [illegible] तवृत्तिना सभिकेन किं क
र्तव्यमित्याह ॥ स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतं ॥ जितमुद्धारयेज्जेत्रे दद्यात्सत्यं वचः क्षमी ॥ एवं
मर्थं धूर्ताधिकारी स राज्ञा धूर्तकितवेभ्यो रक्षितस्तस्मै राज्ञे यथासंप्रतिपन्नमंशं दद्यात् ॥ यथोचितं यद्
व्यं तद् [illegible] पराजितसकाशाद् [illegible] जेत्रे जयिने सभिको दद्या
त्तथा क्षमी भूत्वा सत्यं वचो विश्वासार्थं धूतकारिणां दद्यात् ॥ तदुक्तं नारदेन सभिकः कारयेद्द्यूतं देयं दद्याच्च
तत्कृतमिति ॥ यदा पुनः सभिको दापयितुं न शक्नोति तदा राजा दापयेदित्याह ॥ प्राप्ते नृपतिभागे प्रसिद्धे धूर्त

श्लो ३

॥७८॥

मंडलैर्जितं सभिकेस्थानेदापयेदन्यथानतु॥ प्रसिद्धेराजाध्यक्षसमन्वितेसभिकसगृहे तेकितवस
माजेसभिकेनचराजभागेदत्तेराजाध्यक्षः कितवमविप्रतिपन्नंजितंपणंदापयेत्॥ अन्यथाप्रच्छन्नेसभिकगृहे
देत्तराजभागेद्यूतेजितंपणंजेत्रेनदापयेत्॥ ॥ जयपराजयविप्रतिपत्तौनिर्णयोपायमाह॥ द्रष्टारोव्य
वहाराणांसाक्षिणश्चतएवहि॥ द्यूतव्यवहारांणांद्रष्टारः सभ्यास्तएवकितवाः एवराज्ञानियोक्तव्याः॥ नात्र
त्रकृताध्ययनसंपन्नेत्यादिनियमोस्ति॥ साक्षियाश्चद्यूतेद्यूतकाराएवकार्याः॥ नतत्रस्त्रीबालवृद्धकितवेत्यादि
निषेधोस्ति॥ कचिद्यूतंनिषेद्धुंदंडमाह॥ राज्ञासचि [illegible] ह्निर्वास्याः कूटाक्षदेविनः॥ कूटैरक्षादिभिरूपधि
नामातिवंचनहेतुनामेणिमंत्रौषधादिनायेदीव्यंतितान्स्वपदादिनांकयित्वाराजास्वराष्ट्रान्निर्वासयेत्॥ ना
रदेनतुनिर्वासनेविशेषउक्तः॥ कूटाक्षदेविनः पापान्राजाराष्ट्राद्विवासयेत्॥ कंठेक्षमालामासज्यसह्ये
षांविनयः स्मृतइति॥ याचानिमनुवचनानिद्यूतनिषेधपराणितानिसमाहरप्रवेवयः कुर्यात्कारयेत्वा॥ तान्
सर्वान्घातयेद्राजाशूद्रांश्चद्विजलिंगिनइत्यादीनितानिपिकूटाक्षदेवनविषयतयाराजाध्यक्षसाक्षिकरहितद्यूतवि
षयतयाचयोज्यानि॥ किंच॥ द्यूतमेकमुखंकार्यंतस्करज्ञानकारणात्॥ तस्कराज्ञानकारणात् द्यूतंनदेवमुखंकार्यं एकंमुखं
प्रधानंयस्यद्यूतस्यतत्तथोक्तंकार्यंराजाध्यक्षाधिष्ठितंराज्ञाकारयितव्यमित्यर्थः॥ तस्कर ज्ञानकारणात्॥
पूर्वोक्तंतस्करज्ञानरूपंप्रयोजनंपर्यालोच्यप्रायसो चौर्यार्जितधनाएवकितवाभवंत्यतश्चौरविज्ञानार्थमे
कमुखंकार्यं॥ द्यूतधर्मसमाह्वयेअतिदिशन्नाह॥ एषएवविधिर्ज्ञेयः प्राणिद्यूतसमाह्वये॥ मेषहस्त्यादिकर्यादिभिर्या
दिनायोद्यूतधर्मउक्तः स एवप्राणिभिर्मल्लमेषमहिषादिनिर्वर्त्यसमाह्वयसंज्ञिकेज्ञातव्यः॥ ॥ इति
द्यूतसमाह्वयाख्यप्रकरणं॥ इदानींवाक्यारूढंप्रकरयते॥ तत्रलक्षणंचोक्तंनारदेन॥ देशजातिकुलादिनामा

१२
॥७९॥

क्रोशन्यंगसंयुतं॥ यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते॥ इति। देशादीनामाक्रोशन्यंगसंयुतं॥ उच्चैर्भाषणमाक्रोशः। न्यं
गमवद्यं॥ तदुभययुक्तं यत्प्रतिकूलार्थमुद्वेगजननार्थं वाक्यं तद्वाक्पारुष्यं कथ्यते॥ तत्र कलहप्रियाः खलु गौ
डा इति देशाक्रोशः॥ अतिलोलुपाः खलु वणिज इति जात्याक्रोशः। क्रूरचरित्रा ननु वैश्वामित्रा इति कुलाक्षे
पः आदिग्रहणात्स्वविद्याशिल्पादिनिंदया विद्यावदादिपुरुषाक्षेपो गृह्यते॥ तस्य च दंडतारतम्यार्थं नि
ष्ठुरादिभेदेन त्रैविध्यमभिप्रेत्य तल्लक्षणं तेनैवोक्तं॥ निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतं। गौ
रवानुक्रमात्तस्य दंडोपि स्यात्क्रमाद्गुरुः॥ साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यंगसंयुतं॥ पतनीयैरुपाक्रोशैस्तीव्रमा
हुर्मनीषिण इति॥ तत्राधिक्षेपगर्भं मूर्ख जाल्मेत्यादि साक्षेपं। अत्र व्यंगमिश्रितं सभ्यमूवचनं भगिन्यादिगमनं तद
क्तमश्लीलं सुरापो ऽसीत्यादि महापातकाद्याक्रोशयुक्तं वचस्तीव्रं॥ अत्र
च निष्ठुराक्रोशे सवर्णविषये दंडमाह॥ सत्यासत्यान्यथास्तोत्रैर्न्यूनांगेंद्रियरोगिणां॥ क्षेपं करोति चेद्दंड्यः पणा
नर्द्धत्रयोदशान्॥ न्यूनांगाः कररचरणादिविकलाः॥ न्यूनेंद्रियाश्चक्षुःश्रोत्रादिरहिताः रोगिणो दुश्चर्मप्रभृतयः
स्तेषां सत्येनासत्येनान्यथास्तोत्रेण च निंदार्थया स्तुत्या यच्च नेत्रयुगलं नष्टं अंध इत्युच्यते तत्सत्यं। यत्र पु
नश्चक्षुष्मानेवांध इत्युच्यते॥ तदसत्यं यत्र विकृताकृतिरेव दर्शनीयस्त्वमसीत्युच्यते तदन्यथा
स्तोत्रमेवं विधेयः क्षेपमर्त्सनं करोत्यसावर्द्धाधिकैर्योदशपणान्दंडनीयः॥ काणं वाप्यथवा खंजमन्यं वापि
तथाविधं तथ्येनापि ब्रुवन्दाप्यो दंडं कार्षापणावरं॥ इति मनुवचनं तादृशनिष्ठुरत्वविषयं॥ यदा पुनः
पुत्रादयो मात्रादीनाक्षिपंति तदा शतं दंडनीया इति तेनैवोक्तं॥ मातरं पितरं जायां भ्रातरं श्वशुरं गुरुं॥ आक्षा
रयन् शतं दाप्यः पंथानं चाददद्गुरोरिति॥ एतच्च सापराधेषु मात्रादिषु गुरुष्वनिरपराधायां तु द्रष्टव्यं॥ अ
श्लीलाक्षेपे दंडमाह॥ अभिगंतास्मि भगिनीं मातरं वा तवेति ह॥ शपंतं दापयेद्राजा पंचविंशतिकं दमं॥

॥७९॥

164

त्वदीयां भगिनीं मातरं वा अभिगंतास्मीति शापं तमन्यं वा त्वज्जायामभिगंतेत्येवंरूपं तेरा आपं चविंशति
कं पणानां पंचाधिकां विंशतिं तस्मिं दंडे स तथोक्तः तं दमं दापयेत् ॥ ७ ॥ एवं समानगुणेषु दंडमभिधाय
विषमगुणेषु दंडं प्रतिपादयितुमाह ॥ अर्धोऽधमेषु द्विगुणः परस्त्रीषूत्तमेषु च ॥ अधमेषु क्षेत्र वेक्ष
यान्यूनगुणेषु दिगुणेषु अर्धो दंडः ॥ पूर्ववाक्ये पंचविंशतेः प्रकृतत्वात्तदपेक्षया द्व्यः ॥ सार्द्धद्वादशपण
त्मको दंडः व्यः ॥ परस्त्रीषु पुनः सविशेषेणाद्विगुणं पंचविंशत्यपेक्षये वं पंचाशत्पणात्मको वेदितव्यः ॥
तथोत्तमेषु स्वापेक्षया अधिकगुणेषु तेषु दंडः पंचाशत्पणात्मक एव ॥ वर्णानां मूर्द्धावसिक्तादीनां च
परस्पराक्षेपे दंडकल्पमाह ॥ ७ ॥ दंडप्रणयनं कार्यं वर्णजात्युत्तराधरैः ॥ वर्णा ब्राह्मणादयः ॥ जात
यो मूर्द्धावसिक्ताद्याः वर्णाश्च जातयश्च वर्णजातयः उत्तराश्चाधराश्च उत्तराधराः ॥ वर्णजातयश्च ते
उत्तराधराश्च ते वर्णजात्युत्तराधरास्तैर्वर्णजात्युत्तराधरैः ॥ परस्पराक्षेपे क्रियमाणे दंडस्य प्र
णयनं प्रकर्षेण नयनमूहनं वोदितव्यं ॥ तच्च दंडकल्पनं उत्तराधरैरिति विशेषोपादानादुत्तरा
धरभावापेक्षये व कर्तव्यमित्यवगम्यते ॥ यथा मूर्द्धावसिक्तं ब्राह्मणाद्धीनं क्षत्रियाद्युत्कृष्टं वा आक्रो
श्य ब्राह्मणां क्षत्रियाक्षेपनिमित्तात्पंचाशत्पणाद्दंडात्किंचिदधिकं केवलसमत्वात्मकं दंडमर्हतीति क्ष
त्रियेणैवं कुश्य ब्राह्मणाक्षेपनिमित्ता शतदंडान्न्यूनं पंचसप्ततिकं दंडं ॥ मूर्द्धावसिक्तोऽपि तावदेवत्य
तमेव दंडमर्हति ॥ मूर्द्धावसिक्ताम्बष्ठयोः परस्पराक्षेपे ब्राह्मणक्षत्रिययोः परस्पराक्रोशनि

वर २
म ३
सवर्णेषु २
आ २
स्या २

170

॥८०॥

मितस्कौ यथाक्रमेण दंडौ वेदितव्यौ ॥ एवमन्यत्राप्यूहनीयं ॥ एवं सवर्णविषये दंडमभिधाय वर्णानामेव
प्रतिलोमानुलोमाक्षेपे दंडमाह ॥ प्रातिलोम्यापवादेषु द्विगुणत्रिगुणा दमाः ॥ वर्णानामानुलोम्येन त
स्मादर्द्धार्द्धहानितः ॥ अपवादास्तु अधिक्षेपाः प्रातिलोम्येनापवादाः प्रातिलोम्यापवादास्तेषु शतपणाक्रोश
कारिणो क्षत्रियवैश्ययोर्यथाक्रमेण पूर्ववाक्यात् द्विगुणपदोपात्तपंचाशत्पणापेक्षया द्विगुणाः शत
पणास्त्रिगुणा सार्द्धशतपणा दंडा वेदितव्याः ॥ शूद्रस्य शतपणाक्रोशे ताडनं जिह्वाच्छेदनं वा भवति । यथा
ह थाह० शतं ब्राह्मणमाक्रुश्य क्षत्रियो दंडमर्हति । वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हतीति । विट्शूद्रयो
योस्तु रप्येवं क्षत्रियादन्तरेणोत्तर लम्न्यायतयोः शतमध्यर्द्धशतं च यथाक्रमेण क्षत्रियाक्रोशे वेदितव्यौ । शू
द्रस्य च वैश्याक्रोशे ताडनं ॥ आनुलोम्येन तु वर्णानां क्षत्रियविट्शूद्राणां ब्राह्मणेनाक्रोशे कृते तस्माद्ब्राह्मणाक्रोशनि
मित्तात् शतपरिमितात् क्षत्रियदंडाद् प्रतिवर्णमर्द्धस्यार्द्धस्य हानिः कर्त्तव्येति एवं पंचाशत्पंचविंशतिः द्वादशपणा
त्मकं यथाक्रमं ब्राह्मणो दंडनीयः ॥ तदुक्तं मनुना ॥ पंचाशद्ब्राह्मणो दंड्यः क्षत्रियस्याभिशंसने । वैश्ये स्यादर्द्धपंचाशत् शू
द्रे द्वादशको दमः इति । क्षत्रियेण वैश्यशूद्रयोराक्रोशे यथाक्रमं पंचाशत्पंचविंशतिको दमः ॥ वैश्यस्य च शूद्राक्रोशे पंचा
दित्यूहनीयं ब्राह्मणराजन्यवत् क्षत्रियवैश्ययोरिति गौतमवचनात् ॥ एवं विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वत
स्तुतिमनुसरणात् ॥ पुनः निष्ठुराक्षेपमधिकृत्याह ॥ बाहुग्रीवानेत्रस^थिनाशे वाचिके दमः ॥ शतस्तदर्द्धिकः पा क्थिन
दनासाकर्णकरादिषु ॥ बाह्वादीनां प्रत्येकं विनाशे वाचिके प्रतिपादिते तत्र बाह्वादिषु प्रत्येकं शतपरिमितो
दंडो वेदितव्यः ॥ पादनासादिषु आदिग्रहणात् स्फिगादिषु वाचिके विनाशे तदर्द्धिकस्तस्य शतस्यार्द्धं तदस्यास्य

॥८०॥

171

ज़ा.१

सौतर्द्दिकः ॥ पेवा ग्रासणिको दंडो वेदितव्यः ॥ किंच ॥ अक्षौसु वदन्ले वं दंडनीयः पणांदश ॥ तथा शक्तः प्रतिभुवं
दाप्यः क्षेमाय तस्य तु यः पुनर्जरादिनाक्षीणाक्तिमं तु [illegible] भंगं करोमीत्येवं शापस्य सो दश पणान् दंड

शक्तः ३

नीयः ॥ यः पुनः समर्थः क्षीणशक्तिं पूर्ववदाक्षिपस्य सो पूर्वोक्तः [illegible] दंडो [illegible] तरं कालं तस्या शक्तस्य क्षेमार्थं प्रतिभुवं दापनीयः
आक्रोशे दंडमाह ॥ ते पतनीये कृते क्षेपे दंडो मध्यमसाहसः ॥ उपपातकयुक्ते तु दाप्यः प्रथमसाहसं ॥ पातित्यहे
तुभिर्ब्रह्महत्यादिभिर्वर्णनामाक्षेपे मध्यमसाहसो दंडः ॥ उपपातकसंयुक्ते पुनः गोघ्नस्त्वमसीत्येवमा
दिरूपे क्षेपे प्रथमसाहसं दंडनीयः ॥ किंच ॥ त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः ॥ मध्यमो जाति
पूगानां प्रथमो ग्रामदेशयोः ॥ त्रैविद्या वेदत्रयसंपन्नास्तेषां राज्ञां देवानां वा क्षेपे उत्तमसाहसो दंडः ॥
ये पुनर्ब्राह्मणा [illegible] मूर्द्धावसिक्तादिजातीनां पूगाः संघास्तेषामाक्षेपे मध्यमसाहसो दंडः ॥ ग्राम
देशयोः प्रत्येकमाक्षेपे प्रथमसाहसो दंडो वेदितव्यः ॥ इति वाक्पारुष्यं नाम विवादपदं ॥ छ ॥
दंडपारुष्यं संप्रति प्रस्तूयते ॥ तत्स्वरूपं च नारदेनोक्तं ॥ परगात्रेष्वभिद्रोहो हस्तपादायुधादि
भिः ॥ भस्मादिभिश्चोपघातो दंडपारुष्यमुच्यते ॥ इति परगात्रेषु स्थावरजंगमात्मकद्रव्येषु हस्त

दू.१

पादायुधैरादिग्रहणाद्ग्रावादिभिर्योऽभिद्रोहो हिंसनं दुःखोत्पादनं तथा भस्मना आदिग्रहणाद्

हा.२

॥८९॥

ऽधः पंकपुरीषाद्यैश्चैव उपघातः संस्पर्शो न रूपं मनोदुःखोत्पादनं तदुभयं दंडपारुष्यं दंड्यते ने
नेति दंडो देहस्तेन यत्पारुष्यं विरूपीकरणं जंगमादेर्द्रव्यस्य तद्दंडपारुष्यं॥ तस्य चावगोरणादि
करणभेदेन त्रैविध्यमभिधाय हीनमध्यमोत्तमद्रव्यरूपकर्मत्रैविध्यात् पुनस्त्रैविध्यं तेनैवोक्तं॥
तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमक्रमात्॥ अवगोरणनिःसंगपातनक्षतदर्शनैः॥ हीनमध्यो
त्तमानां च द्रव्याणां समतिक्रमात्॥ त्रीण्येव साहसान्याहुस्तत्र कंटकशोधने॥ अवगोरणं निःसंगपातनं
निःशंकप्रहरणं॥ त्रीण्येव साहसानि त्रिप्रकाराण्येव साहसानि तानि दंडपारुष्याणीत्यर्थः॥ तयोर्दं
डपारुष्ययोरुभयोः प्रवृत्तकलहयोर्मध्ये यः क्षमते तस्य दंडाभावः॥ किंतु पूज्य एव॥ तथा पूर्वं कल
हप्रवृत्तस्य दंडो गुरुतरः॥ कलहे च बद्धवैरानुसंधातुरेव दंडभाक्त्वं॥ तथा तयोर्द्वयोरपराधयितृत्वे पापी
याने दंडः समः॥ तथा श्वपचादिभिरार्याणामपराधे कृते सज्जना एव दंडस्थापनेऽधिकारिणस्तेषाम
शक्यत्वे तान्राजा घातयेदेवातोर्यग्रहीयादि से वं प्रकाराविधयस्तेनैवोक्ताः॥ विधिः पंचविधस्त्व
स्य तयोरपि पारुष्ये सति संरंभात्तु सत्ते स्वत्व योर्द्वयोः॥ समान्यतेषु क्षमते दंडभाग्यातिः
वर्तते॥ पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषवान्॥ पश्चाद्यः सोऽप्यसत्कारी पूर्वे तु विनयो

रुभयोर

॥८९॥

173

गुरूः ॥ द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुनः स तं यो दंडमाप्नोति पूर्वो वा यदि वेतरः ॥ पा
रुष्यदोषावृतयोर्युगपत्संप्रवृत्तयोः ॥ विशेषश्चेन्न लक्ष्येत विनयः स्यात्समस्तयोः ॥ श्वपाककर्मचंडा
लव्यंगेषु वधवृत्तिषु ॥ हस्तिपव्रात्यदासेषु गुर्वाचार्यातगेषु च ॥ मर्यादातिक्रमे सद्यो घात एवानुशासनं ॥
यमेव ह्यतिवर्तेरन्नेते सं तं जनं न्नृषु ॥ स एव विनयं कुर्यान्न तद्विनयभाक् नृपः ॥ मलाह्येते मनुष्याणां
धनमेषां मलात्मकं ॥ अतस्तान्घातयेद्राजा नार्थदंडेन दंडयेदिति ॥ वंचकं तं दंडपारुष्यानि कीय पूर्वं कथा
दंडप्रणायनस्य तस्य स्वरूपं संदेह हेतुमाह ॥ असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च । द्रष्टव्यो व्य
वहारस्तु कूटचिह्नकृतो भयात् ॥ यदा कश्चित्केनचित्स्वयमेव नाहतः तदाऽप्रतिराज्ञे निवेदयति तदा चिह्नैर्व्र
णादिस्वरूपम लैर्लिंगैर्युक्त्याकारप्रयोजनपर्यालोचनात्मिकया आगमेन च जनप्रवादेन च व्र
णादिव्ये न वा कूटचिह्नकृतत्वसंभावनायां भयात्परीक्षा कार्या ॥ धृ ॥ एवं निश्चिते साधनाविशेषेण
दंडविशेषमाह ॥ भस्मपंककृतं रेणुस्पर्शे दंडो दशपणः स्मृतः ॥ अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगु
णस्तैः ॥ समेष्वेवं परस्त्रीषु द्विगुणस्तूत्तमेषु च ॥ हीनेष्वर्द्धदमो मोहमदादिभिरदंडनं ॥ भस्मना

पंकेन रेणुना वा यः परं स्पर्शयत्य सो दशपणं दंडं दाप्यः॥ अमेध्यमिति अश्रुश्लेष्मनखकेशकर्ण
विट्दूषिकाभुक्तोच्छिष्टादिकं च गृह्यते॥ पार्ष्णिः पादस्य पश्चिमो भागः॥ नि˚ तं मुखनिःसारितं जलं।
तत्स्पर्शने ततः पूर्वोक्ताद्दशपणाद्द्विगुणो विंशतिपणो दंडो वेदितव्यः॥ पुरीषादिस्पर्शने पुनः कात्या
यनेन विशेष उक्तः॥ छर्दिमूत्रपुरीषाद्यैरापाद्यः स चतुर्गुणः॥ षड्गुणः कायमध्ये स्यान्मूर्ध्नि त्वष्टगुणः स्मृ
तः॥ आद्यग्रहणाद्वसाशुक्रासृङ्मज्जानो गृह्यंते॥ एवंभूतः पूर्वोक्तो दंडः सवर्णविषयो द्रष्टव्यः॥ परभार्या
सु चाधिकेषु वोत्तमेषु स्वापेक्षयाधिकेषु वर्त्तमानेषु पूर्वोक्ताद्दशपणाद्विंशतिपंचाशाद्य दंडात् द्विगुणो
दंडो वेदितव्यः॥ प्रातिलोम्यापराधे दंडमाह॥ विप्रपीडाकरं छेद्यमंगमब्राह्मणस्य तु। उद्गूर्णे प्रथमो दंडः सं
स्पर्शे तु तदर्द्धिकः॥ ब्राह्मणानां पीडाकरमब्राह्मणस्य हस्तपादादि यदंगं करचरणादिकं तच्छेत्तव्यं॥ क्षत्रिय
वैश्ययोरपि पीडां कुर्वतः शूद्रस्यांगछेदनमेव॥ येनकेनचिदंगेन हिंस्यात् श्रेयांसमंत्यजः॥ छेत्तव्यं तत्त
देवास्य तन्मनोरनुशासनमिति॥ द्विजातिमात्रस्यापराधे शूद्रस्यांगछेदविधानात्॥ वैश्यस्यापि
क्षत्रियापकारिणोयमेव दंडस्तुल्यन्यायत्वात्॥ उद्गूर्णे वधार्थमुद्यते शस्त्रादिके प्रथमसाहसो वेदितव्यः॥
शूद्रस्य पुनर करपोपि हस्तादिछेदनमेव॥ ॥रामराम रामराम रामराम रामराम॥

ष४ पी४ ष्म० ष्यू२ क्रो५

175

व्यः २

पाणि मुद्यम्य दंडं वा पाणिछेदनमर्हतीति मनुस्मरणात्। उद्गूरणार्थं शस्त्रादिस्पर्शने तु न दंडः। प्रथमसाहसो दंड इति
जीवेन्नि भस्मादिसंस्पर्शेपि क्षत्रियवैश्ययोः प्रातिलोम्यापवादे तु द्विगुणत्रिगुणा दमा इति ब्राह्मणस्य क्षत्रियादिष्वे
न कल्प्यः। शूद्रस्य तत्रापि हस्तछेदनं च। अथ नखी वृत्ता रपीतु द्विवाष्ठे छेदयेन्नृपः॥ अवमूत्रयतो मेढ्रमवशर्दयतो गुद
मिति मनुस्मरणात्। एवं प्रातिलोम्यगरा चे दंडमभिधाय पुनः सजातीयमधिकृत्याह। उद्गूर्णे हस्तपादे तु दशविंशतिकौ
मौ दे। परस्परं तु सर्वेषां शस्त्रे मध्यमसाहसः॥ हस्तपादयोरुद्गूर्णे यथाक्रमं दशपणो विंशतपणश्च दंडो वेदि
तव्यः। परस्परवधार्थं शस्त्रे उद्गूर्णे सर्वेषां वर्णानां मध्यमसाहसो दंडः। किंच। पादकेशांशुककराल्लुंठनेषु पणान्
दश पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः॥ पादकेशवस्त्रकराणामन्यतमं गृहीत्वा य उद्दिश्याकर्षति तस्मै दशपणो द
ण्डः। पीडाकर्षांशुकावेष्टपादाध्यासैस्तस्मिन् समुदिते शतं दंड्यः। एतदुक्तं भवति। अंशुकेनावेष्ट्य गाढं सपी
ड्य पीडाकर्षांशुकावेष्टपादाध्यासै तस्मिन् समुदिते शतं दंड्य इति। किंच। शोणितेन विना दुःखं कुर्वन् काष्ठादिभिर्नरः। द्वात्रिंशत
आरभ्य पणादेन ... तु शतं पणानां दमः स्यादिति। किंच। शोणितेन विना दुःखं कुर्वन् काष्ठादिभिर्नरः। द्वात्रिंशत
पणान् दंड्यो द्विगुणं दर्शने सृजः। यः पुनः शोणितं यथा न दृश्यते तथा काष्ठादिभिस्ताडनं करोत्यसौ
द्वात्रिंशत् पणान् दंड्यः। यदा पुनर्गाढेन लोहितं दृश्यते तदा द्वात्रिंशतो द्विगुणं चतुःषष्टिपणान् दंड
नीयः। त्वक्मांसास्थिभेदेषु मनुना विशेषो दर्शितः। त्वग्भेदकः शतं दंड्यो लोहितस्य च दर्शकः। मांसभेत्ता च
षड्निष्कान् प्रवास्यस्त्वस्थिभेदक इति॥ करपाददंतभंगे छेदने कर्णनासयोः। मध्यो दंडो व्रणोद्भेदे मृतकल्पहते
तथा॥ करपाददंतानां भंगे कर्णनासयोश्छेदने व्रणोद्भेदे मृतकल्पहते तथाहते ताडिते मध्यमसाहसो विज्ञेयः। अत्र बु
द्धिपूर्वकत्वाद्यपेक्षया साम्यमत्राप्यवगंतव्यं। किंच॥ चे
ष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने। कंधराबाहुसक्थ्नां च भंगे मध्यमसाहसः। गमनभोजनभाषणानि
रोधे नेत्रस्य ... आदिग्रहणाज्जिह्वायाश्च प्रतिभेदने कंधराग्रीवाबाहुप्रसिद्धः। सक्थि ऊरुः। एतेषां प्रत्येकं भंगे
ने मध्यमसाहसो दंड्यः। अपि च। एकं घ्नतां बहूनां च यथोक्ताद्द्विगुणो दमः। यदा पुनर्बहवोमिलित्वा एक

८४ कुड्यावपातने॥ पणान्दद्यात्पंचदश विंशतिं तद्व्ययं तथा॥ मुद्गरादिना कुड्यस्याभिघाते विदारणे द्वैधीकरणे च यथाक्रमं पंचपणो दशपणो विंश

॥८३॥ लोम्यार

साम्यं पापादिकं कुर्वन्ति। तदा यस्मिन्नपराधे यो दण्ड उक्तस्ततस्माद्विगुणो दण्डः प्रत्येकं वेदितव्यः। अस्ति च रत्या
न्तेषां प्रातिलोम्यानुलोम्यापराधयोरप्येतस्यैव सवर्णविषयेऽभिहितस्य दण्डस्योतस्यैवाभ्यारभ्यो न केऽपेत्य हानिवृद्धिश्च
व्यपेताः। वाक्पारुष्यप्रस्तावोक्तः प्रातिलोम्यानुलोम्यतः। न एव दण्डपारुष्येऽपि राज्ञा यप्याह मगिति मैत्रस्मरणा व
कलहापहृतं देयं दण्डश्च द्विगुणस्ततः कलहे वर्तमाने यद्येनापहृतं तत्तेन प्रसर्पणीयमपहृतद्रव्याद्विगुणश्चाप
हारनिमित्तो दण्डो देयः। दुःखमुत्पादयेद्यस्तु स समुत्थानजं व्ययं प दाप्यो दण्डं च यो यस्मिन्कलहे समुत्थितः।
यो यस्य ताडनाद् दुःखमुत्पादयेत्स तस्य व्रणरोपणार्थमौषधार्थं पथ्यार्थं च यो व्ययः क्रियते तं दद्यात् समुत्थानं च
तस्य पर्णं यस्मिन्कलहे यो दण्डस्तं च दद्यात्स समुत्थानजं व्ययं प्रमाणं॥ परमाचार्य प्राह दण्डमुच्यते तेन नरं गार्थ
नारो दण्डमाह। अभिघाते तथा छेदे भेदे कुड्यावपाते पयोदण्डांसमुचितानयोत्या:
पुनः कुड्यस्य पादनार्थं च धनं स्वामिने दद्यात्। अपिच। दुःखोत्पादि गृहे द्रव्यं क्षिपन्प्राणहरं तथा। षोडशा
द्यः पणान्दाप्यो द्वितीयो मध्यमं दमं। दुःखोत्पादकेन कण्टकादिद्रव्यं प्रक्षिपन् षोडशपणान्दंड्यः। प्राणहरं पु
नर्विषभुजंगादिकं प्रक्षिपन् मध्यमसाहसं दण्ड्यः। पशूनामभिघाते दण्डमाह। दुःखे च शोणितोत्पादे शाखांगच्छेदने
तथा॥ दण्डः क्षुद्रपशूनां तु द्विपणप्रभृति क्रमात्। क्षुद्राणां पशूनामजाविहरिणप्रायाणां ताडनेन दुःखोत्पा
दने रक्तश्रावे त्वक्शाखांगच्छेदने शाखा शब्देनचात्र प्राणसंचररहितं शृंगादिकं लक्ष्यते अंगानि करे
चरणप्रभृतीनि। शाखा चांगं च शाखांगं तस्य छेदने द्विपणप्रभृति दण्डः। द्वौ पणौ परिमाणमस्य दण्डस्य स द्विपणः। द्वि
पणप्रभृतिरादिर्यस्य स द्विपणप्रभृतिः। स च दण्डगणो द्विपणश्चतुःपणः षट्पणोऽष्टपण इ
त्येवंरूपो न पुनर्द्विपणत्रिपणश्चतुःपणः पंचपण इति वर्धमानेति तदुच्यते। अपराधगुरुत्वानावस्थापे
मरद्गात् गुरुतरेष्वपराधेषु दण्डवितपमवगम्यते। तत्र चाक्षत चित्यादि संख्याश्च बलादरं श्रुतिर्द्विसं

त्यादिपर८

॥८३॥

बहिरं

नु

स्तियदगुणदण्डो वेदितव्यः॥ अवपातने तु पुनः ×८

ख्यापयता भ्यासाश्रयणेन गुरुत्वसंपादनमिति निरवद्यं ॥ किंच ॥ लिंगस्य छेदने मृत्यो मध्यमो मूल्यमेव च । महापशूनामेतेषु
स्थानेषु द्विगुणो दमः ॥ तेषामेव क्षुद्रपशूनां लिंगछेदने मरणे च मध्यमसाहसो दंडः ॥ स्वामिने च मूल्यं दद्यात् महापशूनां पुनर्गोग
जवाजिप्रभृतीनामे

तेषु स्थानेषु ताडन लोहितस्रावणादि निमित्तेषु पूर्वोक्ताद्दंडाद्द्विगुणो दंडो वेदितव्यः ॥ २ ॥ स्थावरापराधे दंडमाह । प्ररोहिशाखि
नां शाखास्कंधसर्व विदारणे । उपजीव्यद्रुमाणां च विंशतेर्द्विगुणो दमः ॥ प्ररोहोंकुरः तद्युक्ताः शाखाः प्ररोहिण्यो याः छिन्नाः पुनर
प्याः प्रतिकांडं प्ररोहंति । ताः शाखा येषां वटादीनां ते प्ररोहिशाखिनस्तेषां शाखाछेदने च यतो मुलशाखा निर्गच्छंति स स्कंधस्त
स्य छेदने समूलस्य छेदने च यथाक्रमं विंशतिपणाद्दंडात्प्रभृति सा द्विगुणो दंडो द्विगुणः ॥ ४ तदुक्तं भवति । विंशति
पणाश्चत्वारिंशत्पणोऽशीतिपणा इत्येवं त्रयो दंडा यथाक्रमं शाखाछेदनादिष्वपराधेषु भवंतीति । अप्ररोहशाखिनामप्युपजीव्य
द्रुमाणामाम्रादीनां पूर्वोक्तेषु स्थानेषु पूर्वोक्ता एव दंडाः । अनुपजीव्याप्ररोहशाखिषु पुनर्वृक्षेषु कल्प्यं । वृक्षविशेषे प्रत्याह ।
चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये । जातद्रुमाणां द्विगुणो दमो वृक्षे च विश्रुते । चैत्यादिषु जातानां वृक्षाणां शा
खाछेदनादिषु पूर्वोक्ताद्दंडाद्द्विगुणं विश्रुते च पिप्पलपलाशादिके द्विगुणो दंडः ॥ गुल्मादीन्प्रत्याह ॥ गुल्मगुच्छक्षुपलता
प्रतानौषधिवीरुधां ॥ पूर्वस्मृतादर्धदंडः पूर्वोक्तस्थानकर्त्तने ॥ गुल्मा अनतिदीर्घा निबिडलताः मालत्यादयः ॥ गुच्छा
कुव ^ सरलप्राया लता दीर्घा यायिन्यो द्राक्षातिमुक्ताप्रभृतयः ॥ प्रता
नाः कांडप्ररोहरहिताः सरला या पिप्पलशारिवाप्रभृतयः । औषध्यः फलपाकावसानाः शालिप्रभृतयः । वीरुधश्छिन्ना
अपि या विविधं प्ररोहंति गुडूचिप्रभृतयः । एतेषां पूर्वोक्तेषु स्थानेषु विकर्तने छेदने पूर्वोक्ताद्दंडादर्द्धदंडो वेदि
तव्यः ॥ इति दंडपारुष्यप्रकरणं ॥ ८ ॥ संप्रति साहसं नाम विवादपदं व्याख्यास्यन् तल्लक्षणं तावदाह ॥ साम

X ल्लीरूपाः सरलप्रायाः कुरंटकादयः क्षुपाः ह्रस्वशाखशिफाः X ४

षा ८
द ६

ओ ३

178

॥ ८४॥ प्र १

न्य द्रव्यं सम हरणात्साहसं स्मृतं ॥ सामान्यस्य साधारणस्य यथेष्टविनियोगानर्हत्वाद्विशेषेण परकीयस्य वा द्रव्यस्याप
पहरणं साहसं कुतः प्रसभं हरणं प्रसह्य हरणं हठाद्बलावष्टंभेन हरणमित्यादि पर्यायं ॥ तदुत्पत्तेः। राज्ञः दंडजनको
क्रोशोल्लंघ्य राजपुरुषे तर्जनमसूयां पर्यवस्थिं चिन्मारणपरदारप्रधर्षणादिकं क्रियते तत्सर्वं साहसमिति साहसलक्षणं। स ३
अतः साधारणधनपरधनयोर्हरणस्यापि बलावष्टंभेन क्रियमाणत्वात् साहसत्वमिति नारदेनापि साहसस्य स्व
रूपं विवृतं सहसा क्रियते कर्म यत्किंचिद्बलदर्पितैः। तत्साहसमिति प्रोक्तं सहो बलमिहोच्यत इति। तदिदं साहसं चौ
र्यवाग्दंडपारुष्यस्त्रीसंग्रहणेष्वप्यासक्तमपि सत्त्वबलदर्पविशेषात्पृथगेव निरूप्यत इति। दंडगौरवकार्यविशेषकृते विधानं। अ ६
तस्य च दंडं वैचित्र्यप्रतिपादनार्थं पृथगुदितं देनचैविध्यमभिधाय तल्लक्षणेन नैव विवृतं। तस्य च त्रैविध्यं
सं प्रथमं मध्यमं तथा। उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक्। फलमूलोदकादीनां क्षेत्रोपकरणस्य च। भंगाक्षे ण ८
पापमर्दायैः परदाराभिमर्शनाप्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसं। तस्य दंडः प्राप्ते प्रथमस्य शतावरः।
मध्यमस्य तु शास्त्रज्ञैः दृष्टः पंचशतावरः। उत्तमे साहसे दंडः सहस्रावर इष्यते। वधः सर्वस्वहरणं पुरान्निर्वासनां
कने तदंगच्छेद इत्युक्तो दंड उत्तमसाहसे इति। वधादयश्चापराधतारतम्यादुत्तमसाहसे समस्ता व्यस्ता वा योज्याः।
तत्र परद्रव्यापहरणरूपे साहसे दंडमाह। तन्मूल्याद्द्विगुणो दंडो निह्नवे च चतुर्गुणः। तस्यापहृतद्रव्यस्य मूल्या
द्विगुणो दंडः। यः पुनः साहसं कृत्वा नाहमकार्षमिति निह्नुते तस्य मूल्याच्चतुर्गुणो दंडो भवति। एतस्मादेव विशेष
दंडविधानात् प्रथमसाहसादि सामान्यदंडविधानमपहारव्यतिरिक्तविषयं गम्यते ॥ ४॥ साहसिकस्य प्रयोजयितु
रप्याह ॥ यः साहसं कारयति स दाप्यो द्विगुणं दमं। यश्चैवमुक्त्वाहं दाता कारयेत्स चतुर्गुणं ॥ यस्तु हे सौख्य
कुर्वित्येवं वाचैव प्रेरयति स साहसिकाद्द्विगुणं दमं दाप्यः। यः पुनरहं तुभ्यं धनं दास्यामि त्वं कुर्वित्येवं

तृ ५

हसा ३

२१

॥ ८४॥

179

वाच्येवमुक्त्वा साहसं कारयति । स चतुर्गुणं दाप्योऽनुबंध इति शायात् । साहसिकस्य विशेषमाह ॥ अर्घ्याक्रोशाति
क्रमकृद्भ्रातृभार्याप्रहारदः । संदिष्टस्याप्रदाता च समुद्रगृहभेदकृत् । सामंतकुलिकादीनामपकारस्य कारकः ।
पंचाशत्पणिको दंड एषामिति विनिश्चितः । अर्घ्यस्यार्घार्हस्याचार्यादेराक्षेपमाज्ञातिक्रमं च यः करोति यश्च
भ्रातृभार्यां ताडयति यश्च संदिष्टस्य प्रतिश्रुतार्थस्याप्रदाता । यश्च मुद्रितं गृहं मुद्रां उद्घाटयति । तथा स्वगृहसमु
पादि संसक्तगृहस्वामिनां कुलिकादीनां स्वकुलोद्भवानां ग्रामादिगृहस्थानां स्वग्रामस्वदेशीयानां च
यापकर्ता तेषां सर्वेषां पंचाशत्पणपरिमितो दंडो वेदितव्यः । किं च ॥ स्वच्छंदविधवागामी विक्रुष्टे नाभिधावकः ।
अकारणे च विक्रोष्टा चंडालश्चोत्तमान्स्पृशन् । शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः । अयुक्तं शपथं कुर्व-
न्नयोग्यो योग्यकर्मकृत् । वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत् । साधारणस्यापलापी दासीगर्भविनाशकृ-
त् । पितृपुत्रस्वसृभ्रातृदंपत्याचार्यशिष्यकाः । एषामपतितान्योन्यत्यागी च शतदंडभाक् ॥ नियोगं विना यः
स्वेच्छया विधवां गच्छति । चौरादिभयाकुलैर्विक्रुष्टे यः शक्तोऽपि नाभिधावति । यश्च वृथा क्रोशं करोति । य-
श्च चंडालो ब्राह्मणादीन्स्पृशति । यश्च शूद्रप्रव्रजितान्नग्नदिगंबरादीन्देवपित्र्ये च कर्मणि भोजयति । यश्चायुक्तं मा-
नरं गृहीष्यामीत्येवं शपथं करोति । तथायोग्य एव शूद्रादिर्यो जप... ध्ययनादिकं करोति । वृषो बलीवर्दः । क्षु-
द्रपशवो ... तेषां पुंस्त्वस्य प्रजननसामर्थ्यस्य विनाशकः । क्षुद्रपशव इति तु पाठे हिंस्रा चौषधप्रयोगेण ता-
ड्यो बीजादयस्तेषां पुंस्त्वस्य प्रजननसामर्थ्यस्य विनाशकः । ... तेषां सर्वेषां प्रत्येकं पणशतं दंड
... प्रसूतानां पातयिता । यश्च पित्रादयोऽपतिताः परस्परं त्यजन्ति ... साहसप्रसंगात्तत्सदृशापराधेषु नजकादीनां दंडमाह ॥ य-
र्हापयेत् ॥ ५ ॥ इति साहसप्रकरणम् ॥ ५ ॥

श्लो० ७

श्लो० ५

श्लो० ३

श्लो० ३

180

॥१८५॥ व७ स५ फ५

सानसीतृपत्नान् दंस्योनेन कृत्स्नप रांशुकं। विक्रया वक्रपाधानयाश्चितेषु पत्नान् दरा। नेद्भवः वस्त्रस्य वहारक
सर्पदि निर्वेजनार्थे समर्पितान्ति यासां स्वि स्वयमकारयति। तदा सो पत्नीचयं दग्धायःपुनस्ताभिर्विक्री गीतोऽस्
वक्रपंनोऽल तोत्काललमु पत्नो गार्थवृत्यं दीयते। तद्यमेवो यदेतन्नं देयमित्येवं भाटकं पुत्रादस्येति। आध्यिसंवानयते
स्वगृहं इत्यायापश्चितं दत्यसो प्रत्यपराधं दापणान् दउनीयः। तान्निचवस्यान्तिम्ल शालमलफलके ला
लनीयान्निरै पालेन चवा त्यै नीयाति। नचस्वगृहे वासयितव्या नीतस्या दउ। लम्लैते लके स्त्र स्योति श्चा हीसा
सिनेजथः। न च यासांसि वासो निर्हितेन च वासयेदिति मनुस्मरणात्। परा पुनस्तान्निप्रसादज्ञाय पतितदानार
देनांकं दृष्यं। मलाक्षमागोहीयेले सं फ्रोतस्य वास सः दिः पारस्त्रि स्तीपाद्याश्चतुर्दो नेदंमे वच। अर्धतया
नु परतः पा दासापचयः क्रमान्। पावता पीला दशाजीर्णे जीर्णस्य म्लियमः स्यपरस्ति। अष्टपला कीलस्य सवजोत
रत्स्वस्यनानीस्याष्ट मृपलभागोनप रान्युनं मत्स्य देयं। द्विधौतस्य पादोन पणदयो न त्रिधौतस्य पुनस्तीया
मान्वनैच तुर्द्धौतस्यार्दपला चतुष्टयं। ततः परं प्रतिग्ने लेन नमं वशिष्टं मलं पादापचये नदेयं। पावजीर्णजीर्ण
स्य पुनर्नीत्या तस्याघातो मल्य दानं कल्पनं। पितापुत्रयोरोधे तु साक्ष्मिस्यांगिपणो दमः। अंतरे चत यायिः स्या
नस्याप्पष्टगुलो दमः। पितापुत्रयोः कलहे यः साक्ष्यं मं गीक रोति न पुनः कलहे वारयत्यसो पलत्रयं दंड्यः।
पनम्नुनयोः सपणे विवादे पणदाने च प्रतिभर्भरत्यसो चका त्र योपं कलहे वर्दयति। सोपि त्रिपलादष्टगुणं
चतुर्थं शाक्ति पत्नानु दउनीयः। दंपत्यादिष्वप्येवं दंडानुसरणीयः। ॥८५॥ तुलाशासनमानानां कूटकृल्लालवस्य च।
एभिश्च व्यवहर्ता यः सदाप्यो दममुत्तमं। तुलातोलनेदउ। शासन रचितं। मानं प्रस्थद्रोणादि मेणणकं मुद्रादि ॥१८५॥

म७ पा५ कृ७ त७ कृण४ ज्या५

181

तदंगमनिष्कासितेनेषां यः कूटं देशप्रसिद्धपरिमाणाद् न्यूनं समाधिक्यं वा द्रंमादेर्व्यवहारिकमुद्रितं तं
ताम्रादिगर्भं तं वा कारयेत् ये श्चैते कूटे ज्ञानन्नपि व्यवहरंति तावुभौ प्रत्येकमुत्तमसाहसं दंडनीयौ ॥ वैणिक परी
क्षकप्रत्याह ॥ अकूटं च कूटं कूटं कूपक्षोपकूटकं । स नाणकपरीक्षस्तु दाप्य उत्तमसाहसं ॥ यः पुनर्नाणकपरीक्षा
ताम्रादिगर्भमेव द्रंमादिकं सम्यगिति ब्रूते सम्यक्वा कूटमिति । असावुत्तमसाहसं दंड्यः ॥ चिकित्सक
प्रत्याह ॥ भिषङ् मिथ्याचरन् दाप्यस्तीर्यक्षु प्रथमं दमं । मानुषे मध्यमं राजमानुषेषूत्तमं दमं ॥ यः पुनर्भिषक् मिथ्या
पुर्वेसानभिज्ञ एव जीवनार्थं चिकित्सितज्ञोहमिति तिर्यक्मनुष्य राजपुरुषेषु चिकित्सामाचरत्यसौ यथा
क्रमेण प्रथममध्यमोत्तमसाहसान् दंडनीयः ॥ तत्रापि तिर्यगादिषु मूल्यविशेषेण च रोगविशेषेण
राजप्रत्यासत्तिविशेषेण दंडस्य गुरुलघुभावः कल्पनीयः ॥ अबध्यं यश्च बध्नाति बद्धं यश्च
प्रमुंचति ॥ अप्राप्तव्यवहारं च स दाप्योदममुत्तमं ॥ यः पुनर्बंधनार्हमनपराधिनं राजाज्ञया विना बध्नाति
ति ॥ यश्च बद्धं व्यवहारार्थमाहूतमनिरूपितव्यवहारं चोत्सृजति स उत्तमसाहसं दाप्यः ॥ मानेन तुलया वापि यो
ंशमष्टमकं हरेत् ॥ द्वे शते दाप्यो हिरांतर वृद्धौ हानौ च कल्पितं ॥ यः पुनर्वणिक व्रीहिकार्पासादेः पण्यस्याष्टमभागं कूट
मानेन कूटतुलया वान्यथा वा परिहरत्यसौ पणानां द्विशतं दंडनीयः ॥ अपहृतस्य द्रव्यस्य वृद्धौ हानौ च दंडस्य
वृद्धिर्हानिश्च कल्प्या ॥ भेषजस्नेहलवणगंधधान्यगुडादिषु ॥ पण्येषु प्रक्षिपन्हीनं पणान्दाप्यस्तु षोडश ॥ भेष
जमौषधद्रव्यं स्नेहो घृतादि गंधद्रव्यमुशीरादि लवणं प्रसिद्धं आदिशब्दो हिंगुमरीचादि ॥ तेषु सारद्रव्य
मिश्र यः पण्यमिश्रयत षोडशपणान्दंड्यः ॥ किंच ॥ मृच्चर्ममणिसूत्रायः काष्ठवल्कलवाससां ॥ अजातौ जातिकरणे
विक्रयार्थं मिश्रयत षोडशपणान्दंड्यः

स्मिनूचर्मादिके १

॥८८॥ ला लोलविक्रय पादचतुर्रस्यः। नच्यिघने बहुल्याजातिपतिदज्ञाग्निलस्मिन्नाग्नि कर लोलविक्रयपार्यगंधौरसांन रसंचार लोन रहुकल्यज्ञीवीयस्या दृश्यसंपादनेप्रधामक्तिकामोर संचारलोन मक्ति कायासुगंधा मल कुम्मिनि। मानुरिचर्मगिवर्णोलिर्त्यापादनेन व्याघ्रचर्मगैस्फटिकमालोवलोनिर करलोन पद्मरागद्गत कार्पादिके सचेगुलोत्कर्षधोनेन पदस्य चम्यिमिति। कालायमेन वर्णोत्कर्षधोनेनरजतमिति बिल्वकाष्ठचदंता मोदसंचारलोनचंदनमिति कोलेनगारव्यलवगमिति कार्पासादिके सचेगुलोत्कर्षधानेनकोशेयमिति। विक्रेयस्यापादितसाहस्य स्यमूल्यमादिः। एतस्याप्यगुलोदंडो नदितव्यः समुद्रपरिवर्तं च सारभांडच कुचिमं कांधानं विक्रियं वाप्पिनमतो दंडव्यंस्य नास्ति नेपणेन पंचाशत् पलनुशतमुच्यते। द्विपलेन हि साता दंडाम्मल्यवद्दोचवद्द्विमान मुद्रपिधानं मुद्रेन सारवर्नतरं गतिसमुद्र रडकं परिवर्तनं व्यत्यासः। योऽन्यदेरमुक्तानांसुवर्णारडप दर्शयित्वा हस्तलाघवेनान्यदेयस्फटिकानां पर्यक रडकं समर्पयिगि। प्रसार भांड कस्तूरिकादिके द्रव्ये मद्यतोविक्रयमाधिवानेयति। तस्य दंडं कृत्य नावल्यमालयेदितव्या। लत्रिके ॥ गे देय त्यामतोपतो मिलैव्यनेनपणम्मूल्यरते पायतस्मिन् दागमे विक्रीते पंचाशत् पलोदंडः। प्रलाम्भल्यशतं। द्विपलस्लेति होनादंडरसेवं मूल्ये वद्दौ दंडवद्दि रूह्ये या। वणिजप्रसाह संभूयकुर्वता मर्वस बाधकारशिलिनां। अर्घस्यहासं वद्दिंवाजानंतोदमतो मः। रा जनिरूपितार्घस्य ह्रासं वद्दिंवाजानंतोपि वणिजः संभूय मिलित्वा कारुशिल्पिनां गाते नकर्यात्रिल्पि नांचि त्रकारादिना सवाधं पीडाकरमघात रलाभ लोभाकुर्वतः। यैचा संभूय गोनि जापरतमन पणसहस्रंदंडनीयाः १ ॥८८॥

लाभं रुंधतो विक्रीणानो वा विहितो दंड उत्तमसाहसः। यः पुनर्वणिजो मिलिता देशांतरागतं पण्यमनर्घेण

हीनमूल्येन प्रार्थयमाना उपरुंधंति महार्घेण वा विक्रीणंते तेषां पुनः पणसाहस्रो दंडो विहितो नोभया वादिशितः केन सेर२

पुनरघेण परिणतवयमिसत आह॥ राजनि स्थाप्यते योऽर्घः प्रत्यहं तेन विक्रयः। क्रयो वा निःस्रवस्तस्मा-

द्वणिजां लाभकृत्स्मृतः। राजनि संनिहिते सति यस्तेनार्घः स्थाप्यते निरूप्यते तेनार्घेण प्रतिदिनं

वा५ क्रयविक्रयौ कार्यौ। निर्गतं च स्रवो निःस्रव यो विशेषस्तस्माद्राजनिरूपितार्घान्निःस्रवः स एव वणिजो

लाभकारी न पुनः स्वच्छंदपरिकल्पितात्। मनुनाप्यत्रार्घकरणे विशेषो दर्शितः पंचरात्रे पंचरात्रे पक्षे मासे

तथागते। कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः इति॥ ५॥ [illegible] स्वदेशपण्ये तु शतं वणिग्गृह्णीत

पंचकं। दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी। स्वदेशप्राप्तं पण्यं गृहीत्वा यो विक्रीणीते असौ पंचकं

शतं पणशते पंचकं लाभं गृह्णीयात्। परदेशप्राप्ते पुनः पण्ये शतपणमूल्ये दश पणान् लाभं गृह्णीया- लाभोद्ध

त्। यः सद्यः पण्यग्रहणदिवस एव विक्रयं संपादयते। यः पुनः कालांतरेण विक्रीणीते तस्य कालोत्कर्षा-

कल्प्यः। एवं च पण्य अनिरूपिते पणशते पंच पणो लाभो भवति तथैव राज्ञा स्वदेशपण्यविपर्यये

पनीयः॥ ६॥ पारदेश्यपण्ये अनिरूपितार्घप्रकारमाह। पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवं। अर्घोऽनु-

ग्रहकृत्कार्यः क्रेतुर्विक्रेतुरेव च। देशांतरादागते पण्ये देशांतरगमनप्रत्यागमनभांडग्रहणशुल्कादि

प२ स्वानेस्पुपानानुगुणोऽर्थस्तावंतमर्थं परिगणय्य शुद्धपण्यमूल्येन सह मेलयित्वा यथा पण-

शते स्वपण्ये लाभः संपद्यते। तथा क्रेतृविक्रेत्रोरनुग्रहकृत्कार्यर्घो राज्ञा स्थापनीयः। प्रासंगिकं परिस्र

184

॥८७॥

मा प्याधुनाम्व क्रीयासंप्रदानं प्रक्रमते। तत्स्वरूपं नारदेनाभिहितं विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीय
ते विक्रियासंप्रदानं तद्विवादपदमुच्यत इति। तच्च विक्रेयं द्रव्यं चराचरभेदेन द्वैविध्यमभिधाय पुनः ष
ड्विधत्वं तेनैव प्रत्यपादि। लोकेऽस्मिन्द्विविधं पण्यं जंगमं स्थावरं तथा। षड्विधस्तस्य तु बुधैर्दानादान
विधिक्रमः। गणितं तुलितं मेयं क्रियया रूपतः श्रियेति। गणितं क्रमुकफलादि तुलितं कुंकुमादि मेयं
शाल्यादि क्रियया वाहदोहादिरूपया उपलक्षितं मण्डनमहिष्यादि रूपतः पण्याङ्गनादि। श्रिया दीप्त्या मरक
तपद्मरागादि॥ प्रकारमपि पण्यविक्रीयासंप्रदानस्याह। गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रय
च्छति। सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते। गृहीतमूल्यं पण्यस्य पण्यस्य विक्रेत्रा लब्धं गृहीतमू
ल्यं। तद्यदि विक्रेता प्रार्थ्यमानो यस्त्वदेशावणिजे क्रेत्रे न समर्पयति। तच्च पण्यं यदि क्रयकाले
बहुमूल्यं सत्कालान्तरेऽल्पमूल्यं नैव लभ्यते। तदा सोदयं तोयउदयो वृद्धिः पण्यस्य स्थावरजंग
मात्मकस्य तेन सहितं पण्यं विक्रेत्रा क्रेत्रे दानीयः। यदा तु सोदयस्य तत् पण्यस्योदयो नास्ति। किंतु क्र
यकालवद्धेयतो मूल्यस्येपसंपण्यमिति प्रतिपन्ने। तावदेव तदा तत्पण्यमादाय तस्मिन्
क्रीणन्न सयोत्ता मूल्येनोदयेन सहितं द्विवं विक्रमित्यादिप्रतिपादित वृद्धिरूपोदयेन वा सहि
तं क्रेत्रे बाधावरा दापनीयः॥ ॥ अर्घधर्मेदपहीय त सोदयं पण्यं वस्तुग्रहादिक्रय

॥८७॥

पद्ध

प४

ना५

185

उपभोगलाभाद्वा नखुरवर्णैर्वसना न्यूनादिरूपो विक्रेतु त्यसहितं पण्यमसौ दाप्यः। यथाह नारदः॥ विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति। स्थावरस्य क्षयं दाप्यो जंगमस्य क्रियाफलमिति। विक्रेतुरुपघा

प्र२ तः स्वपरुत्पत्ते। क्रेतुः संबंधेन क्षीयमाणत्वान्नपुनः कृष्यपाल स्वस्यपा नादिरूपः। न स्वबुद्ध

पहत्वे नष्टापण्यं दह्यते तापदृते येनवा विक्रेतुरेव सोनर्थो विक्रीयासंप्रपद्यत इत्यत्रोक्तत्वात्। यदा

त्वसौ क्रेता देशांतरात्पण्यग्रहणार्थमागतस्तदा तस्य मादाय देशांतरे विक्रीणन्स्वस्य योऽर्थ

स्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्यः। क्रयं च क्रीतपण्यसमर्पणं निपमो नुशायाभावे द्रष्टव्यः॥

५८ सति त्वनुशये क्रीत्वा विक्रीयवा किंचिदिदं इति मनुक्तं वेदितव्यं। किंच। विक्रीतमपि विक्रेयं पूर्वं क्रेतर्य

ग्रहणाति। हानिश्च क्रेतृदोषेण क्रेतुरेव हि सा भवेत्। यदा पुनर्जातानुशयः क्रेता पण्यं न गृह्णाति

त्यति तदा विक्रीतमपि पण्यमन्यत्र विक्रेयं। यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तदा पण्य

ज्ञ दैविके नोपहतं। तदा क्रेतुरेवासौ हानिर्भवति। पण्यापहरणरूपेण क्रेतृदोषेण नाशितत्वात्। अ

पि च राजदैवोपघातेन पण्ये दोषमुपागते। हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः। यदा पुनः

स्प२ क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयं ज्ञातानुशयोपि तत्र राजदैविकेनोपहतं तदा

यः पुनर्विनैवानुशयेनान्यस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते स दोषवत्पण्यं प्रच्छादितदोषं

२४ भवति। तदासौ हानिर्विक्रेतुरेव। अतोन्यददुष्टं पण्यं विनष्टसमसदृशं क्रेत्रे देयं। किंच। अन्यहस्ते च विक्रीतं दुष्टं वाऽदुष्टवद्यदि। विक्रीणीते समस्तमल्पाद्विगुणो ॥२४॥

186

॥८८॥

त

विक्रीणीते। तदानस्य पण्यस्यानुशयगुणदोषो वेदितव्यः। नारदेनाप्यत्र विशेषो दर्शितः। अन्यहस्ते तु विक्रीय यो
न्यस्मै प्रयच्छति। द्रव्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु। निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति। समूल्यं द्वि
गुणं दाप्यो विनयं तावदेव चेति। सर्वस्यापि विधिरयं दत्तमूल्ये पण्ये द्रष्टव्यः। अदत्तमूल्ये पुनः पण्ये नात्र क्रये
ऽस्ति विक्रेतुर्नियमकारितः। समयो दानप्रवृत्तौ वा न कश्चिद्दोषः। यथाह नारदः। दत्तमूल्यस्य पण्यस्य विधि
रेष प्रकीर्तितः। अदत्तेऽप्यत्र समयान्न विक्रेतुरतिक्रमः इति। विक्रीयानुशय इति। तत्क्रीतानुशयस्य स्वरूपं तु प्र
दर्शयितुमधुनानुशयप्रसङ्गाद्धर्ममाह। स्वयं दृष्टिचयानि आपण्यानामविज्ञान

ता। क्रीत्वानानुशयः कार्यः कुर्वन्षड्भागदण्डभाक्। परीक्षेत क्रीतपण्यानां क्रयोत्तरकाले क्रयकालपरिमाण

न४

विक्रेता च समर्घ्यनिबंधं पण्य

म४

तोऽर्धकलां वृद्धिं पश्यता क्रेतानुशयो न कार्यः। क्रयपरिज्ञाने पुनः क्रेतापि क्रेतार
स्वयमपरस्यानानुशयितव्यं। क्रयपरिज्ञाने पुनः क्रेतापि क्रेतार

न२

नुशयो भवतीति व्यतिरेकादुक्तं भवतीति। अनुशयकालावधिश्च नारदेनोक्तः। क्रीत्वा मूल्येन यः पण्यं दुःक्रीतं
मन्यते क्रयी विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यवि क्षतं। द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्रिंशांशमावहेत्। द्विगु

॥८८॥

187

णांनुन्नतीयेह्निपरतः केनुरेव नह्यति। अपरीक्षितेन क्रयविक्रयेषु पण्ये वैगुण्यनिबंधनानुरागावधिदर्शनं
चासमाहेत्यादिना दर्शितं एवं तदनपायेचानुलब्धा वृद्धिक्षयपरिज्ञानं तस्यानुरागयकारणत्वमवगम्यते। यथा
पण्यपरीक्षा वृद्धिबलान्यण्य दोषगुणा मतः पण्यदोषतत्वे वृद्धिक्षयकारणत्रितयाभावे तु रागकालाभ्यंतर
द्विपयपनुरागं करोति न तु पण्यपक्षाणं दंडनीय। अनुरागकारणसद्भावेप्यनुरागकालातिक्रमेणानुरागं
कुर्वतो पमेव दंडः। उपभोगे नाशे न च स्वरूपस्थिरार्थेषु उरागकालातिक्रमेणानुशयं कुर्वतो मन्मूल्यो दंडो द्व
व्यः। परेण तु दत्तो हस्य न दद्यान्नापि दापयेत्। अदद्याद्दद्द्वेव राज्ञा दंड्य इत्यालानि षडुक्तानि॥ ७॥ इति विक्रीया
संप्रदानं नाम प्रकरणं॥ १॥ संभूयसमुत्थानं नाम विवादपदमिदानीमभिधत्ते। समवायेन वणिजां लाभार्थं क
र्मकुर्वतां। लाभालाभौ यथा द्रव्यं यथा वा संविदा धृतौ। सर्वे वयमिदं कर्म मीलिताः कुर्मः इत्येवं रूपां संप्रतिपत्तिं स
मवायस्तेन यत्र प्रोक्तं तन्नतं स्मृतयो लाभलिप्सवः प्रतिस्विरं कर्म कुर्वते। तेषां लाभालाभौ उपचयापचयौ योय
याद्रव्यं येन यावद्धनं पण्ये यद्दत्तं घर्षदिनं तदनुसारेण वसे यौ षद्दप्रधानं गुणभावपर्यालो॥
चनयास्यभागदृपमस्यैको भागः इत्येवं समयासंख्येतासमयेन यथासंप्रतिपन्नो तथा वेदितव्यौ॥ ७॥ किंच। प्रति
षिद्धमनादिष्टं प्रमादाद्यच्च ना विनाशितं स तद्दद्यात् ... रक्षितादृशमांशं लभेत्। तेषां संभूयप्रचरतां मध्ये
पत्यस्मिदमिहं नेष्ययदृत्तं व्ययमिति प्रतिषिद्धमाचरतो यच्छोषितो। अनादिष्टमनुज्ञातं यः कुर्वीत तेन
तयोप्रमादाद्यतो हीनं तथावायेन य ... विनाशितं संस्थापयेत् वणिग्भ्यो दद्यात्। यः पुनः स्तेषां मध्ये चोरराजा

घ१ श५ ला८ दू५ स३ त१

188

य१

म
अनि ४
यः ६
तु२

रिजन्मितौ सभासाक्ष्यं पाल्ययति। तस्मादुक्षितां सरणा दण्डाम्यसंशलभते। अर्घप्रक्षेपणाद्विंशां भागशुल्कं नृपो हरेत्। यामिद्रं राजयोग्यं च यद्विक्रीतं राजगाम्येतत्। इ‍पतःपण्यस्येय मूल्यम्यमिलार्घस्य प्रक्षेपणाद्राजतो रसौ मूल्या द्विंशतितमं भागं शुल्कार्थं गृह्णीयात्। पत्तु नर्घाग्नि इमन्यत्र न विक्रेयमिति राज्ञा प्रतिषिद्धं पश्च राजयोग्यं मागिक्या घप्रतिषिद्धमगिसत प्राज्ञे वघलाभ लोभेन विक्रीतं चेद्राजगामी भवत्यदा नग्निरपेक्षतस्य पण्ये राजाप हरेदित्यर्थः। मिथ्यावदन्परीमाणं शुल्कस्थानादपासरन्। दाप्यस्त्वष्टगुणं यश्च सव्याज क्रयविक्रयी। शुल्कस्थानमप्राप्यैव पण्यपरिमाणं निह्नुते। शुल्कस्थानादपसरति। यश्च व्याजेन क्रयविक्रये करोति सर्वेषां तत्पण्यं शुल्करूपेणाष्टगुणं दण्डनीयाः॥ ७॥ अपि च। तरिक शुल्कं

लक्षं ग्रहणेन दाप्यः पणान्दश। ब्राह्मणप्रातिवेश्यनाम नरस्थाने मन्त्रतोऽशुल्कं तिर्वधस्य स्थल जङ्गल जं च नरस्थ लजमर्घप्रक्षेपणाद्विंशांशं भागं शुल्कं नृपो हरेदिति स्मरन्। जेलजं तु मानं यथितं पण्यपान तरेदाप्यं पुरुषोर्द्धप णं गृहितं। पाद पशुश्च योषिच्च पादार्द्धं रिक्तकः पुमान्। भाण्डपूर्णानि यानानि तार्यपण्यानि सारतः। रिक्तभाण्डानि यत्किंचित्तु मासम्प्राप्य रिक्षुदाद्इति। शुल्कं द्वय प्ययमपरम्विशेषः। नाविकानां कार्षापणमस्ति शुल्कं न त्रिल्पः तो नदीसिन्धोनदूते जसैस्यज बधे नहतावशेषरणी प्राश्निये नपद्मजेन न यत्नइतीति निर्यति ने नेति। तरः नावा गीतं जन्यं शुल्कं पिदरतरसं रिकः। सैदास्थलो शुल्कं शुल्कं गृह्णा पति तादशपणा नदण्डनीयः। वेश्मा वेश्म प्रतिवेश्मा इति स्ववेश्मा ग्निमुखवेश्म वेश्मसपार्श्वे स्थितं वा च्यते। नवप र्वैःप्रातिवेश्याः ब्राह्मणाश्च ते प्राति

य२

वेश्या श्च वा सवर्णप्रति वेश्यास्त्वेषां अस्तनवत् संपन्ना नैर्ष्टाः दुष्टिषु वि मते सत्यन्निमं चरेणे एतं वेदत्रा
प्रणतमंबरं ऊनवेदितव्यं ।७। देशान्तरस्थ तयरिग्नि यसंचप्रसादः देशांतरगते प्रेते द्रव्यं दायादबांधवाः ज्ञात
योवाहरेयुः स्तदाग नास्तैर्विना नृपः । यदा संप्रय करिणं मध्ये यः कश्चित् देशांतरगतो म्रतस्तदा तदी
यं मदंदायादः । पुत्रादयः सवर्णाः बांधवा मातृपक्ष्या मातुलाद्याः ज्ञातयो पत्यैव गव्यगोत्रिणः सपिंडा
नाः श्रेणिनाः सह पप्यव हरिणं ये देशांतरादागतास्ते वा गृह्णीयुः स्तैर्विना दायांघ सर्वे गृह्णी
यात् बाशब्देन च दायादादीनां वैकल्पिकमधिकारं दर्शयति । पौर्वीप यनिप मस्य पत्नी दुहितरश्च
दिप्रतिपादितं एवा अपि विज्ञेयः । शिष्य सब्रह्मचारि ब्राह्मणगन्निषेधो वनि कृपणिमिश्रवचनप्रयो
जनं । वर्तिजामपि मध्ये यः पिंडदानोदकदानादि समर्थः स गृह्णीयात् तं स्मामर्थ्याभिषेक पुनः सर्वेषु
त्रिजः संसृष्टि नोविभज्य गृह्णीयुः तेषाम प्यभावे दशवर्षं दायौ गमनं प्रतीक्ष्यानागते सुस्वयमे
व राजा गृह्णीयात् । तदिदं नारदेन स्पष्टमुक्तं । एकस्यचेत्स्यान्मरणं दायादोस्य न देशमुपयात् । अन्योवा
अस्ति दायादे राजकस्वे सर्व एव च । तदधारावनुगुप्तं तत्कारये दशावत्सरान् । अस्वामिकमदायादं दश
वर्षस्थितं ततः । राजा तदात्मसात्कुर्यादेवं धर्मो न हीयते इति ।७। किंच ऋत्विजात्यनेमुनिः सोमप
ज्ञान्येन कारयेत् ऋत्विज लोके च मस्तं निर्लोपं निर्गत लाभमाप्छियेयो जेषु वर्गेनु पूष्टयन्श्रसस्पयकारि

दे° १

दा° ५ नृप° ५

दा° ५

म° २

190

धा३

णांमध्ये सां ३ प्रसवे ष लाग्दिक कर्तुमसमर्थो सावन्येन स्वर्ण कर्माशां ३ मारया इन तरा पध्वय परिहु लग
दिकं कारयेत॥ प्रागुपविष्टं वेत्ति वृषमेस्वि मारिष्वेतस्दिशगिति॥ अनेन न्वि धि शरव्या न ऋत्विपूर्षुकेरक
र्मिणां॥ अनेन लाभालाभो य द्रव्यमित्यग्दि वर्गोधर्मे कथनेन ऋत्विजां हस्त्रादीनां दक्षीवस्त्रानां न
ष्टन नैवतस्त्रादीनांच शिल्प कर्मोपि जीविनां ग्विधिप्रवर्तन प्रकार आरख्यातौस्त ऋत्विजां धनवि
भागविशेषमनुना दर्शितः॥ सर्वेषामर्द्धिनामुख्यास्तदर्द्धिनार्द्धिनोपरे॥ तृतीयिनस्तृतीयांशा
श्चतुर्थांशाश्च पादिनः॥ अस्यायमर्थः॥ ज्योतिष्टोमेनतं शतेन दीक्षयतीति वचनेन गवां शतम्रुत्विगा
नीत रूपदक्षिणाकार्येत्विवी पुक्तं ऋत्विजश्च हो त्रा दयः षोडश तत्र स्वक्रियायामसाहस्य पर्षीया
मिदमुच्यते॥ सर्वेषां होत्रादीनां षोडशर्त्विजां मध्ये ये मुख्याश्चत्वारो होत्राध्वर्युब्रह्मोद्गाता
रस्ते शतस्यार्द्धिनः॥ सर्वेषां भागकरणापपत्तिवशाद् तेषु च त्वारिंशद्दुपाड्डेनार्द्धभाजः॥ मपरे
मैत्रैव रूणप्रतिप्रस्थातृ ब्राह्मणाच्छंसिप्रस्तोतारो द्दर्द्धिनस्ते सोमुख्यांशस्यार्द्धेन चतुर्विंशतिरू
पेणार्द्धभाजः॥ ये पुनस्तृतीयिनो च्छावाक नेष्टाग्नीध्र प्रतिहर्तारस्ते तृतीयिनो मुख्यांशस्य षोडशग
रूपतृतीयांशेन तृतीयांशभाजः॥ ये तु पादिनो ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्यास्ते मुख्यभागस्य
पञ्चतुर्थांशाद्वादश गोरूपस्तद्भाजः॥ ये तु समपमंशनियमो घटतैन ताव दत्र समयो नापिद्
य समवायो नापिवचनं पदशा ह्याग नियमः स्यादतः समंस्या दस्तुत त्वादितिन्यायेन सर्वे

ण१

षं समं चारम्भात्वं कर्मानुरूपैर्वा शापात्तस्मिन्नियुक्ते । तत्रोच्यते ज्योतिष्टोमप्रकृतिके द्वादशाहे ध्रुवस्तु नी
तिनःपाश्विनद्गति सिद्धवदनुवादेन घटते । पञ्चदिनात्मकातिरात्रे ज्योतिष्टोमे मर्दितनीयं चतुर्थंशिपस्य हवं
मेत्रावरुणदीनां च सादितो वैदिकाईप्रकृतिसमाख्यावलात् प्राप्नुवन्तेऽनीयमो वकल्पत इति न
खवं ॥ ५ ॥ इति संभवस्य संस्थानप्रकरणम् ॥ ५ ॥ इदानीं लोपं प्रस्तूयते । तत्र लक्षणं चमनुजाग्निंतसंस्थास हि४
ह संत्वन्वयवत्सु संसुवकर्मसु प्रहृतं । निरन्वयं तु वेलोपं स्यात् प्रत्यये तेन पदन्ति । आन्वयवद् यरक्षराञ्ज च५
ध्यक्षन्दि संसमर्हसंमर्मै प्रेपन पत्सरघन ह रलादिं च क्रियते नत्सार संलोपं तु तद्दिललक्षणं निरन्व

व६

यं द्रव्यस्वाम्याघसमर्थं वैचयित्वा यत्स्वरधन हरणानदुच्यते । पञ्चसहस्रेषु रमणीपद्यत्वान मपेदंदृतस्मिन्निति पयान्निहितेन
दपिस्तं यः नारदेनाप्युक्तं । उपायैर्विविधैरेषां छलरत्वापकर्षणं । सुसमन्तप्रमनेप्यस्ते चमाकुर्मीनीर्षिणं
इतिपत्र नरकरयहणं पूर्वकत्वाद्दनस्य परलस्य च ज्ञानपूर्वकत्वात् ज्ञानेनापायं तावदाहृत्याहकै
र्धिव ते चोरो लोप्त्रं लग्नाप्यदेनवापर्वकर्मापराधी वनयाचाप्युद्वासकः । यश्चौरोय मिन्तिजनैर्विख्या
प्यते सैायाहकैराजपुरुषस्थानपालप्रभृतिभिर्गृहीतव्यः । लोप्त्रेनीपहृतन्माजनादिचावौचोर्यव
लेनानाश ह्यादारभ्याचारपदानुसारेण तं वा ग्राह्यः । पश्चपर्वकर्मापराधी प्राक्प्ररव्यातयोर्यश्चाप्नु
र्दोप्रज्ञातो वासस्थानपस्यासौ आसुद्वासकः सोपिग्राह्यः । किंच । अन्येपि पंचपाप्याह्याः आति

192

॥१९६॥ सने४

नामग्निन्हवे॥ घृतस्त्रीपानसत्क्रा श्रुखुद्रभिन्नमुखस्वर्ः। परद्रव्यग्रहणेन चपलकामुद्धचारिणः। निरोधाव्यवं तस्याभिनष्ट व्यग्रिकेरूपात्। केवलं पर्वोक्तान्याख्या। किंत्वन्येपि चरूपारोग्लिंगैः। दंकया ग्राह्या। अग्निनिह्नवे न ना हंस्य [illegible] इत्येवं रूपेण नाम न ह्नवन नाहं दिवि घकृतेण आदियहणं तु स्वदेशयाम कुलाघ पलायनेन च लक्षितान्याख्या। घृतपण्यागैम न मद्यपानादिव्यंष्वत्तिप्रसक्तास्तथा कुत स्तेयाम स्त्वमितिचोरस्याग्र्याणि चिन्हानि। एतेषाम् [illegible] कुरुते गीन स्वरोयो मवंति। तदर्थसावपि पाद्य॥ बहुवच नात् [illegible] रत्नादीनाग्र हणं तथायेत्ति द्वारणंमिप दस्यप नंमिवास [illegible] निये न प्रच्छंत्रो वेषांतर धारणनात्मानं गृहयित्वाये चरंति येचायो भावेपि बहुव्ययकारिणः ये च गि न नष्टद्रव्यानां जीर्णवस्तु मिश्रगाज नादीनाम विज्ञातस्वामिकानां वि क्रयकास्ते सर्वे चौर्यसंभावन याग्याः। एवं नानाविध चौर्य लिंगान् पुरुषान् गृह्णीयाचोराः किं वा साध वइति सम्यक् परीक्षेत न पुनर्लिंग दर्शनमात्रेण चोर निर्णयं कुर्यात्। चौरस्यापि लो [illegible] दिचौर्यलिंग संबधसंभवात्। यथाह नारदः। अन्य हस्तात्परिभ्रष्ट म कामाद्युत्थितं भुवि चौरेण वा प्रक्षिप्तं सैयत्नात्परीक्षयेत्। तथा सत्या सत्य संकाशाः सत्याश्चासत्य संनिभाः। दृश्यंते विविधा भावास्तस्मा युक्तं परीक्षितुम् इति। एवं चोरशंकया गृहीतेनात्मा शोधनीय इत्याह। गृहीतः शंकया चोरो नात्मानं चेद्विशोधयेत्। [illegible] यित्वा तु तं द्रव्यं चोरदंडेन पादयेत्। यदि चौर्यशंकया गृहीतस्तन्नि

लोघ्रं ३ — अ३ — त॰२ — नाग४

स — दा१ — ॥१९६॥

143

परलार्थमात्मानं नश्शोधयति। तर्ह्दिवद्दयमालगेघ न रपनं वधादि दंडमागमनेदतोमानुषेणन्दमावेदिव्येन चा
त्मा शोधनीयः ॥ ननु नां चौर्यदिति मिथ्यात्तरे वधंप्र मालंसंभवति। नस्यासाव रूपत्वावुच्यते। दिव्यस्यना च
प्रचामावगोचरत्वंरूत्याबान्यतरः कुर्यामित्यत्र प्रश्निपादितं। मानुषप्युनर्य घपिस्याक्ष्यावुद्धिर्मिथ्यौनर नसंभवति।
तथापिकारणसंसदृष्टेभावरूपमिथ्याकारणसोपनंसुरेवना। भौममपि गोचरमेवेसवापयानाशापरकैल्लेहं देशांतरस्छ रत्यगि
युत्ते नभाविते। चौर्यभाव स्यापर्यसिद्धः शुद्धिर्भवत्येव। चौरं दंड्यमाह। चोरंप्रदाप्य पहृतघात येद्विविधै र्वधैः। पस्तुप
गुरूपरीक्ष्य यातं निरपेक्षंच निश्चितंचौरं स्वामिने पहृतं धनं स्वरूपेणमूल्यकृत्यनपावादा पयित्वाविविधैर्वधैर्घातयेत्।
एतच्चोरत्वम सारसंदद्रपाणियोग्येत्तमद्रव्यग्विषयं नपुनःपुष्पवस्त्रादि क्षुद्र मध्यमद्रव्यापहारविषयं। सारसधुंएवो
त्तमस्त्रीपुरुषोमनीषिभिः। सएव दंडस्तेपणिद्यपुत्रिषु नस्यादिति नारदवचनेन वधरूपस्योत्तमसाहसस्योत्तमद्रव्य
विषयेव्यवस्छापितत्वात्। पस्तुपुनर्दंडमनुवचनं। अन्यायोपात्तं ताडनमेषाम लात्मकं ॥ अतस्त्वानुपायैतेदण्डा मा
र्यदंडेन दंडयेदिति। तदपिमहापरा धविषयं। चौरविशेषमपवादस्याह। सचितं ब्राह्मणंद्रूयात्स्व राष्ट्राद्विप्रवा
सयेत्। ब्राह्मणंपुनश्चोरं महत्यपराधे तुनघातयेदपिललाटेव यित्वा तद्देशा त्रिवासयेत्। अंकनंचमनुप दर्कारं कार्यं
यथाचमनुः। गुरुतल्पेभगः कार्यःसुरापाणेसुरध्वजः ॥ स्तेयेचश्वपदं कार्यं ब्रह्महण्यशिराः पुमानिति। एतच्चदंडोत्तरका
लंप्रायश्चित्तमकुर्वतां विहितं। यथाहमनुः प्रायश्चित्तंतुकुर्वाणाः पूर्ववर्णा यथोदितं नांक्याराज्ञाललाटेतु दाप्यास्तू
त्तमसाहसमिति। चोरादर्शने पहृतद्रव्य प्राप्त्युपायमाह। घातितेपहृते दोषोग्राम भर्तुरनिर्गते। विवीतभर्तुस्तु

व४

य८

वित६

ण्य३

194

।।१२३।।

म १ पश्चाच्चोरोद्धर्तुं रक्षितैः ।। यदि ग्रामे मध्ये मनुष्यादिप्रमिति व [illegible] परुरणं [illegible] पते । तद्ग्रामाय तेरेव चौरोपहारो

स २ षु [illegible] गृहार्थं सत्वचोरं गृहीत्वा [illegible] तस्मात् [illegible] धनं धनिने दद्याद्यदि चोरपदं स्वग्रामान्निर्गतं न द

र्शयति । [illegible] पुनस्तत्स्थानं प्रविशन्ति न दृश्यते अधिपतिरेव चोरं धनं चार्पयेत् ।। तथा च नारदः ।। गोचरे

यस्य मुष्येत तेन चोरः प्रयत्नतः । गृह्यो दाप्योऽथवा शेषं पदं यदि न निर्गतं ।। निर्गते पुनरेतस्मात् यत्र तद्विनिपतितं ।। सा

मंतानां मार्गेण [illegible] तांश्चैव दापयेदिति ।। विवीतस्य प हारे विवीतस्वामिन एव दोषः । यद्यत्वद्ध्ये त

द्वृत्तं भवत्यवीतस्य वा विवीतादत्ययं च स एवा न पा चोरोद्धर्तुं मार्गपालस्यैवापराधः । किंच । स्वसीम्नि दद्याद्ग्राम [illegible] दिक्पालस्य ६

पदं वा यत्र गच्छति । पंचग्रामी बहिः क्रोशाद्दशग्राम्यथवा पुनः ।। यदा पुनर्ग्रामबहिः सीमापर्यंते क्षेत्रे मोषादि स ८

म्ना ८ कं भवति । तद्ग्रामवासिन एव दद्युः यदि सीमाबहिः चोरपदं न निर्गतं निर्गते पुनः पंच ग्रामादिरेव चोरपदं प्रविशति । एवं चो

रापलापादिकं कुर्यात् । यदा तु नैकग्राममध्ये क्रोशमात्राद्बहिः प्रवेशो घटितो [illegible] मुषितो वा चोरपदं चनतं समर्द

रापलापादिकं कुर्यात् [illegible] पंचग्रामी [illegible] समाहारो वा दद्यात् । विकल्पवचनं तु

[illegible] नामसंततेः पंचानां ग्रामाणां समस्तानां [illegible] यतो पहृतं धनं दापयितुं न शक्नोति तदास्य क्रो

यथासंख्यासत्य प्रहृतं च न प्रसर्पलापादिकं कुर्यादित्येवमर्थं पदत्व [illegible] गोतम [illegible] मुषिता

[illegible] राज्ञा [illegible] यदि [illegible] मुखिनः शपथं

मुखिनः संदेहे मानुषेण दिव्येन वा निर्णयः कार्यः [illegible] अपराधविशेषेण दण्डविशेषमाह ।। बंदिग्रा

पि ९ दाहादौ [illegible] साधयेत् इति [illegible] धमनुस्मरणात् ।।

।।१२३।।

195

नारोपये त्वरान् । वंदियाहादि न्य

हंस्तपादवाग्जिकुंजरलांच हणिरणः । प्रसह्य घातिनश्चैव शस्त्रानारोपये । अन्यगात्रस्य घाताघातारसेंदकान् हस्त
बलाबन्धेन घातकान् हेयान रौद्रानारोपयेत । अयं च वधप्रकारविशेषापदेशः । ... तु स्तपव गंणिपिसेवरसं दशहीनवर्णकार्ये द्वितीयापराधे कर
च्चरण्यं हस्तस्पृहत्या देवविचारपन्निति मनुस्मरणात् ... तु वर्णोदिवृक्षित्र स्यात्स्वयवायोपहरत्ससोमगृपिमद ः । तो च
पादेकहीनकैव स्वाघु हिसिष्यापहे तु स्तपकवस्वागिव तुवर्णोदिवंषिस्त्र ... रोधैनः करश्चपाद श्चकरपादेन वनदेवंचकरपा
पाक्रमक र संदरा नततजेन्यगुपदेहीनौकार्ये द्वितीयापराधेनः करश्चपाद ... चाद्विघादित्यर्थः । एतद् तेसाहसप्रा
दैक नद्धिंनपथो स्त्रोकरपादेवहीनकौउ स्तपकंगणिपिसेदयोरेवसंकरपादच्छेदा ... नारदवचनात् । ततीयापराधे त्वेवधएवमेनुः । अंगुलीग्रपि
न्दियोग्यद्रव्यविषयं तं दंग छेदद्दस्सुक्तो दंडउत्तमसाहसं नारदवचनात् । ततीयापराधेत्वेव धएवमेतुः ... परियत्रैवनियोगतयः त्रा
मादस्य घ द्रपेक्षप मेयुले । द्वितीय हस्तचरणौतत्तीयेव धमर्हतीति । जातिद्रव्यपरिमाण परियत्रैवनियोगतयः त्रा
मादस्य घ द्रपेक्षपमेयुले । द्वितीय हस्तचरणौत तृतीयेवधमर्हतीति । ... सामान्येन दंडकल्पनोपपन्ना
त्रिगुणदेशकालादिना दंडउरुगुरुलघुतावकेरलानामानंत्यात्प्रति द्रव्यं वक्तुमशक्तेः सामान्येन दंडकल्पनोपपन्ना । दंडक्रमसिति ।
त्रिगुणदेशकालादिना दंड गुरुलघुतावेकरलाना ... देशकालवयःशक्तिसंचिन्त्य दंडकर्मणीति ।
ह । जातिद्रव्यपरिसारतो दंडः । कल्पनीयः । क्षुद्रमध्यमहाद्रव्यहरणे सारतो दमः । देशकालवयःशक्ति ... क्षुद्रादिद्रव्यरूपं चनारदेनो
क्तम् । मृन्मयभाण्डासनखट्वास्थिदारुचर्मतृणादिकं शमीधान्यं कृतान्नं च क्षुद्रद्रव्यमुदाहृतं । वासःकौशेयवर्ज्यं
क्षुद्रलं मध्यमानामुत्तमानां च द्रव्याणां हरणे सारतो मूल्याघनुसारेण दंडः कल्पनीयः । ... गोवर्ज्य पशवः सर्वे हिरण्यवर्ज्यं लोहं च मध्यं व्रीहियवा अपि । हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनः । देवब्राह्म
णराज्ञां च द्रव्यं विज्ञेयमुत्तमम् । त्रिप्रकारेष्वपि द्रव्येषु संसर्गिकः प्रथममध्यमोत्तम साहसरूपो दंडो नियमः
सत्रेव दंडस्तयपि द्रव्येषु चित्रिवद्रुत्तमादिस्तैर्नान्यायेषु मनि
लोनैवदर्शितः । साहसेषु य एवोक्तस्त्रिषु दंडो मनीषिभिः । स एव दंडः स्तेयेपि द्रव्येषु त्रिष्वनुक्रमात् ॥

नृ२ रतीर्थ न५

पु५ म६ ति७ ण८ य९ ३४

॥१९३॥

विवे च ३

कृष्यादिषु गोव्यतिरिक्तेषु च म हिंसने पशुदिपशुषु ब्राह्मणस्य सबधेषु कृतेषु धान्यादिषु च नरतम मष्कावोप्लिप्तेषु सर्वेषु चरं
उद्दिश्य पाकाद्वाणां मूल्याद्यनुसारेण दण्डः कल्पनीयः तेन दण्डकर्मणि दण्डकल्पना योनेकत्तुमतं देशकालवयःशक्ति
कंसम्यक्त्वेनेनीयं एतच्च जातिद्रव्यपरिमाणापरिग्रहादीनामुपलक्षणं। तथाह स्मृतापायस्तेयप्रगित्विषपदस्यादि
गुणेनाशल्गीतरेषां प्रतिवर्णविदुषामिति तमेव दण्डमयस्तमिति। अपमर्षः। किल्विषशब्देनाचदण्डोलक्ष्यते यस्मि
न्न प्रहारे यो दण्ड उक्तः। सम्यक्छुद्रकर्तृके प्रहारे षड्गुण आपादनीयः। एतेषां पुनर्विद्वत्क्षत्रियब्राह्मणानां च विदुषां
स्तेये द्विगुणोत्तरा वेति किल्विषाणि शोडशद्वात्रिंशच्चतुःषष्टिगुणा दण्डा आपादनीयाः। यस्मादिदं द्रव्यमुद्दिश्य मर्त्य
स्तेये द्विगुणोत्तराणीति किल्विषाणि तेः अष्टापाद्यतु भद्रस्य स्तेये भवति किल्विषं षोडशैव तु वैश्यस्य द्वात्रिं
केऽपहारे दण्डः। यस्त्वेष मनुनाप्यसमेवार्थोदर्शितः। अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्विषं षोडशैव तु वैश्यस्य द्वात्रिं
शत्क्षत्रियस्य तु ब्राह्मणस्य चतुःषष्टिपूर्णं वापि शतं भवेत्। द्विगुणा वा चतुःषष्टिस्तद्दोषगुणवेदनः इति। तथाप
रिमाणकृतमपि दण्डगुरुत्वं दृश्यते। यथाह मनुः। धान्यं दशभ्यः कुम्भेभ्यो हरतो ऽभ्यधिकं वधः। शेषेप्येकादशगुणं
दाप्यस्तस्य च तद्धनमिति। विंशतिद्रोणकः कुम्भः हर्तृ हीयमाणस्वामिगुणापेक्षयास्मिन्क्षुद्रमिदम् नाडनी
यस्तयावत्स्य नीयमानस्वामिगुणापेक्षया सुभिक्षदुर्भिक्षा नाडनी
गघेदत्त वधरूपा दण्डाया न्याः। तथा सत्स्यापि विशेषादपि दण्डविशेषो बौद्धादिषु सुवर्णरजतवस्त्रादीनामुत्तमानां चव्वास
साः रत्नानां चैव सर्वेषां शतादभ्यधिको वधः। पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते। शेषेष्वेकादशगुणं मू
ल्याद्दण्डं प्रकल्पयेदिति। तथा द्रव्यविशेषादपि पुरुषाणां कुलीनानां नारीणां च विशेषतः। रत्नानां चैव सर्वेषां
हरणे वधमर्हतीति। अकुलीनानां तु दण्डोत्तरं पुरुषं हरतो दण्डः नमसाहसः। अपराधेनु सर्वस्वं चान्यो हि
रतो वध इति। क्षुद्रद्रव्याणां तु मासाद्यत्नमूल्यानां मूल्यात्पञ्चगुणो दण्डः। काष्ठभाण्डतृणादीनां मृन्म

२

पेक्षयावाद्ध

रम

नां ३

तुर

॥१९३॥

197

८२

क्वार. ३४

पानांतपैवच । वेणुवैणवभांडानां तथा रज्जुस्थास्थिचर्मणां ॥ शाकानामाद्रमूलानां हरणे फलमूलयोः । गोरसे क्षुविकाराणां तथा लवणतैलयोः । पक्वान्नानां कृतान्नानां मत्स्यानामामिषस्य च । सर्वेषामल्पमूल्यानां मूल्यात्पंचगुणो दमः ॥ इति । नारदस्मरणात् । पंचगुणः प्रथमसाहसः क्षुद्रद्रव्येषु शताद्वर पंचशतपर्यन्तो सौमाष मूल्येच यथायोग्यं व्यव स्थापनीयः । पशुनर्मानवं क्षुद्रद्रव्यगोचर वचनं तन्मूल्याद्द्विगुणो दम इति । तदन्यत्र शास्त्रादि विषयं । तथा पराध गुरुत्वादपि दण्डगुरुत्वं । यथा सन्धिं सत्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः । तेषां छित्वा नृपो हस्तौ तीक्ष्णे शूले निवेशये दिति । एवं सर्वेषामपि सापत्तिद्रव्य वस्तुमशक्तेर्जातिपरिमाणादि रीतिः कारयेद्दण्डगुरुलघुभावः कल्पनीयः । पथि कानां पुनरल्पापहरणे न दण्डः । यथाह मनुः । द्विजोध्वगः क्षीणवृत्तिः द्वाविक्षू द्वेच मूलके । आददानः परक्षेत्रान्न दण्डं दातु मर्हति ॥ तथा च गोव्रीहि गोधूम यवानां मुद्गमाषयोः अनिषिद्धं गृहीतव्या मुष्टिरेका पथि स्थितैः । तथैव सप्तमे भक्ते भक्तानि षड् अनश्नता । अश्वस्तन विधानेन हर्तव्यं हीन कर्मतः इति ॥ अचोरस्यापि चौरोपकारिणो दण्डमाह ॥ भक्तावकाशाग्न्युदक मंत्रोपकरणव्ययान् । दत्वा चोरस्य वा हन्तुर्जानतो दम उत्तमः । भक्तं रीमेनं अवकाशो निवाससंस्थानं अग्निश्चोरस्य शीतापनोदाद्यर्थः । उदकं तृषितस्य मंत्रश्चौर्यप्रकारोपदेशः । उपकरणं चौर्यसाधनं व्ययः अपहार्यदेशान्तरं गच्छतः पाथेयं एतानि चौर्यस्य हन्तुर्वा दुष्टत्वं जानन्नपि यः प्रयच्छति तस्योत्तम साहसो दण्डः । चोरो पेक्षि तो पि दोषः । शस्त्रावपाते गर्भस्य पातने चोत्तमो दमः । उत्तमो वाधमो वापि पुरुषस्त्रीप्रमापणे । परस्य ये प्रति शस्त्रस्यावपातने दासीब्राह्मणीगर्भपातने च हन्त दमः । दासीगर्भनिपातने दासी गर्भविनाशकृद्दिति दण्डं दापयित्वा तः । ब्राह्मणीगर्भं तु हत्वा गर्भ स्यविज्ञातमित्यत्र ब्राह्मणहत्यानि देवांच दृष्टं । पुरुषस्य स्त्रियाश्च प्रमापणे शीलवृत्ताद्यपेक्षयोत्तमो वा दण्डो

पक्त ८

को ६

ना२

वाधमो ०

प १ ण २

१९८

॥९४॥

यस्य छितो वेदितव्यः॥ अपि च॥ विप्रदुष्टां स्त्रियं चैव पुरुषघ्नीम गर्भिणीं॥ सेतुभेदकरीं चाप्सु शिलां बध्वा प्रवेशये
त्॥ विशेषणप्रदुष्टा विप्रदुष्टा॥ पुरुषघ्नी स्वगर्भपातनं च पुरुषस्य गृहे स्वासेतुनं भेदनं च एतानागर्भहरिता स्त्रीगले शि
लां बध्वा प्सु प्रवेशयेत्॥ यथा नपूर्वेतेः॥ किंच॥ विषाग्निदां पतीं गुरुं निजापत्यप्रमापणीं विकर्णकरनासोष्ठीं कृ
त्वा गोभिः प्रमापयेत्॥ अगर्भिणीमित्यनुवर्तते॥ पापरव धो धर्मज्ञपानादिषु विषं ददाति॥ या च दाहार्थं मार्गि
षग्निं तथा याच निजं पैगुर्वपत्यानि मारयन्ति॥ तां छित्वा कर्णनासौष्ठीं कृत्वा अदंतैर्दुष्टबलीवर्दैः प्रम
यमारयेत्॥ स्तेयप्रक तोर्दत्तसाहसिके दंडस्य विधानं तस्य संगिकमिति मंतव्यं॥ अविज्ञातकर्तृके हनने
तत्स्वानोपायमाह॥ अविज्ञातहतस्याशु कलहं सुतबांधवाः॥ प्रष्टव्या योषितश्चास्य परपुंसि रताः पृथ
क्॥ अविज्ञातहतस्य सुताः प्रत्यासन्नबांधवाः केनास्य कलहो जात इति कलहमाशु प्रष्टव्याः॥ तथास्य
॥ अविज्ञातहतस्य सुताः प्रत्यासन्ना बांधवाः केनास्य कलहो जात इति कलहमाशु प्रष्टव्याः॥ द्रव्यवृत्तिसं
संबंधिनो योषितो याश्च परपुंसि रता व्यभिचारिण्य स्ता अपि पृष्टव्याः॥ कथं प्रष्टव्या इत्याह॥ द्रव्यवृत्तिसं
संबंधिनो योषितो याश्च परपुंसि रता व्यभिचारिण्य स्ताश्च पृष्टव्याः॥ किमयं स्त्रीकामो द्रव्यकामो वृत्तिकामो
मावा केन वायं गतः सह॥ मृत्युदेशसमासन्नं पृच्छेद्वापि जनं शनैः॥ किमयं स्त्रीकामो द्रव्यकामो वृत्तिकामो
वा तथास्य किं संबंधिनं वा स्त्रियामस्य रतिरासीत्॥ कस्मिन् वा द्वेषोस्ति॥ कुतो वा वृत्तिकामः के न
सह देशान्तरं गत इति नानाप्रकारैर्व्यभिचारिण्यो योषितः पृथक् पृथग्विश्वास्य प्रष्टव्याः॥ तथा मरणदेश
निकटवर्तिनो गोपालविकादयो जनास्तेपि विश्वस्य एवं प्रष्टव्याः॥ नानाप्रकारैः प्रश्नैर्हंतारं निश्चित्य
तद्दुष्टितो दंडोपि विधातव्यः॥ किंच॥ क्षेत्रवेश्मवनग्रामविवीतखलदाहकः॥ राजपत्न्यभिगामी च दग्धो
व्यास्ते कटाग्निना॥ क्षेत्रं पक्वफलसस्योपेतं वेश्म गृहं॥ वनमटवी ग्रामं विवीतम्

॥९४॥

सा०८

णत्वलक्षणं । खलं वा पेदहन्ति । यश्च राजपत्नीमभिगच्छति तान् सर्वान् कटे वीरणैर्वेष्टयित्वा
दहेत् । स्त्रियोऽदेर्दहनं नाम्ना रणं दंडप्रसंगाद् दंडविधाने ॥ ७ ॥ इति स्तेयप्रकरणं ॥ ७ ॥ स्त्रीसंग्रहणं स्त्री
विवादपदमारभ्यते । प्रथमसाहसादि दंडप्रायश्चित्तं त्रेधा तत्स्वरूपं व्यासेन विवृतं । त्रिविधं तत्समाख्या
तं प्रथमं मध्यमोत्तमं । अदेशकालभाषायां निर्जने परस्त्रियः । कटाक्षावेक्षणं हास्यं प्रथमसाहसं स्मृ
तं । प्रेषणं गंधमाल्यानां धूपभूषणवाससां प्रलोभनं चान्नपानैर्मध्यमं समुदाहृतं । सहासनं विवि
क्ते तु परस्परमपाश्रयः । केशाकेशिग्रहश्चैव सम्यक् संग्रहणं स्मृतं । स्त्रीपुंसयोर्मिथुनीभावः संग्रहणं ।
संग्रहणमानसर्वं कर्त्रा तत्कर्तुर्दंडविधानस्य तत्र ज्ञानोपायं तावदाह । पुमान् संग्रहणे ग्राह्यः केशाकेशि
परस्त्रियाः । स ... कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा ॥ संग्रहणे प्रवर्तमानः पुमान् केशादिभिर्लिंगैः
गृहीतव्यः परस्परस्य केशग्रहणपूर्विका क्रीडा केशाकेशि तत्र तेन नैव भिन्नं सरूपं रतिबद्धं ... सती
... प्रत्यय । अन्ययाश्च लुप्यन्ती पाखिभक्तिः । ततश्चायमर्थः । परभार्यया
न ... केशाकेशि क्रीडने नाभिनवैः करनख दशनादिक्षतचोरोगालीते लिंगैर्द्वयोः संप्रतिपत्त्या वाज्ञाख्या
सह केशग्रहणे केशिक्रीड ... गृहीतव्यः । परस्त्रीसंग्रहणं निपुणो वदेत्यादिव्यवहारसाधं च । नीवीस्तनप्रावरणस
संग्रहणमप्रवृत्तो गृहीतव्यः । अदेशकालसंभाषं सहैकस्थानमेव वा । पुनः परदारपरिग्रहे प्रदेशा कुचप्रावर
केशावमर्शनेन । अदेशकालसंभाषं सहैकस्थानमेव वा ॥ पुनः ... परदारपरिग्रहे प्रदेशाकुचप्राव
णजघनमर्दनादि स्पर्शनं साम्भिलाषं नाचरति । तथाऽदेशे निर्जने जनैरव कीर्णे वा ... घ कारा
णजघनमर्दनादि स्पर्शनं ...

॥१९५॥
२२

कुलसंल्लाप नेकरोति। परनायसिहैकमंचकादौ चिरं वा वर्त्तिष्टते। यः सोपिसंग्रहणेप्रवृत्तोग्राह्यः। तथाच
दांम्पत्यमानपुरुष दोर्षेपमिर्तैस्यत्तु नदोषः। यथाहमनुः। यस्तु नाक्षारितः पूर्वमभिभाषेत कारणात्। नदो
षंप्राप्नुयात्किंचिन्नहितस्य व्यतिक्रमः इति। यः परस्त्रियाः स्पृष्टः क्षमते सावपि ग्राह्य इति तेनोक्तं। स्त्रियं स्पृ
शेदरेशेयः स्पृष्टोवामर्षयेत्तथा। परस्परस्यानुमतेः सर्वं संग्रहणंस्मृतम्मिति। यस्त्वमयेपं स्त्रियोधा
समसहद्रमि ते ति श्लाघयाप्रुजं गजनरसम संख्यापमत्यसावपि ग्राह्य इति तेनैवोक्तं। स्त्रियादि
वा मोहात् श्लाघया वा स्वयं वदेत्। पूर्वमपयंप्रुक्तेतितत्रसंग्रहणं स्मृतं। प्रतिषिद्धयोः स्त्रीपुंसयोः पुनः सं
लापकरणेदंडमाह। स्त्रीनिषेधेशतं दद्याद्द्विशतंतु दमंपुमान्। प्रतिषिद्धतयोर्दंडो यथासंग्रहणेतथा।
प्रतिषीध्यत इति प्रतिषेधः। पतिपित्रादिभिर्यैनसहसंभाषणे स्त्री निषिद्धे तत्र प्रवर्तमाना स्त्री शतं पणं
दंडंदद्यात्। पुरुषः पुनरेवंनिषिद्धः प्रवर्तमानो द्विशतं दद्यात्। द्वयोस्तु स्त्रीपुंसयोः प्रतिषेधे प्रवर्तमानयोः
संग्रहणे सोगेव लनुसारेणयोदंडोनश्यते सएवविज्ञेयः। एतच्च चारादिमात्यव्यतिरेकेणैवे
षचारणेदारेषु चिधिनोमन्नो पत्नीविषु। संभ्रपतिगृहेतेनारी नीगरुढां स्वारयेत्तेति मनुस्मरः। त्रि
विधम्मेरानीसंग्रहणेदंडमाह। सजातावुत्तमोदंडः आनुलोम्ये तु मध्यमः। प्रातिलोम्येवधः पुंसो
नार्याः कर्णादिकर्तनं। चतुर्णामपि वर्णानांस्त्रियमनुरूपांमभिगच्छति। तदा मध्यमसाहसं दंडनीयः
यदापुनः सवर्णामनुरूपां मानुलोम्येनगुप्तां वाव्रजति तदामानवेष्विशोपडलः। सहस्रंब्राह्मणे।

नै ३
या ७
चे ४
॥१९५॥

३

201

दंडोगुणोऽपि विप्रे न तथा दूजरू। शतानि पंच दंड्यः स्यात् स्त्रियाः सह संगतः। हीनं ब्राह्मणो दंडो द्याद्गुणो तुल्ये व्रजे

न्नाभ्यर्हणायां स्त्रियां तनयो सह हीनु मध्यमे देइति। एतच्च गुरुसखि भार्यादि व्यतिरेकेण द्रष्टव्यं। माता मातृष्व

सा श्वश्रूर्मातुलानी पितृष्वसा पितृव्यसखि शिष्य स्त्री भगिनी तत्सखी स्नुषा। दुहिताचार्य भार्या च सगोत्रा

शरणागता। राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या। आसाम न्यतमां गच्छन् गुरुतल्पग उच्यते। शि

श्नस्योत्कर्तनात्तत्र नान्यो दंडो विधीयत इति नारदस्मरणात्। प्रातिलोम्येऽप्युत्कृष्टवर्णस्त्रीगमने तत्रैवाह। पुरु

षस्य वधः। एतच्च गुप्ताविषयं। अगुप्तानु धनदंडः। उभावपि इति तत्रैव ब्राह्मण्यां गुप्तायां सरा। क्षत्रियो तोऽसहस्त्रं वै

उभौ दग्धव्यौ च कटाग्निना ब्राह्मणीसीयचगुप्तां तु रमे तांवैश्यपार्थिवौ। वैश्यं पंचशतं कुर्यात् क्षत्रियं तु स

हस्रिणं [illegible] मनुस्मरणात्। शूद्रस्य पुनः गुप्तागुप्त वर्णां स्त्रियं प्रव्रजनो लिंगछेदन सर्वस्वापहरौ गु

प्तासु व्रजतस्तस्य वधः सर्वस्वापहारश्चेति तेनैवोक्तं। शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन्। अगु

प्ते अंगसर्वस्वैर्गुप्ते सर्वेण हीयत इति। नार्याधुनः हीनवर्णं व्रजंत्यां कर्णयो रौद्रस्य एणब्रास देश

कर्तनं। अनुलोम्येन यास वर्णे वाव्रजंत्या दंडः कल्प्यः। अयं च वधा घ्रपदेशो राज्ञः स्त्रैव पालनाधिक

रणत्वादिनाप्तिमात्रस्यैतस्य ब्राह्मणपरि त्यापमप्पेशाख्यं नादशीतेति शास्त्र ग्रहणान्निषेधात्। वह

वरात्रो निवेदने कालवि लंबनेन नृपार्पणि पानाशोकतदास्य यमेव रोजोदि न्हन्यात्। दासीद्विजान्ते

स्त्रियां धर्मोऽयं चोपदिश्यते । तथा नाततायिवधे दोषो हन्तुर्भवति कश्चन । प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्यु
मृच्छति इति शास्त्रयुक्त्याप्यनुज्ञानाच्च । तथा क्षत्रियवैश्ययोरन्योन्यस्त्र्यभिगमने यथाक्रमं सहस्रं पञ्च
शतं पणानां दण्डो वदितव्यौ तथा ह मनुः । वैश्यः क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजन् । यो ब्राह्मण्या
मगुप्तायां तावुभौ दण्डमर्हतः इति । पारदारिकप्रसंगात् कन्यायामपि दण्डमाह । अलंकृतां हरन्कन्यामुत्त
मे त्वन्यथाऽधमं । दण्डं दद्यात्सवर्णासु प्रतिलोम्ये वधः स्मृतः । विवाहार्थमुत्कृष्टां तामलंकृतां सवर्णां क
न्यामपहरन्नुत्तमं साहसं दण्डनीयः । तदनभिमुखीं सवर्णां हरन्प्रथमसाहसं । उत्कृष्टवर्णां कन्यामपहरतः
क्षत्रियादेर्वध एव । दण्डविधानाच्चापहर्तुः सकाशाद् विवाहान्यस्मिन्न देयेति गम्यते । अनुलोम्यापहरणे द
ण्डमाह । सकामास्वनुलोमासु न दोषस्त्वन्यथाऽधमः । यदि सानुरागां हीनवर्णां कन्यामपहरन्ति तदा दोषा
भावान्न दण्डः । अन्यथात्वनभिमुखीमपहरतः प्रथमसाहसो दण्डः । कन्यादूषणे दण्डमाह । दूषणे तु करच्छेद उ
त्तमायां वधस्तथा । अनुलोमामभिसरन्तीं यः कामी कन्यां बलात्कारेण नखक्षतादिना दूषयति तस्य
करच्छेदनं च । यदा पुनस्तामेवाङ्गुलिप्रक्षेपेण योनिक्षतं कुर्वन् दूषयति तदा मनूक्तषट्शतसहि
ताऽङ्गुलिच्छेदः । अभिसह्य तु यः कन्यां कुर्याद्दर्पेण मानवः । तस्याशु कर्त्ये अङ्गुल्यौ दण्डं चार्हति षट्शत
मिति । यदा पुनः सानुरागां दूषयति तदापि तेनैव विशेष उक्तः । सकामां दूषयंस्तुल्यो नाङ्गुलिच्छे
द महति । द्विशतं तु दमं दाप्यः प्रसंगविनिवृत्तये इति । यदा तु कन्यैव कन्यां दूषयति तदा धर्मशास्त्रा

म१

ध५

गविशेष स्तेनैवोक्तः। कन्यैव कन्यां या कुर्यात् तस्याः स्याद्द्विशतो दमः। या तु कन्यां प्रकुर्यात् स्त्री सा सद्यो मौ
ण्ड्यमर्हति। अंगुल्योरेव च छेदं खरेणोद्वहनं तथेति कन्यां कुर्यादिति कन्यां योनि सौचगतेंगुल्यादित्यर्थः।
यदा पुनरुत्कृष्टजातीयां कन्यां मन्यविशेषात्स्वानुरागात्कामो वा अभिगच्छति। तदा हीनस्य क्षत्रियादेर्वृ
षः। उत्तमां सेवमानस्तु जघन्यो वधमर्हति इत्यो मनुस्मरणात्। यदा सवर्णां सकामामभिगच्छति। न दो
षो गमिष्यतुं सत्कृतं तस्मै दद्यादिति। पिता यदि तुष्टः शुल्कमिच्छति दंड्यसैत देवराज्ञे दद्यात्। सवर्णां सकामां तु गा
च्छतो वध एव। यथाह मनुः। शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि। तां यदि यो कामां महादूषयेत् कन्यां स सद्यो व
धमर्हति। सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नर इति। [illegible]। शतं स्त्रीदूषणे दद्याद् द्वे तु मिथ्याभिशंसि
तोपघ्नं गच्छन्नुशतं दाप्योन्स्त्रीणां च मध्यमं। स्त्रीशा मांत्र प्रदत्ता कन्या वच्छते। तस्या यदि कश्चि
द्विषमाणान प स्मार राजयक्ष्मादि कुत्सित रोग संसृष्ट मैथुनादि दोषान् प्रकाशयेत् सम कन्ये ति
षयत्यसौ शतं दाप्यः। मिथ्याभिशंसने पुनरविद्यमानदोषाविष्कारेण दूषणे द्विशतं दंडनीयः। गोष्ठे प्रति
रिक्तपशुगमने शतं दाप्यः। यः पुनर्हीनां स्त्रियमैत्या वस्त्राविनीम विशेषात्सकामामकामां च शनैर्वा ति
गच्छ स सोमध्यमसाहसं दंडनीयः साधारणस्त्रीगमने दंडमाह। अवरुद्धासु दासीषु भुजिष्यासु तथैव
च। गम्यास्वपि पुमान् दाप्यः पंचाशत्पणिकं दमं। गच्छन्नित्यनुवर्तते। उत्कलसवर्णाः स्त्रियो दास्यस्ता

तर

पा।५

न।६

ते।६

प४

हीं।६

णा।१

204

॥१६७॥

एवस्यामि नाप्युक्षा ता निष्पद्यसार्थग्रहणे एवस्थानवस्थितेषु पुरुषान्तरोपभोगेनास्ति रक्षा अवरुद्धा पुरु
षान्तरपरिग्रहात् पुनर्भिः स्वा रक्षा सा वरुद्धा पुनर्भिष्या वा भवेयुस्तदा तासु न पान्वरुद्धा दृश्या स्वैरिणी
नाम पिसा धारण स्त्रीणां पुनर्भिष्याणां ग्रहणं। तासु च सर्वपुरुषसाधारणत्वेन गम्यो स्वस्तिग्रहणे वा
ह्मणं दण्डनीयः। परिगृहीतत्वेन तासां परदारत्वात्। एतच्च स्पष्टमुक्तं नारदेन। स्वैरिण्यब्राह्मणी
वेश्या दासी निष्कासिनी च या। गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः। आस्वेव तु भुजिष्यासु
सरदारवत् गम्यास्वपि हि तेनोपघातः परपरिग्रहादिति। निष्कासिनी स्वाम्यवरुद्धा दासी न तु च स्वैरिणी
ति नासाधारणत्वाद् गम्यत्वाभिधानमुक्तम्। नीर अगितं शास्त्रे नो वाकाश्च न लोके सा रण्यं खिपुडुप लभ्यते।
तथा हि। स्वैरिण्यादासु रता वधूर्नीत्तिपदे। स्वैरिणी पापनिरता सर्वलोकामतः धूपेत्। वर्णानामानुलोम्ये
न दास्येन प्रतिलोमत इति। पसौ जीवति पुरुषान्तरोपभोग एवं घटते। दुःशीलं कामचारो वा गुणैर्वा परिवर्जि
तः। परिचर्यः स्त्रियाः साध्व्यासैर्न देववत्पतिः। कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः। न तु नामापि गृह्णीयात्
पत्यौ प्रेते परस्य च तिन्नेषिभस्मरणेन॥ नापि कन्यावस्थायां साधारणत्वेऽपि ज्ञात्वापि रक्षितापाः कन्याया प
वदानोपदेशात् पुत्रभावेऽपि तथापि धापो एवं स्वयंवरोपदेशात्। चैवं दासीभावात् स्वधर्माधिकारच्युतिः प्रा
प्तं ब्रह्मदास्यं न स्वधर्मपरित्यागः। नापि वेश्या साधारणी वर्णानुलोम्यजव्यतिरेकेणागम्यजातीयनरसंभवा
त्। तदन्तः पातित्वेन पर्यवदेवागम्यत्वे। प्रतिलोमजत्वे तु तासां नितरां गम्यत्वे ततः पुरुषान्तरोपभोगे तासां।

त५

ण

या ३

ष्यासु ५

ध्या ८

न

म१

॥१६७॥

205

न५ म५

भिंद्दितस्मर्मांध्यासेन पश्चित्यात्मनि तसंसर्गस्य चन्नि पिद्दत्वाच्च नसरल्लपुरुषोपभोगयोग्यत्वं।
सत्यमेवं। किंतु। स्वैरिण्या पूपभोगेपि शास्त्रे रसक राजदंडभयादि दृष्टदोषाभावादस्य त्वं वाचो युक्तिः।
दंडोभावश्चावरजासुरः। ष्ठितेभिय तपुरुषपरिग्रहाणधितो दंडविधानान्न तदुपाधिरहिता स्वर्यादि
म्य ते। स्वैरिण्या धानांपुनर्दंडाभावे विधानाभावात् कस्यां भजंत्ति मु त्तदृष्टं नकिंचिदपि दापयेदिति लिंगद
र्शनाच्चावगम्यते। प्रायश्चित्तं तु स्वधर्मो वबैलेन निमित्तं यस्मा नोगंत्विलगं यविशेषादुव सेव। पसुनर्वेश्या नां
तं जोतरासंभवे नवर्णतः पत्निवमनुमानादुक्तं। वेश्यायं वर्णानुलोम्या धंतःपत्निन्योमनुष्यजात्याश्रयत्वा
त्ब्राह्मण्या दिवदिति। तन्न कुंड गोलकादिभिरनैकांतिकत्वात्। अतोवेश्याख्या कापिजातिरनादिर्वैश्या
धुत्तस्यज्जातेः समानजा तेयपुरुषादुत्पन्नापुरुषसंभोगवृत्तिर्वेश्येति ब्राह्मणादिवल्लोके प्रसिद्धत्वेना द
वपगमनीयं। नर्चमूले यं प्रसिद्धिः स्मर्यते हि स्करपु०। पंच चूडानाम काश्चनाप्सरसस्तत्संततिर्वेश्याख्या पंच

य४ मीजातिरिति। अत स्तासंगनियतपुरुषपरिग्रहेनविधिविधुरतयासमानो दृष्टजातिपुरुषाभिगमनेन दृष्ट
रु३ दोषानापि दंडः। तासुचावैकासु गघ्लंपुरुषाणां पद्यपिनदंडो दृष्टस्तथापि दृष्टदोषोस्त्येव। स्वदाररतिर तसंद नि२
तिनियमात्। पश्च वेश्यागमिगमने प्राजापत्यं विधीयत इति प्रायश्चित्तस्मरणब्रत्तैरवध। आवरजासुरास्ती
षि यनेन स्वैरिण्यादिभुजिष्याभिगमे दंडविधतारव भुजिष्यासु दंडनास्तीत्यर्थादुक्तं। तस्यापवादमाह।

डं१

206

॥१९८॥

प्रसह्य दास्याभिगमे दंडो दशपणः स्मृतः । बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक् । पुरुषसंयोगजीविकासु दासी
ष्वैरिण्यादिषु शुल्कं एव विरहेण प्रसह्य बलात्कारेणाभिगच्छतो दशपणो दंडः । यदि बहवः एकामनिच्छंतीं ब
लात्कारेण गच्छंति । तर्हि प्रत्येकं चतुर्विंशति पणः पृथगेकैकं दंडनीयाः । यदा पुनः स्वैरिणी गच्छया भोज्यं दत्वा
पश्चादनीप्सतीमपि बलाद्गच्छंति । तदा तेषामदोषः । यदि व्याधिर्धर्मिष्ठ वस्तुस्तान स्यात् । व्याधितास्ववस्थेमा
नुष्या रा तु कर्मपरायणा । आमंत्रिता चेन्नागच्छेद् दाप्या वडवास्म्तेतत्ति नारदवचनात् । परा शुल्कं गृहीत्वा
स्वस्था नेच्छंतीतरा शुल्कं द्विगुणं दद्यात् तत्पाशुल्कं देवा नामनिघतः स्वस्थस्य पुंसः शुल्कहानिरे
वा शुल्कं दत्वा परस्त्रीनेतितद्द्विगुणं वहेतु । अनिच्छन्स्त्रशुल्कमपि शुल्कं हानिमनाप्नुयात् तैनेवोक्तं ।
नयान्यापि विशेषश्चोक्तो नैव दर्शितः । अप्रयच्छंस्तत्पाशुल्कं मनुष्यपुमानुरक्षियं । अक्रमेणैव संगच्छन्नूद्या
दंतन्नरवादिभिः । अयोनौ वाभिगच्छेद्यावा बहुभिर्वापिवासयेत् । शुल्कं सप्तगुणं दाप्या विनयं तावदेव तु ।
वेश्या प्रधाना याश्च तत्र कामुकास्तद्गृहास्थिताः । तत्समुत्थेषु कार्येषु निर्णयं संशये विदुरितिकिंच । अ
योनौ गच्छतो योषां पुरुषं वाप्यभिमेहतः । चतुर्विंशतिको दंडस्तथा प्रव्रजितागमे । पशुस्वपोषं मुखादावपि
गाच्छतो पुरुषं वाभिमुखाभेहति । तथा प्रव्रजितां वा योषं संसो चतुर्विंशतिपणो दंडनीयः । किंच । अं
त्याभिगमने त्वंक्यः कुबंधेन प्रवासयेत् । शूद्रस्तथांत्य एव स्यादंत्यस्यार्यागमे वधः । अंत्यास्त्वंत्यजाः ॥

ही० सि०

॥१९८॥

207

तत्क्रमेण नवैवर्णिकानृपापश्चिमानामभिमुखावसहस्रं तं स्वजहि यम्भिति वचनात् पणसहस्रं दण्डयित्वा
कुबंधेन कुत्सितबंधेन भगादरेणांकयित्वा स्वराष्ट्रान्निर्वासयेत्। प्रापश्चिमानामभिमुखस्य पुनर्दण्ड उन
मेव। शूद्रः पुनः श्वडाल्यभिगमे स एव चंडाल एव भवति। अंत्यजस्य पुनः श्वगाला दण्ड उक्तः स्वजातिष्वभिगमे म
यएव। ८७। इति स्त्रीसंग्रहणप्रकरणं। ८७। व्यवहारप्रकरणमध्ये स्त्रीपुंसयोगाख्यमप्यपरं विवादपदं
मनुना नारदाभ्यां विरचितं। तत्र नारदः। विवाहादिविधिः स्त्रीणां यत्र पुंसां च कीर्त्यते। स्त्रीपुंसयोगसंज्ञं तत्
द्विवादपदमुच्यत इति॥ मनुरप्याह॥ अस्वतंत्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशं। विषयेषु च सज्जन्त्यः
संस्थाप्या ह्यात्मनो वशे इत्यादि॥ यद्यपि स्त्रीपुंसयोः परस्परमर्थिप्रत्यर्थितया न्यपसमदं व्यवहारो
न सिद्धः। तथापि प्रसक्तेन करणीपरपर्यायाभिदिलेनयोः परस्पराभिचारे दंडादिना दंपती निजधर्ममा
र्गे राज्ञा स्थापनीयौ। इत्येतस्या दोषमागमवतीति। व्यवहारप्रकरणे राजधर्ममध्ये अस्य स्त्रीपुंसधर्मजा
तस्यापरस्त्राः। ९ तत्र विवादप्रकरण एव सप्रपंचं प्रतिपादितमिति योगीश्वरेण पुनरत्र नोक्तं। सांप्र
तं प्रकीर्णकाख्यं व्यवहारपदं प्रस्तूयते। तत्स्वरूपं च कथितं नारदेन। प्रकीर्णके पुनर्ज्ञेया व्यवहारा नृपाश्र
याः। राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं यथा॥ पुरप्रदाने सदस्य प्रकृतीनां तथैव च॥ पाखंडिनै

स्मृ० २

पं२

208

॥११॥ नमस्कगे ग रसाधर्मणि पर्यपाः। पितृपुत्रवि वादश्चप्राय श्चित्त व्यतिक्रमः। प्रतिग्रेच्च लोपश्च कोपश्च
श्चमप्याश्चामपि। वर्णसंकरदोषश्च तद्वृत्तिनियमस्तथा। न दृष्टं पत्र पर्वेषु सर्वं तत्स्यात्प्रकीर्णकं स्मृतिः।
प्रकीर्णकेषु विवादपदेषु विवादाराजो भूधननं संज्ञाकरणं द्विविषयाज्ञेन प्रसमवाययिन च पएव।
तत्र स्मृत्याश्च पेतमार्गवर्तमानां प्रतिकूलानतमस्मादप्यय हारंति ग्रणं कुर्यात्। एवं च वदतायो न
पाश्रयोव्यवहारस्तत्प्रकीर्णकमिसर्पः। तत्पुत्रत्वात्। लक्षितं भवति। तत्रापराधविशेषेण दंडमाह। उ
नगत्वाधिकं वापि लिख्य चौराजशासनं। परदारिकं चौरं वा मुंचतो दंडउत्तमः। राजदत्तमोषिवं
धस्य वा परिमाणतत्स्यूनत्वम ध्यधिकं वाम का श परिवर्तितं विलिखेत्। पश्चात् पारदारिकं चौरं वा हीलो निर्प
यिला मुंचति। तावुभावुत्तमसाहसं दंडनीयौ। प्रसंगात्स्वपाश्रयप्रतिमित्तस्यैव तारविषयो दंडमा
ह। अभक्ष्यैर्द्विजं दूष्य दंड्य उत्तमसाहसं। मध्यमं क्षत्रियं वैश्यं प्रथमं शूद्रमर्द्धिकं। मुत्रपुरीषादिनाप
हा अभक्ष्य स्वैर्द्विजं दूष्य दंड्य उत्तमसाहसं दंड्योपन
र्ष्मणि नैव ब्राह्मणं दूष्यान्न पानादिमिश्रणानस्वरूपेण वा दूषयित्वा यदि वा द्रव्यं पितो नमस्साहसं दंड्यो भव
न्ति। क्षत्रियं पुनरेवं दूषयित्वा मध्यमं वैश्यं दूषयित्वा प्रथमं शूद्रं दूषयित्वा साहसस्यार्द्धं दंड्यो भव
प्रतिमुसंबंधः। लशुनाधमस्य दूषणेन तु दोषतारतम्याद्दंडतारतम्यमूहनीयं। कूटस्वर्णव्यवहारि वि
मांसस्य च विक्रयी। अंगहीनस्तु कर्तव्यो दाप्यश्चोत्तमसाहसं। रसवेधाद्यापादितवर्णोत्कर्ष ॥११॥

ह१
चार४
रा८
उप५
पा२
न

क्रूरैः स्वैरैर्व्यवहारशीलो यः स्वर्णकारादिर्यश्चविमांसस्यभ्वावि संवधीश्चविक्रयशीलः सौनिकादिः चशब्दा न१
त्क्रूरः नतादिव्यवहारी च ते सर्वप्रत्येकं नासाकर्णकरे छिन्नांगे हीनाः कार्याः चशब्दाद् गधेदनसमुत्थि
तमुत्तमसाहसं दंडं दाप्यः । यत्तु मनुनोक्तं । सर्वकंटकपापिष्ठं हेमकारं तु पार्थिवः । प्रवर्तमानमन्याये
छेदयेल्लवशः क्षुरैरिति तद्देवराजब्राह्मणस्वर्णविषयं । विषयविशेषं दंडमाह । चतुःपादकृ
तो दोषो नापे हीति प्रजल्पतः । काष्ठलोष्ठेषु पाषाणबाहुयुग्यकृतस्तथा ॥ चतुष्पादैर्गोगजादिभिः कृ
तो यो दोषो मनुष्यमारणादिरूपो सो गवादिस्वामिनो न भवति यः अपेहीति प्रजल्पतः तथा प६
लकुटलोष्ठसायकपाषाणेषु प्रक्षेपेण बाहुना युग्येन चायुगवरेण ... कृतो यः पूर्वोक्तो दोषः सो पि
काष्ठादीन्प्रास्यता न भवत्यपसर इति प्रजल्पतः । काष्ठाद्युत्क्षेपे नहि सायां दोषाभावरूपेन दंडाभाव
प्रतिपादनार्थं प्रायश्चित्तपुरःसरं बुद्धिपूर्वकरण निमित्तमस्त्येव । काष्ठादिग्रहणं ... मरादेरुपलक्षण
न५ र्थं । किंच । छिन्ननस्येन यानेन तथा भग्नयुगादिना ॥ पश्चाच्चैवापसरतेति हिंसने स्वामी दोषभाक् । नस्वि
मवार ... छिन्नाया राक्लयुक्तं बलीवर्दनस्या रज्जुर्यस्मिन्याने तच्छिन्ननस्यं ... नतथा भग्न
न्युउ युगेन ... गहणा ... चक्रादिना च । यानेन पश्चात्पृष्ठतोपसरतौ चक्राद्युत्तीर्य ... प्रति
युगेन ... स्थिते हिंसने स्वामी योजको वा दोषभाग्भवति । ... तत्र ... जनितत्वा न
सुरंयवालिगच्छता च । मनुष्यादिहिंसने स्वामी योजको वा दोषभाग्भवति ।

प्र१ न१

210

दंस [illegible] नस्य॥ तथा च मनुः। छिन्ननस्ये भग्नयुगे तिर्यक्प्रतिमुखागते। अक्षभंगे च यानस्य चक्रभंगे तथैव च
छेदने चैव यंत्राणां योक्त्ररश्म्योस्तथैव च। आक्रंदे चाप्यपैहीति न दंडं मनुरब्रवीत् इति॥ [illegible] पैयां स्वामिनो
दंडमाह। राक्रोशयमोक्षयन्स्वामी दं[illegible]लंगभंगेिलंगतथा। अनीलप्राजकप्रेरिते द [illegible] ष्टिंग्सि र्गजनागि
रिः [illegible] वध्यमानं समर्पपि स्वामी पध्यमाक्षप नुपस्तेन राकुशालप्राजकस्ते यजन
निमित्तप्रयैसाहेस दंडर घातु। यदा मरितो हरमितिखि[illegible]पिन मोक्षप [illegible] तितस्याद्विगुणं पहापुनः
प्रवीणमेव प्राजकं प्रेरयति। तदा प्राजकस्य दंड्यो न स्वामी। यथाह मनुः। प्राजकश्चेद्भवेदाप्तः प्राजको
दंडमर्हतीति। प्राजको यंता आप्तः कुशलः प्राणिविशेषाद्दंडविशेषः कल्पनीयः। यथाह मनुः। मनुष्यमा
रणे क्षिप्रं चौरवत्किल्बिषं भवेत्। प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु॥ क्षुद्रकाणां पशूनां तु
सार्धं द्विशतो दमः। पंचाशत्तु भवेद्दंडः शुभेषु मृगपक्षिषु॥ गर्दभाजाविकानां तु दंडः स्यात्पंचमाष
कः। माषकस्तु भवेद्दंडः श्वसूकरनिपातने इति॥ किंच। जारं चौरेत्यभिवदन्दाप्यः पंचशतं दमं। उप
जीव्य धनं मुंचंस्तदेवाष्टगुणीकृतं। स्ववंशकलंकं यावज्जारं परदारिकं। चौरमित्यधिक्षेप्य भवेद्दंडोपव
राने पणानां पंचशतानि यस्मिन्दंसस्तथाकृत्वं दमं दाप्यः। यः पुनर्जारस्ताडनमुपजीव्य उत्कोचं गृ[illegible]
गृहीत्वा जारं मुंचत्यसौ यावै [illegible] हीनं तावदष्टगुणीकृतं दंडं दाप्यः। किंच। राज्ञोऽनिष्टप्रवक्तारं तस्यैव वा

दं९

॥३१॥ भि मप मे२ क्षा२ प्र३ प३

21

क्राकारिणं। तन्मंत्रस्य च भेत्तारं छित्वा जिह्वां प्रवासयेत्। तद्योनिष्ट स्यानतिसमतस्याग्निवस्त्रादे
प्रकर्षेण स्यो मर्षो वक्तारं तस्यैव राज्ञस्त्वा ओशकारिणं गनं दारूरगशीलं तदीय स्य च मंत्रस्य स्वर
भ्रुविरुद्धहेतोः परराष्ट्रप्रदस्य मकुरस्य वा भेत्तारमपि च वर्गे षुजपंनं जिह्वामुत्खाय स्व वाष्ट्राग्निः
कासयेत्। कोशापहरणे दोनु वधएव। राज्ञः कोशापह तुश्च प्रगतिकूलेषु चास्थितात्। येन यद्दिविधे
दृढैररीणं चोपजापकानिति मनुस्मरणात्। विविधैः सर्वस्वापहारेण छेदवधरूपेरित्यर्थः। सर्वस्वा
पहारेणापि पघस्य जीवनोपकरणं तन्नापहर्तव्यं चौरोपकरणं विना। यथाह नारदः। अयुधान्यायुधीयानां
वाह्यादीन् वाहजीविनां वेश्यास्त्रीणामलंकारान् वा द्यातोद्यादि तद्विधं। यच्च यस्योपकरणं येन जीवंति
कारुकाः। सर्वस्वहरणे प्येतन्न राजा हर्तुमर्हतीति। ब्राह्मणस्य पुनर्न शारीरो ब्राह्मणो दंड इत्यनिषेधा
द्वधस्थाने शिरोमुंडनादिकं कर्तव्यं। ब्राह्मणस्य वधो मौंड्यं पुरान्निर्वासनांकने। ललाटे वाभिशस्तांकः
प्रयाणं गर्दभेनेतीति मनुस्मरणात्। कियामलना गलमपि विक्रेतुर्गुरोस्ताडयितुस्तथा। राजयानासन
रोढुर्दंडउत्तमसाहसः। मत शरीरसंबंधिनो वस्त्र मूष्यादेर्विक्रेतुर्गुरोः पिता चार्यादेस्ताडयितुस्तथा।
राज्ञानुमतिं विना तद्यानं गजाश्वादिमासनं सिंहासनाद्यारोहेत स्यात्तमसाहसो दंडः। किंच। ये द्व
त्रे मर्दिनो राजद्विष्टादेशकृतस्तथा। विप्रत्वेन च शूद्रस्य जीवतोऽष्टशतो दमः। यः को धार्मिना परस्य नेत्र
यंपि नेत्रिपक्ष ज्योतिःशास्त्रविदुर्वाहितेष्तुव्यतिरिक्तो राज्ञो द्विष्टमनिष्टं संवत्सरात्तवे राधेनुति म

ज्यच्चु १

212

२९॥

निघ्नन्ति त्यादिस्समाद्दैर्वां करोति नैयायः श्रद्धो प्राजनार्थे यज्ञोपवीता हि ब्राह्मणा लिंगानि धारयन्ति तेषा
म् वङ्गा तो दम्भेः श्रद्धो प्रगाशलानि यस्मिन्नु दमस्त तयो चक्रः। श्राद्धभोजनार्थं पुनः शूद्रस्य विप्रवेषधारिण
स्त मरालाकया यज्ञोपवीत वद्दपुष्पालिखेदिति स्मृत्यंतेन राज्ञं द्रष्टव्यं। दर्पयं तु ब्राह्मण लिंगधारि

नू४

णा वधलवद्दिजातिलिंगिनः शूद्रान् घातयेदिति स्मरणात्। राजलोभादिनान्यथाव्यवहारदर्शने दंडमा
हा दुष्टांस्तु पुनर्दृष्टः व्यवहारान्नृपेण तु। सभ्यान्सह नृपेणाद्या दंड्या विवादाद्विगुणं दमं दुष्टैः

सू५

स्मृत्याचारप्राप्तधर्मोल्लंघनेन रागलोभादिभिर सम्यग्विचारितत्वेन राज्ञा सम्यमानो व्यवहारा
नु पुनः स्वयं सम्यक् विचार्य निश्चित्य तद्दोषाः दैर्वसभ्या जयिसहिताः प्रत्येकं विवादे पराजितेभ्यः पराजि
तस्य तं द्विगुणं दण्ड्याः प्राप्त जेतरं विधिपरत्वात् वचनस्य रागलोभादिसाधिर्लोकेनापोनरुत्य ।
यदा पुनः साक्षिदोषेण व्यवहारस्य दुष्टत्वात् तदा साक्षिण एव दंड्या न जयी नापि सभ्याः। यदा तु राजा
नुमत्या व्यवहारस्य दुष्टत्वात् तदा सर्व एव राजा सहिताः सभ्या दण्डनीयाः। पादोना च्छन्ति कर्त्ता
रं पादः साक्षिणां मच्छति। पादः सभासदः सर्वान् पादो राजानमृच्छति इति वचनात्। एतच्च प्रत्येकं राजा
दीनां दोषप्रतिपादनपरं। न पुनरेकस्यैव पापस्य विभागपरं तत्। कर्तृसमवायेपि प्रत्येकं स्वभावत्वा
द्दृष्टस्य न्यायतो निर्णीतव्यवहारस्य पुनर्वर्तयितुं दंड्यमाह। यो मन्येताजितोस्मीति न्यायेनापि पराजि
तः। तमायांतं पुनर्जित्वा दापयेद् द्विगुणं दमं पुनः। न्यायमार्गेण पराजितो पि दुर्बलाहं पराजितोस्मी

ओ१

दमं१

॥१०१॥

213

त्विमन्यत तस्मा यांतं कूटलेख्याघूपन्यासेन पुनर्धर्माधिकरणे यधिनिष्ठंते धर्मेण पुनः प्राजयेन्नी गुणं
दंडं दापयेत्। नारदेनाप्युक्तं तीरितं चानुशिष्टं तु यो मन्येत विधर्मतः। द्विगुणं दंडमास्थाय तत्का
र्यं पुनरुद्धरेदिति। तीरितं साक्षिलेख्यादिनिर्णीतमनुशिष्टं दंडं। अनुशिष्टमुद्धृत दंडं दंडपर्यतं नी
तमिति यावत्। यत्पुनर्वचनं। तीरितं चानुशिष्टं च यत्र वचन निवर्तते। दृष्टं तद्धर्मतो ज्ञेयं न तत्प्राज्ञो नि
वर्तयेदिति। तदर्थिप्रत्यर्थिनोरन्यतरवचन व्यवहारस्याधर्मतोपक्षता शंकायां पुनर्द्विगुणदंडप्र
तिज्ञापूर्वकं व्यवहारं प्रवर्तयेच्च पुनर्धर्मतो व्यवहारनिश्चयेपि राज्ञा लोभादिना प्रवर्तनीय इत्येवं
परं। यत्पुनर्नृपांतरेणापि न्यायापेतं कार्यं निर्णीतं। तदपि सम्यग्विचार्य लेन धर्मेण सज्ञानी
यं क्षीनाद्दिन स्वैन्यायपेतं परन्येन राज्ञाज्ञानेन कृतं पश्येत्। तदप्यन्यायविहितं पुनर्न्यायेन निवर्त
यदिति स्मरणात्॥ ७॥ अन्यायगृहीतधनस्य गतिमाह॥ धा राज्ञान्यायेन यो दंडो गृहीतो वरुण
पतं। निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतं। अन्यायेन यो दंडो राज्ञा लोभादिना गृहीतस्त
त्त्रिंशद्गुणीकृतं वरुणाय दद्यादिति संकल्प्य ब्राह्मणेभ्यः स्वयं दद्यात्। यस्मान्नु दंडरूपेण यावद्गृ
हीतं मन्यायेन तावत्तस्मै प्रत्ति दद्यात्। इतरथापहारदोषप्रसंगादन्यायेन दंडग्रहणे पूर्वस्वामिनः
स्वत्वविच्छेदाभावात्॥ ७१॥ इति श्रीपद्मनाभमहोपाध्यायात्मज स्वामिश्रीमत्परमहंसपरि
व्राजकाचार्यविज्ञानेश्वरैः कृतौ ऋजुमिताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ द्वितीयोध्यायः॥

व्या० द्वि० १
५८
न३

तद्दारकस्य ९

॥ इदंपुस्तकं वैघोपनामकगोविंदपंडितस्य ज्ञेयं आचाराध्यायंसमाप्तः ॥ ७ ॥

Title - बृहन्मिताक्षरा. (Two parts)

Author - विज्ञानेश्वर

Subject - धर्म धर्मशास्त्र)

Pages - 121 + 214.

[OrderDescription]
,CREATED=03.09.20 11:47
,TRANSFERRED=2020/09/03 at 16:34:01
,PAGES=323
,TYPE=STD
,NAME=S0003577
,Book Name=M-834-TRIJUMITASHAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF

FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF

FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,